
# शब्दकौस्तुभः

(प्रभाव्याख्यासंवलितः) भाग-1





सम्पादकः

डा | रोचनाचार्यः बाळगारु



प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम्

वसन्तकुञ्ज, नवदेहली

विश्वविद्याग्रन्थमाला - 6

वेदवेदान्ताध्ययनशोधसंस्थानम्

वैद्यनाथपायगुण्डविरचितप्रभाव्याख्यासहितः

# शब्दकौस्तुभः

## भाग-1

सम्पादकः

डा। रोचनाचार्यः बाळगारु.

प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम्.
वसन्तकुञ्ज, नवदेहली.
2029

**विश्वविद्याग्रन्थमाला- 6**

शब्दकौस्तुभः- प्रभाव्याख्यासहितः भाग-1

**सम्पादकः** **:** डा। रोचनाचार्यः बाळगारु

**प्रकाशनम् :** **वेद-वेदान्ताध्ययनशोधसंस्थानम्.**
**वसन्तकुञ्ज, नवदेहली.**

© **सर्वे अधिकाराः स्वायत्तीकृताः**

**प्रथममुद्रणम् :** **2019**

**ISBN :** **978-81-998716-8- 7**

**प्रतयः :** **250**

**मूल्यम् :** **200 रूप्यकाणि**

**मुखचित्रविन्यासः:** **कार्तिकः**

**मुद्रणालयः:** **वाणिप्रेस्. मैसूरु**

## Vedic Vedantic Studies & Research Institute

# Śabdakautubha

**With the 'Prabha' commentary composed by Vaidyanatha Payagunda**

## vol-1

**Edited by:**

**Dr. Rocanācārya Bāḷagāru**


**Published by:**

**Vedic Vedantic Studies & Research Institute**

**(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)**

Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,
vasant Kunj, New Delhi-110070

**2019**

**Vishvavidyagranthamala -6**

**Śabdakautubha** vol-1

**With the 'Prabha' commentary composed by Vaidyanatha Payagunda**

**Edited by:** **Dr. Rocanācārya Bāḷagāru**

**Published by:** **Vedic Vedantic Studies & Research Institute**

(Eetablished under SRI RAMA VITTALA SHIKSHANA SEVA SAMITI New Delhi)

Sri Krishna Dhama, Plot No-3, Phase-II, Institutional Area,

**ISBN :** **978-81-998716-8-7**

**Edition:** **2020**

**copies :** **250**

**©:** **Publishers**

**Price:** **200**

**printed by:** **Vanipress.Mysore**

# जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्

### पेजावरअधोक्षजमठः,उडुपि

## अनुग्रहसन्देशः

"यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्" इति सुभाषितम् अस्मान् बोधयति यत् सकलशास्त्राणां प्रवेशद्वारं व्याकरणमेव। तत्र पाणिनीयतन्त्रे महाभाष्यस्य आशयं सुदृढं स्थापयितुं, प्रक्रियाग्रन्थानां मूलस्रोतः दर्शयितुं च भट्टोजिदीक्षितैः प्रणीतः 'शब्दकौस्तुभः' इति ग्रन्थराजः वैय्याकरणानां कण्ठाभरणमिव वर्तते। इदानीं अस्य ग्रन्थस्य प्रथमोऽयं भागः प्रकाशते, यत्र प्रथम-द्वितीयाह्निकयोः (पस्पशाह्निक-प्रत्याहाराह्निकयोः) विचारः सन्निविष्टः। अस्य गम्भीरग्रन्थस्य आशयं स्फुटीकर्तुं वैद्यनाथपायगुण्डविरचिता 'प्रभा' व्याख्या अत्र सुवर्णसुगन्धः इव संयोजिता वर्तते।

अस्मिन् प्रथमे भागे व्याकरणशास्त्रस्य आधारभूताः विषयाः निरूपिताः सन्ति। प्रथमे 'पस्पशाह्निके' व्याकरणस्य प्रयोजनानि (रक्षोहागमलघ्वसंदेहाः), शब्दानुशासनस्य आवश्यकता, तथा 'सिद्धे शब्दार्थसम्बन्धे' इति वार्त्तिकद्वारा 'शब्दनित्यता' (शब्दस्य नित्यत्वम्) च विस्तरेण चर्चिता। ततः द्वितीये आह्निके 'अइउण् - ऋलृक्' इत्यादि-माहेश्वरसूत्राणां (शिवसूत्राणां) विमर्शः, हकारादिषु अकारोच्चारणस्य प्रयोजनं, प्रत्याहारसिद्धिश्च निरूपिता। एतेषां विषयाणां सम्यग्ज्ञानेन विना शास्त्रे गतिः न सम्भवति। 'प्रभा'व्याख्यानेन एते क्लिष्टविषयाः अत्र सरलीकृताः।

एतादृशस्य मूलभूतस्य, गम्भीरस्य च ग्रन्थस्य सम्पादनकार्यं व्याकरणशास्त्रनिष्णाताः विद्वान् रोचनाचार्याः अत्यन्तं परिश्रमेण कृतवन्तः। प्राचीनहस्तलेखानां परिशीलनेन, पाठभेदानां विमर्शनेन च तैः कृतं इदं सम्पादनं शास्त्रलोके बहुकालपर्यन्तं स्थास्यति। एतेषाम् अनवरतशास्त्रसेवया वयं भृशं मोदामहे। अस्माकम् उपास्यमूर्तेः श्रीरामविठ्ठलदेवस्य च पूर्णानुग्रहः ग्रन्थसम्पादकानां रोचनाचार्याणां, प्रकाशकानां, अध्येतॄणां च उपरि सदा भूयात् इति सानुग्रहं प्रार्थयामहे।

इति नारायणस्मृतयः

**श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादाः**

# निदेशकवचांसि

वेदपुरूषस्य मुखभूतं व्याकरणशास्त्रं सकलविद्यानां आधारशिला। तत्र पाणिनीयपरम्परायां महाभाष्यस्य आशयं सुदृढं स्थापयितुं श्रीमद्-भट्टोजिदीक्षितैः प्रणीतः 'शब्दकौस्तुभः' इति ग्रन्थराजः वैय्याकरणानां कण्ठाभरणमिव विराजते। अस्य गम्भीरग्रन्थस्य आशयं स्फुटीकर्तुं वैद्यनाथपायगुण्डविरचिता 'प्रभा' व्याख्या अपि अत्र संयोजिता अस्ति।

अस्माकं 'वेदवेदान्ताध्ययनशोधसंस्थानस्य' विश्वविद्याग्रन्थमालायाम् इदं षष्ठं प्रकाशनम् इति निवेदयितुं वयं भृशं मोदामहे। अद्य प्रकाश्यमानः अयं 'शब्दकौस्तुभस्य प्रथमः भागः' पस्पशाह्निक-प्रत्याहाराह्निकयोः विचारं प्रस्तौति। संस्थायाः अल्पे एव कालावधौ एतादृशस्य प्रौढशास्त्रग्रन्थस्य प्रकाशनं अस्माकं कार्यतत्परतां द्योतयति।

अस्य विशिष्टग्रन्थस्य सम्पादनकार्यं विद्वांसः, व्याकरणशास्त्रनिष्णाताः विद्वान् रोचनाचार्याः अत्यन्तं परिश्रमेण कृतवन्तः। प्राचीनहस्तलेखानां परिशीलनेन, पाठभेदानां विमर्शनेन च तैः कृतं इदं सम्पादनं शास्त्रलोके बहुकालपर्यन्तं स्थास्यति। एतेषां शास्त्रनिष्ठा, संस्थां प्रति एतेषां समर्पणभावः च श्लाघनीयः।

अस्य महार्हग्रन्थस्य प्रकाशने अस्माकं मुख्यप्रेरणास्रोतोभूताः, श्रीपेजावरमठाधीश्वराः, परमपूज्य श्रीश्रीविश्वप्रसन्नतीर्थश्रीचरणाः। पूज्यपादानां "ज्ञानदानात् परं न किञ्चित् दानम्" इति आदेशं वयं शिरसा वहामः। तेषां पादपद्मयोः वयं सश्रद्धं साष्टाङ्गप्रणामान् कृतज्ञतां च निवेदयामः।

अनेन ग्रन्थेन व्याकरणजिज्ञासूनां छात्राणां च महान् उपकारो भविष्यति इति विश्वसिमि।

विद्वान् डा। धनञ्जयाचार्यः

।। श्रीगुरुराजो विजयते ।।

# भूमिका

वर्णाम्नायसुधावृतः पणियुवापत्योक्तसूत्रावली-
कल्लोलप्रचुरः कतप्रसववाक्यावर्तजालान्वितः ।
गोनर्दीयनिगूढवाक्यरचनावेलासमुज्झृम्भितः
शश्वद्व्याकरणाम्बुधिः कलयतादानन्दचन्द्रोदयम् ।।

## ०.१ भारतीयसंस्कृतौ व्याकरणशास्त्रस्य स्थानम्

### ०.१.१ व्याकरणशास्त्रम्

स्थावरजङ्गमात्मिकां सृष्टिं विरचय्य असन्तुष्टमना ब्रह्मदेवो ब्रह्मावलोकधिषणं मनुजं निर्माय परमां मुदमाप्तवान् । अत्र ब्रह्मावलोकधिषणमिति विशेषणस्य चारितार्थ्यसम्पत्तये काचन भाषाऽपि तेन प्रदत्ता स्यात्, यया मानवेषु ब्रह्मतत्त्वज्ञानार्थं गुरुशिष्यपरम्परा, समाजरचना च स्यात् । सा च भाषा संस्कृता एव भवितुमर्हति, सैव सृष्टिकालतः प्रचलन्ती आस्ते । यथोक्तम् –

[१]अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ।। इति ।।

अस्याश्च संस्कृतभाषाया वैदिक-लौकिकभेदाभ्यां द्वैविध्यमस्ति । तत्र वैदिकी भाषा अपौरुषेयी परमेश्वरवाणी इत्युच्यते, सा च वेदब्राह्मणारण्यकोपनिषदात्मिका । लौकिकी संस्कृतभाषाऽपि द्विविधा, द्विजातिकृतव्यवहारविषयभूता, तदितरमानवसाधारणव्यवहारविषयमाप्ता चेति । उक्तं च वाल्मीकिरामायणे सुन्दरकाण्डे –

[२]यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।
रावणं मन्यमाना मां सीता भीता भविष्यति ।।
वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम् ।। इति ।।

---

१. ब्र.सू.शा.भा. (१-३-२८) पृ.सं. ३२२

२. वा.रा. ३०सर्गः श्लो.सं. १८

तत्रास्याः संस्कृतभाषायाः स्वरूपज्ञानाय तद्रक्षायै च किमपि शास्त्रं नितरामावश्यकतां बिभर्ति । तदेतत् शास्त्रं व्याकरणशास्त्रसंज्ञया प्रथितम् ।

तत्र व्याकरणशास्त्रमधिकृत्याधिकं वचनात् प्राक् व्याकरणं नाम किम् ? व्याकरणशास्त्रमित्यत्र व्याकरणशब्दः कस्मिन्नर्थे प्रयुज्यते ? इति आदौ विवेचनीयम् ।

व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययविभागविषयीक्रियन्ते, असाधुशब्देभ्यो विविच्य बोध्यन्ते साधुशब्दा अनेनेति व्युत्पत्त्या वि आङ्पूर्वात् डुकृञ् करणे इत्यस्मात् धातोः 'करणाधिकरणयोश्च' (पा०सू० ३-३-११७) इति सूत्रेण करणार्थकल्युट्प्रत्ययान्तो निष्पद्यतेऽयं व्याकरणशब्दः । 'एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति' इति 'एकः पूर्वपरयोः' इति सूत्रभाष्योक्तश्रुत्यनुसारेण साधुशब्दज्ञाने प्रयोगे च धर्मः । न हि व्याकरणज्ञानमन्तरेण साधुशब्दान् व्यवहर्तुं शक्नुवन्ति जना इति निश्चप्रचम् । तत्र 'व्याकरणमित्यस्य कः पदार्थः' इत्याशङ्क्य भगवता पतञ्जलिना[1] 'लक्ष्यलक्षणे व्याकरणम्' वार्तिकेन समाधानमुक्तम् । एवञ्च शब्दो लक्ष्यम् सूत्रं लक्षणमेतत् समुदितं व्याकरणम् । यद्वा [2]व्याकरणं नाम - अर्थविशेषमाश्रित्य स्वरप्रकृतिप्रत्ययादीन् विशेषेण संस्काररूपेण, आ-समन्तात् - वैदिकान् लौकिकांश्च शब्दान् करोति तथाभूतः पाणिन्यादिमहर्षिप्रणीतो ग्रन्थसमूहः ।

## ०.१.२ व्याकरणशास्त्रस्य महत्त्वम्

'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च, प्रधानं हि षट्स्वङ्गेषु व्याकरणम् - प्रधाने हि कृतो यत्नः फलवान् भवति' इति [3]भगवद्वचनानुसारेण प्रकृतिप्रत्ययतत्तदर्थविभागज्ञानपूर्वकं वेदशब्द-तत्तदर्थज्ञानजनकत्वेन उपकार्योपकारकभावसम्बन्धेन व्याकरणस्य वेदाङ्गत्वात् इतराङ्गापेक्षया व्याकरणस्य महत्त्वं प्रतिपादितं भवति । किञ्चेदं च व्याकरणशास्त्रं ज्योतिषामपि ज्योतिः, यतो हि शब्दो ज्योतिः, तस्य प्रकाशनं = अन्वाख्यानं = प्रकृतिप्रत्ययतदर्थप्रतिपादनं व्याकरणमेव करोति । तथा चोक्तं दण्डिना काव्यादर्शे -

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।। इति ।।

---

१. म.भा.पस्प.पृ.सं. ७९ प्रथमभागः

२. नरहरिशर्मभिः भैरवीव्याख्यासहितस्य लघुशब्देन्दुशेखरस्य भूमिकायाम् ।

३. म.भा.पृ.सं. २३ प्रथमभागः

शब्दशास्त्रं समधिगम्य स्वाशयं प्रकटयद्भिः भर्तृहरिभिरपि प्रतिपादितम् –

[1]'इदमाद्यं पदस्थानं सिद्धसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ।। इति ।।

पदमञ्जरीकारा हरदत्तमिश्रा अप्यवोचन् शब्दानुशासनप्रस्तावे –

[2]उपासनीयं यत्नेन शास्त्रं व्याकरणं महत् ।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम् ।।
रूपान्तरेण ते देवा विचरन्ति महीतले ।
ये व्याकरणसंस्कारपवित्रितमुखा नराः ।। इति ।।

तथा चानुशासनतः श्रेष्ठस्य गुणतो गरिष्ठस्य दुर्मेधसो दविष्ठस्य मुख्यवेदाङ्गत्वेन लब्धप्रतिष्ठस्य शब्दानुशासनापरनामधेयस्य व्याकरणस्य सम्प्रति स्वरूपं श्रीमतां समक्षं समुपस्थाप्यते । शब्दसाधुत्त्वप्रतिपादनपरेषु तेषु तेष्वाकरग्रन्थेषु सम्यक्समीक्षमाणेषु शब्दानुशासनस्य स्वरूपद्वयं समुपलभ्यते - एकं लौकिकशब्दव्युत्पादकं, अपरं परमार्थवस्तुप्रतिपादकम् । 'पदलक्षणाया वाचोऽन्वाख्यानं व्याकरणमिदम्' इत्यादिनाद्यं निर्दिष्टम्, 'इयं सा मोक्षमाणानां' इत्यादिना चान्त्यम् ।

एतेनेदं वक्तुं शक्यते यज्जनैः कामं प्रयुज्यमाना पुनः पुनर्व्यवह्रियमाणा काचन वाग् यदा लोकभाषात्वमवाप्नोति, विस्तरश्चैति, भाषान्तरसम्पर्कात् साङ्कर्यदोषमादधाति, तदा तस्याः स्वरूपनिर्धारणाय सीमानियमनाय च प्रयतमाना विद्वांसः कांश्चन नियमान् निबध्नन्ति । तेषामेव नियमानां व्याकरणपदेन व्यपदेशो भवति । तात्पर्यमिदं यत् शब्दानां निष्पन्नानामेव लघुना यत्नेन ज्ञानं साध्यतेऽनेन व्याकरणेन, न तु नवीनानां शब्दानां निष्पादनं क्रियते ।

## ०.१.३ व्याकरणशास्त्रस्य विषयः प्रयोजनश्च

'प्रेक्षावत्प्रवृत्तये व्याकरणस्य विषयं भगवान् भाष्यकारः प्रादर्शयत् ''अथ शब्दानुशासनं'' इति' इति कौस्तुभवचनात् शास्त्रजन्यज्ञानविषयस्यैव शास्त्रविषयत्वेन लौकिकाः वैदिकाः शब्दाः विषयत्वेन स्वीकृताः । प्रकृतशोधप्रबन्धे सम्पादनाय स्वीकृतायां प्रभायां उक्तकौस्तुभपङ्क्तेः व्याख्यावसरे इत्थमभिप्रायो वर्णितः - 'यद्यपि पाणिनिना 'ब्राह्मणेन निष्कारण'

---

१. वा.प. (१।१६) पृ.सं. ३९

२. का.वृ.प. पृ.सं. १४.

इत्यादिश्रुतेर्वेदाध्ययनवन्नित्यतया प्राप्ते व्याकरणाध्ययने सन्ध्योपासनादाविव प्रत्यवायपरिहारार्थितयैव उत्तमाधिकारिप्रवृत्तिसम्भवात् प्रयोजनं नोक्तम् । वार्तिककृता तु 'शास्त्रपूर्वके प्रयोगे धर्मः' इत्यनेन मध्यमाधिकारिणः परमप्रयोजनं दर्शितम् । एवञ्च नास्योपयोगः । तथापि भगवान् विवरणकारत्वात् मन्दाधिकारिणां प्रवृत्तेः प्ररोचकप्रयोजनप्रतिपत्तिप्रवणत्वाद्व्यवहितफलेषु स्वर्गापूर्वादिष्वविश्वासात् साक्षात्प्रयोजनं शब्दव्युत्पत्तिलक्षणं सूचयन् तादृशशब्दरूपविषयं कथयन् शास्त्रारम्भं प्रतिज्ञातवानित्यर्थः' इति । अनेन च व्याख्याकदम्बेनेदमवसीयते - लौकिकाः वैदिकाः शब्दाः विषयाः, शब्दव्युत्पत्तिलक्षणं साक्षात्प्रयोजनम् । रक्षोहागमादीनि तु अवान्तरप्रयोजनानि । कौस्तुभे विषयमित्युपलक्षणं प्रयोजनस्यापि । तज्जिज्ञासुरधिकारी, प्रतिपाद्यप्रतिपादकभावः सम्बन्धः इति ।

### ०.१.४. व्याकरणशास्त्रप्रभेदः

अपौरुषेयार्षग्रन्थेषु समुपलब्धप्रमाणानुसारं संस्कृतव्याकरणस्य आदिवक्ता ब्रह्मा आसीत्, तेन समुपदिष्टो बृहस्पतिर्द्वितीयः प्रवक्ता बभूव । तेन बृहस्पतिना प्रशिक्षितः कश्यपमहर्षेरात्मज इन्द्रदेवः प्रकृतिप्रत्ययविभागगर्भस्य व्याकरणस्यादिसंस्कर्ताऽभवत् । उक्तं च –

[१]''इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं, यथाचार्या ऊचुर्ब्रह्मा
बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय भरद्वाज
ऋषिभ्य ऋषयो ब्राह्मणेभ्यस्तं खल्वक्षरसमाम्नायमित्याचक्षते,
न भुक्त्वा न नक्तं प्रब्रूयात् ब्रह्मराशिः'' । इति ।

''वाग्वै पराच्य व्याकृतावदत् । ते देवा इन्द्रमब्रुवन्, इमां नो
वाचं व्याकुर्विति । तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्[२] । इति च ।

किञ्चेदमैन्द्रं व्याकरणं सर्वेष्वपि व्याकरणेषु प्राचीनतममिति गीयते । इतराणि तस्मादर्वाक्तनानि इति प्रथा । उक्तं च मुग्धबोधकृतकविकल्पद्रुमे ग्रन्थे प्रारम्भे एव —

इन्द्रश्चन्द्रः काशकृत्स्नश्चापिशलिश्शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः[३] ॥ इति ॥

इत्थञ्च सर्वाणि संस्कृतव्याकरणानि त्रिधा विभक्तुं शक्यन्ते –

१. ल.शे.पृ.सं. ८

२. तै.सं. ६।४।७

३. सं.व्या.शा.इ.पृ.सं. ७३ ।

१. केवलानि प्रातिशाख्यादीनि वैदिकव्याकरणानि ।

२. केवलानि लौकिकशब्दपराणि कातन्त्रादीनि ।

३. लौकिक-वैदिकोभयविधशब्दसंस्कारकरणानि आपिशलीय-पाणिनीयानि ।

तत्रापि पाणिनिमुनिमवधिं कृत्वा वैयाकरणानां द्विधा विभागः कर्तुं शक्यते —

१. पाणिनेः पूर्वभवा भरद्वाजापिशालिप्रभृतयः ।

२. पाणिनेः पश्चाद्भवा वामन-भोजराजादयः ।

पाणिनिमुनेः प्राक्तना अपि वैयाकरणा द्विविधा भवन्ति –

१. पाणिन्यनुल्लिखिता इन्द्र-भरद्वाज-व्याडिप्रभृतयः ।

२. पाणिन्युल्लिखिताः शाकटायन-गार्ग्य-गालव-सेनकप्रभृतयः ।

**तत्र पाणिनिनाऽनुत्कीर्तिता वैयाकरणा अधोलिखिता द्रष्टव्याः –**

**१. इन्द्र :-** विक्रमपूर्वीयेभ्यः ९५०० वर्षेभ्यः प्राक्तन आसीत्[१] । एतत्प्रणीतं व्याकरणं जैनशाकटायनव्याकरणे (पा०सू० १.२.३७) उल्लिखितमस्ति ।

**२. वायुः -** विक्रमपूर्वीयेभ्यः ९५०० वर्षेभ्यः पूर्वकालिकः आसीत् । एतद्विरचितं वायुनामकं व्याकरणं कवीन्द्रचार्यस्य ग्रन्थसूच्यामुल्लिखितमस्ति । परन्तु सूचीपत्रनिर्दिष्टवायुव्याकरणस्य प्राचीनतायां विवदन्ति युधिष्ठिरमीमांसकाः ।

**३. भरद्वाजः –** वि०पू० ९३०० वर्षेभ्यः प्राक्कालिकः आसीत् । ऋक्तन्त्रे एतदीयं व्याकरणमुल्लिखितमस्ति ।

**४. भागुरिः** – वि.पू० ४००० वर्षेभ्य पूर्वकालिक आसीत् । अदसीयव्याकरणस्य 'हन्तेः कर्मण्युपष्टम्भात् प्राप्तुमर्थे तु सप्तमीम् । चतुर्थी बाधिकामाहुश्चूर्णि भागुरिवाग्भटाः' इति **शब्दशक्तिप्रकाशिकायां** चर्चा कृता विद्यते ।

**५. पौष्करसादिः –** वि०पू० ३१०० अब्देभ्यः पूर्वकालिक आसीत् । एतत्प्रणीतस्य व्याकरणस्य महाभाष्ये 'चयो द्वितीया पौष्करसादेरिति वाच्यम्' इति वार्तिके तैत्तिरीये प्रातिशाख्ये, च उपलब्धिः सान्दर्भिकतया वर्तते ।

---

१. द्रष्टव्यं संस्कृतव्याकरण शास्त्र का इतिहास - युधिष्ठिरमीमांसकः

६. **चारायणः –** असावपि वि० पू० ३१०० वर्षेभ्यः प्राक्तन आसीत् । महाभाष्ये 'वृद्धिर्यस्याचामा' (पा०सू० १-१-७३) इति सूत्रे सान्दर्भिकतया उल्लेखो दृश्यते ।

७. **काशकृत्स्नः –** अयं च शाब्दिकः वि०पू० ३१०० वर्षेभ्यः प्राक्कालिकः । अस्य व्याकरणस्य चोल्लेखः महाभाष्ये उक्तसूत्रे (पा०सू० १-१-७३) प्रथमाह्निकस्य अन्ते विद्यते ।

८. **वैयाघ्रपद्यः –** अयं वि.पू. ३१०० वर्षेभ्यः पूर्वमासीत् । अस्य दशाध्यायोपेतस्य वैयाघ्रपद्यव्याकरणस्य जयादित्यवामनाभ्यां रचितायां काशिकावृत्त्यां सङ्केतो वर्तते ।

९. **माध्यन्दिनिः –** असौ वि०पू० ३००० वर्षेभ्यः प्राक्कालिकः । अस्य चोल्लेखः 'ऋदुशनस्पुरुदंसोनेहसां च' (पा०सू० ७-१-९३) इति सूत्रे काशिकायां कृतो विद्यते ।

१०. **रौढिः –** अयं च शाब्दिकः वि०पू० ३००० वर्षेभ्यः प्राक्तन आसीत् । काशिकायां 'आचार्योपसर्जनश्चान्तेवासी' (पा०सू० ६-२-३६) इति सूत्रेऽस्य व्याकरणस्योट्टङ्कनं दृश्यते ।

११. **शौनकः –** अयं वि०पू० ३००० समाभ्यः पूर्वसामयिक आसीत् । अस्य व्याकरणस्य समुल्लेखः जेज्जटप्रणीतायां चरकसंहितायाष्टीकायां कृतो दृश्यते ।

१२. **गौतमः –** अयं वैयाकरणः वि.पू०. ३००० वर्षेभ्यः पूर्वीकः । अस्य व्याकरणस्य च महाभाष्ये 'आचार्योपसर्जन' (पा०सू० ६-२-३६) इति सूत्रे उल्लेखः कृत ।

१३. **व्याडिः –** वि०पू० २९०० वत्सरेभ्यः पूर्वमयमासीत् । अस्य व्याकरणं ऋक्प्रातिशाख्ये निर्दिष्टम् ।

**महर्षिपाणिनिना समुल्लिखिता व्याकरणप्रणेतारोऽधोनिर्दिष्टा :—**

१. **आपिशलिः –** अयं विक्रमपूर्वीय - ३००० वर्षेभ्यः पूर्वीकः । अस्योल्लेखो महर्षिणा पाणिनिना स्वकीये सूत्रपाठे वासुप्यापिशलेः इति सूत्रे (पा०सू० ६-१-९२) कृतो दृश्यते । अनेन विरचिता ग्रन्थाः - आपिशलिव्याकरणम्, धातुपाठः, गणपाठः, उणादिसूत्रम्, शिक्षा, कोशः, अक्षरतन्त्रं, सामप्रातिशाख्यश्च ।

२. **काश्यपः –** असौ वि०पू० ३००० वर्षेभ्यः पूर्वतनः । अस्य चोल्लेखः 'तृषिमृषिकृषेः काश्यपस्य' (पा०सू० १-२-२५) इति सूत्रे पाणिनिना कृतः । एतद्विरचितं काश्यपव्याकरणमिति ज्ञायते ।

**३. गार्ग्यः** – महर्षिगार्ग्यः वि०पू० ३१०० वर्षपूर्वकालिकः आसीत् । अस्योल्लेखः पाणिनेः सूत्रपाठे ओतो गार्ग्यस्येति (पा०सू० ८-३-२०) विद्यते । एतद्विरचितं गार्ग्यव्याकरणमिति श्रूयते ।

**४. गालवः** – असौ शाब्दिकः वि०पू० ३१०० संवत्सरपूर्वसामयिक इति इतिहासज्ञाः । अस्योल्लेखः अष्टाध्याय्यां इको ह्रस्वोऽङ्यो गालनस्येति(पा०सू० ६-३-६१) सूत्रे विद्यते ।

**५. चाक्रवर्मणः –** अयं वि०पू० ३००० संवत्सेभ्यः प्राक्तनः । अस्योल्लेखः पाणिनीयसूत्रपाठे (पा०सू० ६-१-३०) 'ईचाक्रवर्मणस्य' इत्यत्र विद्यते ।

**६. भारद्वाजः – अयं** वि०पू० ३००० वर्षपूर्वकालिकः आसीत् । अस्य सङ्कीर्तनं अष्टाध्याय्यां (पा०सू० ४-२-१४५) 'कृकण पर्णाद्भरद्वाजे' इति सूत्रे कृतं विद्यते ।

**७. शाकटायनः –** अयं शाब्दिकः वि०पू० ३००० वर्षसामयिक आसीत् । अस्य नामसंङ्कीर्तनं पाणिनिना स्वीये सूत्रपाठे 'लङः शाकटायनस्य' (पा०सू० ३-४-१११) इति सूत्रे कृतमस्ति । 'उणादयो बहुलम्' (पा०सू० ३-३-१) इति सूत्रे महाभाष्ये 'व्याकरणे शकटस्य तोकम्' इत्युल्लिखितम् । एतेन प्रणीता ग्रन्था इमे - १) शाकटायनव्याकरणम्, २) दैवतग्रन्थः, ३) कोशः, ४) ऋक्तन्त्रम्, ५) लघुऋक्तन्त्रम्, ६) सामतन्त्रम्, ७) पञ्चपदी-उणादिसूत्रम्, ८) श्राद्धकल्पः ।

**८. शाकल्यः –** असौ वि०पू० ३१०० वर्षेभ्यः पूर्वमासीत्, अस्योल्लेखः 'सम्बद्धौ शाकल्यस्येतावनार्षे' (पा०सू० १-१-१६) इति सूत्रे कृतो विद्यते । अस्य नाम्ना शाकल्यव्याकरणं समुपलभ्यते ।

**९. सेनकः** – अयं वि०पू० २९५० वर्षेभ्यः प्राक्कालिकः आसीत् । अस्योल्लेखः 'गिरेश्च सेनकस्य' (पा०सू० ५-४-११२) इति सूत्रे पाणिनिना कृतो विद्यते ।

**१०. स्फोटायनः –** अयं वि०पू० २९५० पूर्वकालिकः । पाणिनिना 'अवङ् स्फोटायनस्य' (पा०सू० ६-१-१२३) इति सूत्रेऽस्योल्लेखः कृतः ।

एतदतिरिक्ताः [१]सप्तपञ्चाशदाचार्या व्याकरणशास्त्रप्रणेतारो वैदिकव्याकरणेषु प्रातिशाख्येषु च निर्दिष्टाः सन्ति । इत्थञ्च अशीतिराचार्याः व्याकरणशास्त्रप्रणेतारो पाणिनितः प्राचीनाः श्रूयन्ते ।

---

१. द्र.सं.व्या.शा.इ ।

पाणिनितोऽर्वाचीनाः पञ्चदश आचार्याः व्याकरणशास्त्रप्रणेतारो जाताः । तेषां नामानि ग्रन्थनामानि प्रस्तूयन्ते -

| ग्रन्थनाम | आचार्यनाम | कालः |
|---|---|---|
| १. कातन्त्रव्याकरणम् | श्रीयशोवर्मा | २००० वि०पू० |
| २. चान्द्रं व्याकरणम् | चन्द्रगोमी | १००० वि०पू० |
| ३. क्षपणकं व्याकरणम् | क्षपणकः | वि.प्रथमशताब्दी |
| ४. जैनेन्द्रं व्याकरणम् | देवनन्दी | ५०० वि०पू० |
| ५. विश्रान्तिविद्याधरंव्याकरणम् | वामनः | ३५० वा. ६०० पूर्व |
| ६. जैनशाकटायनं व्याकरणम् | पाल्यकीर्तिः | ८७१-९२४ |
| ७. शाकटायनं व्याकरणम् | शिवस्वामी | १९४-९४० |
| ८. सरस्वतीकण्ठाभरणं व्याकरणम् | भोजदेवः | १०७५-१११० |
| ९. बुद्धिसागरव्याकरणम् | बुद्धिसागरः | १०८० वि० |
| १०. हैमं व्याकरणम् | हेमचन्द्रः | ११४५-१२२९ |
| ११. दीपकं व्याकरणम् | भद्रेश्वरसूरिः | १२०० वि०पू० |
| १२. सारस्वतं व्याकरणम् | अनुभूतिस्वरूपः | १२५० |
| १३. मुग्धबोधं व्याकरणम् | बोपदेवः | १२८७-१३५० |
| १४. कौमारं व्याकरणम् | क्रमदीश्वरः | १३०० वि०पू० |
| १५. सुपद्मं व्याकरणम् | पद्मनाभदत्तः | १४०० |

## ०.१.५. [२]पाणिनीयं व्याकरणम्

एवं सत्स्वपि बहुषु व्याकरणेषु सर्वैरपि अद्यत्वे पाणिन्युपज्ञमेव व्याकरणं समाश्रीयते,

---

२. पणनं पणः । पण व्यवहारे स्तुतौ च इत्यस्मात् 'घञर्थे कविधानम्' इति कप्रत्ययः । सोऽस्यास्तीति पणी, 'अत इनिठनौ' इति सूत्रेण इनिप्रत्ययः । तस्य गोत्रापत्यं पाणिनः । 'तस्यापत्यम्' इत्यण्प्रत्ययः । अत्र 'नस्तद्धिते' इति टिलोपो न भवति । 'गाथिविदथिकेशिगणिपणिनश्च' इति सूत्रेण अण्प्रत्यये परे प्रकृतिभावविधानात् । ततोऽनन्तरापत्ये पणिनो युवापत्ये वा 'अत इञ्' इत्यनेन इञ्प्रत्यये सति अकारलोपे च पाणिनिशब्दो निष्पद्यते । पुनश्च पाणिनिना प्रोक्तं पाणिनीयम् । 'वृद्धाच्छः' इति छप्रत्यये सति ईयादेशः । 'इञश्च' इति अण् तु न शङ्क्यम्, गोत्रे य इञ् तदन्तादिति उक्तत्वात् ।

तदध्ययनमध्यापनं च लोके प्रसृतं चकास्ति । तत्र किं कारणमिति ? प्रश्नः सञ्जागर्ति । अत्रेत्थमुपदिशन्ति प्राज्ञाः[1] – 'सत्सु बहुषु व्याकरणेषु पाणिनीयमेव मूर्धावतंसतया विराजते । पाणिनिः महेश्वरं सन्तोष्य तदनुग्रहेण चतुर्दशसूत्रीमुपलभ्य लौकिकवैदिकवाङ्मययोः अष्टाध्यायीति नाम्ना व्याकरणं रचयामास । माहेश्वरसूत्रमूलकत्वेन पाणिनीयस्यैव वेदाङ्गत्वमिति' । किञ्चान्येषां व्याकरणानां केषाञ्चिल्लोकमात्रविषयत्वं, केषाञ्चिद्वैदिकैकदेशमात्रविषयत्वमेवेति न तानि पाणिनीयवल्लोकवेदसाधारण्येनोपकारकाणि । ध्वनितं चेदं 'लौकिकानां वैदिकानां चेति' वदता भाष्यकृता । स्पष्टीकृतं चेदं कौस्तुभे प्रकृतसंशोधितायां कौस्तुभव्याख्यायां प्रभायाञ्च । अत एवोक्तं–

[2]पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं, त्याज्यं न किञ्चन ।। इति ।।

किञ्चाष्टाध्याय्याः सूत्रक्रमस्य यत्प्राधान्यं तदन्यत्र व्याकरणान्तरीयसूत्रग्रन्थेषु नैव दृश्यते । उत्सर्गापवादं मनसि निधाय सपादसप्ताध्यायीत्वेन त्रिपादीत्वेन च विभागोऽष्टाध्याय्या महत्त्वं ज्ञापयति । प्रत्याहारद्वारा सूत्रप्रणयनमन्यदेकं वैशिष्ट्यं पाणिनिव्याकरणस्य । किमधिकं वक्तव्यम् यदीदं पाणिन्युपज्ञं व्याकरणं न स्यात्, सर्वेषां वाचां मलं न विधूयेत, सर्वेषामज्ञानान्धंतमः न विभिद्येत । अतः सर्वैरासेव्यमिदं व्याकरणम् । उक्तं च —

[3]येन धौता गिरः पुंसां विमलैश्शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नामः ।।

अष्टाध्यायीति नामास्य व्याकरणस्य अन्वर्थं नाम । तत्र प्रत्यध्यायं चत्वारः पादाः प्रतिपादं च विषयानुसारं न्यूनाधिकसंख्याकानि सूत्राणि संरचितानि सन्ति । अस्या अष्टाध्याय्या व्याख्यानतया प्रवृत्तोऽयं शब्दकौस्तुभः, तद्व्याख्यानतया प्रवृत्तः प्रकृतानुसन्धानप्रबन्धः । इत्थञ्च प्रकृते अष्टाध्यायीव्याख्याभूतस्य शब्दकौस्तुभस्य, तद्व्याख्यायाः प्रभायाश्च परिचयनात् पूर्वं शब्दकौस्तुभः तद्व्याख्या च यमुपजीव्य प्रवृत्तः तस्य भाष्यकैयटादिग्रन्थजातस्य विषये यद्वक्तव्यं तत् द्वितीयभागे कथ्यते ।

---

१. लघुशब्देन्दुशेखरभूमिकायां श्रीपादसत्यनारायणमूर्तिमहाभागाः रा.सं.वि. तिरुपति

२. पराशरोपपुराणम्

३. अष्टाध्यायीसूत्रपाठारम्भे पठनसम्प्रदायः । निर्णयसागरीय सि.कौ.पृ.सं. ४१७

## ०.२ अष्टाध्यायीव्याख्यानुव्याख्याः

### ०.२.१ वररुचिप्रणीतं वार्तिकम्

पाणिनिसमयस्तावत् क्रिस्ताब्दात् पूर्वं पञ्चशतं संवत्सराणि । पाणिनेरनन्तरं त्रिभिः संवत्सरशतकैः वररुच्यपरनामधेयेन कात्यायनेन मुनिना लघुटिप्पणीरूपः ग्रन्थः प्राणायि । सोऽयं वार्तिकमिति परम्परायां प्रसिद्धो वर्तते । यद्यपि लाघवमष्टाध्याय्या अनितरसाधारणो विशेषः, तथापि तेनैव तथैव तन्त्रविशेषाश्रयणाद् रचनाया बहुत्र दुर्बोधा सा । अत एवार्थबोधे व्याख्यानविस्तरः सर्वथाऽपरिहार्यस्तत्र । अतः सुखबोधार्थं पाणिनिना विस्तृतं सूत्रव्याख्यानं शिष्येभ्यः श्रावितं स्यादित्यनुमीयते । विस्मृतिः कालस्वभावः, किञ्च सूत्रेषु काचन न्यूनतापि सम्भवति । अतस्तद्व्याख्यानमनवरतं समाजेऽनुवर्त्ततां सूत्रे न्यूनता चापगच्छतु इत्युद्देशो वार्तिकरचनायाः । उक्तानुक्तदुरुक्तचिन्ताकराण्येतानि वार्तिकानि प्रायः पञ्चसहस्रसंख्याकान्यद्यत्वे उपलभ्यन्ते ।

### ०.२.२ महाभाष्यम्

भगवत्पतञ्जलिविरचितं पञ्चाशीत्याह्निकपरिमाणोपेतं सूत्रवार्तिकव्याख्यानं महाभाष्यमिति गीयते । प्रायः अन्यत्र मीमांसा-न्याय-योगदर्शनप्रभृतिषु भाष्यस्य व्याख्यानभूतं वार्तिकं प्रवृत्तम् । यथा पूर्वमीमांसायां जैमिनिप्रणीतानि मीमांसासूत्राणि, शबरस्वामिप्रणीतं तद्भाष्यम्, कुमारिलभट्टविरचितं वार्तिकम् । अत्र तु व्याकरणे सूत्रवार्तिकव्याख्यानभूतं भाष्यमस्ति । तत्र क्रमविपर्यये त्विदं कारणं - प्रायः वार्तिककारस्य सूत्रेषु उक्तानुक्तदुरुक्तचिन्ता अभिलषिता । अत एव स्वग्रन्थस्य वार्तिकमिति नाम कृतम् । भाष्यकारस्य तु पाणिनेर्गौरवरक्षार्थमेव प्रवृत्तिः दृष्टा । अतः वार्तिकाण्यपि व्याकरोत् । अत एव ''प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविष्य महता प्रयत्नेन सूत्राणि प्रणयति स्म, तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं, किं पुनरियता सूत्रेण'' इति [१]महाभाष्ये प्रतिपादितम् । अत एव **'यथोत्तरं मुनीनां प्रामाण्यम्'** इति प्रथा वैयाकरणसमाजे विद्यते ।

अपि च महाभाष्यं न केवलं व्याकरणनिबन्धः, किन्तु सर्वाण्यपि ज्ञातव्यानि विषयजातानि स्थाने स्थानेऽत्र सपरिकरं विवेचितानि । लौकिकाः व्यवहाराः दर्शनानां सिद्धान्ताश्च निरूपिताः ।

१. म.भा.पृ.सं. १६० प्रथमभागः

एतन्मूलकतयैव भर्तृहरिप्रभृतिभिः वाक्यपदीयवैयाकरणमतोन्मज्जन - भूषणसार - लघुमञ्जूषादिग्रन्थनिकारैः आर्थिकं व्याकरणं संस्थापितम् । तदुक्तम् –

[१]कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ।। इति ।।

अत्र पुण्यराजः – 'तीर्थान्यागमविशेषाः । तान् पश्यति विजानातीति तीर्थदर्शी । अनेन गुरुत्वनिबन्धनः प्रभावातिशयो भगवत उक्तः । तच्च भाष्यं न केवलं व्याकरणस्य निबन्धनं यावत्सर्वेषां न्यायबीजानां बोद्धव्यमित्यत एव सर्वन्यायबीजहेतुत्वादेव महच्छब्देन विशेष्य महाभाष्यमित्युच्यते लोके' इत्यभिप्रायमाविश्चकार ।

किञ्च महाभाष्यरचनाशैली अनितरसाधारणा । तत्र हि क्वचन सोपहासा आक्षेपाः - क्वचित्प्रशंसा - क्वचित्प्रतिवादिसमर्थनं - क्वापि बहुमुखा निर्णयाः - क्वचनान्तिमनिर्णये उदासीनभावः - निर्णीतचरस्य पुनः आशङ्कान्तरोद्भावनेन संभ्रमावस्थावपातः इत्येवं वैविध्यमण्डितया रचनाशैल्या तन्महाभाष्यमापातरमणीयम्, परं दुष्प्रापनिर्णयम् । अत एव नूतनाभ्यासकानां दुरध्येयं वर्तते । यद्यपि महाभाष्यमितरटीकावत् ब्रह्मसूत्रादिभाष्यवत् न दीर्घसमासादिबहुलम्, अतः प्रसन्नार्थम् । तथापि गभीराशयं चिरायाभ्यासेनैव सुज्ञानं नान्यथा । अत एव महावैयाकरणो महाभाष्यस्य प्राचीनतमष्टीकाकारो श्रीमान् भर्तृहरिः वाक्यपदीये महाभाष्यस्येमां वस्तुभूतामवस्थां वर्णयति -

[२]अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्टवात् ।
तस्मिन्नकृतबुद्धीनां नैवावस्थित निश्चयः ।। इति ।।

अपरो वैयाकरणः कैयटोपाध्यायः प्रदीपटीकोपक्रमे अमुमेवाशयं इत्थमाविश्चकार —

[३]भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्ततः ।
छात्राणामुपहास्यत्वं यास्यामि पिशुनात्मनाम् ।। इति ।।

तदिदं कात्यायनऋषेरनन्तरं प्रायः द्वाभ्यां संवत्सरशतकाभ्यां अनन्तरकालिकेन भगवता विरचितं महाभाष्यं पञ्चाशीत्या अहोभिः शिष्येभ्यः पाठितम् । अतः तस्य पञ्चाशीत्याह्निकानि सन्ति । एकस्मिन् अहनि यत्पाठितं तदाह्निकम् । महाभाष्यस्य ग्रन्थपरिमाणं तु ग्रन्थपरिमाणदण्डमनुसृत्य

१. वा.प.पृ.सं. ५१८ द्वितीयकाण्डः

२. वा.प.पृ.सं. ५१९ द्वितीयकाण्डः

३. म.भा.प्र.पृ.सं. ३

षट्त्रिंशत्सहस्राणि (पा०सू० ३६०००) ग्रन्था इति निश्चितं साम्प्रदायिकैः ।

### ०.२.३ महाभाष्यव्याख्यानानि

महाभाष्यस्यास्य अनेकैर्विद्वद्भिर्वैयाकरणैरनेकाष्टीकाः विरचिता विराजन्ते । तासु टीकासु उपलभ्यमानासु प्रथमं व्याख्यानं भगवता भर्तृहरिणा रचितमिति विदन्त्येव इतिहासज्ञाः । अस्य व्याख्याया नाम महाभाष्यदीपिका इति । यद्यपि भर्तृहरिः स्वगुरोः नाम कुत्रापि नोल्लिखितवान् । तथापि पुण्यराजेन 'प्रणीतो गुरुणास्मकमयमागमसंग्रह' इति श्लोकस्यावतरणिकायां 'तत्र भगवता वसुरातगुरूणां ममायमागमः संज्ञाय वात्सल्यात् प्रणीत' इति कथयता वसुरातः भर्तृहरिगुरुः इति प्रतिपादितम् । अस्य हरेः कालः वि० ४०० इति युधिष्ठिरमीमांसकाः ।

परन्त्वतिसंक्षिप्ता महाभाष्यदीपिकानाम्नी व्याख्या छात्राणां महाभाष्यार्थावगमे नालमिति हरिनिर्मितव्याख्यानुसारिणा कैयटेन प्रदीपाख्या सर्वसम्मता व्याख्या व्यरचि । उक्तं च मङ्गलाचरणे –

तथापि हरिबद्धेन सारेण ग्रन्थसेतुना ।
क्रममाणः शनैः पारं तस्य प्राप्ताऽस्मि पङ्गुवत् ।। इति ।।

अत एव कैयटव्याख्याया एव अनेकाः व्याख्या विरचिता विराजन्ते । तत्र Catalogos Catalogoram मध्ये निर्दिष्टाः प्रदीपव्याख्याः –

| व्याख्यानाम | रचयिता |
|---|---|
| कैयटप्रकाशः | चिन्तामणिः |
| लघुविवरणम् | रामचन्द्रसरस्वती |
| बृहद्विवरणम् | ईश्वरानन्दसरस्वती |
| प्रदीपोद्योतनम् | अन्नम्भट्टः |
| विवरणम् | नारायणः |
| प्रदीपव्याख्या | रामसेवकः |
| महाभाष्यप्रदीपव्याख्या | नारायणशास्त्री |
| प्रदीपप्रकाशिका | प्रवर्तकोपाध्यायः |
| प्रदीपोद्योतः | नागेशभट्टः |
| प्रदीपस्फूर्तिः | सर्वेश्वरदीक्षितः |

प्रदीपव्याख्यामतिरिच्य महाभाष्यस्यान्या महत्त्वपूर्णा व्याख्याः सन्ति । तासु गणनार्हतया शेषनारायणविरचितः सूक्तिरत्नाकरः । शिवरामेन्द्रसरस्वतीविरचितः रत्नप्रकाशः । अनयोः व्याख्यानयोः प्रधानतया कैयटस्य विमर्शः, तत्रापि रत्नप्रकाशे शब्दकौस्तुभस्य च विमर्शः दरीदृश्यते । अत एव कौस्तुभप्रभाकारेण वैद्यनाथेन वारं वारं नारायणमतस्य रत्नप्रकाशमतस्य चोल्लेखः कृतः । एतच्च उत्तरत्र विवरिष्यते ।

इदन्तु बोध्यम् - सूत्रवार्तिकमहाभाष्यकैयटव्याख्यानमवलम्ब्य पाणिनिव्याकरणशास्त्रस्य पाठप्रवचनपरम्परा द्वेधा विद्यते । तत्र वामनजयादित्यविरचितायाः काशिकायाः पदमञ्जरी - न्यास - प्रक्रियामञ्जरी इत्यादिव्याख्यानिकुरुम्बैः हरदत्तादिभिः अष्टाध्यायीक्रमानुसारेण एका पाठप्रवचनपरम्परा प्रचालिता । तथा प्रक्रियाक्रमानुसारेण प्रक्रियाकौमुदी - सिद्धान्तकौमुदी - मनोरमा - शब्दरत्न - शेखरादिभिः प्रचालिता पाठप्रवचनपरम्परा कौमुदीपरम्परा इत्येवं प्रसिद्धा वर्तते । तत्र कौमुदी - प्रौढमनोरमाप्रणयनपूर्वकं प्रक्रियापरम्परायाः प्रवर्त्तकेन श्रीभट्टोजिदीक्षित-महाभागेन महाभाष्यगूढार्थोपन्यासतत्परेण शब्दकौस्तुभेन अष्टाध्यायीपाठप्रवचनपरम्परापि सम्यगेव संरक्षिता । तदत्र तृतीयभागे शब्दकौस्तुभस्य तत्कर्तुश्च विषये वक्तव्यं निरूप्यते ।

## ०.३ श्रीभट्टोजिदीक्षितविरचितः श्रीशब्दकौस्तुभः

### ०.३.१ श्रीभट्टोजिदीक्षितः

श्रीमान् भट्टोजिदीक्षितः विश्वसंस्कृतवाङ्मयेऽविस्मरणीयः शाब्दिकः । अस्य कालः कि०श० १५७० तः १६५० वर्षपर्यन्तम् । महाराष्ट्रदेशीयः ऋग्वेदान्तर्गताश्वलायनसूत्रशाकल-शाखाध्यायी भट्टकुलावतंसोऽयं लक्ष्मीधरनामकस्य पण्डितवरस्य तनयः । उक्तं च शब्दकौस्तुभारम्भे - 'नत्वा लक्ष्मीधरं तातं सुमनोवृन्दवन्दितम्' इति । अस्य च भट्टोजिदीक्षितस्य विद्याभ्यासः प्रक्रियाकौमुदीप्रकाशकर्तुः शेषनृसिंहसूनोः शेषकृष्णपण्डितात् समजानि । उक्तं च भावप्रकाशे 'एकस्मादेव गुरोः इत्यस्य विवरणावसारे 'कृष्णपण्डिताख्या' दिति । किं बहुना, यदिदानीमपि व्याकरणपाठप्रवचनपरम्परा लोके प्रसरति, तदस्य महानुभावस्य कृपाकटाक्षेणैवेति निश्चप्रचं वक्तुं शक्यते । यतः अनेन विरचितां सिद्धान्तकौमुदीमपठित्वा भाष्याद्याकारग्रन्थेषु विद्वत्तल्लजानामपि प्रवेशो दुर्गमः । उक्तं च –

कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः ।
कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः ॥

अत एव कौण्डभट्टेन भूषणे तस्येत्थं प्रशंसा कृता –

वाग्देवी यस्य जिह्वाग्रे नरीनर्ति सदा मुदा ।
भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये ।। इति ।।

## ०.३.२ श्रीभट्टोजिदीक्षितविरचिताः ग्रन्थाः

सोऽयं महाभाष्याम्बुधिविहरणपटुर्दीक्षितः व्याकरणशास्त्रे धर्मशास्त्रे वेदे वेदान्ते चानेकान् ग्रन्थान् रचयामास । ते यथायथं (१) धर्मशास्त्रं, (२) वेदः, (३) वेदान्तः, (४) व्याकरणशास्त्रमिति क्रमेणाधो निर्दिष्टाः[१]

१) धर्मशास्त्रग्रन्थाः –

१. आचारप्रदीपः
२. अशौचनिर्णयः
३. कालनिर्णयसंग्रहः
४. गोत्रप्रवरनिर्णयः
५. चन्दनधारणविधिः
६. तिथिनिर्णयः
७. तिथिनिर्णयसंक्षेपः
८. तिथिप्रदीपः
९. तीर्थयात्राविधिः
१०. त्रिस्थलीसेतुसारसंग्रहः
११. प्रायश्चित्तविनिर्णयः
१२. मासनिर्णयः
१३. श्राद्धकाण्डम्

२) वेदभाष्यमधिकृत्य 'वेदभाष्यसार' इति ग्रन्थः एतद्विरचितः 'भारतीय विद्याभवन मुम्बयि' द्वारा प्रकाशितः । संध्याभाष्यमिति अपरः ग्रन्थः अमुद्रितः ।

---

१. एते ग्रन्थाः महाभाष्यभूमिकायां भार्गवशास्त्रिभिः निर्दिष्टाः, तमनुसृत्यात्र प्रदत्ताः ।

(३) वेदान्तग्रन्था :–

१) अद्वैतकौस्तुभः

२) तत्त्वकौस्तुभः

३) तत्वविवेकदीपनव्याख्या

४) दशश्लोकीव्याख्या

५) तन्त्रसिद्धान्तदीपिका

६) तन्त्राधिकारनिर्णयः ।

एतेषु 'तत्त्वकौस्तुभः' माध्वीयचन्द्रिकाखण्डनपरः कञ्चीकामकोटीद्वारा मुद्रितः । अस्य ग्रन्थस्य खण्डनं 'तत्वकौस्तुभकुलिश' इति नाम्ना महामहोपाध्याय सेतुमाधवाचार्यैः विरचितो विद्यते । अस्यापि खण्डनं दीक्षितमण्डनं च 'कुलिशप्रतीकार' इति नाम्ना महामहोपाध्याय पेरी सूर्यनारायणशास्त्रिभिः विरचितमिति भाट्टरहस्य व्याख्यानभूमिकायां पेरीसूर्यनारायणशास्त्रिभिरुक्त-मस्ति ।

४) व्याकरणग्रन्थाः –

१) शब्दकौस्तुभः

२) वैयाकरणसिद्धान्तकौमुदी

३) प्रौढमनोरमा

४) वैयाकरणमतोन्मज्जनम्

५) लिङ्गानुशासनसूत्रवृत्तिः

६) धातुपाठनिर्णयः

### ०.३.३ शब्दकौस्तुभग्रन्थपरिचयः

मीमांसायां यथा मीमांसाकौस्तुभः, न्याये च यथा न्यायकौस्तुभः, तथा व्याकरणे भट्टोजिदीक्षितस्य सर्वोत्तमो ग्रन्थः शब्दकौस्तुभनामा महाभाष्यार्थविवेचनपरो वर्त्तते । अष्टाध्यायीक्रममाश्रित्य प्रवृत्तोऽयं ग्रन्थराजः महाभाष्यगूढार्थाभिसन्धानेऽत्यन्तमुपकारी । अत एव नागेशः कौस्तुभकारमतमेव तत्र तत्रोद्योते प्रकटीचकार इति प्रथा वैयाकरणनिकाये । यद्यप्युक्तरीत्या महाभाष्यस्य कैयटेन प्रदीपनाम्नी टीका विरचिता वर्तते । तयैव महाभाष्यार्था ज्ञातुं शक्यन्ते । तथापि

नायं गतार्थः । वामन-जयादित्य-पुरुषोत्तमदेव - सीरदेव - हरदत्त - न्यासकार - माधवाचार्य - शेषकृष्ण - रामचन्द्र - विठ्ठलप्रभृतीनां विदुषां मतानि परीक्षितानि अत्र ग्रन्थे । प्रायः कैयटमतानुसरणेऽपि क्वचित्तस्यापि परीक्षा विद्यते । तदा भाष्यस्याशयान्तरवर्णनं, क्वचिच्च भाष्यमेव प्रौढिवादतया स्वीकरणम्, क्वचिद्भाष्यदूषितपक्षसमर्थनं च कृतम् । किञ्च बहुत्र नैयायिकानां मीमांसकानां च परामर्शो विद्यते । तस्मात् समादरणीयोऽयं ग्रन्थः । किं बहुना न खलु यद्वैयाकरणसिद्धान्तकौमुदीमविमृश्य कश्चिद्विपश्चिद्वैयाकरणीभवितुमर्हति सा वैयाकरणसिद्धान्त-कौमुदी अपि शब्दकौस्तुभमूला । उक्तं च कौमुद्यामन्ते –

[१]इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम् ।
विस्तरस्तु यथाशास्त्रं दर्शितं शब्दकौस्तुभे ।। इति ।।

**तथा वैयाकरणमतोन्मज्जनेऽपि —**

[२]फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते ।। इति ।।

**ग्रन्थसंख्या अध्यायादिविभागश्च –**

अयं शब्दकौस्तुभः उक्तरीत्या अष्टाध्यायीव्याख्यानार्थं प्रवृत्तः । तथाप्यत्र भाष्यक्रममनुसृत्य अध्यायादिविभागः प्रक्रान्तो वर्तते । भाष्ये तावत् आह्निकक्रममनुसृत्य सूत्रवार्त्तिकयोः व्याख्यानं प्रवृत्तम् । अत्रापि ग्रन्थे स एव क्रमः अनुसृतो ग्रन्थकृता । उपलब्धप्रमाणानुसारादनेन महाभागेन षष्ठाध्यायपर्यन्तं कौस्तुभः रचितः इति निश्चयेन वक्तुं शक्यते । यतो हि 'अतो लोपः' (पा०सू० ६-४-८४) इति सूत्रव्याख्यावसरे मनोरमायां 'विस्तरः शब्दकौस्तुभे बोद्धव्यः' इत्युक्तं ग्रन्थकृता । तत्रैव **शब्दरत्ने** 'विस्तर इति । कौस्तुभे षाष्ठे' इत्युक्तम् । सम्भाव्यते सम्पूर्तितो वा कौस्तुभः अनेन । परन्त्वस्माकं दौर्भाग्यवशादयं ग्रन्थः सम्पूर्णतया नोपलभ्यते । किन्तु आरम्भतः तृतीयाध्यायद्वैतीयीकपादपर्यन्तांशः चतुर्थाध्यायश्च उपलभ्यते ।

**प्रभायां अधिकविचारः**

शब्दकौस्तुभव्याख्यायां प्रभायां अयमाश्चर्यकारः विषयः प्रस्तुतः, तदनुसारेण शब्दकौस्तुभः

---

१. सि.कौ.पृ.सं. ५८५

२. वै.सि.का.श्लो.सं. १

भट्टोजिना न सम्पूर्तित इत्यपि वादः प्रस्तोतुं शक्यते । तथा हि । शब्दकौस्तुभे 'वृद्धिरादैच्' इति सूत्रव्याख्यावसरे 'चोः कुः' (पा०सू० ८-२-३०) इति सूत्रेण कुत्वमैच्छब्दे आशङ्क्य परिहृतः । तत्र प्रभाव्याख्यायां यद्वेति कौस्तुभव्याख्यावसरे ''भाष्ये तु संज्ञाशब्द एव द्रव्यमात्रबोधकत्वमिति मते प्रकृतिप्रत्ययार्थयोः भेदानुपपत्तिमाशंक्यायं पक्ष एकदेशिनोक्त इति गुरुचरणाः । वस्तुतस्तदपि यथायुक्तं तथा **कौस्तुभपूरणे** तत्रैव सूत्रे प्रतिपादितं तत एव बोध्यम्'' इत्युक्तम् । अनेन व्याख्यासन्दर्भेण भट्टोजिना कौस्तुभः न पूर्तितः, नागेशेन सम्पूर्तित इति ज्ञायते । यद्वा नागेशेन कौस्तुभस्यापि व्याख्या रचिता इति श्रूयते । तेन कौस्तुभस्य यथा निर्दुष्टत्वं तथा व्याख्यानेन सम्पूरणं कृतं इत्यपि वक्तुं शक्यते । अत्राधिकं विचारणीयमस्ति ।

### शब्दकौस्तुभपाठः

एतावत्पर्यन्तं शब्दकौस्तुभस्य पञ्चवारं षड्वारं वा संस्करणं जातमिति अन्तर्जालतः (Internet) ज्ञायते । तदत्राधस्तात् निविष्टम् :-

1) Baburam 'संवत्' 1868 'शके' 1753 (i.e., 1811)
2) BhuvaneshvarI Ashram (1904)
3) Srisha Chandra Vasu, Vaman Das Vasu, Allahabad (1906)
4) P.V. Naganatha Shastri (1990) ISBN 81-208-0679-4
५) प. गोपालशास्त्री नेन ६ प. श्रीमुकुन्दशास्त्री पुणतामकार आभ्यां सम्पादितः (१९९१) - चौखम्बा संस्कृत सीरिज् आफिस्
6) S.C. Vasu, Motilal Banarasidass (2003) ISBN - 978-81-208-1290-1.

एतेषु संस्करणेषु प्रकृते पञ्चमसंस्करणस्य पाठमनुसृत्य अयं कौस्तुभव्याख्यारूपशोधप्रबन्धः कृतः ।

## ०.३.४ शब्दकौस्तुभस्य वैशिष्ट्यम्

अस्य ग्रन्थस्य वैशिष्ट्यं स्वयं ग्रन्थकृतैव स्पष्टीकृतम् । तद्यथा -

[१]परिभाव्य बहून् ग्रन्थान् योऽर्थः क्लेशेन लभ्यते ।
तमशेषमनायासादितो गृह्णीत सज्जनाः ।। इति ।।

अयमर्थः । कैयटादिप्राचीनग्रन्थाध्ययनेनैवार्थप्रतिपत्तौ किमनेन शब्दकौस्तुभाख्येन

१. श.कौ. पृ.सं. १

ग्रन्थेनेत्याशङ्कायामयं श्लोकः प्रवृत्तः । तथा च बहून् ग्रन्थान् कैयटादिग्रन्थान् परिभाव्य विचार्य योऽर्थः क्लेशेन भाष्यादिग्रन्थात् बह्वायासेन लभ्यते तं सम्पूर्णमनायासात् इतः बुद्धिस्थात् शब्दकौस्तुभात् गृह्णीतेति भावः । अथवा प्राचीनन्यासकारादिग्रन्थाध्ययनेनैव भाष्यादिग्रन्थाशय-सिद्धौ किमनेनापूर्वग्रन्थेनेत्याशङ्कायां वा उक्तं परिभाव्येति । अत्र च परिभाव्येत्यस्य तिरस्कृत्येत्यर्थः । तथा च प्राचीनग्रन्थानां भाष्यादिविरोधेन निर्युक्तिकत्वेनाश्रद्धेयत्वमिति भावः । नन्वेवं प्राचीनग्रन्थतिरस्कारे प्राचीनग्रन्थप्रतिपाद्यभाष्याद्यविरुद्धार्थाप्रतिपत्तिप्रसङ्ग इत्याशङ्कायां उत्तरभागः प्रवृत्तः । तथा च तेभ्यो न्यासादिग्रन्थेभ्यो योऽर्थः बह्वायासेन लभ्यते, तद्ग्रन्थप्रतिपाद्यं तमाशयं सम्पूर्णमनायासेन शब्दकौस्तुभतः गृह्णीतेत्यर्थः । तदत्र शब्दकौस्तुभे कथं कैयटादिग्रन्थपरीक्षणं कैयटाद्यशयवर्णनं भाष्याद्याशयवर्णनं च कृतमिति यथामति स्थालीपुलाकरीत्या निरूपयिष्यते ।

### ०.३.४.१ कैयटमतपरीक्षणम् :-

प्रत्याहाराह्निके माहेश्वरसूत्रे स्वरसन्धिः कुतो न भवतीत्याशङ्कायां कैयटेन प्रदीपव्याख्यायां इत्थमुक्तम् - ''स्वरसन्धिस्तु न प्रवर्त्तते, वर्णोपदेशकाले अजादिसंज्ञानामनिष्पादात्'' इति । आदिरन्त्येनेत्यस्य वर्णोपदेशानन्तरभावित्वात् तत्समये तदप्रवृत्तेः संज्ञानामनिष्पत्तौ तदधीनगुणादिकं न प्रवर्त्तत इति कैयटाशयः । इमं कैयटं कौस्तुभकारः इत्थं दूषयति - 'तच्चिन्त्यम्, वर्णोपदेशे, इत्संज्ञायामच्प्रत्याहारे च प्रत्याहारे प्रवर्त्तमानानां यणादीनां 'सुध्युपास्य' इत्यादौ तटस्थे इव उद्देश्यतावच्छेदकरूपाक्रान्ते वर्णोपदेशादावपि प्रवृत्तेरावश्यकत्वात् । अन्यथा तुल्यास्यप्रयत्न-मित्यादौ सवर्णदीर्घो न स्यात्' इति । तस्मादत्र संहिताया अविवक्षया न संहिताकार्यं यणादिकमिति सिद्धान्तः ।

### ०.३.४.२ न्यासकारमतपरीक्षणम् :–

'आद्यन्तवदेकस्मिन्' (पा०सू० १-१-२१) इति सूत्रे कौस्तुभे एकग्रहणप्रयोजनविचारा-वसरे - ''यत्तु न्यासकृतोक्तं - अतिदेशसूत्रे एकग्रहणाभावे वृद्धसंज्ञासूत्रस्थमादिग्रहणमनाति-देशिकप्रतिपत्त्यर्थं सदसहायानां ज्ञादीनामेव वृद्धसंज्ञां वारयेन्न तु सभासन्नयनस्य, सन्नयनेत्येत-दन्तर्गताश्चतुरोऽचोऽपेक्ष्यानाति- देशिकस्यादित्वस्य तत्र सत्वादिति । तच्चिन्त्यम्, परस्मिन् सति यस्मात्पूर्वो नास्ति स आदिरिति सिद्धान्तरीत्या मध्यस्थेऽप्यादित्वविरहात् । इयानेव हि विशेषः - असहाये सत्यन्तविशेषणविरहाद्विशिष्टाभावः, मध्यस्थे तु विशेष्याभावाद्विशिष्टाभाव इति'' इति ।

अयमाशयः :– 'आद्यन्तवदेकस्मिन्' इति सूत्रे एकस्मिन्नित्यस्य 'एकस्मिन्निति किम् ? सभासन्नयने भवः साभासन्नयनः, आकारमाश्रित्य वृद्धसंज्ञा न भवति' इति काशिकायामुक्तम् । काशिकाव्याख्यातॄणां न्यासकाराणामत्रायमाशयः - यद्येकग्रहणं न क्रियेत, तदा यत्राद्यन्तव्यपदेशो नास्ति तत्रातिदेशो युक्त इति आद्यन्तव्यपदेशरहिते मध्येऽप्यतिदेशः स्यात् । आद्यन्तवदिति वचनसामर्थ्यात् । ततश्च सभाशब्दाकारस्यादित्वे सति सभासन्नयनशब्दस्य य आकारः, वृद्धसंज्ञकं तमाकारमाश्रित्य 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति वृद्धसंज्ञा स्यात् । तस्याश्च सत्यामणं बाधित्वा 'वृद्धाच्छः' इति छप्रत्ययः प्रसज्येत । ननु मध्येऽपि यद् वृद्धसंज्ञकं तस्यापि यदि वृद्धसंज्ञा स्यात् तर्हि आदिग्रहणं वृद्धसंज्ञासूत्रे व्यर्थं स्यात्, व्यवच्छेद्याभावादिति चेन्न वृद्धसंज्ञासूत्रे आदिग्रहणसामर्थ्यात् यस्य विशिष्टमादित्वमनातिदेशिकं मुख्यम्, तत्परिग्रहार्थं तत्रादिग्रहणम् । एवञ्च यस्य न कदाचिदपेक्षयैवंविधमादित्वं सम्भवति, तदादिग्रहणस्य व्यवच्छेद्यम् । यथा जानातीति ज्ञा इत्यादि । सभासन्नयनशब्दे तु सन्नयनेत्येतदन्तर्गताश्चतुरोऽचोऽपेक्ष्यादित्वमनाति-देशिकमस्तीति सभाशब्दाकारस्य भवति वृद्धसंज्ञा । अतः तद्व्यवृत्त्यर्थमेकस्मिन्नितीति ।

चिन्त्यताप्रदर्शकस्य कौस्तुभकारस्य त्वयमाशयः - 'आदिरन्त्येन सहेता' (पा०सू० १-१-७१) इति सूत्रभाष्योक्तदिशा 'परस्मिन् सति यस्मात्पूर्वो नास्ति' स आदि' रिति सिद्धान्तत्वात् मध्यस्थेऽप्यादित्वं न भवति । अतः एवंविधाशयवर्णनं न युक्तम् । किन्तु असत्येकग्रहणे यत्रादिव्यपदेशो नास्ति, मध्येऽसहाये च सोऽतिदेशस्य विषयः । 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इत्यत्रादिग्रहणस्याप्येतदेव व्यावर्त्त्यं इति विकल्पः स्यात् - कचादित् वृद्धसंज्ञा, कदाचिन्न इति । अतः एकग्रहणम् । सति च तस्मिन् मध्यान्त्ययोर्व्यावृत्त्या वृद्धसंज्ञायामादिग्रहणं सार्थकमिति ।।

## ०.३.४.३ हरदत्तमतपरीक्षणम्

'अदसो मात्' (पा०सू० १-१-१२) इति सूत्रे कौस्तुभे - ''यत्तु हरदत्तेनोक्तम् 'अणोऽप्रगृह्यस्य' इत्यत्रोपस्थितेन पूर्वसूत्रेण संज्ञायां क्रियामाणायां मुत्वस्य सिद्धत्वाल्लिङ्गत्रयेऽपि द्विवचनेऽनुनासिकपर्युदासः पूर्वेणैव सिद्धः । एतत्सूत्रारम्भस्त्वद्विवचनार्थः, पुंसि द्विवचने प्रकृतिभावार्थश्चेति । तच्चिन्त्यम् । प्लुतसंग्रहानुरोधेन पूर्वसूत्रे यथोद्देशपक्षस्यैव स्थापितत्वात् । तस्मात् पुंसि द्विवचनेऽनुनासिक-पर्युदासोऽप्येतत्सूत्रस्य फलं, न तु प्रकृभिभावमात्रमित्यवधेयम्'' इति ।

अयमर्थः - किमेतत्सूत्रस्य प्रयोजनमिति विचारावसरे 'अणोऽप्रगृह्यस्य' इति सूत्रे 'ईदूदेत्' इति सूत्रं उपस्थितं भवति । कार्यकालपक्षाश्रयणात् । एवञ्च तत्र सूत्रे प्रगृह्यसंज्ञायां क्रियमाणायां

मुत्वस्य सिद्धत्वात् लिङ्गत्रयेऽपि द्विवचनेऽनुनासिकपर्युदासः सिद्ध इति हरदत्ताशयः । परन्तु दीक्षिताः प्लुतसंग्रहानुरोधेन ''ईदूदेत्'' इति सूत्रे यथोद्देशपक्षाश्रयणादयं हरदत्तः चिन्त्य इति प्रतिपादयन्ति ।

एवं अष्टविधस्फोटनिरूपणम् । तत्राष्टविधस्फोटविषये उपष्टम्भकतया भाष्याद्याकर-ग्रन्थानामुद्धारः । एवं नैयायिकमतपरीक्षणं मीमांसकमतपरीक्षणं च तत्र तत्र कौस्तुभे स्पष्टं निरूपितमिति भट्टाचार्योक्तस्य परमतनिराकरणपूर्वकस्वमतव्यवस्थापनरूपपरीक्षालक्षणस्य सम्यक् समन्वयः शब्दकौस्तुभे स्फुटं । इत्थञ्च परमतनिराकरणेन स्फुटं भाष्याद्यर्थावगमे सफलश्चेदयं ग्रन्थः किमन्यद्वैशिष्ट्यमस्य ग्रन्थस्य भवितुमर्हति ।।

## ०.४ शब्दकौस्तुभस्य व्याख्यानानि

इत्थं विषयबाहुल्येन गम्भीरविमर्शनेन च वर्णितदिशा शब्दकौस्तुभस्य यादृशं महत्त्वमस्ति तेन तस्य व्याख्यानसाहित्यमपि सम्भावितम् । छात्राणां व्याख्यानिरपेक्षेण तदध्ययनं तु दुःशकमेव । अत एव विद्वद्वरैः नागेशभट्टादिभिः विरचिताः कौस्तुभव्याख्याः विलसन्ति । Catalogs Catalogorm मध्ये निर्दिष्टाः कौस्तुभव्याख्याः

| | | |
|---|---|---|
| १. | शब्दकौस्तुभोद्योतः | विद्यानाथशुक्लविरचितः |
| २. | शब्दकौस्तुभविषमपदी | नागेशभट्टविरचिता |
| ३. | शब्दकौस्तुभभावप्रदीपः | कृष्णमित्रविरचितः |
| ४. | शब्दकौस्तुभमरीचिः | अज्ञातकर्तृका |
| ५. | शब्दकौस्तुभप्रभा | राघवेन्द्राचार्यविरचिता |
| ६. | शब्दकौस्तुभप्रभा | वैद्यनाथपायगुण्डविरचिता (प्रकृतःग्रन्थः) |

एतासु टीकासु १, ४ एतयोर्विषये किमपि प्रमाणं नोपलभ्यते । १, २, ३, ५, विषये क्वचिदेव विषयसंग्रहः लभ्यते इति संस्कृतव्याकरणशास्त्रेतिहासे (पृ.सं. ५५३प्रथमभाग) युधिष्ठिरमीमांसकाः ।

### ०.४.१ नागेशभट्टविरचिता शब्दकौस्तुभविषमपदी

इयं व्याख्या युधिष्ठिरमीमांसकैः (सं.व्या.शा.इ. ५५३ प्रथम भाग) नागेशविरचिता इति

कथितमस्ति । इयं च व्याख्या B.O.R.I. मध्ये Ms.No. 192 मध्ये उपलभ्यते । यदा मया 'शब्दकौस्तुभप्रभायाः' प्रकृतसंशोधनग्रन्थस्य B.O.R.I. मध्ये प्रतिकृतिः (Xerox) स्वीकृता, तदा एषा व्याख्यापि स्वीकृता । अत्र विषमपदीव्याख्यायां नागेशविरचितत्वेन किमपि प्रमाणं नोपलभ्यते । नामाङ्करहितं व्याख्यानमात्रमस्ति । एषाऽपि व्याख्या नवाह्निकभागस्यैव उपलभ्यते । अत्र विषमपदीव्याख्यायां - 'प्रयोजनमाहेति कैयटोक्तं चिन्त्यम् विषयाकथनेन न्यूनत्वात्' इत्युक्तम् । इदं च यत्तूकारमतत्वेन प्रकृतशोधप्रबन्धे स्वीकृत्य निराकृतमिति B.O.R.I. मध्ये उपलभ्यमाना नागेशविरचिता इति वक्तुं न शक्यते । किन्तु यत्र कुत्रापि सा स्यादिति सम्भाव्यते ।

## ०.४.२ कृष्णमित्रकृतः शब्दकौस्तुभभावप्रदीपः

दुर्बलाचार्य इत्यपरनाम्ना प्रथितः कृष्णमित्रः शब्दकौस्तुभस्योपरि 'भावप्रदीप' नाम्नीं टीकामरचयत् । अयं च कृष्णामित्रः रामसेवकदम्पत्त्योः पुत्र इति इतिहासज्ञाः वदन्ति । अनेन सिद्धान्तकौमुद्युपरि 'रत्नार्णव' इति टीका, तथा मञ्जूषोपरि 'कुञ्जिका' नाम्नी टीका च व्यरचि' । अस्य शब्दकौस्तुभव्याख्यानममुद्रितमस्ति । बहुत्र मातृकागारेषु उपलभ्यते । इदमपि व्याख्यानं नवाह्निकभागस्यैवोपलभ्यते ।

## ०.४.३ राघवेन्द्राचार्यविरचिता शब्दकौस्तुभप्रभा

सातार राघवेन्द्राचार्या इति सुप्रसिद्धा वैयाकरणसमाजे । एतैः 'चन्द्रिका' इति 'विषमपदी' इति व्याख्याद्वयं लघुशब्देन्दुशेखरोपरि विरचितमद्यापि वैयाकरणानां नितान्तमयस्कान्तमिवाकर्षकं विद्यते । अत एव लघुशब्देन्दुशेखरभूमिकायां[१] श्रीगुरुप्रसादशास्त्रिभिः - ''श्रीराघवेन्द्राचार्यैः सदाशिवभट्टाभ्यणङ्कालं स्पृशद्भिः श्रीराजारामशास्त्रिचरणैः, श्रीबालशास्त्रिचरणैश्च तत्र तत्र शेखरव्याख्यानावसरे स्मर्यमाणेयं विशिष्टं स्थानं विद्वत्समवाये धत्ते इति विदन्त्येव विद्वांस'' इत्युक्तम् । राधवेन्द्राचार्यस्य परिभाषेन्दुशेखरोपरि टीका त्रिपथगा इति, तथा शब्दरत्नोपरि टीका 'प्रभा' इति च मुद्रिता अस्ति । शब्दकौस्तुभव्याख्या तु इतोऽप्यमुद्रिता पुनायां आनन्दाश्रमसंस्थामातृकाकोशे उपलभ्यते । एषाऽपि व्याख्या नवाह्निकभागस्यैवोपलभ्यते । एते धीरेन्द्रतीर्थाणां शिष्याः । अतः एतेषां कालः (क्रि.श. १७९२-१८५३) इति । एषा व्याख्यापि प्रकृतशोधितव्याख्यानापेक्षया अर्वाचीना ।।

---

१. ल.शे.भूमिका पञ्चटीकासहिता ।

### ०.४.४ शब्दकौस्तुभखण्डनम्

प्रायः शब्दकौस्तुभकारः स्वपूर्वेषां गुर्वादीनां निराकरणं चकार इति हेतोः शब्दकौस्तुभखण्डनमपि सञ्जातमिति सम्भावयितुं शक्यते । तत्र पण्डितराज जगन्नाथेन 'मनोरमाकुचमर्दिन्यां - ''इत्थं च ओत् सूत्रगतकौस्तुभग्रन्थः सर्वोऽप्यसङ्गत इति ध्येयम् । अधिकं कौस्तुभखण्डनादवसेयम्' इति उक्तमस्ति । एतेन 'शब्दकौस्तुभखण्डनं' इति नाम्ना एकः ग्रन्थः अनेन विरचित इति ज्ञायते । परन्त्विदानीं नोपलभ्यते । एवं 'शब्दकौस्तुभदूषणम्' इति भास्करदीक्षितविरचितं इति सं.व्या.शा.इ मध्ये (पृ.सं. ५५३ प्रथम) युधिष्ठिरमीमांसकैरुक्तम् ।

## ०.५ शब्दकौस्तुभप्रभाकरः पायगुण्डेत्युपाख्यो वैद्यनाथः

प्रकृते सम्पदनाय या शब्दकौस्तुभप्रभानाम्नी व्याख्या स्वीकृता अस्याः रचयिता पायगुण्डेत्युपाख्यो वैद्यनाथः । अयं पायगुण्डेत्युपाख्यो वैद्यनाथः वेणी-महादेवाभिधयोर्दम्पत्योः सुत आसीत् । एतच्च तत्त्वं प्रभायां प्रथमाह्निकस्यान्ते ''श्रीमन्महादेवसुतवेणीगर्भजपायगुण्डोपाख्य-वैद्यनाथविरचिताकौस्तुभव्याख्यायां प्रभाख्यायां प्रथममाह्निकम्'' इति विद्यमानपुष्पिकावाक्यतः ज्ञायते । एवं

[१]अमन्दगणमन्दिरं विमलरत्नविद्याधरं
कलाधरकृतादरं कलितचित्तलक्ष्मीवरम् ।
शिरोधृतनदीवरं शिवकरं रमोमावरं
नमामि दुरहिताहरं गुरुवरं सनागेश्वरम् ।।

इति मञ्जूषाव्याख्याया मङ्गलपद्यतः अस्य गुरुः नागेशभट्ट इति ज्ञायते । नागेशभट्टस्तु पाणिनीयव्याख्यातृपरम्परायां विशेषतः संस्मर्यते सम्मान्यश्च विराजते । प्रायः द्विचत्वारिंशत् ग्रन्थाः येष्वधिकाः टिप्पणीग्रन्था अनेन विरचिताः । गुरुचरणक्षुण्णपथमनुवर्त्तमानेन वैद्यनाथेनापि प्रायः नागेशविरचितानां सर्वेषामेव व्याकरणग्रन्थानां वैदुष्यपूर्णाः व्याख्याः तथा तन्त्रान्तरेष्वपि अनेकाः कृतयः विरचिताः सन्ति ।

### ०.५.१ वैद्यनाथस्य कालः

पायगुण्डेत्युपाख्यः वैद्यनाथः नागेशभट्टशिष्य इति सप्रमाणं निरूपितम् । नागेशभट्टकाल-

---

१. वै.ल.म.क. पृ.सं. २ ।

निर्णये सति अस्य कालः सुतरां निश्चितो भवति । बृहच्छब्देन्दुशेखरभूमिकायां (पृ. ५८) श्रीसीतारामशास्त्रिभिः अनेकप्रमाणैः नागेशभट्टकालः १७३१ वैक्रमाब्धात् १८१० वैक्रमाब्ध (१६७४ - १७५३ ई० सन्) इति निर्णीतः । तेनायं ग्रन्थाकारः वैद्यनाथः पायगुण्डेमहोदयः नागेशसमकालीन (१७३०-१८२० A.D.) इति वक्तुं शक्यते । किञ्च वैयाकरणसिद्धान्त-लघुमञ्जूषायाः व्याख्यायां कलायां उपसंहारभागे अयं वैद्यनाथः कलाग्रन्थनिर्माणसमयमित्थं निर्दिष्टवानस्ति –

[1]द्विसारवसुक्षपाकरसम्मितवत्सरे ।
नलाख्ये ज्येष्टमासे च वृषस्थे च दिवाकरे ।।।

कृष्णपक्षे दर्शतिथौ रोहिणीधृतिसंयुजि ।
इन्दुवारे धस्रशेषे कला वै पूर्तिमागता ।। इति ।।

एतदनुसारेण १८५२ वैक्रमाब्दे (१७९६ A.D.) कलारचना इति ज्ञायते । तदानीं वैद्यनाथस्य ६५-७० वयोमानं स्यादिति सम्भाव्यते । अयं वैद्यनाथः काश्यामपि कश्चित्कालमुवासेति समूह्यते । पिष्टपशुमीमांसारम्भे –

स्फुटीकरोमि तन्मूर्खमुखमर्दनहेतुतः ।
पायगुण्डो वैद्यनाथः काश्यां साधुनियोजितः ।।

इति कथनेन इदं ज्ञातुं शक्यते । एतदतिरिच्यास्य विषये किमपि चारित्रिक - ऐतिहासिकघटना नोपलभ्यते, नोल्लिखितं चेतिहासज्ञैः ।

## ०.५.२ वैद्यनाथस्य कृतयः

प्रायः नागेशविरचितानां सर्वेषामेव व्याकरणग्रन्थानामनेन वैदुष्यपूर्णाः व्याख्याः तथा तन्त्रान्तरेष्वपि अनेकाः कृतयः विरचिताः । ताः —

## १. शब्दकौस्तुभप्रभा

प्रकृतसम्पादनम्

---

१. ल.म.पृ.सं. १५७४ द्वितीयभागः

## २. महाभाष्यप्रदीपोद्योतव्याख्या छाया

महाभाष्यव्याख्याभूतस्य कैयटविरचितस्य प्रदीपस्य नागेशेन 'उद्योत' इति प्रदीपाविष्कारकः सर्वाङ्गसुन्दरः व्याख्याग्रन्थः विरचितो विद्यते । तत्र वैद्यनाथः उद्योतव्याख्याव्याजेन भाष्य - प्रदीप - उद्योतानां गूढार्थं शिष्यान् बुबोधयिषुः इमां टीकां अलिखत् । उक्तं च तेनैव –

वैद्यनाथः पायगुण्डो ध्यात्वा ध्यात्वा परं गुरुम् ।
भाष्यप्रदीपसूद्योतान् व्याचष्टे गूढसंविदे ।। इति ।।

इयं च व्याख्या चौखम्बा संस्कृतप्रतिष्ठानतः मुद्रिता ।

## ३. लघुमञ्जूषाव्याख्या कला

विचारकेषु मूर्द्धन्येन नागेशेन 'वैयाकरणसिद्धान्तलघुमञ्जूषा' इति आर्थिकव्याकरणस्फोरकः मौलिकः ग्रन्थः विरचितः । तस्य मञ्जूषायाः कलानाम्नी टीका अनेन व्यरचि । अयं ग्रन्थः चौखम्बा संस्कृत सीरीज् आफिस्' द्वारा मुद्रितः ।

## ४. लघुशब्देन्दुशेखरव्याख्या चिदस्थिमाला

सिद्धान्तकौमुदीं व्याख्यातुं प्रवृत्तः लघुशब्देन्दुशेखरः नागेशविरचितः सुप्रसिद्धः । तस्य 'चिदस्थिमाला' इति व्याख्या अनेन विद्वद्वरेण विरचिता अस्ति । प. गुरुप्रसादशास्त्रिभिः सम्पादिते 'वाणीविलास प्रकाशन' द्वारा मुद्रिते पञ्चव्याख्यासहिते लघुशब्देन्दुशेखर इयं व्याख्या घटकीभूता ।

## ५. परिभाषेन्दुशेखरव्याख्या गदा

'परिभाषेन्दुशेखर' इति नागेशविरचितः प्राचीनव्याकरणतन्त्रे भाष्यवार्तिकयोश्च उपनिबद्धानां परिभाषाणां विवरणात्मकः अपूर्वः स्वतन्त्रग्रन्थः । तस्येयं व्याख्या गदा काशिकेत्यपराभिधा । इयमपि व्याख्याः आनन्दाश्रमसंस्थातः १९१३ क्रि. मुद्रितः ।

## ६. शब्दरत्नभावप्रकाशः

वैयाकरणसिद्धान्तकौमुदीकर्त्रा दीक्षितेन तदुपरि स्वोपज्ञटीका प्रौढमनोरमानाम्नी प्राचां वैयाकरणानां विमर्शिनी सिद्धान्तस्थापिका च रचिता । तदुपरि पण्डितराजजगन्नाथ-चक्रपाणिशेषवीरेश्वरादिभिः खण्डनाभासतया ग्रन्था रचिताः । तान् खण्डनाभासान् अपास्य

प्रौढमनोरमायाः नैजं स्वादु सौन्दर्यं प्रकटीचकार शब्दरत्नव्याख्याव्याजेन नागेशभट्टगुरुः दीक्षितपौत्रः हरिदीक्षितः । तस्य शब्दरत्नस्य व्याख्यानार्थं प्रवृत्तः वैद्यनाथविरचितः भावप्रकाशः । पं.गोपालशास्त्री नेने इति विद्वद्वरैः सम्पादितः १९९४ तमे चौखम्भा संस्कृत संस्थान द्वारा प्रकाशितः ।

### ७. रप्रत्याहारखण्डनम्

सिद्धान्तकौमुद्यां 'लण्मध्ये त्वकारश्च' इति ग्रन्थेन रप्रत्याहारः कैयटानुसारेण स्वीकृतः । तस्य खण्डनं विहितं नागेशेन शेखरे आदौ । शेखरोक्तदूषणमुद्धिधीर्षुः लक्ष्मणपाठकः 'रप्रत्याहारमण्डनम्' इति ग्रन्थं विरचितवान् । तस्य खण्डनार्थमयं ग्रन्थः प्रवृत्तः । डा. रमाकान्त पाण्डेय इति विदुषा सम्पादितः प्रतिभा प्रकाशन दिल्ली द्वारा प्रकाशितः २००० तमे वर्षे ।।

### ८. पिष्टपशुमीमांसा

मीमांसाग्रन्थः अप्रकाशितः । पाषण्डखण्डनमिति नाम्ना प्रसिद्धः मैसूरुनगरे प्राच्यसंशोधनालये MS. No. C. 1962 मध्ये उपलभ्यते ।।

### ९. वेदान्तकल्पतरुमञ्जरी

वेदान्तग्रन्थः अप्रकाशितः

### १०. हरिलोचनचन्द्रिका

चन्द्रालोकव्याख्या अमुद्रिता

## ०.६ प्रकृतव्याख्या शब्दकौस्तुभप्रभा

अयं ग्रन्थः श्रीभट्टोजिदीक्षितविरचितस्य शब्दकौस्तुभस्य व्याख्यानरूपः । गुरुवरनागेशभट्टदत्तमार्गानुवर्तिना पायगुण्डवैद्यनाथोपाध्यायेनापि दीक्षितविरचितस्य शब्दकौस्तुभस्य प्रभानाम्नी अत्युपयुक्ता व्याख्या विरचिता विद्यते । इयं च व्याख्या नवाह्निकभागस्यैवोपलभ्यते ।

### ०.६.१ प्रभारचने कारणम्

वैद्यनाथ पायगुण्डमहोदयाः मङ्गलाचरणानन्तरं एवं प्रतिज्ञां कृतवन्तः -

'वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् ।
व्याख्यां प्रभाख्यां तनुते कौस्तुभस्य स्वबुद्धये ।। इति ।।

अनेनेदं कारणमत्र समूह्यते । अत्र 'स्वबुद्धये' इत्युक्तम् । स्वस्य बुद्धिः स्वबुद्धिः तस्यै । स्वस्यैव विशदज्ञानाय इयं व्याख्या इति । वस्तुतस्तु व्याख्यानं न स्वोद्देशेन प्रवर्तते । किन्तु परोद्देशेनैव । अतः 'स्वबुद्धये' इत्यस्य स्वेषां आत्मीयानां बुद्धये इत्यर्थः । इत्थञ्च ये कौस्तुभमधीयाना आत्मीया च्छात्रा उत्तरत्राध्येष्यमाणाश्च तेषां बुद्धये ज्ञानायेति भावः । एतेनेदं वक्तुं शक्यते नागेशेन स्वगुरुणा यद्यपि कौस्तुभव्याख्या रचिता, तथापि तया शिष्याणां अनुग्रहातिशयो न लभ्यत इति इयं व्याख्या रचिता । किञ्च उक्तदिशा शब्दकौस्तुभस्योपरि अनेके खण्डनाभासग्रन्थाः प्रारभन्त । तन्निराकरणमपि शिष्यानुग्रहायावश्यकमिति 'स्वबुद्धये' इयं व्याख्यां कृता । अपि चायं कौस्तुभः महाभाष्य-व्याख्या - अनुव्याख्यादिग्रन्थसङ्कलनरूपः । यथा कौस्तुभे क्वचिद्भाष्यं - क्वाचिद्भाष्यव्याख्यानप्रदीपं क्वचिदपि प्रदीपव्याख्यानविवरणादिकं - क्वचिद्धरदत्तमतं - वृत्तिमतं - न्यासमतं चेत्येवं समुच्चित्य समुल्लिखितम् । शिष्याणां तु किं भाष्यमतं किमन्येषामिति विज्ञानार्थं मदीयं व्याख्यानमिति भाति । प्रदर्शितं च तत्र तत्र व्याख्यायां विस्पष्टं भाष्याद्युद्धरणं - नारायणादिमतोद्धरणं - कौस्तुभखण्डनकारोद्धरणमित्यादि ।

## ०.६.२ प्रभायाः सम्पादने उपयुक्ताः मातृकाः

अस्याः कृतेः सम्पादने चतस्रः मातृकाः उपयुक्ताः । ताश्च -

### १. कमातृका

मैसूरुनगरस्थप्राच्यविद्यासंशोधनालयात् प्राप्ता समग्रप्राया मातृका । अत्र मातृकायां **प्रारम्भः** - श्रीगणेशाय नमः । शिवाय नमः साम्बाय नमः । श्री गुरुभ्यो नमः । आनन्दकन्दं मुनिहृन्मिलिन्दं स्वच्छन्दगोविन्दपदारविन्दम् । वन्दे सुरेन्द्रादिमुदादिदं तद् दीनादिशाहं रविनन्दनन्दम् । वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् । व्याख्यां प्रभाख्यां तनुते कौस्तुभस्य स्वबुद्धये ।। प्रारिप्सितग्रन्थनिर्विघ्नपरिसमाप्त्यर्थं कृतं भगवदादिनत्यात्मकं मङ्गलं शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति ।। **विश्वेशमित्यादिना ।। अन्ते –** उपसंहरति । तदेवमिति । कैयटाद्यनुरोधेनाह । **भाष्येति । ग्रामे इति ।** भव इति शेषः भवो दैवदत्त इत्यत्रेत्त्यर्थः । अत्र कुणिमताश्रयणे शैषिकेष्वित्यस्य वैयर्थ्यं, व्यवस्थितविभाषयैव सिद्धेरतो अन्यमताश्रय ..... । इति । एतावत्येव मातृका उपलब्धा ।

अत्र मातृकायां ५२ पृष्टे प्रथमाह्निकान्ते ग्रन्थसंख्या १३२१ श्रीसंवत् १८४६ डेहरवीनायक ग्राममण्डली इति उपलभ्यते । अनेनास्याः मातृकायाः रचनाकालः स्पष्टं विदितं भवति । १८४६

श्रीसंवत् इति विक्रमाब्दः प्रकृते निबद्धः । विक्रमाब्दस्य क्रिस्तशके यदा परिवर्तनं क्रियते, तदा १७८९ A.D. इति कालः भवति । प्रभाकरस्य वैद्यनाथस्य कालस्तु सप्रमाणं १७३०-१८२० A.D. इति सप्रमाणं पूर्वं निरूपितः । किञ्च मञ्जूषाव्याख्यायाः कलायाः निर्माणसमयः १८५२ वैक्रमाब्दः (१७९६ A.D.) इत्यपि पूर्वं निरूपितम् । इत्थञ्च इयं मातृका पायगुण्डे वैद्यनाथोपाध्यायस्य समकालीना इति निश्चयेन वक्तुं शक्यते । उपलब्धासु मातृकासु इयमत्यन्तं प्राचीना । अत एव प्रकृतशोधकाले इयं मातृका **कपाठ** इति निर्दिष्टा ।

यद्यपि इयं मातृका पायगुण्डे वैद्यनाथसमकालीनाऽपि तेनैव विरचिता इति वक्तुं न शक्यते । यतः प्रकृतमातृकायां क्वचित्स्थले पङ्क्तयः लुप्ताः - क्वचिच्च वाक्यानां पूर्वापरीभवः - क्वचिच्चासम्बद्धलेखनं - कुत्रचित् (प्रत्याहाराह्निके) अष्टादशपत्राणि लेखकेन अलिखितानि इत्यादयो अनिर्वचनीयाः दोषाः सन्ति । तथापि मातृकान्तरसहायेन शुद्धसंस्करणार्थं प्रयत्नःविहितो वर्त्तते । इयं मातृका प्रथमाध्याये - प्रथमपादे 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति सूत्रकौस्तुभव्याख्यानपर्यन्तमेव, उपलब्धा 'त्यदादीनि च' (पा०सू० १-१-७४) 'एङ्प्राचां देशे' (पा०सू० १-१-७५) इति सूत्रद्वयस्य व्याख्यानं त्वस्यां नोपलभ्यते ।

मातृकास्वरूपं तु - Pages 1-332 + 2 Folios, 32.5 × 13 cms. 11 lines in a page. 68 letters per line. Devanagari script. Good writing. Inc. upto 1st Adhaya 1st Pada Colophon - दशोत्तरशततमे पृष्ठे - इति श्रीमत्पायगुण्डोपाख्य वेणीगर्भजमहादेवसुतवैद्यनाथकृते कौस्तुभव्याख्याने प्रभाभिधे प्रत्याहारह्निकं परिपूर्णम् ।। इति ।

## २. खमातृका

यदा मया एषा कौस्तुभप्रभा संशोधयितुं २००९ डिसंबर् मासे प्रारब्धा, तदा मत्सकाशे तिस्रः मातृका आसन् । एका मैसूरुप्राच्यविद्यासंशोधनालयस्य पूर्वनिर्दिष्टा । द्वितीयापि पूर्वोक्तसंशोधनालयस्यैव तेलगुलिपिस्वरूपा । तृतीया B.O.R.I संस्थातः प्रतिकृतीकृता । सार्धैकवर्षपर्यन्तं एता मातृका अवलम्ब्य कार्यं प्रवृत्तम् । परन्तु कार्यस्यान्तिमकाले महान् कष्टः सम्प्राप्तः । यतः तिसृषु मातृकासु द्वितीयायां तृतीयायां च प्रथमाह्निकभागपर्यन्त एव दृश्यते । प्रथमा च यद्यपि सम्पूर्णा अस्ति, परन्तु अशुद्धिबहुला । तदानीं मया अन्तर्जालमध्ये (Internet) यत्र कुत्रापि अन्या मातृका लभ्यते वा इति अन्वेषणं (Search) कृतम् । तदा इयं खमातृका India

Office Library मध्ये अस्तीति ज्ञातम् । लण्डन्नगर्यां विद्यामानाया अस्या मातृकाया आनयनं कथमिति विचारे प. वीरनारायणाचार्य पाण्डुरङ्गीमहोदयाः मां साहाय्यमकुर्वन् । मातृका च प्राप्ता ।

अस्याः मातृकायाः सहायेन यत्र यत्र कमातृकायां पङ्क्तिपातः - पूर्वपरीभावः - ग्रन्थपातः - इत्येवं कष्टमनुभूतं तत्सर्वमपहस्तितम् । इयं च मातृका आरम्भतः सप्तमाह्निकपर्यन्तमस्ति । अस्या मातृकायाः **'खपाठ'** इति नाम्ना प्रकृतशोधप्रबन्धे निर्देशः कृतः । India Office Library मध्ये मातृकास्वरूपमित्थं निर्दिष्टम् -

610. 399. Foll 252, Size 12 1/4 in. by 4 1/2 in. Written by four or five different hands. Devanageri character. 10-13 lines in a page, prabha a commentary on Bhattoji's Shabdakaustubha, by Vaidyanatha Payagunda, son of Mahadeva and Veni, and pupil of Nageshabhatta.

It begins

आनन्दकन्दं मुनिहृन्मिलिन्दं स्वच्छन्दगोविन्दपदारविन्दम् ।
वन्दे सुरेन्द्रादिमुदादिदं तद्दीनादिशंदं रविनन्दनन्दम् ॥ १ ॥

वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् ।
व्याख्यां प्रभाख्यां तनुते कौस्तुभस्य स्वबुद्धये ॥

प्रारिप्सित ग्रन्थनिर्विघ्नपरिसमास्त्यर्थं कृतं भगवदादिनत्यात्मकं मङ्गलं शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति । विश्वेशमित्यादिना ॥

Ahnika 1 ends fol. 66 इति श्रीमन्महादेवसुत वेणीगर्भजपायगुण्डोपाख्यवैद्यनाथ-विरचितकौस्तुभव्याख्यायां प्रभाख्यायां प्रथममाह्निकं समाप्तं सम्पूर्णम् । [Pratyahasa] Ahnika 2, ends fol. 116. 3 fol 164, 4.fol 197, 5 fol. 220, 6. fol 242 (Dated 1947) 7 fol. 2526. (H.T. Colebrooke)

यत्र यत्र कमातृकायां पाठ लुप्तः, तत्र सर्वत्रानया मातृकया लोपपरिपूर्णता आसाधिता । कुत्रचित् स्थलेऽत्रापि त्रुटिः वर्त्तते, तत्र च ग्रन्थाकारस्य व्याख्यान्तरसहायेन कुत्रचित् पूरणं कृतम्, कुत्रचिच्च '.......' इति ' ? ' इति चिह्नेन च निर्दिष्टम् । खमातृकोपलब्धपाठादिकं त्रुटिपरिपूरणादिकं च तत्र तत्र पादान्तटिप्पण्यां सान्दर्भिकतया निविष्टमस्ति ।

अत्रापि मातृकायां षष्ठाह्निकान्ते पृ.सं. २४२ मध्ये संवत् १८४७ शके १७११ मिते ज्येष्ठशुद्ध ११ इति उपलभ्यते । अनेनापि अस्या मातृकाया अपि रचनाकालः सुविदितो भवति ।

१८४७ इति विक्रमाब्दस्य क्रिस्तशकाब्दे यदा परिवर्तनं क्रियते, तदा १७९० A.D. इति कालः शालिवाहनशकस्य क्रि.शके परिवर्तनं क्रियते चेत् १७८९ A.D. इति काल भवति । अतः उभयोः मेलनं न भवति । मम तु भाति - अत्र लेखकेन '१७१२' इति लेखनीये '१७११' इति लिखितमिति । तदानीं कालः समीचीनतया संयोजितो भवति । इयमपि मातृका वैद्यनाथसमकालीना, परन्तु पूर्वमातृकातः संवत्सरपरिमिता अर्वाचीना ।

३. गमातृका

(B.O.R.I) Bhandarkar Oriental Research Institute द्वारा प्राप्ता मातृका प्रथमाह्निकपर्यन्तमेव लभ्यते । इयं **गपाठः** इति नाम्ना प्रकृते व्यवहृता ।

४. घमातृका

मैसूरुप्राच्यविद्यासंशोधनालयतः स्वीकृता तेलगुलिप्यात्मिका नितान्तं शुद्धा । परन्तु इयं मातृका प्रथमाह्निके त्रिंशत्पत्रात्मिका एव वर्तते ।। इयं **घपाठ** इति प्रकृते व्यवहृता ।

## ०.७ शब्दकौस्तुभप्रभायाः वैशिष्ट्यम्

शब्दकौस्तुभस्य सत्स्वपि बहुषु व्याख्यानग्रन्थेषु, ते न तावदुपकर्तुं प्रभवन्ति, यावदनया व्याख्यायोपक्रियते इति तु न रिक्तं वचः । प्रभायां समुचिता समन्वयरीतिः, विमर्शनीयांशेष्वतिगभीरा विमर्शनपद्धतिः । सुनिपुणा प्रमाणप्रदर्शनसरणिः, सुबोधो ग्रन्थरचनामार्गः । किं बहुना, ये गुणाः व्याख्यानग्रन्थेष्वभिलषणीयाः ते सर्वेऽपि साकल्येनात्र विद्यन्त इत्युक्तिः स्वभावोक्तिर्भवितुमर्हति । एवंविधविशेषपर्यालोचनायामेतद्ग्रन्थकर्तुरसाधारणं पाण्डित्यमिति सर्वेषां सुव्यक्तमेव । यदा यदा सुनिपुणं विमृश्यतेऽयं ग्रन्थः, तदा तदा ग्रन्थकर्तुः पाण्डित्यातिशयः प्रकर्षमाप्नोतीत्यत्र न कोऽपि संशीतिलेशः । एतादृशग्रन्थरचनया पाणिनीयस्याध्येतॄणामध्यापकानां च बहूपकृतं ग्रन्थकृतेति सर्वेऽपि कृतज्ञतामावेदयन्तीति मदीयो दृढविश्वासः । तस्मात् सर्वं व्याख्यानं वैशिष्ट्यपूर्णमेव, तथापि कानिचित् वैशिष्ट्यान्यत्र प्रदर्श्यन्ते ।

### ०.७.१ समुचिता समन्वयरीतिः

प्रभाया अनितरसाधारणं वैशिष्ट्यं यत्र यत्र कौस्तुभपङ्क्तेः क्लिष्टता दुर्बोधता वा तत्र पदं पदमविहाय समन्वयप्रदर्शनम् । यथा - असन्देहप्रयोजननिरूपणावसरे 'तदेवं रक्षोहागम' इत्यादिकौस्तुभस्य इत्थं समुचितपदपदार्थनिरूपणपरं व्याख्यानम् - ''तदेवमिति ।

तस्मादुक्तरीत्येत्यर्थः । फलानि = फलफलानि । इत्युक्तं = इति हेतोः पृथग्व्याख्यानसहितं पूर्वं कथितम् । नन्वेवमुक्तभाष्यमसङ्गतं स्यादत आह । **भाष्ये त्विति ।** सन्दर्भो = रचना । फलचतुष्टयस्य रक्षोहादेः उक्तेरिति शेषः । यथाश्रुतेऽनुपपत्तिः स्पष्टैव । प्रवर्त्तके = आगमे । मध्ये = अर्थात्फलद्वयद्वययोः । तदुक्त्या = आगमोक्त्या, फलसन्दंशेन = संदंशवदुभयतः फलसम्बन्धेन । नित्यानां = संध्यावन्दनव्याकरणाध्ययनादीनां । फलपर्यवसानं = पर्यवसितफलकत्वम्'' इति । एषा शैली ग्रन्थकारस्यात्रैव इति न, किन्तु सर्वत्र शेखरादिव्याख्याग्रन्थेषु च । अत एव वैद्यनाथोपाध्यायस्य व्याख्या सर्वैराद्रीयते लोके विश्रुता च ।

## ०.७.२ अतिगभीरा विमर्शनपद्धतिः

स्वगुरुनागेशभट्टवत् वैद्यनाथ पायगुण्डेमहोदयानां विमर्शनपद्धतिर्नितान्तं मुदावहा अतिगभीरा च । प्रभाया अयं स्वभावः पदार्थप्रकाशनं अन्धकारविनाशनञ्च । प्रकृतग्रन्थे एतदुभयमपि सुस्पष्टमवलोकयतां सुजनानाम् । तद्यथा -

'पञ्च पञ्च नखा भक्ष्या' इति परिसंख्योदाहरणतया कौस्तुभे[१] प्रतिपादितम् । अत्र प्रभायां कौस्तुभाभिप्रायः सम्यक् प्रतिपादितः - ''अयं भावः । पञ्च पञ्च नखा भक्ष्या इति वाक्यं न भक्षणापूर्वविधिपरम् । तस्य रागतः प्राप्तत्वात् । नापि नियमविधिपरम् । पञ्च पञ्चानखा-पञ्चनखभक्षमस्य युगपत्प्राप्तिसम्भवेन पक्षप्राप्त्यभावात् । अत एवेदमपञ्चपञ्चनखभक्षणनिवृत्तिपरमिति भवति परिसंख्याविधिः । सा च द्विविधा श्रौती लाक्षणिकी चेति ''इत्यादिना मुदावहा पदार्थप्रकाशनरूपविमर्शनशैली ।

२. अत्रैव व्याख्यासमये दिगर्थप्रदर्शनव्याजेन कौस्तुभकारमतस्य 'वस्तुतस्तु इदमयुक्तम्' इत्यादिना गुरुचरणपथा अयुक्तत्वप्रतिपादनं विमर्शकानामयस्कान्तवदाकर्षकमस्ति ।

३. एवं मङ्गलपद्ये 'चरीकर्त्ति बरीभर्त्ति सञ्जरीहर्ति लीलया' इत्यस्य व्याख्यानावसरे - 'वस्तुतस्तु चिन्त्यमिदम् । भाषायां यङ्लुकः सार्वत्रिकत्वस्य भाष्याद्यनिष्टत्वादित्यग्रे वक्ष्यामः' इति कौस्तुभमतपरामर्शः ।

४. असकृत् कौस्तुभखण्डनार्थं प्रवृत्तस्य रत्नप्रकाशकारस्य शिवरामेन्द्रसरस्वतीयोगिन, तथा, प्रवर्त्तकोपाध्यस्य, महाभाष्यसिद्धान्तरत्नाकरकर्तुः नारायणस्य मतं तत्र तत्र परीक्षितम् । पृष्टभागप्रदानपूर्वकं स्पष्टीकृतमिदं तत्रैव अधिष्टिप्पण्याम् ।

## ०.७.३ परमताशयविवरणम्

शब्दकौस्तुभे तत्र तत्र नैयायिकानां - मीमांसकानां - वेदान्तिनां च मतस्यानुवादः प्रक्रान्तः। तदाशयस्तु 'अयं भाव' इत्यादिना छात्रोपयोगितया सम्यक् निरूपणमप्यपरं वैशिष्ट्यमस्या तद्यथा-

शब्दकौस्तुभे प्रयोजनप्रपञ्चे - ''एतेन 'पचति' इत्यादौ आदेशैः स्मर्यमाणा लडादयो बोधका इति वदन्तः परास्त'' इति नैयायिकमतपरीक्षा कृता । अत्र नैयायिकानामाशयः प्रभायां सुष्ठु निरूपितः – ''अयं हि तेषां भावः । तिबादयो न बोधकास्तेषां बहुत्वेन शक्त्यानन्त्यापत्तेः । एधाश्चक्रे इत्यादावादेशभूतलुगादेरभावरूपस्य बोधकत्वासम्भवाच्च । आदेशानां भिन्नतया मिथो व्यभिचाराच्च । लःकर्मणीत्याद्यनुशासनाननुगमाच्च । न ह्यादेशेषु अर्थबोधकमन्यदनुशासनमुपलभामहे। किन्तु तैः स्मृता लादयस्तथा लत्वस्य जातिरूपतया शक्ततावच्छेदकत्वौचित्यात् । अव्यभिचाराच्च । न च भूल इत्यतोऽपि बोधः स्यादिति वाच्यम् । बोधे भवतीति समभिव्याहारस्य कारणताया भूति वेत्यतो बोधापत्तिवारणाय तवाप्यावश्यकत्वेनादोषात्'' इति ।

## ०.७.४ प्रामाणिकत्वस्फोरकमतिनिपुणं प्रमाणप्रदर्शनम्

इदमप्यपरं वैशिष्ट्यं प्रभायाः स्वोक्तार्थे सिद्धान्तभूते अतिनिपुणतया प्रामाणिकभाष्याद्याकारग्रन्थप्रदर्शनम् । तदत्र द्वित्राः प्रदर्श्यन्ते ।

१. ओमाङोश्च इति सूत्रे आङ्ग्रहणस्य 'अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीय' इत्यर्थज्ञापकत्वे 'धातूपसर्गकार्यान्तरङ्गताज्ञापकत्वे च 'सम्प्रसारणाच्च' (६-१-१०८) इति सूत्रभाष्यं प्रमाणमिति 'न धातुलोप' सूत्रे प्रतिपादनम् ।

२. 'सार्वधातुकादेशे अनुबन्धा न स्थानिवद्भवन्ति' इति विषये 'हलःश्नः' इति सूत्रभाष्यं प्रमाणमिति 'क्ङितिच' इति सूत्रे निरूपणम् ।

३. 'अङ्गवृत्ते पुनर्वृत्ताववििधिः' इति परिभाषायां 'ज्ञाजनोजः' (७-३-७९) इति सूत्रभाष्यं प्रमाणतया 'क्ङिति च ' इति सूत्रव्याख्याने निरूपणम् ।

४. 'स्वरप्रवृत्तेः पूर्वमन्तरङ्गस्याप्येकादेशस्याप्रवृत्तिः' इति 'यद्धितुपरं छन्दसि' सूत्रभाष्यदिशा निरूपणम् ।।

## ०.७.५ शब्दकौस्तुभप्रभायाः तथा वैद्यनाथकृतेतरग्रन्थानां पूर्वापरीभावः

पूर्वं वर्णितदिशा पायगुण्डवैद्यनाथेनानेके ग्रन्था विरचिताः विराजन्ते । प्राचीनकालादारभ्य इयमप्यस्ति पद्धतिः यत्स्वविरचितग्रन्थान्तराणां ग्रन्थान्तरे उल्लेखरूपा - एवमन्यत्र संक्षेपेण कथितस्य ग्रन्थान्तरे विस्तृततरूपेणकथनमित्यादि । प्रकृतप्रभाव्याख्यायमपि स्वेनैव रचितानामनेकेषां ग्रन्थानां नामनिर्देशपूर्वकमुल्लेखः अस्ति । यद्यपि प्रभायां स्वविरचितग्रन्थान्तरोल्लेखे सति प्रभायाः अर्वाचीनता, ग्रन्थान्तराणां प्राचीनता इति स्पष्टमिति ज्ञायते, तथापि प्रभायामुल्लिखितग्रन्थान्तरेष्वपि प्रभाया उल्लेखोऽस्ति । अतः कः पूर्वः कः पर इति संशयो भवति, तदर्थमियं विचारणा आरभ्यते । अत्र प्रभाव्याख्यायां स्वविरचिताः - छाया, चिदस्थिमाला, गदा, पाषण्डखण्डनं, रप्रत्याहारखण्डनं, भावप्रकाशः एते ग्रन्थाः उल्लिखिताः ।

### ०.७.५.१ शब्दकौस्तुभप्रभा तथा भाष्यप्रदीपोद्योतच्छाया

शब्दकौस्तुभप्रभायां पञ्चविंशतिवारं छायायाः उल्लेखो विद्यते । छायायां तु पस्पशाह्निके एकत्रैव प्रभायाः उल्लेखः विद्यते । अतः प्रकृते संशयः कः पूर्वः कः परः इति

### ०.७.५.२ शब्दकौस्तुभप्रभा तथा चिदस्थिमाला

प्रभायां शेखरव्याख्यायाः चिदस्थिमालायाः द्वित्रिस्थलेषु उल्लेखो विद्यते । चिदस्थिमालायामपि संयोगसंज्ञासूत्रे अनुनासिकसंज्ञाकूत्रे च प्रभाया उल्लेखो अस्ति । अतः प्रकृतेऽपि कः पूर्वः कः पर इति निर्णेतुं दुःशकम् ।

### ०.७.५.३ शब्दकौस्तुभप्रभा तथा परिभाषेन्दुशेखरगदा

शब्दकौस्तुभप्रभायां चतुर्थाह्निके गदायाः द्विवारमुल्लेखोऽस्ति । गदायां तु प्रभाया उल्लेखो न दृष्टचर इति प्रभापेक्षया गदायाः प्राचीनत्वं निश्चेतुं शक्यते ।

### ०.७.५.४ शब्दकौस्तुभप्रभा तथा भावप्रकाश-पाषण्डखण्डन - रप्रत्याहारखण्डनानि

प्रभायां शब्दरत्नभावप्रकाशस्य षोडशवारमुल्लेखः अस्ति । एवं रप्रत्याहारखण्डनस्य प्रभायां चतुर्वारमुल्लेखः, पाषण्डखण्डनस्य एकधा उल्लेखः विद्यते । भावप्रकाशेऽपि तत्र तत्र प्रभायाः उल्लेखः अस्ति । किञ्च भावप्रकाशे शेखवव्याख्याया गदायाः चिदस्थिमालायाः, तथा छायायाः रप्रत्याहारखण्डनस्य चोल्लेखः अस्ति । एतासु व्याख्यास्वपि भावप्रकाशस्योल्लेखो अस्ति । तस्मात् कथमत्र निर्णय इति चेत् -

इत्थमत्र भाति । प्रभाकर्त्रा वैद्यनाथेन प्रथमं सर्वे ग्रन्थाः विरचिताः । अनन्तरं परिशेधनकाले संक्षेप-विस्तारानुगुणं तत्तन्नाम तत्र तत्र ग्रन्थे निवेशितवानिति ।

## ०.७.६ प्रतीकग्रहणम्

अत्र व्याख्यायां प्रतीकग्रहणावसरे 'प्राथमिकेति' इति ग्रहणे कर्तव्ये 'प्राथेति' इत्यादि रूपेण प्रतीकग्रहणं सर्वासु मातृकासु विद्यते । एवं पटविभाजकोपाधिकेत्यस्य 'पटविभाजकोपेति' इत्यादिरूपेण । एवं प्रतीकग्रहणं वैयाकरणग्रन्थेषु प्रदीपादिव्याख्याभूतेषु तथा शेखरादिव्याख्यासु च दृष्टम् । एवं प्रतीकग्रहणे मानं तु पाणिनिसूत्रम् । पाणिनिना हि 'प्राग्रीश्वरान्निपाता' (पा०सू० १-४-५६) इति सूत्रे 'अधिरीश्वरे' (पा०सू० १-४-९७) इति सूत्रस्थरीश्वरशब्दमभिन्नव्याप्य निपाता इत्यधिक्रियते इत्युक्तम् । तत्र प्रागीश्वरादिति वक्तव्ये रीश्वरेति ग्रहणमेव ज्ञापकमीदृशप्रतीकग्रहणे । न हि रीश्वरेति शब्दः दृष्टः । तथापि तद्ग्रहणेन तावत्सूत्रावधिक अधिकार इति सिद्ध्यति । एवमेमोद्दिष्टपमस्य सूचनार्थं एवरीत्या प्रतीकग्रहणमिति न कोऽपि दोषः ।

## ०.७.७ अपूर्वग्रन्थोल्लेखः

इदमप्यपरं वैशिष्ट्यमस्या व्याख्याया यदेतावत्पर्यन्तं अश्रुतपूर्वा अनेका अप्रकटिता ग्रन्था उल्लिखिताः । यथा –

१. ऐकश्रुत्यवाद इति नागेशभट्टविरचितः ।

२. पाषण्डखण्डनं इति स्वेनैव रचिता पिष्टपशुमीमांसासमर्थनपरा ।

३. कौस्तुभपूरणं इति नागेशविरचितः ।

## ०.७.८ पाठान्तरोल्लेखः

शब्दकौस्तुभप्रभायां यद्यपि अनेकानि पाठान्तराणि प्रदत्तानि । क्वचिच्च 'सोऽयमपपाठ' इत्यादिना प्रदर्शितानि च । तथापि मया सम्पादनार्थं स्वीकृते शब्दकौस्तुभमुद्रितपुस्तके प्रभासम्मत एव पाठः प्रायः निविष्ट इति तदत्र पृथग् नोल्लिखितम् । परन्तु प्रत्याहाराह्निके अयोगवाहानां शर्षु पाठविवरणावसरे मुद्रितपुस्तकेऽनुपलब्धानि कानिचन प्रतीकानि गृहीत्वा व्याख्यातम् । अत्र मूलमन्वेषणीयमस्ति ।

## ०.७.९ विशिष्टव्याख्यानोदाहरणानि

‘अथ शब्दानुशासनम्’ इत्यस्य विषयपरव्याख्यानम्

उपसर्गद्योतकत्व-वाचकत्वविचारः

द्योतकत्वपरिष्करणम्

नागेशसम्मताथशब्दवाचकत्वसमर्थनम्

लकाराणां कर्तरि कर्मणि च शक्तिसाधनम्

जञ्भ्यमानाधिकरणे मीमांसकोक्तमतनिराकरणम्

अष्टविधस्फोटस्वरूपनिरूपणम्

ऊहप्रयोजनावसरे कैयटमतनिरासः

साधुत्वनिर्वचनम्

हयवरट्सूत्रे हकारस्य द्विरुपदेशे फलम्

अयोगवाहेषु अनुस्वारांशे भाष्याद्यनुक्तं फलम्

वृद्धिरादैच् सूत्रे कुत्वाभावसमर्थनम्

इको गुणवृद्धी इत्यस्य तच्छेषत्वसमर्थनम्

‘न धातुलोप’ सूत्रे नाजानन्तर्यपरिभाषाविचारः

‘नाजानन्तर्य’ परिभाषायाः सीरदेवाद्युक्तार्थनिरासः

‘दीधीवेवीटाम्’ सूत्रे सीरदेवाद्युक्तार्थनिरासः

‘तुल्यस्यसूत्रे’ स्थानप्रयत्नविवेके विशिष्टं व्याख्यानम्

‘ईदूतौ च सप्तम्यर्थे’ इति सूत्रे अर्थग्रहणप्रयोजनम्

‘सर्वादिसूत्रे’ तद्गुणसंविज्ञानबहुव्रीहिशब्दार्थः

उभयशब्दविचारः

‘स्वमज्ञातिधनाख्यायाम्’ इति सूत्रे प्रकाशकारमतनिरासः

## ०.८. उपसंहारः

यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम् ।
तौ पुण्यौ पुण्यकर्माणौ पङ्क्तिपावनपावनौ ।।

इति मनुस्मृत्युक्तदिशा, तथा

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत् ।।

इति सुभाषितकारवचनेन च व्याकरणमवश्यमभ्यसनीयं सर्वैः । तत्रापि भारतीये भूभागे जन्म लब्ध्वा साङ्गं वेदाध्ययनं वेदाध्यापनं न क्रियते चेत् तस्य जन्मैव व्यर्थम् । अतः वेदाध्ययनार्थमङ्गानि आवश्यकानि । तत्रापि मुखस्थानीयत्वेन व्याकरणस्य प्राधान्यात् अवश्यमध्येयं व्याकरणम् । अत एवास्मत्प्राचीना व्याकरणाध्ययनस्येतरापेक्षया महत्वमप्रकटयन् ।

## ०.९ व्याकरणज्ञानाय अवश्यमाचरणीया अंशाः

मया व्याकरणशास्त्रसम्बन्धिनोऽस्य ग्रन्थस्य सम्पादनाय पौनःपुण्येन व्याकरणग्रन्था अधीताः । तदा एते अंशा व्याकरणज्ञानाय अवश्यमाचरणीया इति भातम् ।

* अष्टाध्यायी कण्ठस्थीकरणीया ।
* न्यूनातिन्यूनं सम्पूर्णा सिद्धान्तकौमुदी पठनीया ।
* एतदर्थं समर्थं ज्ञानिनं गुरुं समाश्रयेत
* कौमुदीपठनात् पूर्वं कानिचन महाकाव्यानि अभ्यसनीयनि
* एतदनुकूलाः संस्काराः बाल्यादेव प्ररोहणीयाः ।

## ०.१० अन्तिमनिवेदना

अन्ते इदं व्याहर्तुमभिलषामि, व्याकरणशास्त्रसम्बन्धिनः श्रीभट्टोजिदीक्षितरचितग्रन्थस्य व्याख्यायाः यत्सम्पादनावकाशः लब्धः स व्याकरणशास्त्रे मम इतोऽप्यतिशयज्ञानार्थं प्राप्तः सुवर्णावकाशः, एषोऽपि मद्गुरुवर्याणां अनुग्रहविशेषप्रापकः । विद्वद्विद्यार्थिसमुदाये श्रीभट्टोजिदीक्षितानां स्थानं सुमहत्, तेषामुपकारः न केनापि विस्मर्तुं शक्यते । तेषां शिष्यकोटिप्रविष्टस्य **वैद्यनाथ पायगुण्डेमहोदयस्य** अभूतपूर्वं व्याख्यानं सम्पादितमिति महतः प्रमोदस्य कारणम् । अत्र कर्मणि यथाशक्ति प्रयत्नो विहितः । इति शम् ।।

# संक्षिप्तनामसूची

| | |
|---|---|
| अ.को. | अमरकोशः |
| ऋ.प्र. | ऋग्वेदप्रातिशाख्यम् |
| का.वृ.प. | काशिकावृत्तिपदमञ्जरी |
| का.वृ.न्या. | काशिकावृत्तिन्यासः |
| का.प्र | काव्यप्रकाशः |
| जै.सू. | जैमिनिसूत्राणि |
| तत्रा.वा | तन्त्रवार्तिकम् |
| तै.सं. | तैत्तिरीयसंहिता |
| राणकः | तन्त्रवार्तिकन्यायसुधा |
| पा.सू. | पाणिनिसूत्राणि |
| पा.शिक्षा. | पाणिनिशिक्षा |
| परि.शे. | परिभाषेन्दुशेखरः |
| परि.शे.ग. | परिभाषेन्दुशेखरगदा |
| पू.मी.शा.भा. | पूर्वमीमांसाशाबरभाष्यम् |
| प्रौ.म. | प्रौढमनोरमा |
| प्रौ.म.श. | प्रौढमनोरमाशब्दरत्नं |
| प्रौ.म.श.भा. | प्रौढमनोरमाशब्दरत्नभावप्रकाशः |
| प्र.कौ.प्र. | प्रक्रियाकौमुदीप्रकाशः |
| बृ.वै.भू. | बृहद्वैयाकरणभूषणम् |
| बृ.परि. | बृहत्परिभाषावृत्तिः |
| ब्र.सू.शा.भा. | ब्रह्मसूत्रशाङ्करभाष्यम् |
| भाग. | भागवतम् |
| म.भा. | महाभाष्यम् |

| | |
|---|---|
| म.भा.प्र. | महाभाष्यप्रदीपः |
| म.भा.प्र.उ. | महाभाष्यप्रदीपोद्योतः |
| छाया | महाभाष्यप्रदीपोद्योतछाया |
| म.भा.प्र.प्रका. | महाभाष्यप्रदीपप्रकाशः |
| म.भा.प्र.वि. | महाभाष्यप्रदीपविवरणम् |
| र.प्र. | महाभाष्यरत्नप्रकाशः |
| यजु.भा. | यजुर्वेदभाष्यम्(सायणकृतम्) |
| या.स्मृ. | याज्ञवल्क्यस्मृतिः |
| रप्र.ख. | रप्रत्याहारखण्डनम् |
| ल.परि. | लघुपरिभाषावृत्तिः |
| ल.म. | लघुमञ्जूषा |
| ल.म.क. | लघुमञ्जूषाकला |
| ल.शे. | लघुशब्देन्दुशेखरः |
| ल.शे.चि. | लघुशब्देन्दुशेखरचिदस्थिमाला |
| वा.प. | वाक्यपदीयम् |
| वा.प.हे. | वाक्यपदीयहेलाराजीयम् |
| वा.रा. | वाल्मीकिरामायणम् |
| वै.सि.कौ. | वैयाकरणसिद्धान्तकौमुदी |
| श.ब्रा. | शतपथब्राह्मणम् |
| श.कौ. | शब्दकौस्तुभः |
| शा.भा. | शाङ्करभाष्यभामती |
| श्लो.वा. | श्लोकवार्तिकम् |
| सू.रत्न. | सूक्तिरत्नाकरः |
| सं.व्या.शा.इ. | संस्कृतव्याकरणशास्त्र का इतिहास |
| IOL | India Office Library |

॥ श्रीः ॥

भट्टोजिदीक्षितविरचितः

# शब्दकौस्तुभः

॥ श्रीगणेशाय नमः ॥

**विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत् ।**
**चरीकर्त्ति बरीभर्त्ति संजरीहर्ति लीलया ॥ १ ॥**

---

॥ श्री ॥

॥ वैद्यनाथपायगुण्डविरचिता शब्दकौस्तुभव्याख्या प्रभा ॥

॥ श्रीगणेशाय नमः ॥[1]

## १. प्रथममाह्निकम्

### १.१ मङ्गलाचरणव्याख्या

**आनन्दकन्दं मुनिहृन्मिलिन्दं[2] स्वच्छन्दगोविन्दपदारविन्दम् ।**
**वन्दे [3]सुरेन्द्रादिमुदादिदं तद् दीनादिशंदं रविनन्दनन्दम् ॥ १ ॥**

**वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुम् ।**
**व्याख्यां प्रभाख्यां तनुते कौस्तुभस्य स्वबुद्धये ॥ २ ॥**

प्रारिप्सितग्रन्थनिर्विघ्नपरिसमाप्त्यर्थं कृतं भगवदादिनत्यात्मकं मङ्गलं शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति॥ **विश्वेशमित्यादिना ।** तत्रादौ व्यापकत्वेन स्वेष्टदेवतात्वेन च भगवतस्तदाह **। विश्वेशमिति ।** सर्वनियन्तृत्वात् विश्वेशत्वम् । सच्चिच्छब्दौ तदाश्रयपरौ । आनन्दो यस्यास्तीति व्युत्पत्त्याऽर्श आद्यजन्तेन नपुंसकेन आनन्दमित्यनेन

---

१. शिवाय नमः साम्बाय नमः श्रीगुरुभ्यो नमः इति क ख ग पाठः । घपाठे श्रीलक्ष्मीहयग्रीवाय नमः । इति अधिकम्

२. मिळिन्दमिति घपाठः

३. सुरेशादि इति घपाठः

ब्रह्मोच्यते । तस्य चिता सह कर्मधारयं कृत्त्वा पुनः समासः । यद्वा तौ धर्मपरौ । तादृशेन पुल्लिङ्गेनैव तेन सः । अखिलं न त्वेकदेशभूतं जगत् न तु किञ्चित् । अनेन सर्वोपादानत्वं ध्वनितम् । **चरीकर्तीत्यादि ।** कृञ उत्पत्त्यर्थकत्वाद्यङो भृशाद्यर्थकत्वाद्भृशमुत्पादयतीत्याद्यर्थः[१] । भृञः पोषणार्थत्वात् भृशं पालयतीत्याद्यर्थः । हृञो हरणार्थकत्वेऽप्यत्रोपसर्गसमभिव्याहारेण प्राणवियोगानुकूलव्यापारार्थकत्वेन भृशं नाशयतीत्याद्यर्थः । ननु वदिधात्वर्थं प्रति यच्छब्दार्थस्य कर्मत्वात् विश्वेशमित्यादिवत् द्वितीया स्यादिति चेन्न तमित्यध्याहारेण वाक्यस्य भिन्नत्वेन्नादोषात् । यत्तु तस्य न कर्मत्वं प्रतिपाद्यम्, किन्तु विशिष्टवाक्यार्थक्य । स चात्र न कर्तृविशिष्टक्रियारूपः । तस्य तत्वासम्भवात् । किन्तु आख्यातं तद्धितकृतोरिति न्यायेन विपरीतः । तस्य कर्मत्वेऽपि तत्प्रतिपादकस्य विशिष्टस्याप्रातिपदिकत्वान्न द्वितीया, श्रुत्वा [२]ममैतदित्यादिवदित्याह । तन्न । नीलं घटमित्यादौ विशिष्टस्य कर्मत्वे त्वदुक्तरीत्योभयत्र द्वितीयानापत्तेः । कटं भीष्ममित्यादौ तत्वेऽपि उभयत्र तत्स्वीकारपरभाष्यविरोधापत्तेश्च । अत एव तिङन्तस्थले क्रियाविशेष्यकबोधाङ्गीकारादेव 'पश्य मृग' इत्यादाविष्टसिद्धिः । कर्तृकर्मेतरकारकाविषयत्वेनासत्वभूतत्वं क्रियायाः । अतो नासत्वभूतत्वहानिः । श्रुत्वेत्यादि तु आर्षमिति दिक् । निरूपितं **चैतद्गुरुचरणैरन्यत्र[३] ।** सदादिभिन्नस्योत्पादनाद्यसम्भवात्तद्रूपं शक्तित्रययुतं[४] अनन्तरूपं भगवन्तं नमामीत्यखण्डार्थः । लीलयेत्यनेन क्लेशाभावसूचनद्वारा सर्वोत्कृष्टत्वं सर्वमिदं [५]लीलामात्रमिति च सूचितम् । भाषायामपि यङ्लुगस्तीति **माधवा**दिमतेनैतत्प्रयोगकथनम् । वस्तुतश्चिन्त्यमिदम् । भाषायां यङ्लुकः सार्वत्रिकत्वस्य भाष्याद्यनिष्टत्वादित्यग्रे वक्ष्यामः । स्पष्टं चेदं **गुरुचरणग्रन्थे[६] ।। १ ।।**

---

१. त्यादिरर्थः इति घपाठः

२. ममैव तदिति क ख ग पाठः । वस्तुतस्तु 'श्रुत्वा ममैतदिति' घपाठः साधुः । 'श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभा' इति मञ्जूषायां तथैव दर्शनात् । (चौ.सं.सी.आ. द्वितीयभागः पृ.सं. ७९८)

३. अन्यत्रेति । मञ्जूषायां तिङर्थनिरूपणे (पृ.सं. ७९८)

४. शक्तित्रययुक्तं इति घपाठः

५. लीलामिश्रं इति घपाठः

६. गुरुचरणग्रन्थ इति । हुश्नुवोः सार्वधातुके (६-४-८७) इति सूत्रभाष्ये उद्योते इत्यर्थः । म.भा. । (चौ.सं.प्र.पञ्चमो भागः.पृ.सं. ३३४)। तत्र हि भाष्ये 'यान्ति' 'सुवन्ति' 'अयुवन्' 'ऊर्णुवन्ति' इत्येषामसंयोगपूर्वोवर्णस्याजादौ सार्वधातुके इत्यर्थेनानेकाज्ग्रहणेनाटोऽसिद्धत्वेन च सिद्धो यङ्लुगर्थं हुश्नुग्रहणम्'' इत्युक्त्वा 'योयुवन्तीनां वृषभम्' 'रोरुवतीनां वृषभम्' इत्यत्र 'छन्दस्युभयथा' (३-४-११७) इत्यनेनार्धधातुकत्वात्सिद्धमित्युक्त्वा एवं तर्हि सिद्धे सति यद्धुश्नुग्रहणं करोति

**नमस्कुर्वे जगद्वन्द्यं पाणिन्यादिमुनित्रयम् ।**
**श्रीभर्तृहरिमुख्यांश्च सिद्धान्तस्थापकान्बुधान् ॥ २ ॥**

**नत्वा लक्ष्मीधरं तातं सुमनोवृन्दवन्दितम् ।**
**फणिभाषितभाष्याब्धेः शब्दकौस्तुभमुद्धरे ॥ ३ ॥**

---

व्यापकनमस्कारोत्तरं तद्व्याप्यान् समुचितानेतच्छास्त्रप्रवर्तकान् नमस्कारोति । **नमस्कुर्वे इति** । पाणिन्यादी[१]त्यत्र बहुव्रीहिपूर्वपदकषष्ठीतत्पुरुषोत्तरपदककर्मधारयः बहुव्रीहिपूर्वपदककर्मधारय-पूर्वपदकषष्ठीतत्पुरुषो वा । ततोऽपि[२] व्याप्यान् तादृशान्नमस्करोति । **श्रीभर्तृहरीति ।** अत्र मध्यमपदलोपिसमासपूर्वपदकबहुव्रीहिः । नमस्कुर्वे इत्यस्य चेनानुकर्षः । मुख्यत्वमेवाह । **सिद्धान्तेति ।** तत्कृतार्थनिर्णयेनैवेतरेषां तन्निश्चयादिति भावः । बुधान् पण्डितान् ।। २ ।।

पितृप्रसिद्धये तत्सेवनेनैवेष्टप्राप्तिरिति श्रुत्याद्युक्तत्वेन स्वस्मिन् तत्वसूचनाय च ततोऽपि व्याप्यं पितरं नमस्करोति । **नत्वेति ।** लक्ष्मीधरनामकं पितरं[३] सुमनसां पण्डितानां वृन्दं समूहस्तत्र तेन वा वन्दितम् । तत्र लक्ष्मीकान्तरूपत्वसूचनाय कृतश्लिष्टपदमाहात्म्यसूचितविष्णुपक्षेऽर्थः स्पष्टः । सुमनसो देवाः । तातं जगत्पितरं । मायेश्वरकार्यत्वाज्जगत इति विशेषः । अनुवृत्तेन नमस्कुर्वे इत्यनेनैव नमस्कारप्रतीतौ पुनः त्त्वान्तस्य 'समानकर्तृके'ति तद्विधानान्नतः परिपूर्णग्रन्थोद्धारा-त्पूर्वत्वबोधनान्मङ्गलस्य कार्याव्यवहितपूर्वक्षणवृत्तित्वरूपकारणत्वबोधनायोपादानम् । अत एवाभिधेयं प्रतिजानीते । **फणीति ।** शारीरिकभाष्यादिव्यावृत्त्यर्थं फणीति । चरकादिव्यावृत्त्यर्थं भाष्येति । तृतीयासमासपूर्वककर्मधारयपूर्वक उपमित्यनेन समासो बोध्यः उपमालङ्कारश्च । यद्वा तादृशो मयूरेति समासः रूपकं च । **शब्दकौस्तुभमिति ।** तदाख्यमित्यर्थः । अत्रापि भाष्याब्धिवत् समासो बोध्यः । शब्दशब्दो योगेन तत्प्रतिपादकग्रन्थपरः ।। ३ ।।

---

तज्ज्ञापयत्याचार्यो भाषायामपि यङ्लुग्भवतीत्युक्तम् । ततो 'बेभिदीति' 'चेच्छिदीति' इत्येतत्सिद्धं भवतीत्युक्तम् । एवंविधप्रयोगद्वयस्यैवोपादानान्न सर्वत्र भाषायां भवतीति कल्प्यत इति नागेशाशयः । प्रयोगद्वयोदाहरणमुपलक्षणमिति दीक्षिताशयः ।

१. पाणिन्यादि अत्र इति क ख ग पाठः ।

२. तेभ्योऽपि इति घ पा० .

३. लक्ष्मीधरनामपितरं इति क पा० ।

**परिभाव्य बहून् ग्रन्थान्योऽर्थः क्लेशेन लभ्यते ।**
**तमशेषमनायासादितो गृह्णीत सज्जनाः ॥ ४ ॥**

**समर्प्य लक्ष्मीरमणे भक्त्या श्रीशब्दकौस्तुभम् ।**
**भट्टोजिभट्टो जनुषः साफल्यं लब्धुमीहते ॥ ५ ॥**

---

ननु कैयटादिप्राचीनग्रन्थाध्ययनेनैवार्थप्रतिपत्तौ किमनेनेत्यत आह । **परिभाव्येति ।** हे सज्जना अनेन तेषामेवात्राधिकारो नान्येषामिति सूचितम् । यूयं बहून् ग्रन्थान् कैयटादिग्रन्थान् परिभाव्य विचार्य योऽर्थः भाष्यादिग्रन्थात् क्लेशेन बह्वायासेन लभ्यते तं सम्पूर्णमनायासात् अक्लेशात् इतः बुद्धिस्थात् शब्दकौस्तुभात् गृह्णीतेत्यर्थः । यद्वा ननु न्यासादिप्राचीनग्रन्थाध्ययनेनैव तत्सिद्धौ किमनेनेत्यत आह । **परिभाव्येति ।** न्यासादिग्रन्थान् तिरस्कृत्येत्यर्थः । तेषां भाष्यादिविरोधेन निर्युक्तिकत्वेन चाश्रद्धेयत्वमिति भावः । इदं चात्र पक्षे पूर्वं क्रिययाऽन्वेति । ननु परिभावस्तिरस्क्रियेति कोशादेतदर्थसम्भवेऽपि विचारार्थकत्वे मानाभावेन प्रागुक्तार्थासम्भव इति चेन्न धातूनामनेकार्थकत्वात्तदर्थकत्वेऽपि बाधकाभावात् । अत एव 'परौ भुवोऽवज्ञाने' इति सङ्गच्छते । ननु तद्ग्रन्थतिरस्कारे तत्प्रतिपाद्यतदविरुद्धार्थाप्रतिपत्तिप्रसङ्ग इत्यत आह । **योऽर्थ इति ।** तेभ्यो न्यासादिग्रन्थेभ्यो योऽर्थो बह्वायासेन लभ्यते, तद्ग्रन्थप्रतिपाद्यं तं तादृशं सम्पूर्णमित्यर्थः ॥ ४ ॥

मणिसादृश्यं ग्रन्थे प्रतिपादयन् यत्करोषीत्यादिभगवदुक्तेर्मणिसमं स्वकीयग्रन्थं भगवति चार्पयन् स्वादिकीर्त्यनुवृत्तये शिष्याणां ग्रन्थे प्रामाणिकताबोधाय च स्वस्य ग्रन्थस्य च नामनी निबध्नाति । **समर्प्येति । श्रीशब्देति ।** मणिपक्षे लक्ष्मीयुक्तं शब्दतुल्यं कर्मव्युत्पत्त्या शब्दायमानं वा कौस्तुभमिति, श्रीश्च तत्तुल्यादिकौस्तुभश्च अनयोः समाहारस्तदिति वाऽर्थः । उदधेर्द्वयोरपि निसृतत्वेन द्वावपि तत्र समर्पिताविति भावः । ग्रन्थपक्षे श्रीवच्छब्दकौस्तुभमिति श्रीरूपं शब्दकौस्तुभमिति वाऽर्थः । सकलार्थप्रतिपादकत्वेनानन्ददातृत्वेन वोभयोः सादृश्यमभेदो वेति बोध्यम् । भट्टोज्याख्यो भट्टः शास्त्रचतुष्टयवेत्ता जन्मनः सफलतां प्राप्तुं ईहते इच्छतीत्यर्थः । धातूनामनेकार्थकत्वादिति दिक् ॥ ५ ॥

## १.२ विषयनिरूपणम्

ननु न हि प्रयोजनाद्यनुद्दिश्य मन्दोऽपि प्रवर्तत इति न्यायात् प्रवृत्तिमात्रे इष्टसाधनताज्ञानादेः कारणत्वाच्च विषयादेरवश्यं वक्तव्यत्वमादौ । प्रकृते तु सूत्रकृता तदनुक्तत्वात् पुरुषाणामप्रवृत्तिः

**प्रेक्षावत्प्रवृत्तये व्याकरणस्य विषयं भगवान् भाष्यकारः प्रादर्शयत् ''अथ**

---

स्यादत आह । **प्रेक्षावदिति ।** मनःप्रणिधानपूर्वकपदपदार्थादिविषयकसूक्ष्मेक्षणं प्रेक्षा तद्वतां पुरुषाणां प्रवृत्त्यर्थमित्यर्थः । ननु वृद्धिरादैजित्यत आदावेवोच्यतामत आह । **व्याकरणेति ।** न चैवमपि व्याकरणत्वस्यापि पाणिनीयमात्रनिष्ठत्वस्य 'वृत्तिसमवायार्थो वर्णानामुपदेशः' इति भाष्यात्[1] 'येनाक्षरेति' शिक्षोक्तेश्च लाभेनाक्षरसमाम्नायस्य तद्वाच्यत्वेन शङ्का तदवस्थैवेति वाच्यम् । अत्र तेन तन्मूलभूतवर्णसमाम्नायस्यापि ग्रहणात् । अन्यथा न्यूनतापत्तेरिष्टसिद्ध्यनापत्तेरुपदेशवैयर्थ्यापत्तेस्त- त्राप्रवृत्त्यापत्तितादवस्थ्यापाताच्च । तथा चोपोद्घाततया समस्तशास्त्रारम्भकथनयोग्यतयाऽत्राभिधानं युक्तमिति भावः । **विषयमिति ।** शास्त्रजन्यज्ञानविषयस्यैव शास्त्रविषयत्वेन लौकिकवैदिकशब्द- रूपविषयमित्यर्थः । शब्दज्ञानार्थकप्रयोजनमित्यस्यापि वक्तुमुचितत्वेऽपि सर्वत्र प्रथमोपात्ते विषये कथिते तस्याप्युक्तप्रायत्वं तत्रोक्तत्वादिति तत् पृथङ् नोक्तम् । अतस्तादृशाधिकारिणां प्रवृत्तिरत्र सुलभेति भावः । यद्यपि प्रयोजनमित्युक्तावुक्तरीत्या घटकतया च विषयस्याप्युक्तप्रायत्वं लभ्यते, तथापि प्रथमातिक्रमे कारणाभाव इति न्यायेन तस्यैवादौ वक्तुमुचितत्वमिति एवमुक्तिः । एतेन प्रयोजनमाहेत्यु**पाध्यायोक्तिः** तद्व्याख्यातृ**स्वामिहरदत्तादीनामु**क्तिश्च चिन्त्येति ध्वनितम् । यद्यपि प्रागीश्वरादिति वक्तव्ये सरेफनिर्देशादत्र व्याकरणे तस्यानाश्रयणं तथापि अन्यत्र तस्याश्रयणमस्त्येवेति प्रकृते न दोषः । अत एव प्रयोजनमाहेत्युपाध्यायोक्तत्यागे बीजं चिन्त्यमिति निरस्तम् । यत्तु विषयाकथनेन न्यूनत्वात्प्रयोजनमाहेत्युपाध्यायोक्तिश्चिन्त्येति । तन्न । प्रकृते विषयं प्रादर्शयदित्युक्तावपि प्रयोजनानुक्त्या न्यूनतायास्तुल्यत्वात् । अन्यतरेणान्यतरप्रतिपत्तेरुभयत्र तुल्यत्वाच्चेति दिक् । एवञ्च विषयमित्यस्योपलक्षणतया प्रयोजनमपि बोध्यम् । तत्कथयिष्यति स्यादेतदित्यादिना प्रयोजनप्रपञ्च इत्यन्तेन ग्रन्थेन । तज्जिज्ञासुरधिकारी, प्रतिपाद्यप्रतिपादकभावः सम्बन्ध इति त्वर्थादेव लब्धम् । तद्वदिष्यति तदग्रिमेणेहेत्यादिग्रन्थेन । यद्यपि पाणिनिना 'ब्राह्मणेन निष्कारण' इत्यादिश्रुतेर्वेदाध्ययनवन्नित्यतया प्राप्ते व्याकरणाध्ययने सन्ध्योपासनादाविव प्रत्यवायपरिहारार्थितयैव उत्तमाधिकारिप्रवृत्तिसम्भवात् प्रयोजनं नोक्तम् । वार्तिककृता तु 'शास्त्रपूर्वके प्रयोगे धर्म' इत्यनेन मध्यमाधिकारिणः [2]परमप्रयोजनं दर्शितम् । एवं च नास्योपयोगः । तथापि भगवान् विवरणकारत्वान्मन्दाधिकारिणां प्रवृत्तेः प्ररोचकप्रयोजनप्रतिपत्तिप्रवणत्वा-

---

१. भाष्यादिति । पस्पशायां (म.भा.पृं.सं. ८० प्रथमभागः)

२. प्रथम इति घ पा० ।

**शब्दानुशासनम्'' इति । अथशब्दः प्रारम्भस्य द्योतको न तु वाचकः, निपातत्वात्,**

---

व्यवहितफलेषु स्वर्गापूर्वादिष्वविश्वासात् साक्षात्प्रयोजनं शब्दव्युत्पत्तिलक्षणं सूचयन् तादृशशब्दरूपविषयं कथयन् शास्त्रारम्भं प्रतिज्ञातवानित्यर्थः ।

## १.२.१ निपातानां द्योतकत्वनिरूपणम्

**अथ शब्दानुशासनमितीति ।** प्रदर्शनक्रियायामितिशब्देनाथशब्दानुशासनमिति वाक्यस्य करणत्वं बोध्यते । ननु वाक्यार्थबोधे पदार्थज्ञानस्य [१]कारणत्वादथशब्दार्थाज्ञाने तद्बोधाप्रसङ्गे विषयनिरूपणासम्भवः । किं च 'मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ' इति कोशात्किमर्थकत्वं तस्य । किञ्चोक्तकोशादिबलात्सिद्धाऽर्थवत्ताऽपि द्योत्यार्थेन वाच्यार्थेन वेत्यत आह **। अथशब्द इत्यादि ।** न चाधिकृतं शाब्दानुशासनमित्युक्तेरेवेष्टसिद्धौ किमनया कुसृष्ट्येति वाच्यम् । श्रुत्या मङ्गलार्थमथशब्दस्योपादानात् । स हि स्वरूपेणान्यार्थं नीयमानदध्यादिवन्मङ्गलं अर्थतस्त्वधिकारार्थतेत्युभयार्थत्वं । तस्य अर्थतो मङ्गलार्थत्वे[२] तु तदर्थता न स्यात् । सकृत्प्रयुक्तत्वादिति भावः । **प्रारम्भस्येति ।** योग्यतयाऽद्यक्षणावच्छिन्नक्रियाया इत्यर्थः । सा चार्थाद्व्याख्यायमानस्य अथ शब्दानुशासनमित्युक्तेरिति बोध्यम् । **द्योतक इति ।** अत्र द्योतकत्वमात्रं साध्यं न तु विशिष्टम् । तत्त्वस्यान्यथासिद्धेः । हेतोरतिप्रसक्त्याऽसङ्गतेश्च । अत एव प्रकृतयोग्यसम्बन्धिप्रदर्शनाय व्यस्तमुपात्तं तन्न तु समस्तमिति बोध्यम् । ननु द्योतकत्वं नाम स्वसमभिव्याहृतगतशक्त्युद्बोधकत्वम् । तच्चात्र वाचकपदाभावादनुपपन्नम् । द्योतकानां द्योत्यवाचकपदसमभिव्याहारनियमात् । शब्दानुशासनशब्दस्तु न तद्वाची । ततस्तथा तस्याप्रतीतेः । अर्थान्तरपरतया व्याख्यातत्वाच्च । न चानेकक्रियाविषयस्य शब्दानुशासनस्य प्रारम्भस्तद्द्योत्यः । अविनिगमकेन श्रवणमननादेरपि तत्वप्रसङ्गात् । अत एव तद्द्योतने एवास्य शक्तिर्न तद्वचने इति न । तस्मा**दौत्पत्तिकस्त्विति** न्यायेन[३] तद्वचनत्वमेव युक्तमिति चेन्न अनन्यलभ्य इति न्यायेन तत्त्वस्यायुक्तत्वात् । उक्तकोशबलादथशब्दसमभिव्याहारे शब्दानुशासनपदस्य तत्प्रस्तावे लक्षणायाः प्रादिसमभिव्याहारे ज्यादिधातोः प्रकृष्टजयादाविव स्वीकारात् । प्रादिवदेतस्यापि केवलस्याप्रयोगात् । तथा व्याख्यनस्य शक्यार्थपरत्वेनादोषाच्च । तथा च स्वसमभिव्याहृतगतवृत्त्युद्बोधकत्वं तत् न तु

---

१. करणत्वात् इति ग पा० ।

२. मङ्गलार्थे इति घ पा० ।

३. न्यायेनेति । औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः (जै.सू. १-१-५) इति न्यायः ।

प्रागुक्तम् । यद्वा प्रायेण तस्य लक्षणस्य सत्वात् क्वचिदन्यथापि स्वीकारात् । तद्यथा प्रादेशं विलिखतीत्यादौ वेर्विमानक्रियाक्षेपकत्वं, तत्प्रादेशं विमाय लिखतीत्यर्थावगमात् । एवं च प्रकृतेऽपि क्रियाविशेषाक्षेपकत्वमेव द्योतकत्वम् । तथा हि । शब्दानुशासनमित्येतावत्युक्ते वाक्यार्थसमाप्तये क्रियाध्याहार आवश्यकः । तत्र चाथशब्दाभावे किं उच्यते उत श्रूयते उत क्रियते उत प्रस्तूयते इत्याद्यनियतयोग्यक्रियाध्याहारप्रसक्तिः । तत्सत्वे तूक्तकोशबलात्तेन क्रियान्तरं व्यवच्छिद्य प्रारम्भरूपक्रियां संविवक्ष्य प्रारब्धमित्येषोऽर्थो निर्णीयते । तथा च द्योत्यबोधकपदसमभिव्याहाराभावे प्रकरणादिवत् तात्पर्यग्राहकत्वेनैवाथशब्दस्य द्योतकत्वम् । न तूपसन्धानेन प्रादेरिव द्योतकत्वम् । द्योत्यत्ववाच्यत्वयोर्विनिगमकमन्यलभ्यत्वाद्येव । एतेनैतस्य तत्वे प्रस्तूयत इति साध्यार्थपरत्वे नामपदानां सिद्धार्थपरत्वनियमभङ्गापत्तिः । सिद्धप्रस्तावार्थकत्वे शब्दानुशासनं प्रस्ताव इत्यनन्वयः । ततो लक्षणया साध्यपरत्वेऽतिक्लिष्टकल्पनागौरवमिति तथोपस्थिते तत्र तत्वमेवैतस्य युक्तमिति [1]**नारायणो**क्तमपास्तम् । प्रारब्धमित्यर्थकत्वेन दोषलेशाभावात् । अत एवाधिकृतमित्येतदर्थो भाष्ये उक्तः । अधिकारादिपदमपि तत्र तादृशकर्मप्रत्ययान्तं, दोषान्तरस्य वक्ष्यमाणत्वाच्च । अत एव तत्वं तत्रैव वक्ष्यमाणमिति बोध्यम् । स्पष्टश्चेदमत्रैव कैयटादौ । निरूपितं चैतद्गुरुचरणै**र्मञ्जूषायाम्**[2] । एतेन बोधकपदाभावादथशब्दस्य तद्द्योतकता अविनिगमकेन श्रवणादेरपि तत्त्वप्रसङ्गश्चेति प्राचोक्तं परास्तम् । शब्दानुशासनपदस्य तादृशस्य सत्वात् । कोशमूलकस्याथशब्दस्य विनिगमकत्वस्य सत्वाच्चेति दिक् । एवञ्चेत्थं अनुमानप्रयोगः । अथशब्दः पक्षः, द्योतक इति साध्यम्, निपातत्वादिति हेतुः, उपसर्गवदिति दृष्टान्त इति ।

## १.२.१.१ उपसर्गाणां द्योतकत्वनिरूपणम्

नन्वेवमपि द्योतकत्वे साध्येऽनुमित्यसम्भवः । व्याप्तिज्ञानरूपकारणाभावात् । अव्यभिचरित-साध्यसामानाधिकरण्यरूपव्याप्तेरनर्थकनिपातेषु निपातत्ववत्सु स्वसमभिव्याहृतस्यैव कस्यचिदभावेन तद्घटिततद्रूपद्योतकत्वाभावेन[3] व्यभिचारज्ञानरूपप्रतिबन्धकसत्वात्तदभावरूपकारणाभावाच्च गृही-तुमशक्यत्वादिति चेन्न वाचकत्वाभावस्य साध्यत्वात् । तदेतदभिप्रेत्याह **। न तु वाचक इति ।** तथा च न पूर्वोक्तानुमानप्रयोगः, किन्तु अथशब्दः वाचकत्वाभाववान् निपातत्वात् उपसर्गवत् इति

---

१. नारायणेति । 'सूक्तिरत्नाकर' इति महाभाष्यटीकाकर्ता शेषनारायणः । पृ.सं. ६ पस्पशयां (आनन्दाश्रमसंस्था) ।

२. मञ्जूषायामिति । निपातार्थनिरूपणे पृ.सं. ५८५ ।

३. तद्घटिततद्रूपद्योतकाभावेन घपा० ।

**उपसर्गवत्। न च तेऽपि वाचका एवेति वाच्यम्, 'उपास्यते गुरुः' 'अनुभूयते सुखम्' इत्यादौ धातोः सकर्मकक्रियापरत्वं विना कर्मणि लकारायोगेन वाचकत्वे स्थिते**

---

बोध्यम्। एवञ्च प्रकृते वाचकत्वाभावसिद्धौ द्योतकत्वमर्थसिद्धमिति भावः। वस्तुतस्तु 'अव्ययं विभक्ती'त्यादिसूत्रस्थभाष्यप्रामाण्यादुपसर्गातिरिक्तनिपातानां वाचकत्वमपीति प्रकृते अथशब्दो वाचक एव। अधिकृतमिति चैतदर्थः इति तत्वम्। स्फुटीकरिष्यामश्चेदमग्रे[1]। नन्वेवमपि उपसर्गवदिति दृष्टान्तासङ्गतिः, तत्र तस्यैवासिद्धेः। षडिन्द्रियाग्राह्यत्वात्प्रत्यक्षस्यामानत्वात्त-ज्जन्यधीविषयधर्मस्य तत्वेऽप्यस्यातथात्वात्। दृष्टान्ताभावादेवानुमानस्यापि। एतेनैवमपि चादिप्रत्येकस्य तत्वमित्यप्यपास्तम्। वाचकत्वस्य तु 'सिद्धे शब्दार्थसम्बन्धे'[2] 'सर्वे सर्वार्थवाचका' इत्यादिसिद्धत्वं, ततश्च व्याप्तेरग्रहादनुमित्यसङ्गतिरित्यभिप्रायवान् तटस्थः शङ्कते। **न च तेऽपीति।** दृष्टान्तभूता उपसर्गा अपीत्यर्थः। **वाच्यमिति।** कर्त्राख्याते दोषसत्वादिति शेषः। तथा हि। [3]शिवमनुभवतीत्यादौ प्रतीयमानोऽनुभवानुकूलव्यापारादिर्न धात्वर्थः। भवतीत्यादितोऽपि तद्बोधापत्तेः। नोऽपसर्गार्थः, तथा सत्यप्रकृत्यर्थतया तत्राख्यातार्थानन्वयापत्तेः। प्रत्ययानामिति व्युत्पत्तेः। अनुगच्छतीत्यादावपि ततस्तद्बोधापत्तेश्च। न विशिष्टार्थः गौरवात्। विशिष्टस्यानतिरिक्तत्वेनोभयो[4]रतिरिक्तत्वेन तस्य वाचकत्वकल्पनादिति। स्वयं दोषान्तरमाह। **उपास्यत इति।** एतेन प्रथमोपस्थितत्यागो निर्बीज इत्यपास्तम्। वाचकत्वे स्थिते इत्यस्य पूर्वेणैव धातोरित्यनेनान्वयः। सकर्मकेत्यादिहेतुरपि वाचकत्वे स्थितावेव। वाचकत्वं च विशिष्टार्थवाचकत्वं बोध्यम्। यद्वा उपसर्गाणामित्यस्य काकाक्षिन्यायेनोभयत्र सम्बन्धः। तथा चोपास्यते गुरुरित्यादौ उपसर्गाणां तदवाचकत्वे स्थिते धातोः सकर्मकत्वस्यैव युक्तत्वादित्यन्वयः। धातोः = आसादिधातोः। **सकर्मकक्रियेति।** कर्मधारयान्तैः सकर्मकत्वसमानाधिकरणक्रियापरत्वं विनेत्यर्थः। क्रियाप्रतिपादकत्वेऽपि व्यापारव्यधिकरणफलवाचकत्वरूपसकर्मकत्वं विनेति यावत्। यद्वा सहाविद्यमानं कर्म तादात्म्येन फलाश्रयः फलं यस्यावैय्यधिकरण्येनानुकूलतासम्बन्धेन तादृशी या क्रिया तद्वाचकत्वं विनेत्यर्थः। यदि प्रतीयमानोपासनानुभवादिरर्थ उपसर्गस्य, तर्हि आसादिधातोः स्थित्याद्यनुकूलव्यापाराद्यर्थकत्वेनोपासनानुभवरूपफलवाचकत्वाभावेन निरुक्तसकर्मकत्वाभावात् कर्मणि लो न स्यात्। ततश्च भावे ले तत्र द्वितीयापत्तिः। क्रियाजन्यफलाश्रयत्वादिति भावः।

---

१. प्रकृतशोधप्रबन्धे पृ.सं. २०। २. म.भा.पृ.सं. ५९ प्रथमभागः

३. शिवामनुभवति गपा०। ४. अनतिरिक्तत्वेप्युभयोः घप०। अनतिरिक्तत्वे चोभयो रिक्तत्वेन ग प०।

**उपसर्गाणां द्योतकत्वस्यैव युक्तत्वात् । ननूक्तयुक्त्याऽस्तूपसर्गाणां द्योतकता निपातान्तरंतु वाचकमेवेति चेत् ? न, साक्षात्क्रियते अलंक्रियते ऊरीक्रियते इत्यादौ कर्मणि लकारेण कर्मीभूतस्य गुर्वादेरभिधानसिद्धये धात्वर्थं प्रति कर्मत्वस्य वाच्यत्वात्,**

---

**द्योतकत्वस्यैवेति ।** वक्ष्यमाणव्यतिरेक्यनुमानेनेत्यर्थः । ततश्च तेषां दृष्टान्तत्वेनोक्तरीत्याऽनुमितिः साध्वी एवेति भावः । पूर्ववत् व्यभिचारेणानुमितिं खण्डयन् स शङ्कते । **ननूक्तयुक्त्येति ।** उपास्यते गुरुरित्याद्यनुपपत्तिरूपयुक्त्येत्यर्थः । निपातान्तरं तु उपसर्गातिरिक्तं चवेत्यादिकं तु वाचकम्, पूर्ववत् द्योतकत्वे मानाभावात्, साक्षात्प्रत्यक्षेत्यादिना वाचकत्वस्य सिद्धत्वाच्च । युक्तिसाम्येन वैषम्ये बीजाभावेन च प्रादयो द्योतकाश्चादयो वाचका इति नैयायिकोक्तिं खण्डयन् प्रादितुल्यतां चादिषु ध्वनयंश्च समाधत्ते । **साक्षात्क्रियत इति ।** गुरुरिति शेषः सर्वत्र । इत्यादावित्यादिनोररीक्रियत इत्यादिपरिग्रहः । अत्रापि धातोः कर्मणि लसिद्ध्यर्थं तत्तदर्थवाचकत्वस्यावश्यं वक्तव्यत्वेनोपसर्गवदमीषामपि तत्वस्यैव युक्तत्वम् । यद्यपि डुकृञ् करण इत्यस्य सकर्मकत्वात्कर्मणि लकारो नानुपपन्नः, तथापि साक्षात्काराद्यर्थाश्रये स न स्यात् । अन्यथा 'वायुर्विकुरुते' 'सैन्धवा विकुर्वते' इत्यत्रापि स्यादिति भावः । तदाह । **कर्मणीति ।** आदिना शिवादिसङ्ग्रहः । **धात्वर्थमिति ।** तस्य साक्षात्कारादिधात्वर्थनिरूपितकर्मत्वस्यावश्यं वक्तव्यत्वादित्यर्थः । तच्च तस्य तदर्थत्व एव सम्भवति, नत्वन्यथा । प्रत्ययानामिति न्यायेन धात्वर्थफलाश्रयकर्मण एव तदुत्तरप्रत्ययेनाभिधानात् । ततश्च प्राग्वत् द्वितीयापत्तिः । फलाश्रयस्य कर्मत्वादिति भावः । [1]**इदमत्राकूतम् ।** साक्षात्काराद्यर्थः किं निपातस्योत विशिष्टस्योत धातुमात्रस्य । नाद्यः । तथा हि सति उत्पत्त्यनुकूलव्यापाराद्यर्थकत्वेन व्यापारव्यधिकरणफलवाचकत्वात् कृञादिधातोः सकर्मकत्वेन घटादिरूपे कर्मणि प्रत्ययोत्पत्त्या तस्याभिधानापत्त्या निपातार्थनिरूपितकर्मत्वस्य गुर्वादेः सत्वेऽपि तस्य धात्वर्थत्वाभावेन तन्निरूपितकर्मत्वस्याभावात् तस्मिन् कर्मणि लस्याभावेन तस्याभिधानानापत्तेः । अधात्वर्थकर्माभिधाने प्रत्ययानामिति व्युत्पत्तिविरोधापत्तेश्च । न द्वितीयः । उक्तयुक्तेः । तृतीये त्विष्टसिद्धिरेवेति प्रागुक्तमेवेति ।

## १.२.१.२ निपातानां द्योतकत्वे नैयायिकोक्ताक्षेपनिरासः

ननु यद्यपि साक्षात्क्रियत इत्यादौ उपास्यत इत्यादिग्रन्थवत् कर्मणि लकारायोगः स्यादिति वक्तव्ये कर्मणि लकारेणेत्यादिवाच्यत्वादित्यन्तवक्रोक्तेर्निर्बीजत्वेनायुक्तत्वं न । करोतेः सकर्मकत्वेन

---

१. चाकूतम् इति घपा० ।

**उपसर्गत्वापेक्षया निपातत्वस्याधिकवृत्तितया तदवच्छेदेनैव द्योतकताकल्पनाच्च । सामान्ये**

कर्मणि लकारसिद्ध्या पूर्वोक्तदूषणाभावस्योक्तत्वात्, तथा च साक्षात्काराद्याश्रयकर्मणो गुर्वादेर्लेनाभिधानं यथा स्यान्न तु यत्किञ्चित्कर्मणः । अतस्तस्य धातुवाच्यत्वं वाच्यम् । एवं हि व्यापारव्यधिकरणतद्रूपफलवाचकत्वरूपसकर्मकत्वमप्युपपन्नमित्युपसर्गवदमीषां तत्वमप्यर्थात् समायाताम् । एवञ्च वक्रोक्तिर्युक्तैव । तथाप्यत्राह कश्चित् । साक्षात्क्रियत इत्यादौ तत्तत्फलवाचकं साक्षात्पदादिकमेवास्तु । तत्तदर्थफलानुकूलव्यापारो धात्वर्थः । न च साक्षात्पदादेस्तत्तदर्थकत्वे न मानमिति वाच्यम् । **साक्षात्प्रत्यक्षतुल्ययोः, अलंभूषणपर्याप्ति शक्तिवारणेषु, उर्युरी चोररी च विस्तारेऽङ्गीकृतौ त्रयमिति** [२]कोशसत्वात् । नमःपदे नमस्कारार्थत्वस्य लोकसिद्धत्वाच्च । सकर्मकत्वं च स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारवाचित्वम् । कर्मत्वमप्येतादृशफला-श्रयत्वमेव क्रियाजन्यफलाश्रयत्वमेव वेति न कर्मणि तस्मिन् लकारानुपपत्तिरिति मास्तु उपसर्गाणां चादीनां च द्योतकत्वम् । प्रत्ययानामिति व्युत्पत्तेरपि प्रत्ययानां प्रकृतितद्युक्तनिपातान्यतारार्थान्वि-तेत्याद्यर्थ इति न तद्व्युत्पत्तिभङ्गः । एवं तण्डुलः पचतीत्यादौ तण्डुलकर्मकः पाक इति बोधवारणायावश्यके अभेदातिरिक्तसम्बन्धेन प्रकृत्यर्थप्रकारकशाब्दबोधे विशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितिर्हेतुरिति कार्यकारणभावे प्रकृतौ निपातान्यत्वविशेषणेन गुरुं साक्षात्करोतीत्यादौ न तद्भङ्ग इति न किञ्चिद्दूषणमितीति चेदित एवारुचेराह **। उपसर्गत्वेति ।** उपसर्गो द्योतक उपसर्गत्वाद्यन्नैवं तन्नैवं यथा घटशब्दादिः । अत्र शक्तिसम्बन्धेनोपसर्गपदवत्वरूपमखण्डं वा पक्षतावच्छेदकम् । उपसर्गपदवाच्यत्वं हेतुः । नातो हेतुपक्षतावच्छेदकयोरैक्यमिति परानुमानीयोक्त-पक्षतावच्छेदकरूपोपसर्गत्वापेक्षयेत्यर्थः । निपातत्वं पक्षतावच्छेदकीकृत्य निपातपदवाच्यत्वेन हेतुना वाचकत्वाभावसाधनस्यैव युक्तत्वमित्यभिप्रायः । निपातत्वस्य वक्ष्यमाणस्वरूपस्य तदवच्छेदेनैव निपातत्वावच्छेदेनैव द्योतकताकल्पनाच्चेति वाचकत्वाभाववत्ताकल्पनस्य युक्तत्वाच्चेत्यर्थः । तथा च निपातास्तादृशा निपातपदवाच्यत्वाद्यन्नैवं तन्नैवं यथा गोशब्दादिरित्यनुमानप्रयोग इति बोध्यम् । युक्तत्वे हेतुमाह **। सामान्य इति ।** व्यापकधर्मे इत्यर्थः । प्रमाणानां = प्रमाकरणानाम् । पक्षपातात् आग्रहात् । व्याप्यत्वेन गृहीतधर्मोपस्थितौ व्यापकधर्मोपस्थितेः प्रागावश्यकत्वम् । तथा चात्रोपसर्गाणां द्योतकत्वसाधकं यत् प्रमाणमर्थापत्तिरूपमनुमानं वा तन्निपातत्ववच्छेदेनैव तत्वं साधयति । प्रमाणस्य हि सामान्यावच्छेदेन प्रवृत्तौ बाधकाभावसहकृतं लाघवं बीजमिति भावः । ननु

---

२. अमरकोशे नानार्थवर्गे तृतीयकाण्डे क्रमात् श्लो.सं. २४३, २५२, २५४ । (चौ.सं.प्र.पृ.सं. ४४१, ४४२)

**प्रमाणानां पक्षपातात् । निपातत्वं चाऽखण्डोपाधिरूपं जातिरूपं शब्दस्वरूपमेव चेति पक्षत्रयेऽपि प्रादिचादिसाधारणमेव । प्रत्वादिप्रत्येकपर्यवसन्नं तदिति पक्षेऽपि प्रादीनां चादिभ्यो वैलक्षण्यानिरुक्तेः केवलानामप्रयोगेन अन्यलभ्यताऽपि तुल्यैव ।**

---

प्रादिचादिसाधारणस्यैकस्य निपातत्वस्याभावेनाननुगतत्वात्कथं तदवच्छेदेन तत्वसिद्धिरित्यत आह । **निपातत्वमिति ।** अयमाशयः । सामान्यं द्वेधा जातिरुपाधिश्च । तत्र नित्यमेकमनेकसमवेतं सामान्यमाद्यम् । इदमखण्डमेव । तद्भिन्नं सामान्यमन्त्यम् । इदमपि द्विविधं सखण्डमखण्डं च । तत्र निर्वक्तुं योग्यमाद्यम् । तद्भिन्नं जातिसदृशमन्त्यमिति । यद्यप्यसत्वार्थकत्वे सति [1]चादिगणपठितत्वरूपं सखण्डमपि तत् सम्भवति । तथापि चादिगणादिभेदेन तस्याननुगतत्वमिति नेष्टसिद्धिरिति तद्विहाय[2] आह च । **अखण्डोपेति ।** अखण्डोपाध्यनङ्गीकारे आह । **जातिरूपमिति ।** एतावतैवाखण्डत्वे लब्धे[3] पुनस्तस्यात्र नानुषङ्गः । अत एव गुरुचरणा मञ्जूषायां शब्दस्वरूपं अखण्डं वेति पक्षद्वयमेवोपन्यास्थन् । तत्तत्पुरुषीयप्रादिनिष्ठेन व्यापकेन कारणतावच्छेदकतादिना सिद्धेन प्रत्वादिरूपवैजात्येन साङ्कर्यादाह । **शब्दस्वरूपमेव चेतीति ।** शक्तिसम्बन्धेन निपातपदवत्वरूपमित्यर्थः । **त्रयेऽपीति ।** तदंशे आवयोरैक्यादिति भावः । **साधारणमेवेति ।** तस्यैक्यात्, एवञ्च तदवच्छेदेनैव तत्वं युक्तमिति भावः । ननु नातिरिक्तं तदुक्तरूपं, किन्तु प्रत्वादिरूपमेवेत्युक्तहेतुरयुक्तोऽत आह । **प्रत्वादीति । पक्षेऽपीति ।** चादीनां तत्वमेवेति शेषः । तत्र हेतुमाह । **प्रादीनामिति । अनिरुक्तेरिति ।** अकथनादित्यर्थः । तत्र लासिद्धिरूपोक्तयुक्तचैक्यादिति भावः । तथा च चादयोऽवाचकाः प्राद्यविलक्षणत्वात् यद्यदविलक्षणं तत्तद्धर्मवत् घटकलशादिवत् मुखचन्द्रादिवच्चेति प्रयोगो बोध्यः । अनुमानान्तरं सूचयन् हेत्वन्तरमाह । **केवलेति ।** किञ्च यत इत्यादिः । असहायानां प्रयोगाभावेनेत्यर्थः । अपिरुक्त-युक्तिसमुच्चायकः । अत्र हेतुमाह । **विजयते इति ।** द्योत्यार्थस्य प्रकारत्वमिति सिद्धान्तादाह । **विशिष्टेति । समुच्चितेति ।** तस्मात्तदभावकल्पनमेव युक्तम् । एवञ्चेत्थमनुमानप्रयोगः । चादयोऽवाचकाः पदत्वे सति केवलानामप्रयोगात् अन्यलभ्यार्थप्रतिपादकत्वाद्वा उपसर्गवत् यन्नैवं

---

१. चादिगणादि इति ग पा० ।

२. तत्सिद्ध्ये इति घपा० ।

३. अखण्डत्वसिद्धेः इति घपा० ।

**विजयते इत्यत्र धातोर्विशिष्टजय इव घटश्चेत्यत्र समुच्चितघटे घटशब्दस्यापि लक्षणायाः संभवात् । किञ्च चादीनां वाचकत्वे समानाधिकरणप्रातिपदिकार्थयोरभेदान्वय**

---

तन्नैवम् । ये वाचकास्ते पदत्वे सति केवलाः प्रयुज्यन्ते यथा गवादयः । प्रत्ययादौ व्यभिचारवारणाय पदत्वे सतीति । तदुक्तं भट्टैः :-

[1]चादयो न प्रयुज्यन्ते पदत्वे सति केवलाः ।
प्रत्ययो वाचकत्वेऽपि केवलो न प्रयुज्यते । इति ।

यतः पदत्वे सति केवलाः न प्रयुज्यन्ते चादयोऽतस्ते न वाचका इत्यर्थः ।

## १.२.१.३ पुनर्नैयायिकोक्तक्षेपान्तरनिरासः

नन्वेतत्सर्वमयुक्तम्। ततोऽपि सामान्यधर्माव्ययत्वावच्छेदेनैवैतत्सिद्ध्यापत्तेः। नचेष्टापत्तिः। स्वरादीनामपि स्वातन्त्र्येण प्रयोगानापत्तेः । निपातत्वं[2] न पक्षतावच्छेदकं किन्तु द्योतकताग्रहेऽव-च्छेदकमित्यपि न । तत्तदर्थनिरूपितद्योतकत्वस्य तत्तन्निपातवृत्तितया तद्वृत्त्यसाधारणधर्मस्यावच्छेद-कत्वावश्यकतया सामान्यधर्मस्यावच्छेदकत्वे मानाभावात् । निपातत्वाद्यजानतोऽपि बोधाच्च । एतेन 'व्यापकत्वाच्छक्ततायास्त्ववच्छेदकमिष्यत' इति मूलग्रन्थः सामान्ये प्रमाणानां पक्षपातात् शक्तता द्योतकता वा तदवच्छेदेनैव कल्प्या । व्यापकत्वात् सामान्यत्वाच्छक्ताताया इत्युपलक्षणम् । द्योतकताया वेत्यपि द्रष्टव्यमिति व्याख्यान**भूषण**ग्रन्थश्च[3] परास्तः । किञ्च तृतीयानुमाने समुदितानां पक्षत्वं प्रत्येकं वा । आद्येऽथशब्दे हेतोर्भागासिद्धत्वम्, तस्य पदत्वात् केवलप्रयोगाच्च । अन्त्येऽथशब्दस्य पक्षतायां हेतोरपक्षवृत्तित्वम् । प्रत्युतानुमानान्तरेण गवादिवत् पदत्वे सति केवलप्रयोगेणाथशब्दस्य वाचकत्वमेव । एतेन द्वितीयानुमानमपि निरस्तम् । तथा च कथं न चादीनां वाचकत्वम् । किञ्च घटश्चेत्यत्र द्योतकत्वपक्षे द्योत्यार्थस्य प्रकारत्वमिति सिद्धान्तात् समुच्चितो घट इति बोधः । वाचकत्वे तु घटसमुच्चय इति बोध इति वैलक्षण्यात् । इत एवारुचेराह । **किञ्चेति ।** यथाश्रुतसमानविभक्तिकत्वस्य घट पट इत्यादावतिप्रसक्तत्वादाह । **समानाधिकरणेति ।**

---

१. वाक्यपदीये द्वितीयकाण्डे श्लो.सं. १९४ । वा.प. (संप्.आ. द्वितीयभागः पृ.सं. २७८)

२. निपातत्वं तु इत्यधिकः पाठः घ ।

३. बृहद्वैयाकरणभूषणे (चौ.अमर.प्र.पृ.सं. २५२) ।

**इति व्युत्पत्तिर्निपातेतरविषयकतया विना प्रमाणं संकोचनीया स्यात्, स्याच्च समुच्चयादिशब्दयोग इव चादियोगेऽपि घटादेः षष्ठी । किञ्च समुच्चया-दिपदैरुपस्थिते यथा विशेषणसम्बन्धस्तथा चादिभिरुपस्थितेऽपि स्यात् ।**

---

समानाधिकरणत्वं [१]चैकविशेष्यकप्रतीतिजनकत्वे सति विरुद्धार्थविभक्तिरहितत्वम्। तच्च प्रातिपदिकस्य विशेषणम्। तेन राज्ञः पुरुष इत्यादावपि नाभेदान्वयः। अभेदसम्बन्धेन नामार्थप्रकारकशाब्दबोधं प्रति समानाधिकरणनामजन्योपस्थितिर्हेतुरिति कार्यकारणभावकल्पनादिति भावः। **प्रातिपादिकेति ।** सुब्विशिष्टेत्यादिः। **इति व्युत्पत्तिरिति ।** नीलमुत्पलमित्यादौ क्लृप्तेति भावः। **विना प्रमाणमिति ।** चाद्यर्थसमुच्चयादिना घटादीनामभेदान्वयनिवृत्यर्थं वाचकतापक्षीयोक्त-बोधार्थं च समानेति व्युत्पत्तौ निपातेतरेति विशेषणावश्यकत्वेन तादृशसत्वार्थकनामार्थयोरेव तथान्वय इत्येवंरूपा सा त्वया सङ्कोचनीया स्यात्। तत्र च मानाभावो गौरवापत्तिश्च। निपातानामवाचकत्वे त्वन्वय एव नास्तीति नायं दोषः। अत एव घटो नास्तीत्यादौ घटपदं तत्प्रतियोगिके लाक्षणिकमिति नैयायिका इति भावः। परैरभ्युपगतत्वादस्तु तदपि, तथापि षष्ठी दुर्वारेत्याह। **स्याच्चेति ।** यद्वा ननु घटो नास्तीत्यादौ तदुक्तप्रकाररीत्याऽसङ्कोच एवात आह। **स्याच्चेति ।** वस्तुतस्तु नन्वव्ययेषु नामत्वमेव नेत्यग्रे वक्ष्यमाणत्वान्नायं दोष इत्यत आह **। स्याच्चेति ।** इति बोध्यम्। **समुच्चयादीति ।** घटप्रतियोगिकसमुच्चयादिरूपेऽर्थे प्रतिपादनीये यथा घटस्य समुच्चय इत्यादिस्तद्घटितः प्रयोगः तथा घटस्य चेत्याद्यपि स्यात्। आदिभ्यां[२] घटस्याभाव इति वत् घटस्य नेत्यपि स्यादिति बोध्यम्। अयं भावः। तेषां वाचकत्वे षष्ठीं विनाऽन्वयाप्रसङ्गः। प्रातिपदिकार्थयोर्विभक्त्यर्थभेदसम्बन्धेन विना विभक्तिमन्वयबोधस्याव्युत्पन्नत्वात्। तयोस्तथान्वय-बोधे विभक्तिजन्योपस्थितेर्हेतुत्वकल्पनात्। अन्यथा राजा पुरुष इत्यत्रापि राज्ञः पुरुष इति वदन्वयापत्तेरिति। न च समुच्चिताभिधानान्निष्कृष्टसमुच्चयानभिधानान्न भेदनिबन्धना षष्ठीति वाच्यम्। तथा सति समुच्चितो घट इत्यभेदेनैवान्वयात् तद्वत् सत्ववाचित्वादनिपातत्वादनव्ययत्वेन विभक्तिश्रवणप्रसङ्गात्। अवाचकत्वपक्षे तु तत एव नोक्तदोष इति बोध्यम्। ननु षष्ठ्यर्थसम्बन्धान्वयिनोः प्रतियोग्यनुयोगिनोर्लिङ्गसङ्ख्यान्वयित्वस्य सर्वत्र दर्शनेन तत्रैव तदङ्गीकारात् प्रकृते तदभावान्न षष्ठीप्रसङ्गोऽत आह। **किञ्चेति ।** घटस्य समुच्चय इत्यादौ समुच्चयादिशब्दैरुपस्थिते समुदायरूपेऽर्थे यथा विशेषणसम्बन्धः शोभनस्सुन्दरो दृष्टः समुच्चयो

---

१. चैकार्थवृत्तित्वम् क पा० ।

२. घटस्य विकल्प इति वत् घटस्य चेत्यपि । घपा० ।

**द्योतकत्वपक्षे तु पदार्थैकदेशत्वान्न तत्र विशेषणान्वयः । अपि च–**

**शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ।**

---

घटस्येत्यादि तथा घटश्चेत्यादौ चाद्युपस्थितेऽपि तदर्थे तदविशेषणसम्बन्धापत्तौ तद्घटितप्रयोगापत्तिः । आदिना भूयान् प्रकर्षः कीदृशो निश्चय इति वत् भूयान् प्र कीदृशोनिरित्यपि स्यादिति बोध्यम् । स्वमते इमं दोषं परिहरति । **द्योतकेति ।** वाचकत्वाभावपक्षे त्वित्यर्थः । **पदार्थैकेति ।** द्योत्यार्थस्य प्रकारत्वमिति नियमादिति भावः । **तत्रेति ।** चादिभिरुपस्थापित इत्यर्थः ।

## १.२.१.४ 'शरैरुस्रैरिव' 'वागर्थाविव' इत्यादिदृष्टान्तैः निपातानामवाचकत्वनिरूपणम् ।

ननु शब्दशक्तिस्वाभाव्यात् पचति पाक इत्यादौ धात्वर्थघञर्थयोरिव चादिसमुच्चितादिवाच्य-समुच्चितादेरसत्वभूतत्वं सत्वभूतत्वं चेति न विभक्तिश्रवणं, समुच्चिताभिधानान्निष्कृष्टसमुच्चयान-भिधानादेव प्रागुक्तबोधाङ्गीकारान्न व्युत्पत्तिसङ्कोचो, नापि तदेकदेशत्वाद्विशेषणयोगो, नापि भेदाभावात् भेदनिबन्धना षष्ठी, धर्म्यंशे शक्तिकल्पनागौरवं तु प्रामाणिकत्वान्न दोषाय । एतेन तस्यान्यलभ्यत्वान्न तत्र तत्कल्पनमित्यपास्तम् । समुच्चयादिपदस्थले तु वैपरीत्यमिति यथासम्भवं सर्वं भवत्येव । तदुक्तम् – [1]'समुच्चिताभिधाने च व्यतिरेको न विद्यत'इति । किञ्च शब्दशक्तिस्वाभाव्येन विभक्त्या स्वार्थसङ्ख्यावत् नित्यपरतन्त्रतया निपातैः स्वार्थस्य परविशेषणत्वेनैव बोधेन विशेषणान्वयाप्रसङ्गः, षष्ठ्यप्राप्तिश्च । नित्त्येत्याद्युक्त्या ऋद्धस्य राजपुरुषः इत्यादौ न दोषः । तदुक्तम्[2] ।

समुच्चयाभिधानेऽपि विशिष्टार्थाभिधायिनाम् ।
गुणैः पदानां सम्बन्धः परतन्त्रास्तु चादयः । इति ।

किञ्च घटं पटं चेत्यादौ घटमित्यस्य क्रियायामेवान्वयोऽवश्यं वाच्यो न समुच्चये । अत एव ततो द्वितीया । घटं समुच्चयवन्तं पटं पश्येति बोधः । तत्र समुच्चयस्य प्रतियोग्याकाङ्क्षायां सन्निहितत्वाद्घटस्यैवार्थिकं प्रतियोगित्वम् । पटे तु समुच्चयस्य भेदेनान्वयो, न तु पटस्य समुच्चय इति क्व षष्ठ्यापादनमत आह । **अपि चेति ।** वेत्यादावित्यादिना **वागर्थाविव सम्पृक्तौ पार्वतीपरमेश्वरौ** वन्दे इत्यत्र वागर्थयोर्वदिकर्मत्वाभावात्तदुत्तरद्वितीयाया अनन्वय इवार्थस्य

---

१. समुच्चिताभिधा नैव व्यक्तिरेका च भिद्यते इति घपा० ।

२. तदुक्तमिति । भर्तृहरिभिः वाक्यपदीये वाक्यकाण्डे (श्लो.सं. १९६ । पृं.सं. २८२) ।

**इत्यादौ उस्रसदृशैः शरैः रससदृशानुदीच्यानुद्धरिष्यन्नित्यादिरर्थः । स च उस्रादिशब्दानां तत्सदृशपरत्वे इवशब्दस्य च तात्पर्यग्राहकत्वे सत्येव लभ्यते । अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधजनकताऽपि भज्येत । इवशब्दात्तु तृतीया दुर्लभा, असत्त्वार्थकतया कारकविभक्त्ययोगात् । एवमप्युस्रादिभ्यस्तृतीयायाऽनन्वयस्यानुद्धाराच्च ।**

---

कर्मत्वबोधासम्भवश्च सङ्गृह्यते । **उस्रेति ।** किरणेत्यर्थः । **स चेति ।** उक्तार्थ इत्यर्थः । **तत्सदृशपरेति ।** तत्समभिव्याहारे लक्षणयेति भावः । अत एव नेवपदानर्थक्यमित्याह । **इवेति । तात्पर्येति ।** द्योतकत्व इत्यर्थः । वाचकत्वाभाववत्व इति यावत् । एवेनान्यथा तदसङ्गतिस्सूचिता । ननूस्रपदोत्तरतृतीयया सदृशनिष्ठकारणत्वस्यैव बोध इति न तदसङ्गतिरत आह । **अन्यथेति ।** उस्रादीनां तदपरत्वेनेवादेरेव वाचकत्वे इत्यर्थः । **प्रत्ययानामिति ।** तत्तत्प्रत्ययानां प्रत्यासत्त्या तत्तत्प्रकृतिवृत्त्युपस्थाप्यार्थयुक्तस्वार्थविशेष्यकबोधजनकत्वमिति न्यायार्थः । बोधकतापीत्यपिना उस्रसदृशस्य करणत्वेप्युस्रस्याकरणत्वादु[१]स्रपदोत्तरतृतीयाया नैरर्थक्यमसाधुत्वं च स्यादिति सङ्गृह्यते । यत्तु अपिना सादृश्यस्येवार्थत्वे नामार्थयोरभेदान्वय इत्यस्य भङ्गस्य सङ्ग्रह इति । तन्न । उक्तयुक्तेः । अयं भावः । उस्रैरिति करणे तृतीया । तया च प्रकृत्यर्थगतं करणत्वं बोधनीयम् । न चात्र उस्रः करणमिति तन्न किरणरूपप्रकृत्यर्थस्य, किन्तु इवार्थसदृशस्य । तस्य चाप्रकृत्यर्थतया तया करणत्वं बोधयितुमशक्यम् । अप्रकृत्यर्थस्यापि तादृशस्य तया तत्वबोधने व्युत्पत्तिभङ्ग इति । ननु इवशब्दादुत्पन्नया तया तस्य तत्वबोधो भविष्यतीत्यत आह।। **इवेति । तृतीयेति ।** करणतृतीयेत्यर्थः । तदाह । **असत्वार्थेति ।** एवञ्च सदृशस्य करणत्वाद्यलाभ एवेति भावः।। **एवमिति**[२] **।** अव्ययात्सर्वविभक्त्युत्पत्तिरिति मते इवशब्दोत्तरं विभक्तिलुक्त्वेन तृतीयोत्पत्तावपीत्यर्थः । तथोत्पन्नाया अपि तस्याः समभिव्याहारात् करणत्वार्थकत्वमिति मन्यते । धर्मिवाचकत्वेन सत्वार्थकतया श्रवणप्रसङ्गादिति शेषः ।

ननु शब्दशक्तिस्वाभाव्यात्तदुपस्थाप्यस्यापि तस्यासत्वभूतत्वमत आह । **उस्रेति ।** पञ्चमीयं । उस्रस्याकरणत्वेन तद्गतकरणत्वाबोधकत्वात्तस्य च प्रतियोगितया सदृशेऽन्वयादिति भावः । चकारेण तथेवोत्तरोत्पन्नतृतीयाया निरर्थकत्वस्य सङ्ग्रहः । न हि समभिव्याहारमात्रेणापूर्वा शक्तिर्ब्रह्मणापि सुवचा । अतिप्रसङ्गापत्तेरिति बोध्यम् । ननु त्वन्मते अब्राह्मण इत्यादौ प्राचीनतत्पुरुषलक्षणा-

---

१. उस्रस्याकरणत्वेऽपि इति ग पा० ।

२. एवमेति ग पा० ।

**नन्वेवं नञ्तत्पुरुषस्योत्तरपदार्थादिप्राधान्यमित्यादिसिद्धान्ता भज्येरन्निति चेत् ? न, पूर्वपदद्योत्यं प्रति प्राधान्यमिति तदर्थात् । द्योत्यार्थेनैवार्थवत्तेति प्रातिपदिकत्वसिद्धिः । अत एव येषां द्योत्योऽप्यर्थो नास्ति ''तु हि च स्म ह वै पादपूरणे'' इत्यमरकोशात् ''कमीमिद्विति पादपूरणार्थाः'' इति निरुक्ताच्च, तदर्थं ''निपातस्यानर्थकस्य'' इति वार्तिकारम्भ इत्यवधेयम् ।**

---

व्याप्त्यापत्तिः । पूर्वपदस्य नञादेरनर्थकत्वेन तदर्थनिरूपितोत्तरपदार्थप्राधान्यस्य दुर्वचत्वादित्याशयेन शङ्कते । **नन्वेवमिति ।** वाचकत्वाभावपक्ष इत्यर्थः । **नञ्तत्पुरुषेति ।** अब्राह्मण इत्यादेरित्यर्थः । **उत्तरेति ।** उत्तरपदार्थप्रधानस्तत्पुरुष इति प्राचीनसिद्धान्तस्य 'कृष्णश्रित' इत्यादौ क्लृप्तस्यात्र भङ्गेन तस्य तत्वस्य भङ्गः । उक्तयुक्तेरित्यर्थः । अतिमालादौ तदसत्वेऽपि तत्र वृत्त्या युक्तत्वात्तत्सत्वमावश्यकमिति भावः । द्योत्यार्थमादायैव तं समर्थयते । **पूर्वेति ।** उक्तलक्षणस्य प्रायो यावत्तत्पुरुषविषयकत्वेन तत्तत्पुरुषविषयकत्वस्य वाच्यत्वेन नञ्तत्पुरुषविषयस्य तस्य पूर्वपदद्योत्यार्थनिरूपितोत्तरपदार्थप्रधानतावान् स इत्यर्थादित्यर्थः । पूर्वपदार्थेत्यत्र सम्बन्धविशेषो न विवक्षितः । तद्बोध्यत्वमात्रं विवक्षितम् । यद्वा शक्तिलक्षणाद्योतनान्यतमसम्बन्धेन तद्बोध्यत्वं विवक्षितमिति भावः । नन्वयुक्तमेतत् । उक्तलक्षणस्यासम्भवग्रस्तत्वादसिद्धान्तत्वाच्चेति चेन्न एवमपि दोषान्तरसत्वात् । तथा हि । त्वन्मते निपातेभ्यो विभक्तिर्न स्यात् । तेषामर्थवत्वा-भावेनाप्रतिपदिकत्वात् । वृत्त्या शक्तिलक्षणान्यतररूपया अर्थबोधजनकत्वं ह्यर्थवत्वं तत्सूत्रे निविष्टम् । अत एवाभेदविवक्षायां गवित्ययमाहेत्यादावनुकरणे तत्वाभावात्तदनुत्पत्तिरिति । इमं परिहरन्नाह **। द्योत्यार्थेनैवेति ।** शक्तिलक्षणाद्योतनान्यतमसम्बन्धेन बोधकत्वरूपार्थवत्वमेव तत्सूत्रे निविष्टम्, न तु पूर्वोक्तमिति भावः । **अर्थवत्तेतीति ।** निपातानामिति शेषः । तच्चोभयान्वयि । इदमर्धजरतीयवादिनोऽप्यावश्यकमिति गूढाकूतम् । इदं समर्थयते । **अथ एवेति ।** उक्तरीत्या तत्र प्रातिपदिकत्वस्य सिद्धत्वादेवेत्यर्थः । येषां निपातानां तानेवासम्भवनिरासाय मध्ये कथयन् अनर्थकत्वे तेषां प्रसङ्गतो मानमाह । **तुहीत्यादि । पादपूरण इति ।** राहूपराग इत्यादिवत् सप्तमी सिद्धसाध्येति न्यायेन निमित्तत्वे फलमिति फलमत्र निमित्तम् । तथा च फलितस्सप्तम्यर्थः प्रयोजनमिति केचित् । पादपूरणशब्दस्य पूर्यमाणपादपरतया निमित्तात्कर्मयोगे इति सप्मीति तत्वम् । **कमिति ।** कं ई इत् उ इति विभागः । **पुराणार्था इति ।** अर्थशब्दः प्रयोजनवाचीति भावः । **तदर्थमिति ।** तेषां प्रातिपदिकसंज्ञार्थमित्यर्थः । **वार्तिकेति ।** इत्यनर्थकपदघटितवार्तिकेत्यर्थः । अर्थवत्सूत्रे सङ्गच्छत इति शेषः । उपसंहरति । **इत्यवेति ।**

**स्फुटश्चेदं कैयटादिग्रन्थेषु । अत एवाऽऽकृत्यधिकरणे (पू.मी. १-३-१३) भट्टैरुक्तम् –**

**चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः ।**
**क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः ।।**

---

### १.२.१.५ निपातानामवाचकत्वे आकरसम्मतिः

नन्वेवमपि द्विविधनिपातस्यापि लिङ्गसङ्ख्याकारकानन्वयित्वेन तदनभिधायकत्वाद्विभक्तिर्नैव स्यादिति चेन्न एकवचनमुत्सर्गतः करिष्यत इति भाष्यसिद्धान्तात्प्रथमैकवचनोत्पत्तिसम्भवात् । अधिपरी इत्यस्य सामान्यापेक्षज्ञापकत्वाद्वा प्रथमोत्पत्तिसम्भवात् । 'अव्ययादाप्सुप' (पा०सू० २-४-८२) इति ज्ञापकाद्वा सर्वासां सर्वैकवचनानां वा सिद्धेः । स्वरादेः कारकान्वयित्वेऽपि लिङ्गसंख्यान्वयाभावात् । स्वरादेरिति वाच्येऽव्ययग्रहणस्य तत्वसम्भवाच्च । **कृत्तद्धिते**ति सूत्रस्थचकारेणानुक्तसमुच्चयार्थेन तत्सङ्ग्रहात् । तत्प्रत्याख्यातमित्यन्यत् । तस्मादुक्तदूषणद्वयबलात् सकलनिपातानामवाचकत्वं युक्तमिति सिद्धम् । अत एव 'भूवादय' इति सूत्रे [1]**उपाध्यायै**रुक्तम् - ''अनेकार्थत्वाद्वा धातूनां विशिष्टोऽर्थो धातोरेव । उपसर्गास्तु बोद्धारं प्रति तत्तदर्थद्योतका'' इति । अत एव च प्रतिष्ठत इत्यादौ तिष्ठतिरेव धातूनामनेकार्थत्वाद्गतिवाची । प्रशब्दस्तु तदर्थद्योतक इति तत्रैव भाष्ये स्पष्टम् । यद्यपि लोके विशिष्टादेव बोध इति विशिष्ट एव क्रियावाची । तथाप्यडादिव्यवस्थार्थं धातूपसर्गयोः पृथक् कल्पनमावश्यकमेव । एवञ्चोपसर्गार्थयोगस्यान्तरङ्गत्वम् । अत एवोपास्यते गुरुरित्यत्र कर्मणि लकारः । निरूपितमेतद्गुरुचरणैरप्यन्यत्र । व्यक्तीभविष्यति चैतदुपरिष्टात् । तदेतत्सर्वं मनसि निधाय आह । **स्फुटमिति ।** चेदं द्योतकत्वं आदिसङ्ग्राह्यं भाष्यमुक्तमेव । स्वोक्तेऽर्थे भट्टोक्तिमपि सम्मतित्वेनाह । **अत एवेति ।** तेषां तत्वादेवेत्यर्थः । **अधिकरण इति ।** व्यक्तिर्वाच्योत जातिरिति संशय्य व्यक्तिरिति शङ्कित्वा जातिरेव वाच्येति सिद्धान्तो यत्र कृतस्तत्र प्रघट्टके 'विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् । निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृत'मिति लक्षणलक्षित इत्यर्थः । भट्टैः = वार्तिकाचार्यकुमारिलभट्टैः । चात्र = संसारे शास्त्रे व्याकरणे वा । अर्थो = निश्चयः, क्रियत इत्यत्रान्वयः । चतुर्विधे पदे = नामाख्यातोपसर्गनिपातरूपे । सप्तमी चेयं शते पञ्चाशदिति वत् । तथा च तत्र विद्यमानस्य नामाख्यातरूपस्य कस्य कोऽर्थ इत्येवंरूपसंशयोत्पत्तेरत्रार्थनिश्चयः क्रियत इत्यर्थः । यत्तु

---

१. म.भा.प्र. पृ.सं. ११८ द्वितीयो भागः ।

**तयोरर्थाभिधाने हि व्यापारो नैव विद्यते ।**
**यदर्थद्योतकौ तौ तु वाचकः स विचार्यते ।। इति ।। (तन्त्र.वा.पृ.सं.२५०)**

**यत्तु अर्थवत्सूत्रे 'अधीते' इत्यादौ धातोरनर्थकता उपसर्गविशिष्टस्य वाचकतेति कैश्चिदुक्तं, तदभ्युच्चयमात्रम् । ''सर्वस्य द्वे'' इति सूत्रे कैयटादिग्रन्थोऽप्येवमेव ।**

---

चतुर्विधपदमध्ये द्विविधस्येति व्याचख्युः । तन्न । निर्धारणविषये तयोरनेकवचनस्यैवाङ्गीकारात् । तत्रैव निर्धारणसम्भवात् । अत एव **मिदचोऽन्त्यादि**ति सूत्रे 'अच' इति सौत्रमेकवचनमिति ग्रन्थकाराः । [१]त्रितयसान्निध्यं त्वत्राप्यस्त्येव । एतेन तदभावात्तदसङ्गतमित्यपास्तम् । उपसर्गनिपातयोस्तु स न क्रियते । हि यतः तयोः उपसर्गनिपातयोः अर्थाभिधाने बोधनीये अर्थे अर्थस्य बोधने वा व्यापारः शक्तिलक्षणान्यतररूपः नैव विद्यते । एवञ्च निरुक्तसंशयाभावः, तौ उपसर्गनिपातौ यदर्थद्योतकौ येन नामाख्यातान्यतरेण लक्षणया शक्त्या वा प्रतीयमानस्यार्थस्य द्योतकौ, अर्थात् तदर्थस्य वाचकः सः नामाख्यातान्यतररूपोऽपि विचार्यत इत्यखण्डार्थः । इतीत्यस्य सङ्गच्छत इति शेषः । वाचकत्वे त्विदमसङ्गतमेव स्यादिति भावः । **विशिष्टस्येति ।** अधिपूर्वस्यैवेङः प्रयोगाद्विशिष्ट एवार्थवान् न तु केवलः । इङ् अध्ययन इत्याद्यर्थनिर्देशस्तु अवयवे समुदायार्थारोपात् । तेन तन्मात्रस्य क्रियावाचित्वनिबन्धनधातुत्वादिसिद्धिरिति **प्रकाश**-काराणामाशयः । **अभ्युच्चयेति ।** प्रजयतीत्यादौ पदद्वयघटितानुपूर्व्याः शक्ततावच्छेदकत्वे गौरवात् । किञ्च धातोरनर्थकतेति तावद्बाधितम् । क्रियावाचित्वं विना तत्वानुपपत्तेः । आरोपितं तदिति चेत् सत्यं तावतैवेष्टसिद्धेः । प्रकृतिप्रत्ययविभागतत्तदर्थविभागधातूपसर्गविभागव्यपेक्षैकार्थविभागाः सर्वेऽपि कल्प्या एव । परमार्थतस्तु पदरूपो वाक्यरूपो वा स्फोट एवार्थवान् । लोकानां तत्रैव शक्तिग्रहेण बोधात् । अत एव तस्य परमार्थत्वम् । लोके बोधजनकत्वात् । शास्त्रेण प्रकृतिप्रत्ययादिव्युत्पादनेन विशिष्टपदादेव तत्तदर्थबोधनद्वारा विशिष्टपदादौ विशिष्टार्थकत्वमेव बोध्यते । स्पष्टं चेदं [२]हरिग्रन्थे । कथमन्यथा इङो द्विर्वचनमडादयश्च स्युः । अत एव च [३]प्रत्याहाराह्निकेऽर्थवन्तो वर्णा इति प्रघट्टके अध्येति अधीत इत्यत्रेकारोऽर्थवानिति स्पष्टमेवोक्तं भाष्य इति भावः । **एवमेवेति ।** वाचकताभाव-पक्षानुसार्येवेत्यर्थः । एवमग्रेऽपि । तत्र हि नित्यवीप्सादिरूपोऽर्थोऽन्त्यद्विर्वचनेन द्योतयितुं न

---

१. त्रितयं इति ग पा० ।
२. उपायाः शिक्ष्यमाणानामिति कारिकायाम् वा.प.पृ.सं. ३१७
३. म.भा. प्रत्याहाराह्निके पृ.सं. १३१ प्रथमभागः ।

**पूर्वोत्तरमीमांसयोस्तत्र तत्र नञः पर्य्युदासे लक्षणेति ग्रन्था अप्येवमेव, उक्तयुक्तेः । अस्तु वा मतान्तरं निपाता वाचका इति, सर्वथापि प्रादयो द्योतकाश्चादयस्तु वाचका इत्येवंरूपमर्द्धजरतीयं नैयायिकाभ्युपगतमप्रामाणिकमेवेति दिक् ।**

---

शक्यते। किन्तु विशिष्टद्विर्वचनेन। एवं **परेर्वर्जन** (पा०सू० ८-१-५) इत्यत्रापीत्युक्तम्[1]। **पूर्वोत्तरेति।** जैमिनीयायां वैयासक्यां चेत्यर्थः। तत्र तत्रेत्यस्य ग्रन्था इत्यनेनान्वयः। पर्युदासे = अक्रियागुणाभ्यां सहान्वये। **लक्षणेति।** अनश्व इत्यादावश्वपदस्य अश्वप्रतियोगिकभेदवतीति भावः। **उक्तयुक्तेरिति।** लक्षणायां नञः तात्पर्यग्राहकत्वेन तत्वस्यार्थसिद्धत्वमित्युक्तयुक्तेरित्यर्थः। एवञ्चोक्तदोषद्वयबलात्सर्वेषां तेषामवाचकत्वमेवेति प्रागुक्तं सिद्धम्।

## १.२.१.६ समुच्चयाधिकरणे मीमांसकोक्तमतनिरासः

नन्विदमयुक्तम्। अन्वयव्यतिरेकाभ्यां निपातानां वाचकत्वस्यैव युक्तत्वात्। बोधकतारूप-शक्तेरबाधाच्च। शरैरुस्रैरित्याद'वुपमानोपमेययोस्समानविभक्तित्व'मिति वचनेन तुल्यार्थैरिति षष्ठ्यर्थतृतीयया वा निर्वाह इति क्वापि दोषाभावाच्च। किञ्चोक्तरीत्या पचतीत्यादौ धातोरेव कर्तृविशिष्टभावनायां लक्षणायां तिङादेस्तात्पर्यग्राहकत्वमित्यस्याप्यापत्तेरत आह। **अस्तु वेति।** वाचकास्ते एव। नन्वेवं कथं तर्ह्यवाचकत्वनिरूपणे निर्भरः कृतोऽत आह। **सर्वथापीति।** पक्षत्रयेऽपीत्यर्थः। यद्वा पक्षद्वयेऽपीत्यर्थः। द्योतकाः द्योतका एव, वाचका वाचका एव इत्येवंरूपमिति। अन्यथा तु तत् स्वसिद्धान्तसिद्धं प्रामाणिकमेवेत्यनुपदं स्फुटीभविष्यति। **अप्रामाणिकमिति।** उक्तयुक्तेः। एवञ्च तत्खण्डने एव ममाग्रहो न तूक्ताद्यपक्षसमर्थन इति भावः। एतेन सर्वेषां वाचकत्वेऽर्थवदिति सिद्धेर्निपातस्येति विधिर्व्यर्थः। सर्वेषां द्योतकत्वे चानर्थकस्येति विशेषणं व्यर्थम्। निपातस्येत्यनेनैव सिद्धेः। तथा च केचिद्वाचकाः केचिद् द्योतका इत्यङ्गीकार्यमिति सिद्धम्। प्रादय एव द्योतका चादयस्तु वाचका इतीत्यपास्तम्। उक्तयुक्तेः। वैपरीत्यापत्तेश्च। सर्वथाऽनर्थकानां तत्वाय तदारम्भाच्च। अत एव तद्विशेषणसाफल्यम्। तस्य प्रत्याख्यातत्वाच्च। एवञ्चोभयमपि मतभेदेन सार्वत्रिकं युक्तमित्यभिमतम्। एतेन केवलरामशब्दात्समुच्चयस्याबोधाच्चकारश्रवणे बोधाच्चकार एव तद्वाचको न द्योतकः। किञ्च द्योतकत्वे पदान्तराणां तत्र शक्तिः कल्प्या, चादेर्द्योतकत्वशक्तिश्च कल्प्येति गौरवं स्यादिति वाचका एव, ते न द्योतका इति **समुच्चयाधिकरणे** मीमांसकोक्तमप्यपास्तम्। अन्वयव्यतिरेकयो-

---

१. म.भा.प्र.पृ.सं. २ षष्ठो भागः।

स्तात्पर्यग्राहकत्वेनाप्युपयुक्तत्वात् घटादिपदानामेव समुच्चिते तत्र लक्षणा तात्पर्यग्राहकः प्रकरणादिवच्चादिरिति स्वीकाराच्छक्तिद्वयकल्पनाभावाच्च। अस्माकं लक्षणाग्रहदशायां बोधात् तत्कार्यकारणभाव आवश्यकः, एवं शक्तिग्रहस्यापीति पक्षद्वयेऽपि कल्प्यान्तराभावेन गौरवाभावाच्च। अत एव **स वाचको विशेषाणां सम्भवात् द्योतकोऽपि वेति** वाक्यपदीयं[१] सङ्गच्छते। केवलप्रयोगस्तु नापाद्यः। केषाञ्चित् **ते प्राग्धातो** (पा०सू० १-४-८०) रिति नियमितत्वात्, केषाञ्चिन्नञादीनां तस्येष्टत्वात्। केषाञ्चित्केवलप्रकृतिप्रत्यययोरप्रयोगवदुपपत्तेरिति दिक्।

## १.२.१.७ नागेशरीत्या अथशब्दस्य वाचकत्वसमर्थनम्

नन्विदं सर्वमयुक्तम्। क्रियागतविशेषबोधकातिरिक्तनिपातानां क्वचित्तत्तदर्थवाचकत्वस्यापि स्वीकारात् अन्वयव्यतिरेकसत्वात्। अत एव नेत्यतोऽभावबोधः कस्येति जिज्ञासा च दृश्यते भावशब्द इव। किञ्च 'पर्वतादा' इत्यादौ पर्वतादर्वागित्याद्यर्थप्रतीतेस्तत्र वाचकत्वमेवेति निरुक्ते स्पष्टत्वात्। द्योतकत्वे हि पञ्चमी न स्यात्। तस्य विशेषणता च स्यात्। अपि च 'गतिर्गतौ' (पा०सू० ८-१-७०) 'उपपदमतिङ्' (पा०सू० २-२-१९) इति सूत्रद्वयभाष्ये क्रियागतविशेषबोधकोपसर्गाणां द्योतकत्वस्यैव 'अधिपरी अनर्थकौ' (पा०सू० १-४-१३) 'नञ्' (पा०सू० २-२-६) 'अव्ययं विभक्ती' (पा०सू० २-१-६) त्यादिसूत्रभाष्येषु तादृशोपसर्गातिरिक्तनिपातानां द्योतकत्वस्य वाचकत्वस्य च स्पष्टत्वात्। अत एव निर्मक्षिकमित्यादौ पूर्वपदार्थप्राधान्यं भाष्योक्तं सङ्गच्छते। अत एव चोद्धतः सङ्कटं[२] इत्यादावुत्समादेरुद्धतसङ्गतरूपक्रियाविशिष्टसाधनवाचकता गतिश्चे (पा०सू० १-४-५९) त्यादिसूत्रभाष्योक्ता सङ्गच्छते। [३]हरिणाप्येतदुक्तम्।

निपाता द्योतकाः केचित् पृथगर्थाभिधायिनः।
आगमा इव केऽपि स्युः संभूयार्थस्य वाचकाः। इति।

केचिदित्युभयान्वयि। केचित् पृथगर्थाभिधायिनो वाचकाः केचिदनर्थका एवेत्याह आगमा इवेतीति तदर्थः [४]प्रातिशाख्येप्युक्तम्।

नामाख्यातमुपसर्गो निपातश्चत्वार्याहुः पदजातानि शब्दाः।

---

१. वा.प.श्लो.सं. १८५। पृ.सं. २७२। २. उद्धत इत्यत्रोद्धतानीत्यर्थे 'उपसर्गाच्छन्दसि धात्वर्थे' (पा०सू० ५-१-११८) इति वतिः। सङ्कटे सङ्गतमित्यर्थे 'सम्प्रोदश्च कटच्' (पा०सू० ५-२-२९) इति कटच्।

३. वा.प. श्लो.सं. १८५। पृ.सं. १९२ . पृ.सं. २७६। ४. ऋग्वेदप्रातिशाख्ये १२। १७। २१७।

तन्नाम येनाभिदधति सत्वं तदाख्यातं येन भावं स धातुरुपसर्गा विंशतिरर्थवाचकाः ।

सहेतराभ्यामितरे निपाताः क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् ।

सत्वाभिधायकं नाम निपाताः पादपूरणा । इति ।

स धातुरित्यत्र तृतीयार्थे प्रथमा । सान्तरान्तरयोर्निस्निरोर्दुस्दुरोश्च प्रायोगिकस्वरूपा-भेदमाश्रित्य विंशतिरित्युक्तम् । इतराभ्यां नामाख्याताभ्यां सह अर्थवाचका इत्यस्य मध्यमणिन्यायेन सम्बन्धः । इतरे नामाख्यातोपसर्गेभ्योऽन्ये निपातास्तथा ज्ञेयाः । प्रागुक्तमुपसंहरति । **क्रियेति ।** उपसर्गो विशेषकृदित्यनेन तेषां द्योतकत्वं दर्शयति । पादपूरणाः पादपूरणा अपीत्यर्थ इति तद्भाष्यम् । उपसर्गेण धात्वर्थ इत्यत्रोपसर्गपदधातुपदे निपातपदपदान्तरयोरुपलक्षके । **स वाचको विशेषाणा**मित्यादिवाक्यपदीयं तु एकदेश्युक्तिपरं वाशब्दः समुच्चयार्थक इत्येवं वा परमिति न विरोध इति दिक् ।

एवञ्च प्रकृतेऽधिकृतमित्यर्थस्य भाष्योक्तस्याथशब्दो वाचक एवेति प्रागुक्तं युक्तमेव । अत एवाथशब्दोऽधिकारार्थ इत्यत्रत्यभाष्यमपि कर्मणि घञा स्वरसतः सङ्गच्छते । एतेन वाचकत्वेऽप्यथशब्दस्य प्रस्तूयत इत्यर्थकत्वे नामपदानां सिद्धार्थपरत्वमित्यस्य भङ्गः । सिद्धप्रस्तावाभिधायित्वे तु शब्दानुशासनं प्रस्ताव इत्यनन्वय इत्यपास्तम् । तस्योक्तार्थकत्वेनादोषस्य प्रागुक्तत्वात् । नामपदानां सिद्धार्थपरत्वमिति नियमसत्वे पाक इत्यादीनामपि तत्वस्य सिद्धत्वेनानुशासनस्य तथार्थकरणस्य वा वैय्यर्थ्यापत्तेश्च । अव्ययमित्यादिसूत्रभाष्यात्सुतरां नियमभङ्गसत्वाच्च । **यत्तु** हिरुगित्यादौ व्यभिचाराच्चिन्त्यमेतदिति । तन्न । तेषां क्रियायामेव विशेषणत्वेन क्रियासामानाधिकरण्यात् क्रियाविशेष्यकत्वेऽपि तद्वाचकत्वाभावात् । स्पष्टं चेदं **भूवादिसूत्रे** भाष्ये । तद्धितश्चेति सूत्रे कैयटेन[१] च । निरूपितं **चैतद्गुरुचरणैरन्यत्र**[२] । किञ्च शरैरुस्रैरित्यादौ द्योतकत्वमेव । उक्तयुक्तेः । यत्तूक्तमुपमानोपमेययोरिति वचनेन निर्वाह इति । तन्न । तस्याभावात् । यदि तुल्यार्थैरिति तृतीयायामन्वयसाधुत्वसार्थकत्वानां सत्वेन न दोष इति । तदपि न । तावतापि प्रागुक्तरीत्या तस्य करणत्वलाभासिद्धेः । अतुलोपमाभ्यामिति पर्युदासादव्यययोग एव तत्प्रवृत्त्या इवयोगे प्रवृत्तेश्च । ननु द्योतकत्वेऽपि उस्रसदृशैः शरैरित्यर्थे उस्रपदोत्तरतृतीयानुप-पत्तिस्तदवस्था । उस्राणां करणत्वाभावात् । उपमानोपमेययोः समानविभक्तिकत्वमिति वचनाभावाच्च । यद्यप्युस्रसदृशरूपोस्रपदार्थस्य करणरूपशरैरभेदान्वयात् सा सुलभा, तथापि

---

१. म.भा.प्र.पृ.सं. ३५१ प्रथमभागः । २. मञ्जूषायां निपातार्थनिरूपणे पृ.सं. ५९७ ।

सदृशस्योक्तरीत्या विशेष्यत्वानापत्तिरिति चेदिष्टापत्तेः। तथा हि। इवादीनां स्वसमभिव्याहृते उपमानताद्योतकत्वं उपमानत्वेन प्रतीतेस्तादृशधर्मवदुपमेयप्रतीतिं विनाऽनुपपत्त्योभयत्रापि साधारणधर्मसम्बन्धबोधे तात्पर्यग्राहकत्वं च। उपमानत्वं च साधारणधर्मवत्वेनेषदितरपरिच्छेदकत्वं, तत्तद्धर्मवत्तया तथा परिच्छेदकत्वं चोपमेयत्वम्। इदं **चोपमानानी**ति (पा०सू० २-१-५५) सूत्रे भाष्ये[1] स्पष्टमिति निरूपितं गुरुचरणैरन्यत्र। उभयत्रापि साधारणधर्मान्वय इति लिङ्गभेदाद्युपमा-दूषणनिरूपणावसरे दशमशेषे [2]**काव्यप्रकाशा**दौ स्फुटम्। एवं च तीक्ष्णोपमानभूतोस्राभिन्नैः तीक्ष्णोपमेयशरैरिति बोधो, न प्रागुक्तः। अत एव समानविभक्तिकत्वम्। अधिकमन्यत्र स्पष्टमिति दिक्।

किञ्चोपास्यते गुरुः साक्षात्क्रियते गुरुरित्यादौ द्योतकत्वमेव। उक्तयुक्तेः। न च किञ्चिन्मतरीत्या निर्वाहः। सकर्मकत्वनिष्कृष्टलक्षणे गत्यभावात्। तथा हि। एतच्छास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वम्। तदनन्वय्यर्थकत्वमकर्मकत्वम्। अत एवाध्यासिता भूमय इत्यादौ क्तादिसिद्धिः। अत्रा**धिशीङि**त्यनेनाधारस्य कर्मत्वम्। अन्वयश्च पृथग् बुद्धेन संसर्गरूपः। अन्वयपदस्य तत्रैव व्युत्पत्तेः। तेन जीवत्यादिषु न दोषः। तत्र प्राणादिरूपकर्मणो धात्वर्थात्पृथगबोधात्। स्पष्टं चेदं **सुप आत्मन** (पा०सू० ३-१-८) इत्यत्र भाष्ये[3]। अत्र सकर्मकलक्षणे एव तात्पर्यम्। अकर्मकलक्षणं त्वर्थलभ्यम्। एवञ्चात्र मते फलाश्रयतया कर्मसंज्ञकस्य धात्वर्थफल एवान्वयौचित्येन तेषां द्योतकत्वमावश्यकम्। **लः कर्मणी** (पा०सू० ३-४-६९) त्यादौ तेन रूपेण बोधस्य दुर्लभत्वाच्च। अन्यतरत्वस्यातिगुरुत्वेन दुर्ज्ञेयत्वाच्चेति दिक्।

यत्तु **भूषणकृत्** - साक्षादर्थसाक्षात्कारस्य धात्वर्थे साक्षादन्वयायोगान्न तद्युक्तम्। अभेदान्यसम्बन्धेन नामार्थप्रकारकशाब्दबोधं प्रति प्रत्ययजन्योपस्थितेर्हेतुताया ओदनः पचतीत्यादौ कर्मत्वसंसर्गेणान्वयवारणायावश्यं वाच्यत्वात्। स्तोकं पचतीत्यत्रेव अभेदान्वयस्तु यदि

---

१. 'उपमानानि' इति सूत्रे हि ''किं सर्वथा भेदे उपमानोपमेयभाव उताभेदे'' इति प्रश्ने उभयत्रापि साधारणधर्मासम्भवात् 'गौरिव गौः' 'गौरिवाश्व' इत्यादौ उपमावाचकेवादेर्नैरर्थक्यापत्तिमुक्त्वा ''यत्र विशेषरूपेण भेदावगतिः साधारणधर्मरूपेणा भेदावगतिस्तत्र स'' इत्युक्त्वा 'कथमेतज्जातम्' इति शङ्कायां ''हीनं मानमुपमानं यन्नात्यन्ताय मिमीते इत्यर्थकोपमानव्यवहारादेतन्निर्णीतम्'' इत्युक्तम्। तस्यायं भावः। प्रस्थादि हि अज्ञातस्य परिमाणरूपार्थस्य साकल्येण ज्ञापकं इति तद् अत्यन्तभेदेनैव परिच्छेदकम्। प्रस्थः परिमाणमस्येति प्रस्थो व्रीहिरिति। इदं तु हीनमिति भेदाभेदाभ्यामेव परिच्छेदकमिति।

२. का.प्र. (मो.बना.पृ.सं. ४९९) लिङ्गवचनभेदोऽपीत्यादिना निरूपितम्। ३. म.भा.पृ.सं. ३६ तृतीयो भागः

**अनुपूर्वकः शासिर्विविच्य ज्ञापने दृष्टः । तद्यथा- ''अक्षेत्रवित् क्षेत्रविदं ह्यप्राट् स प्रैति क्षेत्रविदानुशिष्टः'' । यथा वा - 'संपूषन्विदुषा नय यो अञ्जसाऽनुशासति । य एवेद-मिति ब्रवत्'' । अत्र हि गुणत्रयोपेतेन सद्गुरुणाऽस्मान् शिक्षयेति पूषा प्रार्थ्यते । तत्र अञ्जसेति शैघ्र्यमुक्तम् । अनुशासतीति विविच्य बोधकत्वम् । ''बहुलञ्छन्दसि'' इति**

---

साक्षात्कारादेर्धात्वर्थत्वं तदा स्यात् । तथा सति च साक्षात्पदादेरपि तद्वाचकत्वे मानाभावात्तत्वमेव वाच्यमित्याह । तन्न । कार्यकारणभावे तद्बललभ्यव्युत्पत्तौ च निपातेतरेति विशेषणदानेन तद्वारणसम्भवात् । वस्तुतोऽव्ययेषु नामत्वस्यैवाभावाच्चेति दिगिति चेत्सत्यमत एवाह । **दिगिति ।** एवञ्च उक्तभाष्यादुक्तरीत्यैव व्यवस्थेति परमहृदयम् । अत एवेत्येवंरूपमित्युक्तम् । तेनास्याभिमतत्वं सूचितमित्यलम् ।

## १.२.२ शब्दानुशासनशब्दार्थः

नन्वेतावताऽथशब्दार्थज्ञानेऽपि शब्दानुशासनपदार्थस्याज्ञानाद्वाक्यार्थाबोधस्तदवस्थ एव । उक्तयुक्तेरत आह । **अनुपूर्वेति । विविच्यज्ञापन इति ।** उपपत्तिपूर्वकासाधुविभागपूर्वकबोधन इत्यर्थः । **दृष्ट इति ।** श्रुताविति शेषः । तामेव श्रुतिमाह । **तद्यथाऽक्षेत्रेति ।** क्षेत्रं प्रसिद्धं शरीरं ब्रह्म वा तदनभिज्ञः पुरुषः तज्ज्ञं तं प्रति पृष्टवान् किं क्षेत्रमिति । ततः क्षेत्रविदा इदं क्षेत्रमित्युत्तरिते सतीति शेषः । स अक्षेत्रवित् प्रैति वदति धातूनामनेकार्थत्वात् किं तदाह क्षेत्रविदाऽहमनुशिष्टः विविच्य सम्यक् बोधितोऽस्मीत्यर्थः । यद्वा तेनानुशिष्टः सम्प्रैति निश्चिनोति क्षेत्रमित्यर्थः । स्पष्टत्वाय द्वितीयां तादृशीं तामाह । **यथा वा सम्पूषन्निति ।** हे पूषन् त्वं तेनेति शेषः । विदुषा पण्डितेन सद्गुरुणा अस्मान् सं सम्यक् नय धातूनामनेकार्थत्वात् शिक्षय । तेन केन अञ्जसा शीघ्रं योऽनुशासति विरिच्य बोधयति, अन्यच्च य इदमेव इदमेवमेवेति ब्रूयादित्यर्थः । अस्याः तात्पर्यार्थमाह **। अत्र हीति ।** द्वितीयश्रुतावित्यर्थः । **गुणत्रयेति ।** पण्डितत्व - झटिति विरिच्य बोधनकर्तृत्व - प्रमेयनिष्कर्षवत्वरूपगुणत्रययुक्तेनेत्यर्थः । **तत्र** गुणत्रयान्तर्गतद्वितीयगुणमध्ये । **अञ्जसेतीति ।** इतिः तस्य तत्प्रकरणत्वं बोधयति । एवमग्रेऽपि । विविच्येत्युक्तार्थकं । **बोधकत्वमिति ।** उक्तमित्यस्यानुषङ्गः । नन्वदादिषु शासुधातोः पठितत्वेन **अदिप्रभृतिभ्य** (पा०सू० २-४-७२) इति लुकि अनुशास्तीत्युच्चारयितव्येऽनुशासतीत्यसङ्गतमत आह । **बहुळमिति ।** तदुक्तरं पठितेन **बहुलं छन्दसी**ति सूत्रेण तस्य वेदे वैकल्पिकत्वादिति भावः । **व्यत्ययो बहुळ**मित्यत्र योगविभागमङ्गीकृत्या तत्प्रत्याख्यानपक्षे तु तत एव न लुक् । सर्वेषां व्यत्ययस्य

**शपो न लुक् । इदमित्थमेवेति यो ब्रूयादिति प्रमेयनिष्कर्ष उक्तः । ब्रवदित्यत्र ''लेटोडाटौ'' इत्यट् । तथा च अनुशिष्यन्ते विविच्य असाधुभ्यो विभज्य बोध्यन्ते येनेति करणे ल्युट् । ततश्शब्दानामिति कर्मणि षष्ठी, तदन्तेन समासः । न च ''कर्म्मणि च'' इति सूत्रेण समासनिषेधः शङ्क्यः, तत्र चशब्दस्य इति शब्दार्थकतया कर्म्मणीति शब्दवता**

---

योगविभागसिद्धत्वात् । अत एव व्यत्ययाच्छप इति क्वचित्पाठः । **इत्थमिति ।** शेषपूरणलब्धम् । ननु ब्रूयादिति वक्तव्ये ब्रुवदित्यसङ्गतम् । अन्यलोकप्रसिद्धलकारे त्वर्थासङ्गतिः प्रयोगासङ्गतिश्चेत्यत आह।। **ब्रुवदिति । अडिति । इतश्च लोपः परस्मैपदे** (पा०सू० ३-४-९७) ष्वित्यनेनेकारलोप इत्यपि बोध्यम् । एवञ्च लेटो लिङर्थस्य सत्वेन नार्थासङ्गतिरपीति भावः । प्रकृतार्थमाह । **तथा चेति ।** तस्य तदर्थकत्वसिद्धौ चेत्यर्थः । अनुशिष्यन्त इत्यस्य विवरणं वीत्यादि ध्यन्त इत्यन्तम् । तत्र च विविच्येत्यस्य असाधुभ्यो विभज्येति विवरणं बोध्यम् । ननु व्याकरणस्य सुशब्दतद्व्युत्पत्तिरूपविषयप्रयोजनयोरनेनाभिधाने भावसाधनमनुशासनपदमुचितम् । न चेष्टापत्तिः । भाष्ये शास्त्रपदेन सामानाधिकरण्यानुपपत्तेरत आह । **येनेति । करण इति । करणाधिकरणयोश्च** (पा०सू० ३-३-११७) त्यनेन । एवञ्चान्वर्थत्वादस्य तदभिधानोपपत्तिः । करणसाधनतया च तत्वम् । अत एव **शब्दानुशासनं नाम शास्त्र**मिति भाष्यं सङ्गच्छते इति भावः ।

## १.२.३ कर्मणि षष्ठीविचारः

**तत इति ।** करणल्युटि कर्मणोऽनुक्तत्वादित्यर्थः । इतीत्यत्र । **कर्मणि षष्ठीति । कर्तृकर्मणोः कृती** (पा०सू० २-३-६५) त्यनेनेति भावः । [1]तादृशेन कर्मषष्ठ्यन्तेन शब्दानामित्यनेन । **समास इति । षष्ठी**(पा०सू० २-२-८)ति सूत्रेणेति शेषः । कर्मणि चेति निषेधस्तु न । उभयप्राप्ताविति विहितषष्ठ्यामेव तत्प्रवृत्तेरिति भावः । इदमेव शङ्कापूर्वं विशदयति । **नचेत्यादिना अस्त्युभयप्राप्तिरित्यन्तेन ।** कर्तरि चे (पा०सू० २-२-१६)ति वत् समुच्चयार्थकत्वेन चस्य कर्मणि या कापि षष्ठी तदन्तेन न समास इत्यर्थात्तस्येति भावः । तत्र = निषेधसूत्रे कर्मणि चेत्यत्र । **इतिशब्दार्थकेति ।** अव्ययानां नानार्थत्वादिति भावः । अयं चेत्यर्थादित्यत्र हेतुः । **कर्मणीति शब्देति ।** इतेः पदार्थविपर्यासकृत्वेन तादृशशब्दस्वरूपवतेत्यर्थः । **या षष्ठीति ।** विहितेति शेषः । **इत्यर्थादिति ।** तस्य सूत्रस्येति शेषः । अत एवेध्मप्रव्रश्चनादौ समासः । अन्यथा तत्रापि न स्यादिति भावः । नन्वेवमपि प्रकृते तेनैव षष्ठ्यां निषेधो दुर्वार एवेत्यत आह । **इयं त्विति ।**

---

१. तदन्तेन इति ग पा० ।

**''उभयप्राप्तौ'' इतिसूत्रेण या षष्ठी तदन्तं न समस्यते इत्यर्थात् । इयं तु ''कर्त्तृकर्मणोः'' इति विहिता षष्ठी, न तु ''उभयप्राप्तौ'' इति, आचार्यस्य कर्त्तुर्वस्तुतः सत्त्वेऽपीहानुपादानात् । 'चित्रं गवां दोहोऽगोपेन' इत्यत्र हि आश्चर्यं प्रतिपाद्यं, तच्च यद्यशिक्षितो दोग्धा दुर्दोहा गावश्च दोग्धव्यास्तदैव निर्वहति, न त्वन्यथा । अतः कर्तृकर्मणोर्विशिष्योपादानादस्त्युभयप्राप्तिः । इह तु शब्दानामिदमनुशासनं न**

---

शब्दानामित्यत्रेत्यर्थः। ननु करणे ल्युटि कर्तृकर्मणोरनुक्तत्वेन कर्तृकर्मणोरित्यनेनोभयत्र प्राप्तावुभयेति नियमप्राप्तिसत्वादिदमुभयं निर्हेतुकमयुक्तमत आह। **आचार्यस्येति।** पाणिनेरित्यर्थः। यद्यत्कार्यं तत्तत्सकर्तृकमिति व्याप्तेः सामान्यत इति भावः। **अपीहानुपेति।** प्रकृतवाक्ये इत्यर्थः। प्रयोजनाभावादिति शेषः। तथा च नोभयेति नियमप्राप्तिः। **उभयप्राप्ता**विति सूत्रं प्राप्तिग्रहणादुभयोः कर्तृकर्मणोर्यत्र सामर्थ्यप्राप्तमुपादानं तत्रैवोभयप्राप्तेरङ्गीकारात् प्रवर्तते। न त्वन्यतरप्रयोग इत्यात्ममान (पू०सू० ३-२-८३) इति सूत्रे भाष्ये[१] स्पष्टत्वादिति भावः। नन्वेवं प्रसिद्धतदुदाहरणे चित्रमित्यादावप्यन्यतरानुपादानेऽनुभयप्राप्तेस्तदप्राप्तौ निषेधो न स्यादत आह। **चित्रमित्यादि।** (चित्रमि)त्यत्र तु हि यतः प्रतिपाद्यं वक्तुस्तात्पर्यविषयीभूतम्। अत एव चित्रमिति सफलम्। तच्च = आश्चर्यं च। तदैव = इत्यस्यार्थस्य बोधने एव। अन्यथा = तदर्थाबोधने। **अत इति।** तन्निर्वाहकतदर्थबोधार्थमित्यर्थः। अगोपादिपदसाहचर्याद्गोपदं दुर्दोहगोपरमिति भावः। अत एव विशिष्येत्युक्तम्। नन्वेवं प्रकृतेऽप्युभयप्रयोगोऽस्तु। एवञ्चास्ति उभयप्राप्तिरिति चेन्न तथा प्रतिपाद्याभावेन प्रयोजनाभावादनुपादानात्। इदमेव सूचयन् प्रकृते ततो वैलक्षण्यं [२]प्रदर्शयति। **इह त्विति।** भाष्ये त्वित्यर्थः। वाक्यमित्यत्रान्वयः। यद्वा प्रकृतभाष्यप्रयोगे त्वित्यर्थः। नास्त्युभयप्राप्तिरित्यत्रान्वयः। [३]यत इति शेषः। **अर्थनिवृत्तीति।** तथासंशयेन तन्निवृत्तेराकाङ्क्षितत्वादिति भावः। **परमिति।** वाक्यस्य बहुधा दृष्टत्वादिति भावः। **न त्विति।** कर्तृविशेषस्य प्रसिद्धत्वेन प्रतिपाद्यतयाऽविवक्षितत्वेन तद्भिन्ननिवृत्तेरतथात्वेनानाकाङ्क्षितत्वादिति भावः। अतः = अतत्वेन तस्यानुपादानात्। नारायणादिमतेनाह। **अस्तु वेत्यादि वास्त्वित्यन्तेन। एतेनात्ममान** इति सूत्रभाष्यविरोधाच्चिन्त्यमिदमित्यपास्तम्। अत एवाह। **यथाकथञ्चिदिति।** उक्तरीत्या तस्या अभावात् क्लेश इति भावः। **न क्षतिः।** प्रयोगस्यान्यथोपपत्तेः। तामेवाह। **उभयेति।** उभयेति सूत्रे 'स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः', 'शेषे विभाषे'ति

---

१. म.भा.पृ.सं. १७५ तृतीयो भागः। २. दर्शयति इति घपा०।

३. यत इति शेष इति नास्ति घपाठे।

**त्वर्थानामित्यर्थनिवृत्तिपरं वाक्यं न तु कर्त्तृविशेषनिवृत्तिपरमतो नास्त्युभयप्राप्तिः । अस्तु वा यथाकथञ्चिदुभयप्राप्तिः । तथापि न क्षतिः, ''उभयप्राप्तौ'' इति सूत्रे अविशेषेण विभाषेति पक्षस्यापि वक्ष्यमाणतया नियमाप्रवृत्तिपक्षे आचार्यस्य शब्दानुशासनमिति प्रयोगसंभवात् । शेषलक्षणा षष्ठी वाऽस्तु । तस्माद्वैदिका लौकिकाश्च साधवः शब्दा इह**

---

[1]वार्तिकद्वयम् । तत्र द्वितीयबोध्यविकल्पः पूर्ववार्तिकोक्तनिषेधस्य अकाकारव्यतिरिक्ते स्त्रीप्रत्यये वा इत्यर्थात् । तेन विचित्रेत्यादिसिद्धमित्येके । अन्ये तु नियमस्य स विकल्पो न तु तस्येत्याहुः । तत्र द्वितीयमताभिप्रायेणाह । **सूत्रेऽविशेषेणेति ।** अकाकारभिन्ने कृत्प्रत्ययमात्रे वा इति तदर्थः । अपिः तत्समुच्चये । **पक्ष इति ।** एवञ्च कर्तृकर्मेत्युभयत्र षष्ठ्यां निषेधाप्रसङ्ग इति भावः । अत एव सशेषपूरणमाह । **त्वाचार्येति ।** ननु प्रवृत्तिपक्षे पक्षान्तरे च दोषस्तदवस्थ एवेत्यत आह । **शेषेति ।** एवञ्च तेनाषष्ठ्यां निषेधाप्राप्त्या समासः सुकर इति भावः । नन्वेवमपि तन्त्र्यादिशब्दानामपि कुतो न विषयत्वमतः पर्यवसितमुपसंहरति । **तस्मादिति ।** उक्तरीत्या शब्दानुशासनपदं व्याकरणान्वर्थनामेति सिद्धमिति ध्वनितम् । तन्त्रीशब्दापभ्रंशादीनामविषयत्वमिति भावः । नन्वेवमपि किं लौकिकमात्रविषयकत्वेन शाकटायनादिशास्त्रमधिकृतं उत वैदिकमात्रविषयकत्वेन प्रातिशाख्यमिति चेन्न व्याकरणस्य वेदाङ्गत्वस्यागमसिद्धत्वात् तत्र तत्र भाषायां छन्दसीत्याद्युक्त्या चोभयोरपि विषयत्वेन लोकवेदसाधारणतयाऽद्यत्वेऽस्यैव तत्वेन पाणिनीयशब्दानुशासनस्यैवाधिकृतत्वात् । एतदेव ध्वनयन् वक्ष्यति । **प्रातिशाख्येष्विवेत्यादिना ।** तदेतत्सर्वं मनसि निधायाह । **वैदिका लौकिकाश्चेति ।** अग्निमीळ इत्यादयो गौरश्व इत्यादयश्चेत्यर्थः । ननु चिदानन्दस्वरूपब्रह्मातिरिक्तस्य सर्वस्य लोकपदार्थत्वात् वेदस्यापि तदन्तर्गतत्वात् भेदेनाभिधानं न युक्तमिति चेन्न 'ब्राह्मणा आगता वसिष्ठोऽप्यागत' इतिवत् तेषां प्राधान्यख्यापनाय तथोक्तेः । तेषां प्राधान्यं यत्नेन सर्वत्रापभ्रंशपरिहाराद्बोध्यम् । लौकिकानां तु याज्ञे कर्मण्येव तत्परिहारः । अत एव प्राग्वैदिका इत्युक्तिरत्र । अन्यथा ब्राह्मणवसिष्टन्यायप्रवृत्तिसूचनाय विपरीतोक्तिरुचितेति ध्येयम् । यद्वा प्रयोज्यप्रयोजकवृद्धव्यवहारे प्रयुज्यमानानामेव लौकिकत्वमिति दर्शयितुं तथोक्तेः । एवञ्च वेदमात्रान्तर्गतकर्णेभिर्देवासोगृभ्णामित्येतत्परता वैदिकशब्दस्य । तदन्यपरता लौकिकशब्दस्य । तैस्तद्व्यवहारदर्शनात् । प्रातिशाख्येष्विवेत्यादिवक्ष्यतो मूलकृतोऽयमेव पक्षोऽभिमतः । कर्णेभिरित्यादीनामतत्वेन तद्वत्सामान्यविशेषभावाभावेन तन्न्यायाविषयत्वात् । अत एव प्राक्

---

१. म.भा. द्वितीयभागः पृं.सं. ५२८ ।

**विषय इति स्थितम् । वेदे भवा वैदिकाः, अध्यात्मादित्वाट्ठञ् । एवं लोके भवा लौकिकाः । यद्वा लोके विदिता लौकिकाः ''तत्र विदित'' इति वर्त्तमाने ''लौकसर्वलोकाट्ठञ्'' । प्रातिशाख्येष्विव न वैदिकैकदेशमात्रमिह विषयः । न वा व्याकरणान्तरेष्विव छान्दसपारित्याग इति सूचयितुमुभयोपादानम् ।। इति विषयनिरूपणम् ।। स्यादेतत्, गौरित्यादिः शब्द इह विषयः । तत्र च गकार औकारो विसर्गश्च घटकः । व्युत्पाद्यते तु डोप्रत्ययसुप्रत्ययवर्दिशादिकम् । न चैतद्गौरिति बोधे भासते । तथा चार्थान्तरता ।**

---

तदुक्तिः । भाष्यसम्मतस्तु आद्यपक्ष इति बोध्यम् । अपभ्रंशवारणायाह । **साधव इति ।** उक्तयुक्तेरिति भावः । इह व्याकरणे । सप्तमी वक्ष्यमाणरीत्या । एवमग्रेऽपि । स्थितं भाष्यादौ । विशेषसूत्रसत्वा-दाह । **यद्वेति ।** विदिताः प्रसिद्धाः । वैदिकशब्दे तु सैव व्युत्पत्तिः । यद्यपि गाव्यादयोऽपि लोके विदितास्तथापि न ते सर्वलोकविदिताः । प्रतिदेशं भिन्नत्वात्तेषाम् । लोकशब्दस्य च लोकत्वावच्छिन्ने शक्तित्वेन सर्वत्र सत्वात् । सङ्कोचे मानाभावात् । एवञ्च साधव इत्यस्यानुक्तावपि न दोषः । तल्लाब्धार्थस्य स्पष्टतया कथनपरमेव वा तदिति भावः । **तत्रेति । सूत्रघटकं ठञ् इत्यस्येति ।** सूत्रेण ठञिति शेषः । **वैदिकैकदेशमात्रमिति ।** षष्ठीतत्पुरुषः कर्मधारयो वा । कर्णेभिरित्यादीत्यर्थः । अत एवैकदेशेत्युक्तिरग्रे छान्दसेत्युक्तिश्च । **व्याकरणान्तरेष्विवेति ।** कलापादिप्रोक्तेष्वित्यर्थः । **परित्याग इति ।** इहेत्यस्यानुषङ्गः ।

इति श्रीमत्पायगुण्डोपना[१]मकवैद्यनाथभट्टकृतायां कौस्तुभव्याख्यायां प्रभाख्यायां
विषयनिरूपणं समाप्तम्

## १.२.४ शब्दस्य शब्दबोधे भानाभानविचारः

अथ व्याकरणस्य साक्षात् परम्परया च प्रयोजनं वक्तुमुक्तविषयकेऽत्रार्थान्तरादि निरसितुं तच्छङ्कते । **स्यादेतदित्यादिना चेदित्यन्तेन ।** तत्र लौकिके आह । **गौरित्यादिरिति ।** इह व्याकरणे । सम्बन्धिनोऽधिकरणत्वविवक्षायां[२] सप्तमी । **विषय इति ।** शास्त्रजन्यज्ञानविषयस्यैव शास्त्रविषयत्वादपदं न प्रयुञ्जीतेति निषेधात् प्रयुक्तानामेवान्वाख्यानाच्च विशिष्ट एवैतस्य विषय इत्यर्थः । तत्र च = गौरिति शब्दे च । गकारः व्यञ्जनमात्रं विवक्षितम् । इदमेव बोधयितुं कारोक्तिः । तस्य तत्रैव विधानात् । **घटक इति ।** अर्थबोधोपकारकत्वेनावयवत्वेन च प्रविष्ट इत्यर्थः । **व्युत्पाद्यते त्विति ।** [३]व्याकरणेनेति शेषः । आदिनेत्संज्ञालोपादिपरिग्रहः । **न चैतदिति ।**

---

१. पायगुण्डोपाध्यायेति घ पा० ।

२. विवक्षया इति घ पा० ।

५०. व्याकरणे चेति घपा० ।

**गौरित्यनेन परिनिष्ठितेन सह डोप्रभृतीनां सम्बन्धविशेषस्तत्प्रतिपत्त्युपयोगिता चास्तीति तद्व्युत्पादनमिति चेत् ? न, शब्दान्तरव्यावृत्तस्य सम्बन्धस्य उपयोगस्य च दुर्वचत्वात् द्रव्यगुणादिपदार्थानामिह व्युत्पाद्यतापत्तेश्च । अस्ति हि तेषां गौरित्यनेन वाच्यवाचकभावादिः सम्बन्धः । अत एव शाब्दबोधे गवि समवायेन गोत्वमिव शक्त्याख्यसम्बन्धेन शब्दो विशेषणतया भासते । चाक्षुषबोधेऽपि व्यक्त्या स्मारितः शब्दो विशेषणमित्यभ्युपगमः । आह च —**

---

[1]न हि डोप्रत्ययादिकं गौरिति शब्दश्रवणे विषयो भवतीत्यर्थः। **तथा चेति।** ततश्चेत्यर्थः। यतस्तस्य तत्राविषयत्वमत इति यावत्। अनाकाङ्क्षितार्थसिद्धिरर्थान्तरता। एतामुद्धरति। **गौरित्येति।** नन्वित्यादिः। **सम्बन्धेति।** प्रतिपाद्यप्रतिपादकभावाख्येत्यर्थः। **तत्प्रतीति।** [2]परिनिष्ठितप्रतिपत्त्युपयोगिता च तेषामित्यर्थः। व्युत्पादनद्वारेति भावः। यद्यपि तत्प्रतिपत्तिर्लोकादितः, तथापि शास्त्रप्रक्रियाज्ञानपूर्वकत्वाज्ज्ञानस्यैव धर्मजनकत्वमिति भावः। यद्वा तेषां साधुत्वेन या प्रतिपत्तिस्तदुपेत्याद्यर्थः। अपेक्षारूपोपयोगापेक्षया सम्बन्धोऽतिरिक्त इति भावः। **शब्दान्तरेति।** नानाजातीयेषु व्याकरणेषु सत्सु प्रक्रियान्तरस्थशब्देत्यर्थः। तथा चोपायानां तत्र तत्र भिन्नानामुक्तत्वादसाधारणसम्बन्धादेर्दुर्वचत्वेन कस्य व्युत्पादनमित्यत्र न विनिगमकमिति सा तदवस्थैवेति भावः। नन्वशोकवनिकान्यायेन तद्व्युत्पादनम्। किञ्चाव्यवहितोत्तरत्वनिवेशेन तादृशसम्बन्धादेरपि सुवचत्वमिति सा नैवात आह। **द्रव्येति।** तेषामपि परिनिष्ठितेन सह सम्बन्धादिसत्वादनेन शास्त्रेण द्रव्यादीनामपि व्युत्पादनस्य कर्तव्यतापत्तेरित्यर्थः। एवञ्च द्रव्यादीनां तन्त्रान्तरे निरूपितत्वादस्य शास्त्रस्य तदंशे नोपयोगोऽसाधारणो यथा तथा लोकतो वेदतश्च तत्प्रतिपत्तिरिति तदंशेऽपि तथेत्यस्य सर्वथा वैयर्थ्यापत्तिराद्यपक्षे। द्वितीये तु केवलतदापत्तिरिति भावः। तत्रादौ सम्बन्धसत्वमाह। **अस्ति हीत्यादि स्थितमित्यन्तेन।** आदिना लक्ष्यलक्षकभावादिग्रहणम्। सम्बन्धसत्वं पोषयति। **अत एवेति।** तेषां तैस्सह वाच्यवाचकभावादिसम्बन्धसत्वादेवेत्यर्थः। अस्याभ्युपगम इत्यत्रान्वयः। **शाब्द इति।** शाब्दबोधविषयभूतगोव्यक्तावित्यर्थः। भासत इत्यस्य तद्विषयकज्ञानविषयो भवतीत्यर्थः। भासत इत्यस्य विषयो भवतीत्यर्थे तु गोविषयकशाब्दबोधे इत्यर्थ इति तस्यैव भासत इत्यत्रान्वयेन यथाश्रुतमेव साधु। अत एवाग्रिमैकवाक्यता। **व्यक्त्येति।** ज्ञानद्वारेति भावः। **विशेषेति।** तत्वेन विषयो भवतीत्यर्थः। **अभ्युपगम इति।**

---

१. न तु इति घपा० ।

२. परिनिष्ठिते इति घपा० ।

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।। (वा.प. १-१२३)**
**ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।**
**तथैव सर्वशब्दानामेते पृथगवस्थिते ।। इति । (वा.प. १-५५)**

---

वैयाकरणानां सङ्गच्छत इति शेषः । शब्दार्थयोर्नित्यसम्बन्धादेकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकत्वादिति भावः । अत्र सम्मतिमाह । **आह चेति ।** हरिरिति शेषः । प्रत्ययः=विशिष्टज्ञानं, शब्दानुगमात् = शब्दविषयकत्वात् । इदमेव तदनुविद्धत्वम्[१] । (अत्र भा) सत इत्युक्तेः । अनुव्यवसायं प्रमाणं दर्शयत्युत्तरार्धेन । **अनुविद्धमति ।** अत्र केचित् । तत्र तत्वं च वस्तुतस्तत्पदबोध्यत-त्तदर्थविषयकज्ञानसामान्ये [२]यथाकथञ्चित्साक्षात्तत्तदर्थबोधकतत्तच्छब्दविषयकत्वमिति । अनुव्यवसाये व्यवसायद्वारा[३] तद्विषयशब्दविषयकत्वेऽपि उक्तरूपतत्वस्याभावादाह । **इवेति ।** यद्वा तत्र तत्वं ज्ञानमात्रे यथाकथञ्चित्तद्विषयकत्वम्, न तूक्तरूपमिति निर्विकल्पकानङ्गीकारे वक्ष्यमाणरीत्या प्रत्यक्षे तद्भानासम्भवः । अर्थज्ञानोत्तरं स्मृतस्य तस्य व्यवसाये भानासम्भवात् । अनुव्यवसायत्वे त्वेतद्भानं सूपपादमिति । व्यवसाये तत्वस्याभावादाह । **इवेति ।** यद्वा अनेनाभेदस्याध्यस्तत्वं सूचितम् । यद्वा भेदस्य प्रतिभासमात्रकल्पितत्वेनाध्यस्तत्वमभेदस्य व्यवहारिकत्वमुभयोरपि व्यवहारिकत्वं वाऽनेन सूच्यते । यद्वा घटं पश्येत्यादौ तत्वासम्भवादिवेत्युक्तम् । यद्वा प्रत्यक्षादौ तदसत्वादाह । **इवेति ।** इति बोध्यमित्याहुः । वस्तुतस्तु इवोऽवधारे । **इवौपम्ये पारिभवे ईषदर्थेऽवधार** इति कोशात् । स्पष्टं चेदं [४]**मञ्जूषादा**विति बोध्यम् । ननु घटादिपदानां तत्तदर्थशक्ततया तज्जन्यशब्दबोधे कम्बुग्रीवादिमदादि भासताम् । शब्दस्त्वशक्यत्वेन तथा तदनुपस्थितत्वात्कथं भासेत । अन्यथाऽतिप्रसङ्गापत्तेरत एवाह । **ग्राह्यत्वमिति ।** अयं भावः । यथा बहिर्द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्यालोकसहकृतचक्षुषः कारणत्वस्वीकारेणालोकस्यालोकत्वेन कारणत्ववत् द्रव्यत्वेन विषयत्वमपि, तथा घटादिशब्दानामपि ग्राह्यत्वग्राहकत्वे बौद्धस्यार्थस्य बौद्धेन शब्देनाविभागात्तन्मूलाभेदाध्यवसायेन शब्दानामपि ग्राह्यत्वग्राहकत्वे [५]बौद्धार्थाकारवृत्तौ जायमानायां स्वाकारस्यापि समर्पणमिति शब्दस्यापि तद्विषयता । एवमर्थेनापि स्वाकारसमर्पणे शब्दाकारस्यापि समर्पणमिति । **तथेति ।**

---

१. तदनुविद्धत्वम् इति क ख ग पा० ।

२. यथाकथञ्चित्तत्तदर्थबोधकतत्तच्छब्दानां साक्षादिषयकत्वमिति । घ पा० ।

३. व्यवसायविषयशब्दविषयकत्वेऽपि क ख ग प० ।

४. ल.मञ्जू बौद्धार्थवाच्यत्वनिरूपणे पृं.सं. ३४७ ।

५. शब्दादर्थाकारवृत्तौ इति क.ख.ग. पा० ।

**यत्संज्ञास्मरणं तत्र न तदप्यन्यहेतुकम् ।।**

**पिण्ड एव हि दृष्टः सन् संज्ञां स्मारयितुं क्षमः।। इति च । (भामती पृ.सं. २५४)**

**युक्तं चैतत्, गृहीतशक्तिकं प्रति शब्देनार्थस्येव अर्थेन शब्दस्यापि स्मरणे बाधकाभावात् । अत एव गोत्वस्येव गोशब्दस्यापि व्यक्तिविशेषणत्वाविशेषात्संसर्गोऽपि तादात्म्यमेवास्तु । एवं गोगुणादिभिरपि तदभिन्नाभिन्नस्य तदभेदादित्याशयेन ''अथ**

---

केचित्तु शब्दार्थयोर्भेद एवेति पक्षेप्यनुभवबलात् ज्ञानसामान्यसामग्र्या एव शब्दाभासकत्वकल्पनान्न दोषः । प्रत्यक्षे मूलोक्तं तु न युक्तम् । प्रागुक्तयुक्तेरित्याहुः । अन्ये तु सर्वशब्दानां तत्तच्छब्दरूपमेव प्रवृत्तिनिमित्तम् । निरुक्तोक्तेः । यद्वा स्वरूपं जात्यादि चेत्युभयं प्रवृत्तिनिमित्तमित्याहुः । वस्तुतो निर्विकल्पकाङ्गीकारात्तत्वस्य तादृशस्याङ्गीकाराच्च मूलं युक्तमेवेति बोध्यम् । एतेन ज्ञानं शब्दाननुविद्धमेव, अर्थज्ञानस्य वाचकशब्दाभावात् अर्थवाचकेनेति करणयुक्तेन घट इति जानामीति तद्व्यवहार इत्यपास्तम् । प्रत्यक्षे तदङ्गीकारे मानमाह । **यत्संज्ञेति ।** तत्र प्रत्यक्षे । **न तदिति ।** उपस्थितेनैव निर्वाहात् । तदाह । **पिण्डेति ।** हि यतः ।

## १.२.५ 'अथ गौरित्यत्र कः शब्द' इति भाष्यार्थनिरूपणम्

नन्वगृहीतशक्तिकस्य चाक्षुषे कथं तस्य तत्स्मारकत्वमत आह । **युक्तमिति ।** यस्य यथा शक्तिग्रहस्तस्य तथैव तदिति सर्वथा तं विना तन्नेति भावः । **नार्थस्येवेति ।** ज्ञानमात्रे दृष्टान्तः । यतः पदाच्छक्त्युपस्थितिरर्थात् स्मरणं । पदादपि स्मृतिरेवेति मते तु यथाश्रुतमेव साधु । अत एव चक्षुषा दृश्यमानमप्यज्ञातशब्दकं पदार्थं 'किमिदमिति न जानामि' इति व्यवहरन्ति । तदुपदेशे च 'ज्ञातमिद'मिति व्यवहारन्ति । शब्दस्य विशेषणत्वं पोषयति । **अत एवेत्यादि स्थितमित्यन्तेन । अत एवेति ।** यथाकथञ्चिदुपस्थितस्यार्थसम्बन्धित्वेन गृहीतस्य शब्दस्य ज्ञानमात्रे विशेषणत्वस्वीकारादेवेत्यर्थः । अस्य चाशङ्क्य[1] निराकृत इत्यत्रान्वयः । गोशब्दस्यापीत्यपिना गुणक्रियासमुच्चयः । द्वितीयापिना ताभ्यां द्रव्यस्य तादात्म्यरूपसंसर्गस्य समुच्चयः । एवेन प्रागुक्तसंसर्गव्यवच्छेदः । एवं = व्यक्तेर्जातिवच्छब्दगुणक्रियाभिस्तादात्म्याङ्गीकारवत् । **गोगुणेति ।** गोसम्बन्धिगुणादिभिरपि सहेत्यर्थः । शब्दस्येति शेषस्तादात्म्यमेवास्त्वित्यनुषङ्गः । आदिना जातिक्रिये । तदविशेषणत्वादुक्तहेत्वभावादत्र अन्यहेतुमाह । **तदभिन्नेति ।** शब्दाभिन्नव्यक्त्य-भिन्नगुणादीनां शब्दाभेदादित्यर्थः । अयं च न्यायो मूलकारणोपादानककार्योपादानके कार्ये

---

१. संशङ्क्य इति घ पा० ।

**गौरित्यत्र कः शब्दः'' इति प्रघट्टके द्रव्यगुणकर्मसामान्यैः सह शब्दस्याभेदो भाष्यकृद्भिराशङ्क्य निराकृतः। तत्र निराकरणग्रन्थस्यायमाशयः - समसत्ताकभेदाभेदौ विरुद्धावेव। अन्यथा त्वदुक्तरीत्या सत्तागुणत्वाद्यभेदात्सुखदुःखस्वर्गनरकादेरप्यभेदापत्तौ प्रवृत्तिनिवृत्तिव्यवस्था न स्यात्, न स्याच्च भेदग्रहाद् भ्रमनिवृत्तिः। जातिव्यक्त्यादिसम्बन्धस्त्वतिरिक्त एवेति। एवमेव शब्देनापि**

---

मूलकारणोपादानकत्वस्यापि व्यवहारेण सिद्धः। यथा तन्मात्राद्युपादानकेऽपि प्रकृत्याद्युपादानकत्वमिति भावः। भाष्ये कर्मणो गुणतः प्राथम्येऽपि तन्त्रान्तरस्थक्रमेणाह। **गुणकर्मेति।** ननु शङ्कायास्तथाशयकत्वे कथं निराकृतिरत आह। **तत्रेति।** प्रघट्टक इत्यर्थः। तयोर्मध्ये इत्यर्थो वा। **निराकरणेति। नेत्याह। द्रव्यं नाम तदि**त्यादेरित्यर्थः। **समसत्तेति।** सत्ता तावत् द्विविधा पारमार्थिकी व्यवहारिकी च। प्रातिभासिकी त्वनतिरिक्ताऽतिरिक्ता वेत्यन्यदेतत्। तत्रान्त्ययाऽत्मप्रपञ्चयोर्भेदः आद्यया तु तयोरैक्यम्। एवं स्थिते समयैकयैव सत्तया धर्मिणि भेदाभेदौ विरुद्धौ। शास्त्रं च शब्दश्रुत्यर्थमन्त्यया शब्दार्थादेर्भेदं परिकल्प्य प्रवृत्तम्। तयैव चेदभेदस्याप्यङ्गीकरणं तर्हि घटत्वादिसामान्यस्य घटाद्यभेदादुक्तरीत्या घटमानयेति वाक्यं, तथापि बोधे घटाद्यानयनप्रसङ्गः। यद्वा समा तुल्या अन्यूनानतिरिक्ता सत्ता स्थितिर्ययोर्भेदाभेदयोस्तौ तथा गुणक्रिययोः तद्रूपेण मिथो भेदस्यातिरिक्तस्य तदन्यतरमात्रवृत्तित्वेनैकाधिकरणत्वात्समसत्ताकत्वं, तथा तयोरभेदस्यापि एवमन्यत्रापीति तयोर्विरोधः। गवि द्रव्यत्वपृथिवीत्वयोः परस्परं तत्वेन भिन्नयोर्जातित्वेन योऽभेदस्तस्यतथात्वेन द्रव्यत्वपृथिवीत्वयोरुभयोरङ्गीकार एवमन्यत्रापीत्यर्थः। तदभिन्नेति न्यायस्तु यः स्वाभिन्नद्वारकः स्वस्वरूपानुगमस्तद्विषयकः। यथा परमकारणकार्योपदानके परमकारणाभेदः। अत एव सुखदुःखयोः स्वर्गनरकयोः कुण्डलकण्टकयोश्च नैक्यम्। यदन्तःकरणावयवपरिणामः सुखं तदन्यावयवपरिणाम एव दुःखमित्यङ्गीकारात्। स्वर्गकुण्डलारम्भकयागसुवर्णावयवानुगमस्य नरककटकयोरभावाच्चेति बोध्यम्। अन्यथा = तयोरविरोधे। **त्वदुक्तेति।** उक्तन्यायेनेत्यर्थः। **सत्तेति।** इत्यादिरूपसामान्यधर्माणामैक्यादित्यर्थः। किञ्च सुखाभिन्नात्यन्ताभिन्नस्य दुःखादेस्सुखत्वम् एवं सर्वत्र बोध्यम्। **भेदग्रहादिति।** तत्प्रयोज्यभ्रमनिवृत्तिरुक्तरीत्या न स्यादित्यर्थः। तस्याविरोधित्वात्तज्ज्ञानस्यैव सर्वत्र निवर्तकत्वात्। भेदाग्रहादिति त्वपाठः। ननु सर्वथा भेदे तादात्म्यस्यासम्बन्धत्वात्कथं निर्वाहोऽत आह। **जातीति।** आदिना गुणगुणिनोः क्रियातद्वतोस्सङ्ग्रहः। **अतिरिक्त इति।** समवायाख्य इत्यर्थः। इतिराशयसमाप्तौ। वस्तुतस्तु शब्दार्थयोरविभागादेव प्रोक्तरीत्या प्रश्नः, तस्य तत्वाशङ्का च तद्विविक्तशब्दतत्वाज्ञानात्। गुणादेः शब्दत्वाशङ्का तु, गुणसमूहो द्रव्यमिति भाष्यादेर्गोशब्दे

**सहास्त्येव सम्बन्धो द्रव्यादीनामिति स्थितम्। अस्ति च द्रव्यादिव्युत्पादनस्य प्रकृते उपयोगोऽपि। अस्मिन्नर्थेऽयं साधुरित्यर्थविशेषं पुरस्कृत्यैव साधुत्वस्य वक्तव्यत्वात्। अत एव वाजिनि दरिद्रे च क्रमेण अश्वशब्दो अस्वशब्दश्च साधुर्व्युत्क्रमेण त्वसाधुरिति सिद्धान्तः।**

**ननु यथा वैशेषिकादीनामेतच्छास्त्रसिद्धमेव प्रकृतिप्रत्ययविभागमुपजीव्य पदार्थव्युत्पादनाय प्रवृत्तिः, प्रकृतिप्रत्ययादिविचारस्तु क्वाचित्कः प्रासङ्गिकस्तथेहापि लोकप्रसिद्धं दर्शनान्तरसिद्धं च पदार्थजातमुपजीव्य शब्दमात्रव्युत्पादनं न विरुध्यते इति चेत्? अस्तु तावदेवं, तथापि डोप्रभृतिव्युत्पादनं निष्फलमेव; इति चेत्? अत्रोच्यते, गौस्तिष्ठति देवदत्तः पचतीत्यादयः शृङ्गग्राहिकया तावज्जन्मसहस्रेणापि बोधयितुं बोद्धुं**

---

तत्समूहाभेदे तत्समूह्यभेदोऽपि सिद्ध एवेत्याशयेन। उत्तराशयस्तु गोशब्दस्यानुद्भूतभेदावयवानुगत-समूहेनैव तादात्म्यं, न तु तदवयवैरपीतीति बोध्यम्। उपसंहरति। **एवमेवेति।** जातिव्यक्त्यादीनामतिरिक्तसम्बन्धवदेवेत्यर्थः। **सम्बन्ध इति।** अतिरिक्त इत्यादिः। वाच्यवाचकभावादिरित्यर्थः। आदिना गुणादिपरिग्रहः। **स्थितमिति।** भाष्य इति शेषः। एवं सर्वथा प्रागुक्ततादात्म्यभिन्नशब्दार्थसम्बन्धसत्वं निश्चित्योपयोगं स्पष्टयति। **अस्ति चेत्यादि सिद्धान्त इत्यन्तेन।** प्रकृते = शब्दप्रतिपादने। अत एव = तथा साधुत्वस्य वक्तव्यत्वादेव। सिद्धान्त इत्यत्रान्वयः। अस्वशब्दे बहुव्रीहिः। पूर्वनिपातप्रकरणस्यानित्यत्वात्तस्यापूर्वनिपातः, योगरूढोऽयम्। **त्वसाधुरिति।** जातिप्रवृत्तिनिमित्तक इत्यर्थः।

## १.२.६ येन सास्नलाङ्गूलेत्यादिभाष्यार्थनिरूपणम्

एवं समर्थितं द्वितीयदोषं खण्डयति। **नन्वित्यादि प्रथम चेदित्यन्तेन।** आदिना स्थान्यादेशादिपरिग्रहः। एवमग्रेऽपि। **दर्शनान्तेति।** न्यायशास्त्रादिसिद्धं चेत्यर्थः। जातं = तत्समूहं। मात्रपदेन तेषामेव व्युत्पादनं तेषामपि वा व्युत्पादनमिति पक्षद्वयनिरासः। **न विरुद्ध्यत इति।** अर्थान्तरताया निरस्तत्वादिति भावः। अत एवाङ्गीकारेण समाधत्ते। **अस्त्विति।** डोप्रभृतीनामशब्दतया तद्व्युत्पादनस्यैवं सत्यप्रसङ्ग एवेति परमदोष इत्याशयेन स्यादेतदिति पूर्वपक्षमुपसंहरति। **तथापीति। निष्फलमेवेतीति।** तेषां तदघटकत्वेन तदसम्बन्धित्वेन तदप्रतिपादकत्वाल्लोकवेदतस्तज्ज्ञानादुक्तरीत्या तदप्रसङ्गाच्चेति भावः। परमार्थतो वाक्यस्यैव शब्दत्वमित्याशयेन विशिष्टोल्लेखः। **शृङ्गेति। पर्यायार्हर्णोत्पत्तिष्वि** (पा०सू० ३-३-१११) ति

**चाशक्याः, आनन्त्यात्। अतः प्रकृतिप्रत्ययविभागकल्पनारूपो लघुभूत उपायः समाश्रीयते लिपिवत्। आरोपित एव च तत्र सम्बन्धः। प्रसिद्धो हि स्थूलारुन्धतीशाखाचन्द्रादिन्यायो लोके, पञ्चकोशावतरणन्यायश्चोत्तरमीमांसायाम्। तात्पर्यविषयाबाधाच्च प्रामाण्यम्। एषैव ह्यर्थवादेष्वपि गतिः। आत्मवपोत्खेदनप्रभृतीनां बाधेऽपि**

---

स्त्रियां भावे ण्वुच्। तथा शृङ्गग्रहणपूर्वकबोधनविषयकन्यायेनेत्यर्थः। यथा शृङ्गं शृङ्गं गृहीत्वा वदति इयं मदीयेयं मदीया गौरिति तथेति भावः। तावत् आदौ, यद्वा समासघटकं जन्मविशेषणं, शास्त्रोक्तेति तदर्थः। **बोद्धुमिति।** एतेन साक्षात्परम्परकर्तृत्वे विरोधाभावेऽपि निरस्ते। नन्वेवमपि तयोस्सम्बन्धस्यैवाभावात्कथमुपायत्वं न स्यादत आह। **आरोपित इति।** तद्द्वयमपि कल्पित एवेत्यर्थः। अत एव चसङ्गतिः। तत्र = तयोः। यद्वा कल्पिते प्रकृत्यादौ। नन्वेवं कुत्र दृष्टमत आह। **प्रसिद्ध इति।** हि यतः। स्थूलारुन्धतीति सामानाधिकरण्योदाहरणम्। का अरुन्धतीति प्रश्नात्। **शाखाचन्द्र इति** वैयधिकरण्योदाहरणम्। कुत्र चन्द्र इति प्रश्नादिति भावः। **न्याय इति।** इत्यादिविषयकन्याय इत्यर्थः। आदिना स्थूलं देवदत्तगृहमित्यादे रेखागवयन्यायस्य च परिग्रहः। **पञ्चकोशेति।** यथा तत्रान्नप्राणमनोविज्ञानानन्दमयात्मकपञ्चकोशव्युत्पादनं वास्तवपुच्छब्रह्मबोधनाय तथा प्रकृत्यादिव्युत्पादनं वास्तवमुख्यस्फोटबोधनाय। नायं भृगुवल्लीस्थः। तत्र चतुर्णामेवोपायस्य उक्तत्वात्। किन्त्वानन्दवल्लीस्थः। तत्र पञ्चापि उपाया एवोक्ताः। अत एव ब्रह्म पुच्छं प्रतिष्ठेति पृथगुक्तं तत्रेति भावः। कोशो भाण्डभूः, अवतरणं निकृष्टादुत्कृष्टप्राप्तिः। **मीमांसायामिति।** प्रसिद्ध इत्यनुषङ्गः। अत एव चसङ्गतिः। यद्वा चेन [१]भूषणाद्युक्तपूर्वमीमांसीयदृष्टन्तसमुच्चयः। नन्वेवं बाधितार्थबोधकत्वेनाप्रामाण्यापत्तिरत आह। **तात्पर्येति।** तद्विषयस्यार्थस्याबाधादित्यर्थः। चस्त्वर्थे। अस्यावश्यकत्वमाह। **एषैवेति।** उक्तैवेत्यर्थः। हिर्हेतौ। **आत्मेति।** ''स आत्मनो वपामुदखिनत्[२]। तामग्नौ प्रागृह्णात्'' इति श्रुत्या होमार्थं निजवपोत्खेदनं कृत्वा तया होमः कृतो ब्रह्मण इति प्रतिपादितम्। तत्रात्मवपोत्खेदने मरणस्यैव सम्भावितत्वात् बाधितार्थबोधकत्वेन श्रुतेरप्रामाण्यप्रसङ्गमाशङ्क्य तात्पर्यविषयीभूताजयागप्रशस्त्यबोधकत्वेन नाप्रामाण्यमिति समाहितं पूर्वतन्त्रे। उक्तसमाधिं

---

१. 'कल्पितानामुपाधित्वं स्वीकृतं हि परैरपि' इति कारिकाव्याख्यावसरे निरूपितम्। पृ.सं. ३२२।

२. उदखिदत् इति घ पा० तै.ब्रा.।

**तात्पर्यविषयीभूतस्य प्राशस्त्यस्याबाधितत्वात्। उक्तं च हरिणा –**

**उपायाः शिक्षमाणानां बालानामुपलालनाः।**
**असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ॥ इति ॥ (वा.प. २-२३८)**
**उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः। इति च।**

**अत एव हि केचित्सुप्रत्ययं विदधति, अपरे सिम्। तथा सूत्ररीत्या 'पाठितम्' इत्यत्र इतप्रत्ययः, भाष्यरीत्या तप्रत्ययः, सूत्ररीत्या तावानिति वतुप् ''डावतावर्थ-वैशेष्यात्'' इति वार्त्तिकोक्तरीत्या डावतुरिति दिक्।**

---

दृढयति। **उक्तश्चेति।** शिक्ष्येति पाठे बालविशेषणम्। शिक्षेति पाठे तु तेषामुपाया बालानामित्याद्यन्वयः। उपलालना इत्यस्य भवन्तीति शेषः। न तु वास्तवा इति भावः। तदेवाह। **असत्य इति।** आरोपित इत्यर्थः। लोकानां तत्तच्छब्दजन्यबोधानुपयोगित्वात्तेषां तत्वम्। सत्यं विशिष्टशक्त्या बोधकं पदादि। तदुक्तं साधकान्तरमाह। **उपेयेति।** 'पञ्चकोशादिवत्तस्मात्कल्पनैषा समाश्रिते'त्यस्य पूर्वार्धे उपेयप्रतिपत्त्यर्थेत्यन्त एकोऽन्वयः। ननु प्रत्यक्षस्य स्फोटस्य श्रवणादितोऽपि बोधसम्भवान्न शास्त्रं तदुपायोऽत आह। **उपाया इति।** यत इति शेषः। उपायस्योपायान्तरादूष-कत्वात्। तथा चादृष्टं भवतीति भावः। शास्त्राप्रामाण्यप्रसङ्गनिरासाय चेदं तेनोक्तम्। **अत एव** तेषामव्यवस्थितत्वादेव। हिश्चार्थे। निश्चये वा। **त्रेत प्रत्यय इति।** सेट्कः प्रत्यय इत्यर्थः। पक्षद्वयेऽपीति भावः। **तप्रत्यय इति।** [1]भाष्यकृता हि निष्ठायां सेटीत्यस्याभावे इडागमे पाठीतमिति स्यादित्याशङ्क्य णेरध्ययन[2] इत्यत्र णेरिति योगं विभज्य ण्यन्तान्निष्ठायां इण्नेत्येवं तद्व्याख्याय ततो द्वितीयं योगं विभज्य पाठक्रमादिति न्यायेन वृत्तं वृत्तेरेव निष्ठायां णिलोपो नान्यस्येत्येवं व्याख्याय ततोऽध्ययने स चाध्ययन एव नान्यत्रेति व्याख्यानेन तत्प्रत्याख्यानं सिद्धान्तितम्। **सूत्रेति।** तथेत्यस्यादावनुषङ्गः। इति इत्यत्रोक्तरीत्येति। **यत्तदेतेभ्यः परिमाणे वतुबि**त्यत्रेति शेषः। एवञ्चासर्वनाम्न (६-३-९१) दृग्दृश्यवतु(६-३-८९)ष्विति वतुप इदंकिमो(६-३-९०)रित्यत्रा-नुवृत्तस्य अनुवृत्तिर्न कार्येति भावः। इदं च प्रमाण इत्यनुवृत्त्यैव सिद्धे परिमाणग्रहणफलादिपरम्। एवञ्च शास्त्रजन्यज्ञाने वैजात्यं कल्प्यते। तस्य च शरीरादिशुद्धौ यथाकथञ्चित्स्वर्गमोक्षादौ च हेतुत्वम्। न चालीकया प्रकृतिप्रत्ययादिकल्पनया कथं वास्तवस्फोटबोधः। तस्यालीकत्वा-सिद्धेरन्यत्रोक्तत्वात्। रेखागवयन्यायेन तत्सम्भवाच्चेति दिक्। तदाह। **इति दिगिति।**

---

१. निष्ठायां सेटि (६-४-५२) सूत्रे 'अवचने हि णिलोपे इट्प्रतिषेधप्रसङ्ग' इति वार्तिके निरूपितम्। (म.भा. पञ्चमो भागः पृं.सं. ३१७)।

२. णेरध्ययने वृत्तम् (७-२-२६) इति सम्पूर्ण सूत्रम्।

**एतेन 'पचति' इत्यादौ आदेशैः स्मार्यमाणा लडादयो बोधका इति वदन्तः परास्ताः। तथा हि, वृद्धव्यवहाराच्छक्तिग्रह इति निर्विवादम्। ततश्च प्रयोगसमवायिनामेव तिप्रभृतीनां शक्तिः सिध्यति, न त्वलौकिकानां लादीनाम्। एवं डुपचष् डुकृञ् इत्यादिप्रकृतयो विच्क्विबादिप्रत्ययाश्च न शक्ताः किन्तु अपाक्षीत् पपाच पापच्यते करोति चर्करीति इत्यादिप्रयोगसमवायिनः अपाक् पपाच् इत्यादय एव।**

**श्रूयमाणेन डुपचष्प्रभृतीनां स्मरणं तेनार्थबोध इति चेत् ? न, लाघवाद्व्यवस्थितत्वाच्च श्रूयमाणानामेवार्थसम्बन्धकल्पनात्, औत्प्रेक्षिकस्य स्मरणकल्पने गौरवात्,**

---

## १.२.७ नैयायिकमीमांसकोक्तलकारार्थखण्डनम्

प्रसङ्गादन्यमतं खण्डयति। **एतेनेति।** उपायानामव्यवस्थितत्वाल्लट्चङादीनां नानात्वेनेत्यर्थः। **आदेशैः** तिबादिभिः। **वदन्तः** नैयायिकाः। अयं हि तेषां भावः। तिबादयो न बोधकास्तेषां बहुत्वेन शक्त्यानन्त्यापत्तेः। एधाञ्चक्रे इत्यादावादेशभूतलुगादेरभावरूपस्य बोधकत्वासम्भवाच्च। आदेशानां भिन्नतया मिथो व्यभिचाराच्च। **लः कर्मणी**त्याद्यनुशासनाननुगमाच्च। न ह्यादेशेषु अर्थबोधकमन्यदनुशासनमुपलभामहे। किन्तु तैः स्मृता लादयस्तथा लत्वस्य जातिरुपतया शक्ततावच्छेदकत्वौचित्यात्। अव्यभिचाराच्च। न च भू ल इत्यतोऽपि बोधः स्यादिति वाच्यम्। बोधे भवतीति समभिव्याहारस्य कारणताया भूति वेत्यतो बोधापत्तिवारणाय तवाप्यावश्यकत्वेनादोषात्। तदानुगुण्याच्चेति। **ततश्चेति।** व्यवहाराच्चेत्यर्थः। चस्त्वर्थे। **प्रयोगेति।** प्रयोगे समवायेन स्थितानामित्यर्थः। एकदेशिनेत्यादिवत्प्रयोगः। यद्वा मत्वर्थीयघटितोत्तरपदकसप्तमीतत्पुरुषः। यद्वा प्रयोगं समवयन्ति गच्छन्तीति **सुप्यजाता (पा०सू० ३-२-७८)** वित्यादिना णिनिः। एवव्यवच्छेद्यमेवाह। **न त्वलौकीति।** प्रयोगाघटकानामित्यर्थः। एवं पचतीत्यादौ प्रत्ययांशे तेषां शक्तिं संसाध्य प्रकृतेरेकरूपत्वात्तामुपेक्ष्याख्याते प्रकृतिभेदस्थले प्रकृतिषु कृत्प्रत्ययेषु चोक्तार्थमतिदिशति। **एवमिति।** वृद्धव्यवहारात्तेषां शक्तत्ववदित्यर्थः। आदेशिनां मध्ये प्रथमोपात्तत्वेनादौ ण्वुलादीनां वक्तुमुचितत्वेऽपि तत्रादेशस्य भावरूपत्वात्तदुक्तिसम्भवेऽपि विजादौ तस्य सम्भव एव नेति स्थानिन एव तत्वं वाच्यमिति तदुक्तिखण्डनायाह। **विजिति।** इत्यादय एव शक्ता इत्यस्यानुषङ्गः। आदिना क्विबाद्यन्तलिडादयः। एवं स्फुटत्वाय। एतेनेत्यनेनोक्तमेव सविस्तरं सहेतुकं च वक्तुं प्रकृत्यादौ शङ्कते। **श्रूयेति।** जातावेकवचनम्। श्रूयमाणैरपागित्यादिभिरित्यर्थः। अत एवाग्रे तथोक्तिः। **लाघवादिति।** आदेशिस्मरणकल्पनाभावप्रयुक्तलाघवादित्यर्थः। **व्यवस्थितत्वाच्चेति।**

**अव्यवस्थापत्तेश्च। 'पचति देवदत्तः', 'पचन्तं तं पश्य' इति तिपूशतृभ्यां स्मारितस्य लट एव बोधकत्वे एकत्र आधाराधेयभावेन संसर्गेण देवदत्ते अख्यातार्थो यत्नोविशेषणभितरत्र तु अभेदेन संसर्गेण कृदर्थः कर्त्ता विशेषणमिति त्वत्सिद्धान्तभङ्गापत्तेश्च। एतेन कर्त्रधिकरणे आख्यातार्थत्वं कर्तुर्निरस्य जञ्जभ्यमानाधिकरणे ज्ञानजर्थत्वं स्वीकुर्वन्तो मीमांसका अपि परास्ताः।**

---

प्रयोगान्तर्गततया निश्चितत्वाच्चेत्यर्थः। उक्तमेवार्थं व्यतिरेकमुखेन दृढयति। **औत्प्रेक्षिकेति।** काल्पनिकस्य स्थानिन इत्यर्थः। **गौरवादिति।** उपस्थितं परित्यज्यानुपस्थितकल्पनाल्लादेर्वाचकत्वं तेषां स्मारकत्वं चेत्यतश्च गौरवादित्यर्थः। **अव्यवस्थेति।** तेषामपि तत्तद्वैयाकरणैः स्वेच्छया भिन्नभिन्नानामभ्युपगमात् कः शक्तः को नेत्यव्यवस्थापत्तेश्चेत्यर्थः। सर्वेषां तेषां शक्तत्वे तु गौरवं व्यभिचारश्चेति भावः। लकारमविदुषामपि बोधान्न लत्वं शक्ततावच्छेदकम्। न च तिङ्क्षु शक्तिभ्रमात्तत एव बोधः। पदतदर्थघटितशक्तेर्भ्रमस्य दुरुपपादत्वात्। भ्रमत्वे मानाभावाच्चेत्यपि बोध्यम्। दोषान्तरमाह। **पचतीति।** तं देवदत्तम्। श्येति इत्यत्र। एवेनादेशव्यावृत्तिः। एकत्र = तिङन्ते। कृतेस्तिङर्थत्वेन तदविशेष्यात्वात्। इतरत्र = कृदन्ते। आश्रयस्य कृदर्थत्वेन तदविशेष्यत्वात्। **विशेषणमिति।** देवदत्त इत्यनुषज्यते। **भङ्गापत्तेश्चेति।** वैलक्षण्यानुपपत्तेरिति भावः। **एतेनेति।** लट एव बोधकत्वेऽर्थभेदे प्रमाणाभावेनेत्यर्थः। **कर्त्रधिकरणे इति।** तत्र हि आख्यातार्थो न कर्ता, तथा सति तस्य प्राधान्यापत्तेः। किन्तु फलावच्छिन्नव्यापारानुकूलव्यापारः कृत्यादिरूपः, स च व्यापारत्वेनैव वाच्यः। अत एव जानाति यतते रथो गच्छतीत्यादावाश्रयत्वे न लक्षणा। व्यापारान्तराननुभवेनाश्रयत्वस्यैव तिङर्थत्वाङ्गीकारात्। तस्याप्यसत्वभूतस्यैव तिङोक्त्या व्यापारत्वात्। कालान्वयो धात्वर्थव्यापारे उक्तरूपे आख्यातार्थेऽपि वाऽनभिहित इत्यस्याबोधिते कर्त्रादावित्यर्थः। बोधश्च शक्त्याक्षेपाल्लक्षणया वा। एवञ्च सुकर आश्रयबोधस्तादृशं तमादायैव च सामानाधिकरण्योपपत्तिः। सङ्ख्यान्वयश्च तत्रैव। लः कर्मणीत्यादिकमपि तथार्थानुशासनमेव। यद्वा फलमेव धात्वर्थस्तदनुकूलो व्यापारो भावना सैव चाख्यातार्थः। फलमात्रमेव भावनेति तु **राणकः**[1]। सर्वथाऽप्याख्यातार्थभावनाविशेष्यक एव बोधो न प्रथमान्ताद्यर्थविशेष्यकः। प्रथमान्ताद्यर्थः कर्ता तु आख्यातार्थभावनायां प्रकारतयाऽन्वेतीत्युक्तम्। **जञ्जभ्येति।** तत्र हि

---

१. राणकः इति तन्त्रवार्तिकव्याख्यायाः न्यायसुधाया नामान्तरम्। 'विधिर्वा संयोगान्तरात्' (३-४-१९) इति कर्त्रधिकरणे निरूपितम्।

**यत्तु तैरुक्तं शानजंशे ''कर्त्तरि कृत्'' इति व्याकरणं शक्तिग्राहकमस्तीति ; तदप्यापाततः, कृद्वाक्यशेषोऽयमनिर्दिष्टार्थेषु ण्वुलादिषूपतिष्ठते न तु शत्रादिषु स्थान्यर्थेन निराकाङ्क्षत्वादिति वक्ष्यमाणत्वात्। आकाङ्क्षितविधानं ज्याय इति न्यायात्। अन्यथा क्रियमाण इति कर्म्मणि शानचो दौर्लभ्यापत्तेश्च। किञ्च ''कर्त्तरि कृत्'' इति यत्कर्तृग्रहणं तदेव ''लः कर्मणि'' इत्यत्राप्यनुवृत्तं, तत्कथं कृतां तिङां च वैलक्षण्यम् ? अन्यलभ्यत्वादेरुभयत्र साम्यात्।**

**यत्तु नामार्थयोरभेद एव संसर्ग इति हि शानजादौ कर्त्ता वाच्य इत्युक्तम्, तत्तु पचतिकल्पं पचतिरूपं देवदत्त इत्याद्यनुरोधात्तिङ्क्ष्वपि तुल्यम्।**

---

**जञ्जभ्यमानो ब्रूयान्मयि दक्षक्रतू** इतीत्यत्र भावनाया लवाच्यत्वेन प्राधान्ये तस्या ब्रूधात्वर्थे कर्तृत्वासम्भवः। प्रथमान्तपदान्तरानुल्लेखेन तदसामानाधिकरण्यात्। विधौ लक्षणानङ्गीकाराच्च। नाश्रयस्य प्राधान्येन लाभः। अतोऽवश्यं प्राधान्याय शानजर्थः कर्तेत्युक्तम्। अपिर्नैयायिकसमुच्चायकः। तैर्मीमांसकादिभिः। लत्वेन[१] भावनाया लकारार्थत्वेऽपि शानच्त्वादिना तस्य कर्ताऽर्थ इत्याशयेनाह। **शानजांश इति।** तदप्येत्यपिः प्रागुक्तसमुच्चायकः। शेषोऽयं कर्तरि कृदिति योगः। इदमुपस्थितहेतुगर्भविशेषणम्। तेन परिभाषात्वसूचनद्वारा स्वातन्त्र्येणार्थादेशकत्वमस्य निरस्तम्। अत एवाह। **अनिर्दीति।** निषेधे हेतुमाह। **स्थान्यर्थेति।** भावनारूपेणेत्यर्थः। **निराकाङ्क्षत्वादिति।** तेषामर्थांश इति निर्दिष्टार्थकत्वमिति चाद्यन्तयोः शेष इति इत्यस्य, **वक्ष्येति**। तृतीये तत्सूत्रे। अत्र हेतुमाह। **आकाङ्क्षीति।** हेत्वन्तरमाह। **अन्यथेति।** न्यायानङ्गीकारेण निराकाङ्क्षत्वेऽपि विधान इत्यर्थः। इति इत्यत्र। उभयसाधारणं दोषमाह। **किञ्चेति।** यत इति शेषः। अपि**र्भव्यगेये**(पा०सू० ३-४-६८)ति सूत्रसमुच्चायकः। तथा च द्वयोर्योगयोस्तुल्ययोगक्षेमत्वम्। तत्र दोषान्तरं सूचयन्नत्र हेतुमाह। **अन्यलभ्येति।** प्रत्ययान्यप्रकृतिलभ्यत्वस्य भावनायामुभयत्र तुल्यत्वादित्यर्थः। आदिना लक्षणादिलभ्यत्वस्य विवरणदर्शनस्य च सङ्ग्रहः।

**नामार्थेति।** यत्त्वित्यादिः। हि यतस्तयोस्स एव संसर्ग इति अतः शानजादौ कर्ता वाच्यः। अर्थात्तेनाऽन्यथाऽनन्वयापत्तिरित्यर्थः। **तुल्यमिति।** तिङकयोस्तदन्तयोश्चानामत्वेऽपि

---

१. लेन इति घ पा०।

**तस्मात्पररीत्या न कश्चिच्छत्रन्तात्तिङन्ते वैषम्यहेतुः। अस्मद्रीत्या तु ''भावप्रधानमाख्यातं, सत्वप्रधानानि नामानि'' इति निरुक्तकारोक्तेः प्रत्ययार्थप्राधान्यमौत्सर्गिकं तिङ्षु त्यज्यते, 'प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्'' (पा०सू० १-२-५६) इति सूत्राच्च। शतृशानज्विधौ रूपब्विधौ च भाष्येऽपि स्फुटमेतत्। 'पाचको व्रजति' इतिवत् 'पचति व्रजति' इति प्रयोगोऽप्यत एव नोपपद्यते, पचतो रूपं पचन्ति रूपमित्यादौ रूपबाद्यन्ते द्विवचनादिकश्च न भवति। तस्मात्तिङ्षु कृत्सु च विशेषणविशेष्यभावव्यत्यासमात्रमस्तीति वक्ष्यते।**

---

अकरूपाद्यन्तप्रकृतिकसुबन्तयोर्नामत्वस्य सत्वेनाभेदान्वयस्य तुल्यत्वमिति भावः। उपसंहरति। **तस्मादिति। परेति।** नैयायिकमीमांसकेत्यर्थः। शत्रान्तात् = शत्राद्यन्तात्। **वैषम्येति।** अर्थेत्यादिः। नन्वेवं त्वन्मतेऽर्थवैलक्षण्येऽपि कथं बोधवैषम्यमत आह। **अस्मदिति।** भावप्रधानमिति पाठः। भावकालकारकसङ्ख्याश्चत्वारोऽर्था आख्यातस्य। तत्र भावः प्रधानम्। सत्ता द्रव्यं लिङ्गं सङ्ख्येति नामार्थः। तत्र द्रव्यं प्रधानमिति तद्भाष्यम्। **प्रत्ययार्थेति।** आश्रयादीत्यर्थः। **औत्सर्गिकमिति।** प्रायशो वर्तमानं न तु सार्वत्रिकम्। संख्यादौ व्यभिचारादित्यर्थः। हेतुगर्भमिदं विशेषणम्। तथा च तदनङ्गीकारेण तत्रापि त्याग इति भावः। नन्वेवमपि पाणिन्यसम्मतमिदमत आह। **प्रधानेति।** तत्प्राधान्यस्य सार्वत्रिकत्वे हि सूत्रकृत्तन्न खण्डयेद्यतस्तु तथाऽतस्तस्य व्यभिचरितत्वमेव तदभिमतमिति भावः। नन्वेवमपि भाष्याद्यसम्मतमिदमत आह। **शत्रिति।** तत्र हि **क्रियाप्रधानमाख्यात**मित्याद्युक्तमिति भावः। अपिना **कैयटादि**समुच्चयः। इष्टसिध्यनिष्टनिरासावपि स्वमते एवेत्यस्यावश्यकत्वमाह। **पाचक इत्यादिना। अत एवेति।** क्रियायाः प्राधान्यादेवेत्यर्थः। तद्वत्तत्कर्तृकव्रजनासम्भवादिति भावः। अस्य च स्थलत्रयेऽन्वयः। आश्रयस्य विशेष्यत्ववादिमते तु पदार्थैकदेशत्वाद्भेदसम्बन्धेनान्वयासम्भवेऽप्यभेदसम्बन्धेनान्वयसम्भवात्तद्वत्स्यात्। एवं नैयायिकमतेऽपि स्यात्। प्रथमान्तार्थस्य मुख्यविशेष्यत्वेन द्वयोः क्रिययोरनुकूलकृत्योराधारतया तत्रान्वयादिति भावः। **उपपद्यत इति।** पचिक्रियाकर्तृकभवनरूपेऽर्थे इत्यर्थः। तन्मते तूक्तरीत्या स्यात्। तत्तु नेष्टं, पचति व्रजतीत्यादेरपि तत्वापत्तेरिति भावः। **रूपबाद्यन्त इति।** अपादानस्याधिकरणत्वविवक्षायां सप्तमी न भवतीति प्रधानभूतक्रियाया असत्वभूतत्वात् तन्मते त्वाश्रयस्य प्रधानस्य सत्वरूपत्वात्स्यात्तदिति भावः। यथा तु स्वमते एकवचनं तथाऽन्यत्र स्पष्टम्। स्वमतमुपसंहरति। **तस्मादिति। कृत्सु चेति।** परस्परापेक्षयेति शेषः। कर्तृद्वाराऽऽधारस्यास्तीत्यत्रान्वयः। मात्रपदेनार्थान्तरनिरासः। **वक्ष्यत इति।** प्रथमे तृतीये बौद्धे।

**यत्तु भट्टैरुक्तं-कर्त्तरि यदेकत्वं तत्रैकवचनं तिबिति लादिविधेः ''द्व्येकयोः'' इत्यादेश्चैकवाक्यतया व्याख्यानान्न कर्तुर्वाच्यता सूत्रादायातीति, तदप्यापाततः। द्विवचनादिसंज्ञा ह्यादेशनिष्ठा, ततश्च तद्विधिना ''द्व्येकयोः'' इत्यस्य एकवाक्यता, न च तत्र कर्त्तरीत्यस्ति, यद् द्वित्वादिविशेषणतया कथञ्चिद्योज्येत। लविधितिबादिविध्योरप्येकवाक्यतास्तीति चेत् ? सत्यम्, वाक्यैकवाक्यता सा, न तु पदैकवाक्यता आदेशविधेर्लविधिलभ्यलकारानुवादेन प्रवृत्तेः। लविधौ कर्तृग्रहणम्। स च द्विवचनादिसंज्ञाविनिर्मुक्त एव। अत एव आदेशस्मारिता लकारा बोधका इति पक्षे एकत्वादिभानायाऽऽदेशा एव शरणीकर्तव्याः।**

---

[1]लादीत्यादिना तिबादिविधिः, इत्यादेरित्यादिना बहुषु बहुवचनमिति। एवञ्च कर्तुर्विशेषणत्वान्न वाच्यत्वसम्भव इति भावः। अपिः प्राग्वत्। हेत्वर्थकहिशब्दघटितमापातत्वे हेतुमाह। **द्विवचनेत्यादि योज्येतेत्यन्तेन।** न हि यत इत्यादौ योज्यम्। **तद्विधिना** तिप्तस्झीत्यादिना। **इत्यस्य** इत्यादिसाकाङ्क्षत्वात्तस्य। **एकेति।** पदेत्यादिः। **न च** न हि। तत्र = आदेशविधायके। यतः। कर्तरीति पदं। **द्वित्वादीति।** तन्निष्ठविशेष्यतानिरूपितप्रकारतयेत्यर्थः। कथञ्चिदित्यनेन गुणानां चेति न्यायविरोधः, संख्यायाः प्रकारत्वेनैव भानात्तथान्वयासम्भवश्च सूचितः। कश्चित्तदाश्रयमाह। **लविधीति।** लः कर्मणि, तिप्तसित्यादेरित्यर्थः। नन्वित्यादिः। अपिरुक्तयोस्तयोः समुच्चायकः। **सा** सा तु द्वितीया तयोरेकवाक्यता। तुरुक्तवैलक्षण्ये। न तु = न हि। हिना निषेधस्य तत्र हेतुत्वं सूचितम्। तत्सूचितं नञर्थे हेतुमाह। **आदेशेति।** लस्येत्यधिकृत्य तद्विधानादिति भावः। तुरुक्तवैलक्षण्ये। स च = लस्तु। **मुक्त एवेति।** द्व्येकयो(१-४-२२)रिति सूत्रोक्तक्रमेणैवमुक्तम्। तथा च तत्र द्व्येकयोरित्याद्युपस्थापकाभावात्तदभावात्कथं तस्य तद्विशेषणत्वम्। न चावान्तरवाक्यार्थे तत्रान्वितस्य तस्य तद्वाक्यैकवाक्यतायामावृत्त्या एकत्वादिविशेषणत्वमपीति वाच्यम्। आवृत्तौ मानाभावान्निराकाङ्क्षत्वाच्चेति भावः। वस्तुतत्वं वक्तुं नैयायिकादिमते प्रागुक्ते दोषान्तरं प्रतिपादयति। **अत एवेति।** लकाराणां द्विवचनादिसंज्ञारहितत्वादेवेत्यर्थः। **कर्तव्या इति।** तत्तच्छक्त्याश्रयत्वेनेत्यादिः। एवञ्चादेशानामेव तत्वेन लकाराणामतत्वेन तथान्वयासम्भवेन तथैवान्वयेन तथैकवाक्यत्वेऽपि तत्र तदभावेन कर्तरि लस्तद्गतैकत्वे तस्य तिबित्याद्यर्थाङ्गीकारेण तत्स्वीकारावश्यकत्वमित्युभयत्र तत्कल्पने गौरवं

---

१. इतः पूर्वं ''पश्च इति इत्येवमेव क्रमेण न तु विपरीतक्रमेण तथैवेष्टत्वात्। व्याख्यानेऽस्यान्वयः'' इति मातृकासूपलभ्यते। परन्त्विदं वाक्यमनन्वितमिव भाति।

**एवं पलादौ तिबादिद्वारकं लिडादिस्मरणं कल्प्यमिति महदेव गौरवम्। न च परम्परासम्बन्धेन पलेव बोधकः, वृत्तिशून्यत्वात्। अत एवापभ्रंशानां साधुस्मारकताभ्युपगमस्तवापीति दिक्।**

**तस्मात् ''पूर्वत्रासिद्धम्'' इत्यादौ यथा आहार्यारोपेणैव व्याख्यानं सर्वसंमतं तथा शास्त्रीयप्रक्रियायां सर्वत्र।**

**वस्तुतस्तु वाचकता स्फोटैकनिष्ठा। तत्र चाष्टौ पक्षाः-वर्णस्फोटः १, पदस्फोटः २,**

---

स्फुटमेवेति तेषामेव तथा तत्वमुचितमिति भावः। तत्रैव दोषान्तरमाह। **एवमिति।** उक्तगौरववदित्यर्थः। **परम्परेति।** स्वाश्रयाधारवाच्यत्वेन स्वस्थानिवाच्यत्वेन वेत्यर्थः। **अत एवेति।** वृत्तिशून्यत्वादेवेत्यर्थः। मूलमते मतद्वयस्यापि सत्वेनापिः पक्षे सम्यगेव। सिद्धान्ते त्वपिरेवार्थे गम इत्यग्रे योज्यः। **दिगिति।** तदर्थस्तु - न च व्याकरणभेदेन स्थानिभेदेऽपि तेष्वेकस्यैव शक्तिस्वीकारान्नानन्तशक्त्यापत्तिः। विनिगमनाविरहात्। न च वेदाङ्गतया पाणिनिबोधितस्थानिनामेव तत्वं, अन्याध्येतृणां बोध्यानापत्तेः। तेषामशक्तौ लक्षणापि दुर्वचा। किञ्च भू ल इत्यतो बोधापत्तिवारणाय समभिव्याहारकारणत्वकल्पनापेक्षया लाघवात् समभिव्याहारविषयवर्णेष्वेव शक्तिकल्पनोचिता। किञ्च स्मारकत्वे यन्मम शक्ततावच्छेदकं तत्तव स्मारकतावच्छेदकम्। येन केनचिद्रूपेण तत्वेऽतिप्रसङ्गात्। तथा च तद्धेतोरिति न्यायेन तेषां तत्वमेवोचितम्। पपाच इत्यादावनेकेषां तत्वापत्तिश्च। किञ्च प्रत्ययार्थः प्रधानमित्यस्य यत्र प्रत्ययस्य वाचकता तद्विषयकत्वेनादेशप्रसङ्ग एव कर्तरीत्यादेस्तद्विषयाद्धेतोरित्यर्थे न तिङ तत्, द्योतकत्वात्। अत एवार्थस्यान्यप्रमाणत्वादित्येवोक्तम्। न तु व्यभिचरितत्वादित्यप्युक्तम्। वस्तुतः स्थानिनां वाचकत्वमादेशानां वेत्यादिविचारो निष्फल एव। कल्पितवाचकत्वस्योभयत्र सत्वात्। एवञ्च व्याकरणभेदेन स्थानिनां भेदेऽपि न क्षतिर्लिपीनां भेद इवेति बोध्यमिति। तदेतद् ध्वनयितुं वस्तुतत्वं वस्तुतस्त्वित्यादिना कथयितुं च लिप्यादिदृष्टान्तान्यदृष्टान्तसहितमुपसंहरति। **तस्मादिति। आहार्येति।** बाधकालिकमिच्छाजन्यं ज्ञानं सः। बाधसत्वेऽपि तथाऽसत्तत्तद्धर्मप्रकारकधीरिति यावत्।

## १.२.८. अष्टविधस्फोटनिरूपणम्

**स्फौटैकेति।** तन्मात्रनिष्ठेत्यर्थः। **तत्र चेति।** स्फोटविषय इत्यर्थः। **तादृगिति।**

**वाक्यस्फोटः ३, अखण्डपदस्फोटः ४, तादृग्वाक्यस्फोटः ५, इत्थं पञ्च व्यक्तिस्फोटाः, वर्णपदवाक्यभेदेन त्रिविधो जातिस्फोट इति। तथा हि, किञ्चिद्वर्णव्यत्यासादिना शक्ततावच्छेदकानुपूर्वीभङ्गस्य प्रतिपदमौत्सर्गिकत्वात्तत्र च केनचित्क्वचित्प्रथमं शक्तिग्रहात्केन कस्य स्मारणमित्यत्र विनिगमनाविरहादृषभो वृषभो वृष इत्यादाविव कर् कार् कुर् चकर् इत्यादीनां प्रयोगसमवायिनां सर्वेषामेव वर्णानां तत्तदानुपूर्व्यवच्छिन्नानां वाचकतेति वर्णस्फोटपक्षः। कर्प्रभृतयो वाचका न वेति चेह विप्रतिपत्तिशरीरम्।। १।।**

---

अखण्डेत्यर्थः। जातेः सखण्डत्वाभावादाह। **त्रिविध इति।** ननु किं स्वरूपमेषां किमर्थं वाङ्गीकारोऽत आह। **तथा हीति।** वर्णं तु वाऽक्षर इति कोशात् किञ्चिदित्यत्र न दोषः। समासेन निर्वाह इति केचित्। आदिना देशादिपरिग्रहः। भङ्गो भेदः। नानार्थकहर्यादौ प्रातिपदिके एकमात्रार्थैकैकशब्दादौ च व्यभिचारादाह। **औत्सर्गिकेति। तत्र** च उत्सर्गतः प्रतिपदं तद्भङ्गे च सति। यद्वा तेषां मध्ये च। **केनचित्** पुरुषेण। **क्वचित्** तत्रैव प्रयोगान्तर्गतकर्शब्दादौ, **प्रथमं** वृद्धव्यवहारकाले आवापोद्वापाभ्यां। **केन** प्रयोगसमवायिकर्प्रभृतिना। **कस्य** तदन्तर्गतकर्प्रभृतेः। एकतरपक्षपातिनी युक्तिर्विनिगमना। ननु चरमवर्ण एव वाचकत्वशक्तिः। शक्तेर्व्यासज्यवृत्तित्वे मानाभावात्। पूर्वपूर्ववर्णानुभवजन्यसंस्काराश्चरमेणार्थधीजनने सहकारिण इति तन्मात्रोच्चारणादर्थधीरिति चेत्तदेवं वर्णस्फोटवादिमतान्तरखण्डनायाह। **सर्वेषामेवेति।** अयं भावः। अर्थबोधानुकूला शक्तिर्वर्णसमूह एव पर्याप्ता। न प्रत्येकम्। तथा सति प्रत्येकमर्थवत्वात्प्रातिपदिकत्वाद्यापत्तौ धनं वनमित्यादौ नलोपाद्यपत्तेः। किञ्च प्रत्येकं शक्तिमत्वे प्रत्येकं वर्णादर्थबोधापत्तेः। किञ्च द्वितीयादिवर्णोच्चारणानर्थक्यापत्तेः। न च प्रत्येकं वर्णैरर्थस्मरणमात्रं जन्यते। चरमेण पुनः स्पष्टं जन्यते। प्रत्यक्षे इव स्मरणेऽपि वैजात्यस्वीकारे बाधकाभावादिति वाच्यम्। प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात् गुरुत्वाच्च। न च तेन सम्बन्धेन प्रत्येकावृत्तेः कथं समूहवृत्तित्वम्। द्वित्वादिवदुपपत्तेरिति। **तत्तदिति।** अन्यथा रामोऽस्तीति वाच्ये राम् इत्यतो घटितोत्तरमकारोच्चारणेऽर्थबोधापत्तितः तादृशानुपूर्व्या एव शक्ततावच्छेदकत्वमुचितम्। अत एव च सरो रस इत्यादावविशेषो न। अन्यान्यप्रादुर्भावादिति वत्साधुरयं प्रयोगः। तथा च वर्णस्फोट इत्यस्य प्रकृतिप्रत्ययानां पृथक् वाचकत्वमित्यर्थ इति फलितम्। प्रकृतिप्रत्ययाभ्यां तत्तद्रूपेण पृथगर्थोपस्थितिरिति यावत्। तदाह। **कर्प्रभृतय इति।** अत्र निषेधकोटिः परेषां विधिकोटिरस्माकम्। यद्यपि उक्तरीत्या तेषां तादृशानां वाचकत्वे सिद्धे

**'रामं रामेण रामाय हरये हरौ हरीन्' इत्यादौ परिनिष्ठिते रूपे कियानंशो द्रव्यादिवाचकः कियांश्च कर्मत्वादेरित्यस्य विनिगन्तुमशक्यतया राममित्यादिपरिनिष्ठितं पदमेव वाचकं कर्मत्वादिविशिष्टस्येति पदस्फोटपक्षः ।। २ ।। दधीदं, हरेव, विष्णोव, इत्यादावपि विनिगमनाविरहतौल्याद्वाक्यमेव विशिष्टार्थे शक्तमिति वाक्यस्फोटः ।। ३ ।। एकः पट इति वदेकं पदं वाक्यं वेत्यबाधितप्रतीतेर्वर्णातिरिक्तमेव पदं वाक्यं वा अखण्डं**

---

तत्समभिव्याहाररूपपदस्यापि तत्वं सिद्धमेव । अन्यथोक्तदोषापत्तिस्स्फुटैव । अत एव तादृशानुपूर्व्या एव शक्ततावच्छेदकत्वमित्युक्तम् । तथापि **सुप्तिङन्त**मिति परिभाषितपदस्य वाचकत्वं स्वीकर्तॄणां मतमाह । **राममित्यादि ।** प्रथमादिना स्वार्थलिङ्गपरिग्रहः । द्वितीयादिना संख्यापरिग्रहः । व्याकरणभेदेनादेशभेदात्संहितावशात्प्रकृतिप्रत्ययभेदानवगमाच्च प्रत्येकं ताभ्यामर्थानुपस्थितेर्विशिष्टस्यैव शक्तिः । अन्यथा घटेनेत्यत्र घट् इति प्रकृतिरेनेति प्रत्ययो, घटे इति प्रकृतिर्नेति प्रत्ययो वेत्यादिप्रकारेण विनिगमकाभावादनन्तशक्ततावच्छेदककल्पनापत्तेः । तत्तदजानतां बोधानापत्तेश्च । न च राम इत्यादौ अमभावेन प्रकृतिसत्वेन च तत्प्रतीत्याऽन्वयव्यतिरेकसत्वाद् राममित्यादौ प्रकृतेरेव द्रव्याद्यर्थोऽमः कर्मत्वादीति किमनेन पदस्फोटेनेति वाच्यम् । दधि मध्वित्यादावमभावेन कर्मत्वबोधानापत्तेः । किञ्च आद्यपक्षे हि प्रकृतिप्रत्ययाभ्यां तत्तद्रूपेण स्वस्वार्थोपस्थितिः, अत्र तु न तथा । किन्तु समुदितस्य, वस्नसादौ, समुदायस्यैव विधानेन प्रकृतिप्रत्ययसंमोहेन तद्विभागस्य सर्वथा ज्ञातुमशक्यत्वेन तथावश्यकत्वात् । एतेन वैयाकरणैर्विभागो राममित्यादौ सुज्ञेय इत्यपास्तम् । अवैयाकरणानां प्रत्येकं तदज्ञानेऽपि समुदायव्युत्पत्तिमात्रेण बोधाच्च । अतोऽयमावश्यक इति भावः । उक्तरीत्या सुप्तिङन्तचयरूपवाक्यस्यापि वाचकत्वमावश्यकमित्याह । **दधीदमिति ।** अत्र **अकः सवर्णे** (६-१-१०१) इत्याद्येकादेशे सति न तद्विभागः सुज्ञानः । तथा च प्रागुक्तरीत्या स्पष्टं प्रत्येकपदाज्ञानेऽपि समुदायशक्तिज्ञानाच्छाब्दबोधात्समुदाये एव विशिष्टशक्त्यावश्यकत्वमिति भावः । इदानीमखण्डपक्षद्वयमाह । **एक इत्यादि ।** अबाधीत्यनेन तस्या भ्रमत्वनिरासः । **वर्णातीति ।** अवयवादवयविनोऽनतिरेकेण वर्णरूपसमूहातिरिक्तमित्यर्थः । वर्णशब्दे अर्श आद्यच् । एतेनाद्यभेदः[1] सूचितः । पदस्यापि तत्वाभावादाह । **वाक्यं वेति ।** अखण्डं प्रकृतिप्रत्ययादिशून्यम् । अनेन [2]द्वितीयतृतीयभेदः सूचितः । अस्य नित्यत्वे सदाऽभिव्यक्त्यादिवा-

१. आद्यपक्षतो भेदः इति घ पा० ।

२. द्वितीयतृतीयपक्षतो इति घ पा० ।

**वर्णव्यङ्ग्यम्। एकत्वप्रतीतिरौपाधिकीति चेत् ? पटेपि तथात्वापत्तेः।। कः पदार्थोसाविति चेत् ? भावः। भावविशेषेषु क्वान्तर्भवतीति चेत् ? त्वत्परिभाषितेषु द्रव्यादिषु मान्तर्भूत्। नह्येतावता प्रमाणसिद्धं प्रत्याख्यातुं शक्यते। अनियतपदार्थवादे गौरवमिति चेत् ? व्यक्तीयत्ता तवापि नास्ति। उपाधीयत्ता तु सर्वैः सुवचा। भावत्वाभावत्वाभ्यां नित्यत्वानित्यत्वादिना वा विभजनात्। भावत्वविभाजकोपाधयस्तु घटविभाजकोपाधिवदेवाऽनावश्यकाः। अस्मिंश्च पक्षद्वये वर्णा अप्यनावश्यकाः। नन्वनुभवसिद्धास्ते इति चेत् ? व्यञ्जकध्वनिविशेषोपहितस्फोट एव ककाराद्यात्मना**

---

रणायाह। **वर्णव्यङ्ग्यमिति।** [१](अत एव न वर्णवैयर्थ्यमिति भावः।) न चानुपूर्वीविशेषविशिष्टवर्णानामेव पदादिव्यञ्जकत्वमवश्यं वाच्यम्। अन्यथा सरो रस इत्यादावर्थविशेषप्रतीत्यनापत्तेः। एवञ्चानुपूर्वीविशेषविशिष्टानां तेषामेव वाक्यत्वोपपत्तावतिरिक्ततत्कल्पनाऽसङ्गता। प्रतीतेरौपाधिकत्वेनाप्युपपत्तेरिति वाच्यम्। सन्निवेशविशेषविशिष्टतन्त्वादीनामेव पटत्वाद्युपपत्तावतिरिक्ततत्कल्पनाभावापत्तेः। यत्तु विशिष्टशक्तिग्रहे पदशक्तिग्रहः कारणम्। प्रत्येकपदशक्तिग्रहाभावे वाक्यार्थबोधस्याजायमानत्वात्। तत्सत्वे चापूर्ववाक्यश्रवणेऽपि तस्य जायमानत्वादिति। तन्न। वाक्यशक्त्याग्रहे तदभावादेवाद्ये तदभावोपपत्तेः। प्रत्येकपदशक्तिग्रहभावेऽपि विशिष्टे विशिष्टशक्तिग्रहेण जायमानबोधस्य त्वन्मतेऽभावापत्तेश्च। एवञ्च तत्सत्वे स जायत एवेति सिद्धमिष्टम्। अत एव समुदायव्युत्पत्त्या समुदायार्थबोधेऽपि व्याकरणव्युत्पत्तिं विना पदविभागसामर्थ्याभावोऽनुभवसिद्धः सङ्गच्छत इति यत्किञ्चिदेतत्।

परः शङ्कते। **एकत्वेति।** एवमग्रेऽपि। **औपाधिकीति।** जात्यादिनिबन्धनेत्यर्थः। चेन्नेति पाठः। चेदित्येव पाठेऽग्रेऽऽपत्तिरिति पाठः। **पदार्थोऽसौ** पदरूपो वाक्यरूपो वा स्फोटः। **विशेषेषु** द्रव्यादिषु। निर्धारणसप्तमी। **एतावता** तत्रानन्तर्भावमात्रेण। **सिद्धं** स्फोटरूपं वाक्यम्। मेयसिद्धेर्मानाधीनत्वात्। ननु तत्र घटत्वादेरनुगतस्य सत्वेन तत् सुवचत्वं, तत्प्रकृते कथमतः सुवचत्वे हेतुमाह। **भावेति।** आदिना निरवयवत्वसावयवत्वपरिग्रहः। एतेनात्र पक्षे कथं विभाग इति शङ्का निरस्ता। नन्वेवमप्यग्रे उपाधीयत्ताऽपि दुर्वचेत्यत आह। **भावेति।** द्रव्यत्वादय इत्यर्थः। **पटविभाजकोपेति।** नीलपटत्वादिस्तत्तत्पटत्वं वेत्यर्थः। एवञ्चाखण्डपदवाक्यस्फोटौ सिद्धाविति भावः। अत्रैव पक्षान्तरमाह। **अस्मिंश्चेति। वर्णा अप्येति।** व्यञ्जकरूपा इत्यादिः। अपिः प्रागुक्तोपाधिसमुच्चायकः। **अनुभवेति।** तत्तद्रूपेण प्रतीतेरिति भावः। **व्यञ्जकध्वनीति।**

---

१. ( ) एतच्चिह्नान्तर्गतः ख घ मातृकायामुपलब्ध अधिकः पाठः।

**व्यवह्रियते इत्यभ्युपगमात्। भाट्टमते तारो मन्दो गकार इतिवत् अद्वैतसिद्धान्ते विषयसंबन्धजन्यवृत्तिवैचित्र्येण व्यङ्ग्ये स्वरूपसुखे वैचित्र्यवच्च। अत एव**

---

मध्यमपदलोपिसमासपूर्वकषष्ठीतत्पुरुषपूर्वकतृतीयातत्पुरुषः। व्यञ्जकगतविशेषोपहितो ध्वनिगत-विशेषोपहितश्चेत्यर्थः। ततश्च तद्धर्मास्तत्र आरोप्यन्त। अयं भावः। तत्तद्वर्णव्यञ्जकत्वा-दिनाभिमतवायुसंयोगनिष्ठतत्तद्वर्णजनकताद्यवच्छेदवैजात्यमादायैवोदात्तादिव्यवहारवत् कत्वादिव्यवहारोऽपि। एवञ्च व्यञ्जकनिष्ठवैजात्यमेव परम्परासम्बन्धेन स्फोटवृत्तिकत्वादिबोध्यम्, तादृशसम्बन्धः एव च तत्र कत्वादिग्रहे प्रकारतावच्छेदकतया भासते। स एव वास्यवृत्तिनियामक इति नातिप्रसङ्गः। तस्य चाभिव्यञ्जका नानाजातीया वायुसंयोगाः। तत्र तत्तद्वायुसंयोगेनाभिव्य-क्तस्फोटानामभिव्यक्तेः क्षणिकत्वेऽपि जन्यत्वपक्ष इव पूर्वपूर्वसंस्कारसहकृतश्रोत्रेण वर्णसमुदा-यग्रहणवदेव ग्रहणं बोध्यम्। बोधकारणतावच्छेदकं च घत्वेनाभिव्यक्तस्फोटाव्यवहितोत्तर-टत्वेनाभिव्यक्तस्फोटत्वमेव। परेषामिवास्माकमपि तदर्थज्ञापकत्वज्ञानमपि चरमवैजात्यविशिष्टता-दृशस्फोटश्रवणे एवेत्येकवर्णविकलश्रवणे न बोधापत्तिः। यद्वा वर्णस्थलेऽपि दोषेण वर्णाग्रहणेऽनुभवसिद्धगृह्यमाणताकतत्तद्ध्वनिनिष्ठवैजात्यमेव परम्परया तद्वृत्तिकत्वादि, स च नित्यः, उत्पत्त्यादिप्रतीतिस्तु व्यञ्जकनिष्ठस्य ध्वनिनिष्ठस्य वोत्पत्त्यादेः परम्परया वर्णवृत्तित्वात्तामादाय। अत एव न भ्रमत्वं, साक्षात्सम्बन्धांशे तु लाघवाद्भ्रमत्वं सोऽयमित्यत्र व्यक्त्यभेदांशे परस्य भ्रमत्ववत्। न चैवं ककारटकारयोरैक्यापत्तिर्भिन्नप्रतीत्यभावापत्तिश्चेति वाच्यम्। व्यञ्जकविशिष्टयोर्भेदेन दोषाभावात्। विशेष्यांशमादायाभेदस्त्विष्ट एव। तत्प्रतीतिस्तु नापाद्या, उपाध्यनालिङ्गितवर्णप्रतीत्यभावात्। तद्वक्ष्यति। **अत एव वाचस्पतीति। तार इति।** वायुनिष्ठतारत्वमन्दत्वादेर्यथा वर्णेष्वारोप इति भावः। [१]**भामत्यां** देवताधिकरणे स्पष्टतरमिदम्। **अद्वैतेति।** विषयबाह्येन्द्रियाणां मिथो यः सम्बन्धस्संयोगादिस्तज्जन्यं यत् वृत्तिवैचित्र्यं तेनेत्याद्यर्थः। अन्तःकरणस्य मूलावच्छिन्नं चैतन्यं प्रमाता, मध्यावच्छिन्नं चैतन्यं प्रमाणं, अग्रावच्छिन्नं चैतन्यं वृत्तिः। विषयसुखनिरासाय स्वरूपपदं। ब्रह्मस्वरूपसुख इति तदर्थः। अत एव तन्नित्यमेकं विषयसुखं स्रगादिविषयसम्पर्केण सत्वावच्छिन्नान्तःकरणे चेतनप्रतिबिम्बः। अत एव तस्य ज्ञानत्वमनित्यत्वं च। सैव वृत्तिरिति भावः। अत एव = अतिरिक्तवर्णाभावादेव। वस्तुतः

---

१. 'किमात्मकं पुनःशब्दमभिप्रेत्येदं शब्दप्रभवत्वमुच्यते' इति शङ्कभाष्याव्याख्यावसरे भामत्यां निरूपितम्। (भाम. पृ.सं. ३२३) कृ.अका.

**वाचस्पतिमिश्रास्तत्त्वबिन्दौ ''वस्तुतः ककारादतिरिच्यमानमूर्त्तेर्गकारस्याभावात्'' इति स्फोटवादिमतमुपन्यास्थत्। यथा वा अखण्डेष्वपि ऋकारादिषु वर्णेषु वर्णान्तरसमानाकारैकदेशावभासः, तथाऽत्र पक्षे वर्णावभासोऽपि भविष्यति। उक्तं च बोपदेवेन —**

**शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम्।**
**औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत्॥ इति॥ (कविकल्पद्रुमे)**

---

परमार्थतः। स्यादेतदनवयवमेव वाक्यं वाचकमित्युक्त्वा, वर्णा एवानुभूयन्ते न तदतिरिक्तं पदादीत्याशङ्क्य, पदं वाक्यमिति चानुसंहारबुद्धावभिन्नस्य वस्तुन उपारोहात्तदतिरिक्तमिति समाधाय, नेयमभिन्नबुद्धिर्नानावर्णगोचरा एकत्वनानात्वयोरेकत्रासमवायात् इति तदुपपाद्य, न चावर्णात्मनोऽतत्समवायिनो वा वाक्यस्य कुतस्तदुपरागवती प्रख्येति वाच्यम् तदतिरिच्यमानमूर्तीनां परमार्थसतां वर्णानामभावादित्यादि तत्र तैरुक्तम्। एको घट इत्यादिनोक्तेऽखण्डपक्षे एव व्यञ्जकीभूतवर्णाभावे अस्मिंश्चेत्याद्युक्तपक्षीयदृष्टान्तापेक्षया दृष्टान्तान्तरकथनेन पक्षान्तरमाह। **यथा वेति।** अयं चाखण्डपदस्फोटपक्षे दृष्टान्तो, न तादृशवाक्यस्फोटपक्षे। तत्र हि एकाक्षरपदेष्वनुभूतकत्वादेस्तत्रारोपः, वाक्यं तु नैतादृशमनुभूतम्। सजातीये एवारोपो न विजातीय इति तस्यैव वाक्येऽप्यारोप इति दूर्वचमिति कश्चित्। वस्तुतस्तु अर्थाध्याहारादिस्थले एकपदात्मकवाक्यस्यापि सत्वेन तस्य चैकाक्षरत्वस्यापि सत्वेन वाक्यस्फोटेऽपि तद्वदारोपसम्भवेन वर्णावभाससम्भवः। अत एव सामान्योक्तिरिति बोध्यम्। तथाऽत्र पक्षे = अखण्डपक्षद्वये व्यञ्जकवर्णानङ्गीकारपक्षे। **उक्तं चेति।** अन्यत्रान्यधर्मावभासांशेऽव्यवहितपक्षद्वयोक्ते वस्तुतो व्यञ्जकवर्णाभावे च सम्मतिरियमिति कश्चित्। वस्तुतो यद्यप्ययं श्लोको जातिस्फोटप्रतिपादको शक्तत्व इत्यादेरुक्तत्वात्। तथा हि। सन्त्येव वर्णा अनुभूयमानत्वात्। अन्यथा योऽयं गः सोऽयं ह इत्यापत्तेः। स्फोटस्यैक्यात् गोऽयं न ह इत्यनापत्तेश्च। किन्तु न वाचका गौरवात्। **आकृत्यधिकरणन्यायेन** जातेरेव वाच्यत्ववत् वाचकत्वस्यापि युक्तत्वाच्च। 'इदं हरिपदं' इदं हरिपदमियं प्रकृतिरियं प्रकृतिरित्याद्यनुगतप्रतीत्या हर्याद्युपस्थितित्वावच्छेदेन हरिपदज्ञानत्वादिना हेतुत्वात्तदवच्छेदककोटिप्रविष्टतया जातिविशेषस्वीकारस्यावश्यकत्वात्। वर्णानुपूर्व्यैव प्रतीतिकारणत्वयोर्निर्वाहस्तु न, घटघटत्वयोरपि संयोगविशिष्टमृदा आकारादिभिश्चान्यथासिद्ध्यापत्तेः[1]। तस्या अपि कालभेदेन पुरुषभेदेनानन्तत्वाच्च। तस्याः शक्ततावच्छेदकत्वे गौरवाच्च। अत एव पद्ये

---

१. अन्यथासिद्धेः इति घ पा०।

**भर्तृहरिरप्याह –**

**पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।**
**वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥ इति। (वा.प. १.७३)**

**तस्मादखण्डं पदं वाक्यं वेति ॥ ५ ॥ पञ्चापि व्यक्तिस्फोटावान्तरभेदाः। जातिस्फोटवादिनस्तु घोत्तरटत्वादिकं शक्ततावच्छेदकतया आद्यपक्षत्रयेऽपि यथायथं**

---

लाघवमित्युक्तम्। तस्माज्जातिरेव वाचिका तादात्म्येनाऽवच्छेदिका च। निरवच्छिन्नैव वा शक्तता। जातेरेकत्वेनानुगमकाकाङ्क्षाया अभावात्। सा च व्यक्तिवत् ज्ञातैव वाचिका। नन्वेवं सरो रस इत्यादौ जात्योः सत्वाविशेषादर्थबोधभेदो न स्यादत आह। **औपाधिको वेति।** वा त्वर्थे। उपाधिरानुपूर्वीविशेषस्तद्विशिष्टवर्णा एव च जातिविशेषस्याभिव्यञ्जकाः आकारविशेष इव घटत्वादेरिति भेदः कारणीभूतज्ञानस्येति नातिप्रसङ्गः। उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टान्तमाह। **वर्णानामिति।** प्रतिपादितमिदमनुपदमेव। तथाप्यत्र पक्षेऽपि सुयोज इति सर्वत्र सम्मतिरियम्। तथा हि। शक्यत्व इत्यादेस्तदवच्छेदकत्व इत्यर्थः इति तत्सम्भवः। अत एव भर्तृहरिरपीप्यपिसङ्गतिः। अखण्डपदवाक्यस्फोटयोः पक्षत्रयोक्तयोः सत्वे सम्मतिमाह। **भर्त्रिति।** पदे = पचतीत्यादौ। न वर्णा विद्यन्ते नातो वर्णसमूहः पदं। तत्र दृष्टान्तव्याजेनाह। **वर्णेष्विति।** अकारादिवर्णेषु प्रतीयमाना अप्यवयवा यथा वस्तुतो न तथेत्यर्थः। न चेत्यत्रेवेति पाठस्तु सुगम एव। एवं वाक्येऽप्याह। **वाक्यादिति।** पदानामपि वाक्यादत्यन्तं प्रविवेको भेदो नास्तीत्यर्थः। अखण्डत्वरूपधर्मैक्यात् पदवाक्ययोरत्यन्तभेदो नास्तीति यावत्। उपसंहरति। **तस्मादिति।** वाक्यं वेत्यस्य वाचकं सिद्धमिति शेषः।

## १.२.९ जातिस्फोटनिरूपणम्

नन्वेवं विजातीयवायुसंयोगेष्वेव कत्वादिकमस्तु। तेषां च विजातीयानामेवास्तु श्रवणं वाचकता च। यद्वा विजातीयध्वनिनिष्ठमेव कत्वादिकं, तेषामेव श्रवणं वाचकता चास्तु। मास्त्वतिरिक्तः स्फोट इत्यत आह। **जातीति।** अयं भावः। बहूनां वायुसंयोगानां ध्वनीनां वा न वाचकत्वम्। गौरवात्। एको गकार एकं पदमित्यादिप्रतीत्यनुरोधेन तस्यातिरिक्तस्यावश्यकत्वाच्च। शृणोमीत्याद्यनुरोधेनातिरिक्तस्य श्रोत्रग्राह्यस्यावश्यकत्वाच्च। प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वाच्च। न चैवमपि वायुसंयोगादिना सर्वोपपत्त्या वर्णैक्यपक्षाङ्गीकारात्तस्यैव

**वाच्यम् । अन्यथा सरो रस इत्यादावर्थविशेषप्रतीत्यनापत्तेः । तच्च उपाधिरूपम् । उपाधिश्च परम्परासंबद्धा जातिरेव । सा च सर्वाधिष्ठानब्रह्मस्वरूपात्मिका । तथा च शक्यांश इव शक्तांशेऽपि न्यायसाम्येनाकृत्यधिकरणरीत्या ब्रह्मतत्त्वमेव तत्तदुपहितं वाच्यं वाचकं च । अविद्याविद्यकधर्मविशेषो वा जातिरिति पक्षे तु सैव वाचिकाऽस्त्वित्याहुः ।। ८ ।।**

---

तत्वमस्त्विति वाच्यम् । घटाकाशमठाकाशादिवदुपाध्यालिङ्गिताया एव तत्प्रतीतेरभावेनौपाधिको भेद इत्यस्य दुर्वचत्वेन वर्णानन्त्यस्यावश्यकत्वात् । सोऽयमित्यादिप्रत्यभिज्ञा तु साजात्यनिबन्धना । न चैवं पदादीनां शक्तिग्रहे आनन्त्यव्यभिचारौ । आनुपूर्व्या तु न निर्वाहः । उक्तोत्तरत्वादिति वाच्यम् । शक्यतावच्छेदकजातिवच्छक्ततावच्छेदकजातेरप्यङ्गीकारेणादोषात् । स च प्रागुक्त एव । न च क्रमिकवर्णसमुदायस्य यौगपद्यासम्भवेन तत्र जातिर्दुरुपपादा । प्रागुक्तरीत्यैकबुद्धिविषयीकृते तत्सम्भवात् । तस्माद्बहुनां वर्णानां वाचकत्वे वर्णसमुदायरूपपदतत्समूहरूपवाक्ययोस्त-दतिरिक्तयोर्वा तत्वे गौरवात् तद्गतजातिरेव तथा । तत्र वर्णगता जाती रामायेत्यादौ रोत्तरात्वमोत्तरात्वादिरूपा शक्ततावच्छेदकतया पराभिमता, तथा घटेनेत्यादिपदगता घोत्तरटत्वतदुत्तरनत्वादिरूपा तदवच्छेदकतया तदभिमता, एवं वाक्यवृत्तिरपीति अन्त्ययोरतिरिक्ताखण्डत्वेनैवेष्टसिद्धौ तन्निष्ठप्रागुक्तरूपजातिसत्वेऽपि तस्याः स्फोटत्वे मानफलयोरभावादाह । **आद्ये पक्षत्रयेऽपीति ।** अपिर्मिथः समुच्चायकः । अत एव यथायथमित्युक्तम् । अन्यथा = तस्य तत्वानङ्गीकारे । तच्च = घोत्तरटत्वादिकं च । नन्वेवमुपाधिस्फोटसिद्धावपि न जातिस्फोटसिद्धिः । किञ्च तस्य तत्वमपि दुर्वचमत आह । **उपाधिश्चेति । परम्परेति ।** स्वाश्रयघटितत्वेनेत्यर्थः । समवायादेरसम्भवात् । अन्यथा तस्य वर्णवृत्तित्वेऽपि समुदायावृत्तित्वादवाचकत्वेन स्फोटत्वासिद्धिरिति भावः । ननु जातेः किं स्वरूपं यद्रूपोऽयमुपाधिरुक्तोऽत आह । **सा चेति ।** जातिश्चेत्यर्थः । प्रकृतमाह । **तथा चेति ।** तस्य तत्वावश्यकत्वे चेत्यर्थः । शक्यशक्तोभयसमुदायापेक्षयांशत्वं बोध्यम् । अस्य च न्यायसाम्येनेत्यत्रैवान्वयः । **न्यायेति ।** लाघवावश्यकत्वादियुक्तीत्यर्थः । तत्तदुपहितमित्यनेन भेदाप्रतीतिर्निरस्ता । **आविद्यकेति ।** अविद्यया कल्पितेत्यर्थः । तान्त्रिकव्यवहार्यत्वेनाभिमत इति यावत् । तुना एतत्पक्षयोः स्वानभिमतत्वं सूचितम् । केचित्तु जातेः शक्ततावच्छेदकत्वेनाशक्तत्वेऽपि प्रागुक्तरीत्यङ्गीकारेण तत्र स्फोटव्यवहारः, शक्यतावच्छेदके विषयतया शक्तेरिव आश्रयतया शक्ततावच्छेदकेऽपि सत्वादित्याहुः ।

**अष्टावप्येते पक्षाः सिद्धान्तग्रन्थेषु तत्र तत्रोपनिबद्धाः। तथा हि, स्थानिवत्सूत्रे ''सर्वे सर्वपदादेशाः'' इतिभाष्यग्रन्थः। पद्यतेऽर्थोऽनेनेति अर्थवदिह पदं न तु सुप्तिङन्तमेव। तथा च ''एरुः'' इत्यस्य तेस्तुरित्यर्थ इति टीकाग्रन्थश्च वर्णस्फोटेऽनुकूलः। तथा स्थान्यर्थाभिधानसमर्थस्यैवादेशत्वमिति स्थानेऽन्तरतमपरिभाषयैव ''तस्थस्थमिपाम्'' इत्यादिषु निर्वाहात्तदर्थं यथासंख्यसूत्रं नारब्धव्यमिति भाष्यमपि। पदस्फोटवाक्यस्फोटौ तु इहैव प्रघट्टके ''येनोच्चारितेन'' इति भाष्यप्रतीकमुपादाय कैयटेन भाष्यार्थतया वर्णितौ। वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वेति वदता तयोरखण्डताप्युक्ता। ''नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यम्'' इति तत्र तत्र भाष्ये सखण्डतोक्ता।**

**मायानिश्चलयन्त्रेषु कैतवानृतराशिषु।**
**अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम्॥ इत्यमरः। (अ.को.पृ.सं. ४०३)**

---

नन्वष्टपक्षीसत्वे एव मानाभावोऽत आह। **अष्टावेति। पदादेशा** इत्यस्य **दाक्षीपुत्रस्य पाणिनेः। एकदेशविकारे हि नित्यत्वं नोपपद्यत** इति शेषः। कैयटग्रन्थमाह। **पद्यत इति।** गम्यत इत्यर्थः। अर्थवत् शक्तम्। इह पद्ये न तु सर्वत्र। **एवेति।** तत्वेन तदपीत्येव स्वारस्यम्। टीकाग्रन्थश्च = कैयटग्रन्थश्च। भाष्यग्रन्थसमुच्चायकश्चः। केवलभाष्यात्तदलाभः इत्यस्योल्लेखः। अत एव द्वितीयं तत्र तदाह। **तथेति।** तदर्थं = तस्येत्याद्यर्थं। **भाष्यमपीति।** वर्णस्फोटेऽनुकूलमित्यस्य लिङ्गव्यत्ययेनानुषङ्गः। प्रकृतिप्रत्यययोर्वाचकतेति वर्णस्फोटपक्षतात्पर्यमिति प्रागुक्तमेवेति बोध्यम्। इहैव प्रघट्टके = पस्पशाह्निके एव शब्दविवेचनप्रकरणे। **वर्णिताविति।** वर्णस्फोटपक्षे येनेत्याद्येकवचनानुपपत्तेरिति भावः। **वर्णव्यतीति** प्रग्वत्। वदता कैयटेन। अपिस्तयोरेव समुच्चायकः। नन्वेवमपि सखण्डसत्वे किं मानमत आह। **नित्येष्विति।** अत्र नित्यत्वं व्याकरणानिष्पाद्यत्वमेव। न तु कण्ठताल्वाद्यभिघातेनोत्पाद्यत्वाभावः। अत **एवानपायोपजनविकारिभि**रिति भाष्ये तच्छेषः सङ्गच्छते। [1]**न वेति** सूत्रभाष्ये तथैवोपक्रमोपसंहाराभ्यां लाभाच्च। कूटपदार्थमाह। **मायेति।** प्रकृतेऽयोघनवाचीति तत्वं। तद्वत्तिष्ठन्ति ते कूटस्थास्तैः। रूपान्तरापत्तिर्विचालः तद्रहितैः। सर्वसाधारणं मानमाह। **पस्पशेत्यादि।** प्रघट्टकान्तरे किं

---

१. न वेति सूत्रभाष्ये एतन्नोपलभ्यते। किन्तु 'आद्यन्तौ' इति सूत्रभाष्ये उपलभ्यते। अत आद्यन्ताविति भाव्यमिति भाति।

**पस्पशायामेव प्रघट्टकान्तरे ''किं पुनः'' इत्यादि भाष्यमुपादाय 'केचिद्वर्णस्फोटमपरे पदस्फोटं वाक्यस्फोटं चाहुः' इति वदता कैयटेन ''अइउण्'' इत्यत्र व्यक्तिस्फोटजातिस्फोटयोर्बलाबलं चिन्तयता प्रत्याहाराह्निकान्ते ''अक्षरं न क्षरं विद्यात्'' इति भाष्यव्याख्यावसरे व्यवहारनित्यता तु वर्णपदवाक्यस्फोटानां, नित्यत्वं तु जातिस्फोटस्येति प्रतिपादयता, अनुपदमेव ब्रह्मतत्त्वमेव हि शब्दरूपतया प्रतिभातीत्यर्थ इति व्याचक्षाणेन सर्वे पक्षाः सूचिता एव। यदा तु अविद्यैव जातिरिति पक्षस्तदभिप्रायेण जातिस्फोटस्यापि व्यवहारनित्यतेति ''अक्षरं न क्षरं विद्यात्'' इत्यस्य कैयटीये पाठान्तरम्। ''आद्यन्तौ टकितौ'' इति सूत्रे च भाष्य एव वर्णस्फोटपदस्फोटावुक्तौ। असत्यमेव प्रकृतिप्रत्ययविभागं तदर्थं चाश्रित्य रेखागवयन्यायेन सत्यस्य पदस्फोटस्य**

---

पुनर्नित्यः शब्द आहोस्वित् कार्य इति प्रघट्टके। केचित् मीमांसकाः। **वर्णस्फोटमिति।** ध्वनिव्यङ्ग्यं वर्णात्मकं नित्यं शब्दमित्यर्थः। पदवाक्ये च वर्णसमूहरूपे एवेति तदाशयः। अत्र मते एकं पटपदमित्याद्यनुपपत्तेराह। **अपर इति।** वैयाकरणा इत्यर्थः। पदस्फोटं वर्णव्यतिरिक्तं। अस्याप्यसिद्धान्तत्वादाह। **वाक्येति।** एतत्पक्षो मुख्यः। पदे वर्णानामिव वाक्ये पदानामपि कल्पितत्वात्तेषामर्थवत्त्वमपि काल्पनिकमिति वाक्यस्यैव शब्दत्वमिति तद्भावः। सप्तम्यन्तयोरिति वदतेत्यत्र कर्मद्वाराऽन्वयः। अग्रिमतृतीयान्तानां कैयटेनेत्यत्रान्वयः। तस्य च सूचिता एवेत्यत्रान्वयः। **व्यवहारनित्यतेति।** सर्वेषां शब्दानामाकाशादिवत् सृष्ट्यादावुत्पत्तिः प्रलये च नाश इत्यर्थः। नित्यत्वं तु पारमार्थिकेत्यादिः। अत एव तुः। **अनुपदमेवेति।** [1]अक्षरमित्यादिव्याख्यासमीप एवेत्यर्थः। **इत्यर्थ इति।** ब्रह्मराशिरिति पदस्येति शेषः। एवं कैयटे पाठाभावादाह। **यदा त्विति।** कैयटग्रन्थमाह। **जातीति।** नन्वेवमपि भगवता साक्षान्नोक्ता अत आह। [2]**आद्यन्ताविति।** अत एवैवः प्रयुक्तः। 'तेनायं विशेषेण शब्दान्तरं समुदायं प्रतिपद्यत' इत्यनेन तत्रत्येन वर्णस्फोटः, समुदायत्वोक्तेः वाचकस्यैवानया प्रणाड्या व्युत्पादनमिति तद्भावः। 'एतयाऽनुपूर्व्याऽयं शब्दान्तरमुपदिशती'त्यनेन तत्रत्येन द्वितीयादिः। कल्पितस्यानेन साक्षात् बोधनं तेन च बोधकस्य सखण्डस्याखण्डस्य वा बोधनमिति तद्भावः। यत्तु कैयटेन नित्यशब्दनयेऽखण्डाः शब्दा वर्णवदनर्थकोपलभ्यमानावयवा इत्याद्युक्तम्, तदत्रत्यद्वितीयपक्षे न तु नित्यशब्दमते

---

१. अक्षरेऽपीत्यादि इति घ पा०।

२. म.भा. प्रथमभागः पृ.सं. ३९७।

**व्युत्पादनमभिप्रेतमिति तत्रैव कैयटः। 'अर्थवदधातुः'' ''स्वं रूपं शब्दस्य'' ''तपरस्तत्कालस्य'' इत्यादिसूत्रेष्वपि स्पष्टमिदं भाष्यकैयटादावित्यलं बहुना। जातेश्च ब्रह्मात्मकत्वमुक्तं हरिणा –**

**सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु।**
**जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥**
**तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते।**
**सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ॥ इति। (वा.प. ३-३३-३४)**

**जातेः स्फोटत्वमपि प्रघट्टकान्तरे स एवाह —**

---

वर्णरूपावयवा न सन्त्येवेत्यभिप्रायेण। तत्र चावयवशब्दस्य प्रकृतिप्रत्ययादिरूपेत्यर्थः। तच्छून्यत्वेनैवाखण्डत्वं। शास्त्रमपि रेखागवयन्यायेनोपपन्नम्। न तु वर्णरूपा अवयवा अपि न सन्तीति तस्यार्थः। मानाभावादत एव वर्णवदिति दृष्टान्तः सङ्गच्छते। यथा वर्णा उपलभ्यमानावयवा एव न तु वस्तुगत्या विद्यमानावयवास्तथा ते उपलभ्यमानानर्थकावयवा एवेति तदर्थः। तदेव ध्वनयन्नाह। **असत्यमेवेति।** तत्रैव = **आद्यन्ता**वित्यत्रैव द्वितीयपक्षे। **इदमिति।** प्रागुक्तं सर्वं स्फोटरूपमित्यर्थः। यथा चैतत्तथाऽन्यत्र स्पष्टम्। विस्तरस्तु **स्फोटवादादौ**[१] ज्ञेयस्तदाह। **अलमिति।**

## १.२.१० जातेर्ब्रह्मरूपत्वसाधनम्

ननु जातेर्ब्रह्मरूपत्वमुक्तमयुक्तम्। मानाभावादत आह। **जातेश्चेति।** सम्बन्धिभेदात् = उपाधिव्यक्तिभेदात्। भेदवती सती = गवादिष्वर्थेषु विद्यमाना सती च। सत्तैव = ब्रह्मसत्तैव। ब्रह्मैवेति यावत्। जातिपदव्यवहार्या भवतीत्यर्थः। तस्यां प्रवृत्तिनिमित्तभूतायां वाच्यायां वा व्यवस्थिता इत्यनेनैव सर्वतः सर्वबोधो वारितः। तदेव विशदयति। **तामिति।** चेन पदादिसमुच्चयः। सत्तेत्यस्यार्थान्तरं निराकुर्वन् भावप्रत्ययवाच्यापि सैवेत्याह। **सा नित्येति। महानात्मेति।** पदद्वयं विशिष्टं विधेयं। महानित्यनेन तद्वत् व्यापकत्वादनेकसमवेतत्वं, आत्मेत्यनेन ब्रह्मरूपत्वम्। वाच्या वाचिका तादात्म्येनाऽवच्छेदिका च सैवेत्यर्थः। शास्त्रीयप्रक्रिया प्राग्वदेव जातिव्यञ्जकबोधनार्था। नन्वेवमपि तस्याः स्फोटत्वमुक्तमयुक्तं मानाभावादत आह। **जातेरिति।** अपिर्ब्रह्मत्वसमुच्चायकः। **स**

---

१. नागेशभट्टविरचित अडयार् लैब्ररी द्वारा प्रकाशितः।

**अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ।**
**कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिता ।। इति ।। (वा.प. १-९३)**

**यद्यपीहाष्टौ पक्षा उक्तास्तथापि वाक्यस्फोटपक्षे तात्पर्यं ग्रन्थकृताम् । तत्रापि जातिस्फोटे इत्यवधेयम्, पूर्वपूर्वोपमर्देनैवोत्तरोत्तरोपन्यासात् । तथा च प्रथमव्युत्पत्तेर्व्यवहाराधीनतया संपूर्णस्य वाक्यस्य विशिष्टे प्राथमिकः शक्तिग्रह इति निर्विवादम् । स चावापोद्वापाभ्यामवयवानां शक्तिरिति न्यायोपष्टम्भेन त्यज्यत इति दर्शनान्तराणां**

---

**एव** हरिरेव । ननु वर्णजातिस्फोटपक्षे जातेः प्रत्येकं वर्णेष्वपि सत्वात् प्रत्येकादर्थबोधापत्तिस्त्वस्त्येवेति प्रत्येकं वर्णा एव वाचकास्सन्त्विति किं तेनात आह । **अनेकेति ।** अनेकाभिः वर्णव्यक्तिभिरभिव्यङ्ग्येत्यर्थः । तत्समुदायेनाभिव्यक्तैव जातिः स्फोट इति स्मृता योगार्थतया बोधिकेत्यभिप्रेतेति यावत् । एतेन स्फोटस्य नित्यत्वात्सर्वदा अर्थबोधापत्तिरित्यपास्तम् । अयं भावः । त्रिविधजातिस्फोटेषु वर्णजातिस्फोटपक्षे यद्यप्युक्तदोषस्तथापि उक्तविशेषणान्न । अनेकवर्णव्यक्त्यभिव्यङ्ग्यवर्णसमुदाये प्रकृतिप्रत्ययादिरूपे तस्याः पर्याप्तिसम्बन्धेन वृत्तित्वात् । तदेव द्विवर्णस्फोटस्वरूपमित्युक्तम् । पदवाक्यजातिस्फोटपक्षयोस्तु नैव दोषः । तत्र तस्याः पर्याप्तिसम्बन्धेन वृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वात् । एवञ्च तत्पक्षे एवेदं विशेषणं सफलमिति । कैश्चित्तु व्यञ्जकवर्णव्यक्तय एव तत्वेन स्वीकृताः ता ध्वनय एव न तदतिरिक्ता इत्यभ्युपेयते । ध्वनिवर्णयोर्भेदाभावादित्युत्तरार्धार्थः । अत एव 'बुधैः वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृत' इति **काव्यप्रकाश**कृदुक्तिः सङ्गच्छते । नन्वेवमष्टानामपि मुख्यत्वापत्तिरत आह । **यद्यपीहेति ।** सिद्धान्तग्रन्थेष्वित्यर्थः । तत्रापि = वाक्यस्फोटेष्वपि । **पूर्वेति ।** पूर्वपूर्वबोद्ध्रपेक्षयोत्तरोत्तरबोद्धुस्तत्तद्व्यापकबोध्यवृत्तिधर्माश्रयत्वादिति भावः । यद्वा आकाङ्क्षादिना संसर्गलाभ इति वर्णस्फोटपदस्फोटवादिनोर्मतम् । तदुपमर्दकत्वं वाक्यस्फोटस्य । **संसर्गस्य वाक्यशक्यत्व**मिति तन्मतात् । तदुपपत्तिश्चान्यत्र स्फुटा । यद्वा किञ्चिद्वर्णेत्यादिप्रागुक्तरीत्या पूर्वपूर्वोपमर्दो बोध्यः । तस्य मुख्यत्वमेव ध्वनयन्नाह । **तथा चेत्यादिना ।** तथा च = तस्य मुख्यत्वे च । अस्य निर्विवादत्वेऽन्वयः । **व्यवहारेति ।** वृद्धेत्यादिः । निर्विवादं उभयसाधारणत्वात् । स च = प्राथमिकशक्तिग्रहश्च । न्यायशरीरमाह । **अवापोद्वापेति ।** पदान्तरोच्चारणमवापः । पूर्वविद्यमानपदत्याग उद्वापः । **दर्शनान्तराणां** न्यायादीनाम् । **एकादेशादिस्थले**

**पन्थाः । एकादेशादिस्थले उक्तरीत्या विनिगमनाविरहेण कैश्चित्पररूपादिस्थले पूर्वलोपाद्यभ्युपगमेन च व्याकरणानां कलहे सति अवयवशक्तेर्दुरुपपादतया प्राथमिकशक्तिग्रह एव प्रमारूप इति तु सैद्धान्तिकः पन्थाः । उक्तं च हरिणा —**

**तत्र यन्मुख्यमेकेषां तत्रैतेषां विपर्ययः ।। इति ।**

**ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बले ।**
**देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः ।। इति च । (वा.प. २-१४)**

**एवंस्थिते निपाता द्योतका विकरणा अनर्थका इत्यादिविचारोऽपि प्रक्रियादशायामेव । आह च –**

**अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम् ।**
**धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः ।। इति । (वा.प. २-१८०)**

**तादृशोऽखण्ड इत्यर्थः । एवञ्च 'नामार्थयोरभेद एव संसर्गः' 'प्रत्ययार्थः प्रधानम्'**

---

इत्यस्यावयवशक्तेर्दुरुपपादतयेत्यत्रान्वयः । तत्र हेतुमाह । **उक्तेति ।** हेत्वन्तरमाह । **कैश्चिदिति । च व्याकरणानां कलहे सतीति ।** व्याकरणानां कलहे सति चेत्यर्थः । कलहश्च भिन्नभिन्नप्रक्रियाबोधकत्वम् । सतिसप्तम्या तस्य निमित्तत्वं फलति । न चैतादृशे विषये स्थानिनामुपस्थापका एवादेशाः । तथा सति व्याकरणभेदेन स्थानिनामननुगमेऽपि न दोषः । स्मारितानानुगमस्यादोषत्वात् । न ह्येकसम्बन्धिदर्शनेनापरसम्बन्धिस्मरणे प्रतिसम्बन्धी अनुगन्तुं शक्यते । यदा यद्विषयसंस्कारोद्बोधस्तदा तस्यैव स्मरणसम्भवादिति वाच्यम् । अनधीतव्याकरणस्य बोधाभावापत्तेः । शक्तिभ्रमाद्बोधाङ्गीकारे तु वरं शक्तिकल्पनमेवेत्याद्यन्यत्र विस्तरः । तुरुक्तवैलक्षण्ये । अत्रोभयत्र सम्मतिमाह । **उक्तं चेति ।** तत्र = बोधविषये शक्तिग्रहविषये वा । **एकेषां** अन्येषां नैयायिकादीनां । **तत्रैतेषां** प्रकृतबुद्धिस्थानां वैयाकरणानाम् । एवं मार्गद्वयसम्मतिमुक्त्वा मुख्यसिद्धान्तमतसम्मतिमाह । **ब्राह्मेति ।** यथा समस्तेऽवयवानर्थक्यमेवं देवदत्त गामभ्याज शुक्लां दण्डेनेत्यादिवाक्येऽपीत्यर्थः । एवं स्थिते = मुख्यभूतस्य तस्यैवार्थवत्वे । एवमग्रेऽपि । आदिना प्रकृतिप्रत्ययधातूपसर्गवाचकत्वादीनां ग्रहणम् । अपिरसिद्धान्तसप्त-स्फोटविचारसमुच्चायकः । अत्र मानमाह । **आह चेति ।** हरिरिति शेषः । आदिना द्वित्वादिपरिग्रहः । शास्त्रे इत्यन्त एकोऽन्वयः । तु किन्तु । आदिना अन्यव्युत्पत्तिग्रहणम् । अपिः

**इत्यादिव्युत्पत्तयोऽपि प्रक्रियाश्रया एव। उक्तं च –**

**किंगर्भजन्ये किंगर्भं कीदृग्भातीति नो मते।**
**विचारः फलितः सर्वः प्रकृतिप्रत्ययाश्रयः ।। इति।**

**आरोपितस्यापि पारमार्थिके उपायता न विरुद्धा। लिपिस्थूलारुन्धतीशाखा-चन्द्रादीनां लौकिकदृष्टान्तानामर्थवादवाक्यपञ्चकोशावतरणादीनां तन्त्रान्तरसिद्धानां पूर्वत्रासिद्धादीनां चैतच्छास्त्रसिद्धानां प्रागेव दर्शितत्वात्। तदेवं पक्षभेदेन अविद्यैव ब्रह्मैव वा स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या स्फोट इति स्थितम्। आह च –**

**शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते। इति। (वा.प. २-२३३)**
**समारम्भस्तु भावानामादिमद्[1] ब्रह्म शाश्वतम्। इति च। (वा.प. २-२३७)**

---

पूर्वसमुच्चये। **उक्तं चेति।** हरिणेति शेषः। किङ्गर्भो मयूरस्तज्जन्येऽण्डे किंगर्भं मयूरस्वरूपं नीलपीतादि कीदृग्भातीति वदस्मन्मते सर्वोऽपि विचारः प्रकृतिप्रत्ययाद्याश्रयः फलित इत्यर्थः। यथा मयूराण्डे विविक्ता एव नीलादयः प्राकट्यदशायां भेदेन भासन्ते तथाऽयं वाक्यार्थोऽखण्ड एव कल्पितविभागात् सखण्ड इव प्रतीयत इति भावः। नन्वेवं शास्त्राप्रामाण्यप्रसङ्गः। वाचकस्याखण्डत्वात् शास्त्रस्य च प्रकृतिप्रत्ययादिना पदादिव्युत्पादनमात्रार्थत्वात्। किञ्चासत्यस्य कथं सत्योपायत्वमत आह। **आरोपितेति।** कल्पितस्यापीत्यर्थः। पारमार्थिके तज्ज्ञाने। लिपेर्बोधकत्वमारोपितम्। **अर्थवादेति।** स आत्मनो वपामित्यादीत्यर्थः। **पञ्चकोशेति।** आनन्दवल्ल्यामन्नप्राणमनोविज्ञानानन्दमयात्मकपञ्चकोशव्युत्पादनं वास्तवसर्वाधारब्रह्मबोधन-फलकमित्यर्थः। भृगुवल्लीस्थस्तु न ग्राह्यः। तत्र पञ्चमस्य ब्रह्मत्वेनाकोशत्वस्य प्रागुक्तत्वात्। **तन्त्रान्तरेति।** पूर्वोत्तरमीमांसेत्यर्थः। यथासंख्यमन्वयः। प्रकृतमुपसंहरति । **तदेवमिति। पक्षभेदेनेति।** अविद्यापरमार्थभेदेनेत्यर्थः। वर्णपदवाक्यभेदेनेत्यर्थो वा। अविद्यादशायामपि वर्णानां वाचकत्वमभ्युपेत्य स्फोटखण्डनमयुक्तमुक्तयुक्तेस्तदाह। **स्फुटेति।** उभयत्र सम्मतिमाह। **आह चेति।** क्रमेणोभयं हरिरिति शेषः। **रविद्यैवोपेति।** प्रकृतिप्रत्ययपदपदार्थादिरूपैवेत्यर्थः। तथा च शास्त्रमप्यसत्यव्युत्पादकमेवेति भावः। 'समारम्भाच्च भावानामादिमद्ब्रह्म शाश्वत'मिति पाठः। तत्र तथैव सत्वात्। [2]'घटादिदर्शनाल्लोकः परिच्छिन्नाऽवसीयत' इत्यस्य पूर्वार्धे लोको विश्वप्रपञ्चः।

१. मुद्रितपाठे अनादि ब्रह्म इत्यस्ति। प्रभानुसारेण पाठव्यत्यासः कृतः।
२. वा.प. द्वितीयकाण्डे श्लो.सं. २३७, पृ.सं. ३१६।

**तदेवं वराटिकान्वेषणाय प्रवृत्तश्चिन्तामणिं लब्धवानिति वासिष्ठरामायणोक्ता-भाणकन्यायेन शब्दविचाराय प्रवृत्तः सन् प्रसङ्गाददृैते औपनिषदे ब्रह्मण्यपि**

---

समारम्भ उत्पत्तिः । अनादिमिथ्याभूतशास्त्राभ्यासानुसारेणैव शब्दशास्त्रज्ञलोकेन केनचिदर्थप्रत्यायकतया गृह्यते । यथा घटादिकं परिच्छिन्नं दृष्ट्वा सर्वोऽपि प्रपञ्चः परिच्छिन्नत्वेन गृह्यते । भावानां पदार्थानामुत्पादं दृष्ट्वा च शाश्वतमनाद्यपि ब्रह्मादिमदुत्पादवदिति मन्यते च लोकेन तद्वदित्यर्थः । यतः परमार्थतो ब्रह्मैव स्फोटोऽत आह । **तदेवमिति ।** तस्माद्धेतोरुक्तप्रकारेणेत्यर्थः । शब्दविचाराय प्रवृत्तः सन्नित्यत्रान्वयः । **वराटिकेति ।** षष्ठे निर्वाणप्रकरणे सप्तत्रिंशत्तमे सर्गे शिखिध्वजनृपोपाख्याने रामं प्रति वसिष्ठवाक्यम् ।

अत्यन्तकृपणः कश्चित् किराटो धनधान्यवान् ।
आस्ते विन्ध्याटवीकच्छे कुटुम्बी ब्राह्मणादिवत् ।

तस्य काचिन्निपतिता गच्छतो विन्ध्यजङ्गले ।
एका वराटिका राम[१] तृणजालसमावृते ।

कार्पण्यात्सुप्रयत्नेन सर्वं तृणाम्बुसादिकम् ।
कपर्दार्थं स्वमभिमतो दुधाव स दिनत्रयम् ।

ततो दिनत्रयस्यान्ते तेन तस्मात्कुजाङ्गलात् ।
पूर्णेन्दुबिम्बप्रतिमो लब्धश्चिन्तामणिर्महान् ।

यथा तत्र किराटेन कपर्दान्वेषणेन तत् ।
रत्नं लब्धं जगन्मौल्यं निरन्तरमखेदिना ।
तथा श्रुतोपदेशेन स्वात्मज्ञानमवाप्यते । इति ।

न्यायेनेत्यस्य व्युत्पाद्यतामित्यत्रान्वयः । **प्रवृत्तः सन्निति ।** अधिकारीति शेषः । हरिविशेषणं चेदम् । अनुद्देश्यत्वादेवाह । **प्रसङ्गादिति । विवर्तेति ।** ब्रह्मणो जगत् विवर्तः विषम-सत्ताकोऽतात्विको वाऽन्यथाभावः सः इत्यादीत्यर्थः । आदिना परिणामादिपरिग्रहः । तस्यापि तदर्थमेव प्रवृत्तत्वेनानुद्देश्यत्वात् । सङ्गतिमाह । **प्रसङ्गादिति ।** तन्त्रान्तरे उत्तरमीमांसायाम् ।

---

१. राजन् इति घ पा० ।

**व्युत्पद्यतामित्यभिप्रायेण भगवान्भर्तृहरिर्विवर्त्तवादादिकमपि प्रसङ्गाद् व्युदपादयत्, तत्तु तन्त्रान्तरे स्फुटं प्रकृते नातीवोपयुक्तं चेति नेह तन्यते। इति स्फोटस्वरूपव्युत्पादनम्॥**

**स्यादेतत्, चं लिख चकारस्त्रुटित इत्यादिव्यवहाराल्लिपावेव शब्दभ्रमवतां तत्रैव वाचकत्वाभिमानजुषां बालानां पुस्तकमुपयुज्यते यथा, तथैव भेदग्रहवतामपीति वस्तुस्थितिः। एवमिहापि प्रकृत्यादिविभागे पारमार्थिकत्वाभिमानवतामपि उपयुज्यते एव शास्त्रं तत्किमर्थं कल्पनाव्युत्पादनक्लेशः। अत एव हि भाष्यकारोऽपि शब्दो नित्योऽनित्यो**

---

**नातीवोपेति।** स्फोटानुपायत्वात्। अनेन तच्चिन्तनशीलस्योपयोगोऽस्त्येवेति सूचितम्। **अत्रेदं बोध्यम्।** वर्णस्फोटस्वरूपं प्रागुक्तम्। सखण्डपदस्फोट इत्यस्य– प्रकृतिप्रत्ययविभाग-तदर्थज्ञानपूर्वकं पदं बोधकमित्यर्थः। एवं हरेऽवेत्यादौ प्रत्येकपदज्ञानपूर्वकं बोध इति सखण्डवाक्यस्फोटः। इदं च स्फोटत्रयं न वादिभेदेन व्यवस्थितं, किन्तु बोधृभेदेन, कस्यचित्प्रकृतिप्रत्यययोः प्रत्येकं तत्तदर्थशक्तिग्रहाद्बोधेन कस्यचित्पारिभाषिकपुष्पवन्तादिपदे तद्ग्रहाद्बोधेन कस्यचित्समुदाये तद्ग्रहाद्बोधेन त्रयाणामप्यावश्यकत्वात्। अधिकमन्यतो बोध्यम्। प्रकृतिप्रत्ययादिकल्पनारेखागवयन्यायाभ्यां तद्बोधितमखण्डं प्रकृतिप्रत्ययादिविभागानाश्रयः पदादिबोधकमित्यखण्डपदवाक्यस्फोटौ जातिस्फोटस्वरूपमप्युक्तमिति। केचित्तु एकाक्षरनिघण्टु-बोधितार्थवाचको वर्ण एव न तु तदवयवा इति वर्णस्फोट इत्यस्यार्थः। अन्यत्प्राग्वदित्याहुः। **इति स्फोटस्वरूपव्याख्यानम्।**

## १.२.११ प्रकृतिप्रत्ययादिविभागकल्पनावश्यकता

**शब्दत्वभ्रमेति।** अन्यथा शब्दविषयकोक्तव्यवहारस्य लिपौ करणासङ्गतेरिति भावः। तत्रैव = लिपावेव। बालानां = अज्ञानाम्। **भेदग्रहेति।** लिपेः शब्दो वाचको भिन्न इत्येवं ग्रहेत्यर्थः। पुस्तकमुपयुज्यत इत्यस्यानुषङ्गः। तत्स्मारकत्वादिति भावः। वस्तुस्थितिरित्यग्रेऽस्तीति शेषः। **एवमिति।** तद्वदित्यर्थः। एवञ्चेत्यादिः। एवञ्चेत्येव पाठस्तु सुगम एव। इहापि = शब्दज्ञान-विषयेऽपि। **अभिमानवतामपीति।** अपिना तत्रापारमार्थिकत्वाभिमानवतां समुच्चयः। **उपयुज्यत एव शास्त्रमिति।** साधुत्वज्ञानायेति भावः। **कल्पनाव्युत्पादनेति।** प्रकृत्यादिविभागे इत्यादिः। तत्र कल्पनायाः व्युत्पादनस्य क्लेश इत्यर्थः। तत्र काल्पनिकत्वप्रतिपादनक्लेश इति यावत्। अत्रोच्यते। गौस्तिष्ठतीत्यादिना कृत इति शेषः। शास्त्रस्योभयथाप्युपयोगेनैतद्विचारस्य निष्फलत्वादिति भावः। यद्वा प्रकृतिप्रत्ययादिविभागकल्पनया साधुशब्दव्युत्पादनक्लेश इत्यर्थः। **अत एव हीति।** यतो

**वेति विकल्प्य उभयथापि व्याकरणारम्भस्य निष्प्रत्यूहत्वाद्यथातथास्त्वित्युदासिष्यतेति चेत् ? सत्यं, व्युत्पत्त्यर्थं वस्तुस्थितिः कथिता। पक्षभेदेषु हि गौणमुख्येषु व्युत्पादितेषु तत्र परस्परविरुद्धतया भासमाना अपि सिद्धान्तग्रन्था व्यवस्थापयितुं शक्यन्ते। स्वार्थद्रव्यादीनां पञ्चानां क्रमेण भानमित्यादि वक्ष्यमाणमपि कल्पनयैवोपपादयितुं शक्ष्यते इति दिक्।**

**नन्वस्तु साधुशब्दो विषयः, अस्तु च प्रकृतिप्रत्ययादिकल्पनया तद्व्युत्पाद-**

---

निष्फलोऽत एवेत्यर्थः। नित्योऽनित्यो वेतीति पाठः। नित्यो न वेतीत्यपाठः। **उभयथापीति।** उक्तरीत्येति भावः। अर्धाङ्गीकारेण समाधत्ते। **सत्यमिति।** व्युत्पत्त्यर्थं = भेदेन ज्ञानार्थं। न तु तत्र पारमार्थिकत्वाभिमानवतां शास्त्रत्वानुपयोगप्रतिपादनार्थम्। **वस्तुस्थितिः** प्रकृत्यादिकं काल्पनिकं ततोऽन्यः स्फोट इत्येवंरूपा। ननु क उपयोगो व्युत्पत्तेरतस्तत्र हेतुमाह। **पक्षभेदेष्विति।** भिन्नेषु पक्षेष्वित्यर्थः। सत्सप्तमीयं व्यवस्थापयितुं शक्यत्वे तेषां निमित्तत्वं सूचयति। हि यतः तज्ज्ञानात्। एवञ्च सावश्यकेति तथोक्तं, फलान्तरमाह। **स्वार्थेति।** न त्वन्यथेति एवव्यावर्त्यम्। एवञ्च तद्व्युत्पादनक्लेशो युक्त एवेति भावः। **दिगिति।** तदर्थस्तु प्रकृत्यादिविभागे कल्पनिकत्वप्रतिपादनस्येदमपि फलं तत्र पञ्चकोशादिवत्सदसद्भिलक्षणत्वस्य सदसद्रूपत्वस्य वा शास्त्रे रेखागवयन्यायसमानत्वस्य च बोधनरूपमिति। एतेन प्रकृत्यादीनां काल्पनिकत्वेन शशविषाणकल्प्यत्वेन वास्तवस्फोटज्ञानासम्भव इत्यपास्तम्। न च शास्त्रज्ञानं विनापि गामानयेत्यादिवाक्यमात्रव्युत्पन्नस्य पामरादेरपि शाब्दबोधेन तत्र स्फोटज्ञानस्य जायमानत्वान्नैतच्छास्त्रं पञ्चकोशादिवत्स्फोटज्ञानासाधारणोपाय इति वाच्यम्। प्रकारान्तरेण तज्ज्ञानसम्भवेऽपि प्रकृतिप्रत्ययव्युत्पत्तिपूर्वकविजातीयतज्ज्ञानस्य स्वपूर्वप्रयोगद्वारा शारीर-शुद्धिफलकस्य तत्फलत्वेनादोषात्। तदुक्तं हरिणा। **तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्**[१] इति। एवञ्च विजातीयज्ञाने एव शास्त्रस्योपयोग इति न तृणादिकारणतावत् व्यभिचारः। लघुनोपायेन सकलशब्दप्रतिपत्तौ च शास्त्रस्योपयोग इत्यपि बोध्यमिति दिगिति।

## १.३ व्याकरणाध्ययने प्रवर्त्तकविचारः

भाष्यीयन्यूनतापरिहारं भाष्यसूचितं प्रतिपादयितुं युक्त्याऽनुवादपूर्वं शङ्कते। **नन्वस्त्विति।**

---

१. वा.प. ब्रह्मकाण्डे श्लो.सं. १४, पृ.सं.३७. पवित्रं सर्वविद्यानामधिविद्यं प्रकाशत इत्युत्तरार्धम्।

**नोपपत्तिः, तथापि व्याकरणाध्ययनस्यानुष्ठापकं किमिति चेत् ? नित्याध्ययनविधिरिति गृहाण। श्रूयते हि ''ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च'' इति। निष्कारणो दृष्टकारणनिरपेक्षो नित्य इति यावत्। कार्यतेऽनुष्ठाप्यतेऽनेनेति कारणं**

---

**तदिति।** साधुशब्देत्यर्थः। **व्याकरणाध्ययनस्येति।** साधुशब्दज्ञानफलकव्याकरणाध्ययनस्येत्यर्थः। **नित्येति।** नित्यवेदाध्ययनबोधकविधिरित्यर्थः। नित्यत्वमध्ययने विधौ च तन्त्रेण विशेषणम्। **श्रूयते हीति।** यतस्तथा श्रुतिरस्तीत्यर्थः। अविवक्षितकर्मतया भावे प्रत्ययः। तामेवाह। **ब्राह्मेति। निष्कारण इति।** अत्र कारणशब्दः फलपरः। मूले वक्ष्यमाणव्युत्पत्तेः। ततो निर्गतो निष्कारणः फलरहित इत्यर्थः। ननु नित्येऽपि प्रत्यवायपरिहाररूपं फलमस्त्येवेत्यत आह। **दृष्टेति।** ननु प्रकृते रक्षादिरूपं दृष्टमपि फलमस्त्येव अत आह। **निरिति।** एवञ्च पूर्वपदेन न तदभावः प्रतिपाद्यते, किन्तु तदनपेक्षा, नित्यत्वात्प्रवृत्त्युपपत्तेः। अत एव नञं विहाय निरित्युक्तम्। एवञ्च दृष्टफलनिरपेक्ष इत्यर्थः। अध्ययनादिनिष्ठं दृष्टकारणानपेक्षत्वं विषये आरोप्य निष्कारण इति वेदे प्रयोगः। अत एव तत्तात्पर्यार्थमाह। **नित्य इति।** कारणशब्दस्य फलपरत्वे युक्तिमाह। **कार्येति।** दूरत्वाद्ब्राह्मणेनेत्यस्यात्र नान्वय इति भ्रमनिरासायाह ब्राह्मेतीति कश्चित्। वस्तुतस्तु ब्राह्मणेन निष्कारणो धर्मो ज्ञेयस्तेनैव निष्कारणः षडङ्गो वेदोऽध्येय इति वाक्यद्वयमिति **कृष्णो**क्तिनिरासायाह। **ब्राह्मेति** इति बोध्यम्। ज्ञेयश्चेतीति चयुक्त एव भाष्येऽत्र च पाठः। तदभावे गामश्वमित्यादिवत् समुच्चयबोधस्तत्रेति भावः। अत्र ब्राह्मणेनेत्युक्त्याऽन्ययोरेवमध्ययनं काम्यमेवेति सूचितमिति कश्चित्। तन्न। स्मृत्यन्तरविरोधापत्तेः। तस्मात्त्रैवर्णिकोपलक्षणं तत्। यद्वा कलौ क्षत्रियविशोरभावात्तथोक्तम्। धर्मस्तद्रूपः। वेदस्य धर्मत्वं च पुरुषयत्नसाध्यतया धर्मत्वेनाभिमताध्ययनज्ञानकर्मत्वेनौपचारिकम्। षडङ्गः शिक्षाकल्पव्याकरणनिरुक्तज्योतिषाङ्गसहितः। श्रुतिलिङ्गादिना षडङ्गत्वं तु न। षडङ्ग इत्यस्य वैयर्थ्यापत्तेः। वेदः स्वस्वशाखारूपः। अन्यथा सकलशाखस्य वेदत्वावच्छिन्नस्याध्ययनस्येदानीमसम्भवेनासङ्गत्यापत्तेः। अध्येय इत्यत्र कर्मणि जायमानो यदधीङः [१]प्रैषे (३-३-१६३)ति सूत्रेण प्रैषे विधिरूपेऽपि बोध्योऽतस्ततः प्रेरणाविषयाध्ययनकर्मेति बोधः। यद्यपि **तेन प्रोक्त**(४-३-१०१)मिति सूत्रभाष्ये वक्ष्यमाणरीत्या वेदत्वं शब्दतदर्थोभयनिष्ठमिति ज्ञेय इति व्यर्थम्। अर्थबोधपर्यवसाय्यध्ययनं कार्यमिति तदर्थेन सिद्धेः। तथापि पुनरुक्तिसामर्थ्यात् ज्ञेय इत्यस्य सम्यगर्थबोधपर्यवसाय्यध्ययनं कार्यमित्यर्थे तात्पर्यम्। अत एव **समानमीहमानानामधीयानानां च केचिदर्थैर्युज्यते केचिन्नेति** [२]वक्ष्यति

१. प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च सम्पूर्णं पा.सू.। २. म.भा.पृ.सं. १३५ (प्रथमो भागः)

**फलम्। ब्राह्मणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्चेत्यन्वयः। तथाच साङ्गवेदाध्ययनतदर्थ-ज्ञानरूपोऽयं धर्मो नित्यः सन्ध्योपासनादिवदित्यर्थः। श्रुतिरेषेति हरदत्तादयः। स्मृतिरिति तु भट्टाचार्याः। तत्र यदि स्मृतिरेवेति प्रामाणिकं तर्हि ''आगमः खल्वपि'' इति भाष्येप्यागममूलकत्वादागमः स्मृतिरेवेति व्याख्येयम्। अङ्गत्वं चाङ्गत्वेन संस्तवात्।**

---

भाष्यकृत्। अध्ययनतदर्थज्ञानयोश्च समुच्चयः। उक्तहेतोः। अनेनातादृशस्याधर्मत्वं सूचितम्। श्रुत्या मिलितस्यैव धर्मत्वबोधनात्। तथा च व्यासः :-

> वेदार्थज्ञो[१] जपं जप्त्वा तथैवाध्ययनं द्विजः।
> कुर्वन् स्वर्गमवाप्नोति नरकं तु विपर्यय। इति।

जपपदं मन्त्रसाध्यकर्ममात्रोपलक्षकम्। ज्ञेय इति चाध्येय इत्येतत्तुल्यम्। सर्वत्मना ज्ञाधातोर्हि ज्ञानानुकूलो मनःप्रणिधानविषयेन्द्रियसंयोगसम्पादनादिरूपो व्यापारोऽर्थः। तस्यैवात्र विधेयत्वम्। एतेन ज्ञानस्य कर्तुमकर्तुमन्यथाकर्तुमशक्यत्वेनाविधेयत्वादिदं चिन्त्यमिति वाक्यादि-रूपप्रमाणपरतन्त्रज्ञाने विध्यसम्भवात् षडङ्गवेदाध्ययनफलत्वेनैवैतत्कीर्तनमित्याहुरिति चापास्तम्। तदेतद्ध्वनयन् तात्पर्यार्थमाह। **तथा चेति।** निष्कारणत्वे चेत्यर्थः। **तदर्थेति।** साङ्गवेदार्थेत्यर्थः। **नित्य इति।** श्रुतावपि जनमेजयाद्युपाख्यानवत् पौरुषेयव्याकरणस्य नित्यताबोधनमुपपद्यते। वस्तुतस्तु **तेन प्रोक्त**मिति सूत्रोक्तभाष्यरीत्या वेदार्थवत् व्याकरणार्थोऽपि अनादित्वरूपनित्यतावानिति श्रुत्या तस्य नित्यत्वबोधनमिति बोध्यम्। तथा च व्याकरणाध्ययनस्य नित्यकाम्यतेति फलितम्। नित्यत्वं चाध्येयज्ञेयपदार्थयोर्विशेषणीभूताध्ययनज्ञानयोर्बोध्यम्। तदभिप्रेत्याह। **श्रुतिरेषेतीति।** ब्राह्मणेनेत्यादिरित्यर्थः। **भट्टेति।** कुमारिलेत्यादिः। तत्र = तयोर्मध्ये। सर्वं वाक्यमिति न्यायेनाह। **स्मृतिरेवेतीति।** यदीत्यनेन **हरदत्तम**तस्यैव वस्तुतः प्रामाण्यमिति सूचितम्। अत एव भाष्ये आगमपदोल्लेखः सङ्गच्छते। अन्यथा तदसङ्गतिः स्पष्टैव। एतदभिप्रायेणैव **श्रूयते हीति** प्रागुक्तम्। न च पठ्यमानश्रुतिष्वनुपलम्भः। पठ्यमान-स्मृतिष्वनुपलम्भस्यापि तुल्यत्वात्। तदेतद्ध्वनयन्नाह। **तर्हीति।** अपिना श्रूयते हीत्यपि स्मर्यत इत्येवंपरतया व्याख्येयमित्यस्य समुच्चयः। आगममूलकत्वात् = श्रुतिमूलकत्वात्। ननु कथं तेषां षण्णामङ्गत्वं, यैस्तस्य षडङ्गत्वं भवेत्। न त्ववयवत्वं सम्भवति। तद्विशिष्टे वेदत्वाभावात्। अनित्यस्य परमते नित्यावयवत्वाभावाच्च। न च तादर्थ्यात्तत्वम्। तादर्थ्यावेदकश्रुत्याद्य-भावादत आह। **अङ्गत्वमिति।** आरोपिताङ्गरूपत्वेन स्तुतत्वादित्यर्थः। तदेवाह।

---

१. मञ्जूषायां तिङर्थनिरूपणे मन्त्रार्थज्ञ इति पाठः। पृ.सं. १४६।

**उक्तं हि शिक्षायाम् —— [1]मुखं व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते ।**
**निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे ।।**
**शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान्प्रचक्षते ।। इति ।**

**उपकारकतयाऽप्यङ्गत्वम् । व्याकरणं हि अर्थविशेषमाश्रित्य स्वरविशेषादीन् विदधत् पदार्थविशेषनिर्णये उपयुज्यते । ज्योतिषमपि स्वाध्यायोपयोगिनमनुष्ठानोपयोगिनं च कालविशेषं प्रतिपादयति । निरुक्तं तु व्याकरणस्यैव परिशिष्टप्रायं बाहुलकादिसाध्यानां लोपागमविकारादीनां प्रायशस्तत्र सङ्ग्रहात् । छन्दोविचितिरपि गायत्र्यादिलक्षणद्वारा गायत्र्या यजतीत्यादिविध्यर्थनिर्णये उपयुज्यते । शिक्षापि वर्णोच्चारणप्रकारं दर्शयति । कल्पसूत्राण्यपि प्रकरणान्तरपठितस्य न्यायलभ्यस्य शाखान्तराधीतस्य चाङ्गजातस्योपसंहारेण प्रयोगं दर्शयन्ति । तस्मात्षडङ्गानि । तेष्वपि प्रधानं व्याकरणम्,**

---

**उक्तं हीति ।** यतस्तत्रोक्तमित्यर्थः । मुखं व्याकरणादीनां रूपकं आहार्यभेदारोपस्तद्धर्मारोपो वा बोध्यः । तस्य = वेदस्य । **विचितिः** समूहः । **पदे** चरणे । **कल्पान्** कल्पसूत्राणि । न केवलं गौणं तथैवाङ्गत्वं किन्त्वन्यथापि मुख्यं तदित्याह । **उपेति ।** वेदस्येति शेषः । उपकारजनकतयेत्यर्थः । तत्वं चागमप्रत्यक्षादिसिद्धमेवेति भावः । यद्यप्यस्य वैदिकशब्दविषयकत्वमपि प्रागुक्तमिति तदुपकारकत्वमुक्तप्रायं, तथापि लोकवेदसाधारणशब्दद्वारापि तदुपकारकत्वं प्रतिपादयन् शिक्षादिसाधारणैकरूपेण सर्वेषामङ्गत्वं प्रतिपादयंश्च सर्वेषामुपकारकत्वमुपपादयति तत्क्रमेण । **व्याकरणमित्यादिना ।** हि यतः । **स्वरेति ।** उदात्तादीनीत्यर्थः । स्वाध्यायोपयोगिनं = वेदाध्ययनोपयोगिनं । **परिशिष्टेति ।** वेदपरिशिष्टवदवशिष्टार्थबोधकतयैतदङ्गभूतमित्यर्थः । **बाहुलेति ।** व्याकरणे इत्यादिः । आदिना पृषोदरादीनीत्यादिसङ्ग्रहः । लोपस्याविकारत्वात्पृथग्गणनम् । आदिना विपर्ययादिसङ्ग्रहः । तत्र तत्प्रायत्वं दृढयन्नाह । **प्रायश इति । तत्र** निरुक्ते । छन्दोविचितिरपि तत्समूहोऽपि । **लक्षणेति ।** तत्कथनेत्यर्थः । आदिभ्यां त्रिष्टुबादेः त्रिष्टुभं शं सतीत्यादेश्च परिग्रहः । न्यायलभ्यस्य = युक्त्यादिलभ्यस्य । अङ्गजातस्य = तत्समूहस्य । उपसंहारेण एकीकरणेन । उपसंहरति । **तस्मादिति ।** उक्तहेतोरित्यर्थः । तेष्वपि = उक्ताङ्गेष्वपि । ननु **गुणानां च परार्थत्वादसम्बन्धः समत्वादिति** न्यायेन तेषां परस्परं सम्बन्धाभावात् षडङ्गेषु प्रधानमिदमित्यनुपपन्नम् । तेषु वर्तमानं स्वाङ्गापेक्षया प्रधानमित्यर्थे तु शिक्षादावविशिष्टत्वमत आह ।

---

१. पाणि.शि. पृ.सं. २२० ।

**पदपदार्थावगमस्य व्याकरणाधीनत्वात् ; वाक्यार्थज्ञानस्य तन्मूलकत्वात्। अत एव तस्य शिक्षायां मुखत्वेन निरूपणं कृतम्। मन्वादिस्मृतिष्वपि अङ्गाध्ययनविधयः प्रसिद्धा एव। तथा चाध्ययनविधिर्व्याकरणाध्ययनस्यानुष्ठापक इति स्थितम्। तथाच सन्ध्योपासनादेरभावे प्रत्यवायोऽनुष्ठाने च पापक्षय इति यथाभ्युपेयते तथा व्याकरणाध्ययनस्याप्यननुष्ठाने अनुष्ठाने च बोध्यम्।**

**रक्षाप्रभृतीनि फलान्तराण्यपि सन्ति। तथा च भाष्यम् - ‘‘कानि पुनरस्य**

---

**पदेति।** नन्वेवमपि तत्र न तदवगमस्य किञ्चित्फलमत आह। **वाक्येति।** पदार्थबोधस्य वाक्यार्थबोधहेतुत्वादित्यर्थः। एवञ्चैतच्छास्त्रं पदपदार्थावगमद्वारा वाक्यवाक्यार्थावगमोपयोगीति वेदार्थज्ञाने व्याकरणं प्रधानं करणमिति भावः। तथा च व्याकरणानध्ययनप्रयुक्तवेदार्थाज्ञानप्रयुक्त-प्रत्यवायपरिहारकतयाऽस्य नित्यत्वमिति बोध्यम्। अत एव = प्रधानत्वादेव। तस्य = षडङ्गान्तः-पातिनो व्याकरणस्य, **मुखत्वेन** आरोपितेन, यथा सर्वशरीरावयवानां मध्येऽन्नपानादिप्रवेशनद्वारा शरीरनिर्वाहकं मुखमेवं वेदस्वरूपनिर्वाहकमिदमिति शरीराङ्गेषु तस्यैव तेष्वस्य प्राधान्यमिति भावः। एवं तद्घटकत्वेन तद्विधिमुक्त्वा इदानीं स्वतन्त्रं तद्विधायकमाह। **मन्वादीति।** आदिना **याज्ञवल्क्यादि** अङ्गाध्ययनविधयः **श्रावण्यां प्रौष्टपद्यामि**त्यादयो वक्ष्यमाणाः। प्रकृतमुपसंहरति। **तथा चेति।** तदर्थकतादृशविधिसत्वे चेत्यर्थः। अध्ययनविधिः = उक्तद्विविधः। **स्थितमिति।** भाष्यादाविति शेषः। अस्योक्तं नित्यत्वं सन्ध्योपसनादितुल्यतयोपपादयति। **तथा चेति।** तस्य तदनुष्ठापकत्वे चेत्यर्थः। चस्त्वर्थे। **बोध्यमिति।** अत एव रक्षादिप्रयोजनसत्वेऽपि न नित्यत्वक्षतिः। न ह्यप्रयोजनं नित्यं किन्तु यदकरणे प्रत्यवायस्तन्नित्यमिति तल्लक्षणसत्वमत्राप्यविशिष्टमिति, भावः।

## १.३.१ वेदरक्षायाः प्रयोजनत्वविचारः

पारम्पर्येण धर्मार्थकाममोक्षसाधनतामस्य ध्वनयितुं तान्येवाह। **रक्षेति। फलान्तरेति।** पापक्षयान्यानि दृष्टानि शब्दव्युत्पत्तिरूपप्रयोजनप्रयोजनानीत्यर्थः। तत्र सम्मतिमाह। **तथा चेति।** कानि पुनः शब्दानुशासनस्येति पाठः। भाष्ये तथैव सत्वात्। अस्येति पाठेऽर्थतोऽनुवादः। उभयथापि शब्दज्ञानफलकव्याकरणाध्ययनस्येति तदर्थः। शब्दज्ञानद्वारा व्याकरणाध्ययनस्य तदज्ञानप्राप्तप्रत्यवायपरिहार एव फलमिति सन्ध्योपासनादिवत् व्याकरणाध्ययनं नित्यं कर्म उत

**प्रयोजनानि । रक्षोहागमलघ्वसन्देहाः प्रयोजनम्'' इति । अत्र प्रयुज्यते प्रवर्त्यतेऽनेनेति करणल्युडन्तः प्रयोजयतीति कर्तृव्युत्पत्त्या बाहुलकात्कर्तृल्युडन्तो वा, उभयथापि प्रवर्त्तकविधिपरः पुल्लिङ्गः प्रयोजनशब्द एकः । फलपरः क्लीबोऽपरः । उभयोः ''नपुंसकम्'' इति नपुंसकैकशेषे एकवद्भावस्य वैकल्पिकतया प्रश्ने बहुवचनमुत्तरे एकवचनं च बोध्यम् । तत्र आगमः प्रवर्त्तकः, रक्षोहलाघवासन्देहास्तु फलानीति विवेकः । तत्र प्रवर्त्तक आगमो व्याख्यातः । फलानि व्याख्यायन्ते ।**

**तत्र रक्षा वेदसंरक्षणम् । तथा हि, भाषायामदृष्टा लोपगमवर्णविकाराश्छन्दसि**

---

तदतिरिक्तमपि दृष्टं किञ्चिदिति काम्यमिति प्रश्नाशयः । अत्र प्रयोजनशब्दः करणव्युत्पत्त्या प्रयोजकपरोऽपि । तेन व्याकरणाध्ययनस्य प्रयोजकं प्रत्यवायपरिहारातिरिक्तमपि किञ्चिदस्ति उत तद्रूपमेवेत्यपि प्रश्नाशयो बोध्यः । अत एवोत्तरे आगमपदोपादानम् । प्रयोजनमध्ये तदुल्लेखस्य फलं तु अग्रे वक्ष्यति मूलकृदेव । एतेन यदत्र **कृष्णेनोक्तं** तदपास्तमिति स्पष्टं मत्कृतभाष्यप्रदी**पोद्योत**व्याख्यायां **छायायाम् ।**[1] पुनःशब्दो विशेषे पश्चादर्थकोऽपि सुयोज इत्यपि तत्रैव स्पष्टमिति बोध्यम् । तदेतद् ध्वनयन्नाह । **अत्रेति ।** भाष्यग्रन्थ इत्यर्थः । बोध्यमित्यत्रास्यान्वयः । **करणल्युडन्त इति ।** प्रयोजनशब्द इति शेषः । प्रयोजकस्य करणत्वविवक्षेति भावः । [2]**नारायणा**दिमतेन पक्षान्तरमाह । **प्रयोजेति ।** अत एव वाशब्दोऽनास्थायाम् । ननु कर्तरि ल्युटि मानाभावः । बाहुलकस्यागतिकगतित्वात् । तथा च द्वितीयपक्षासम्भव इत्यत आह । **उभयथापि प्रवर्तकेति ।** अव्ययानामनेकार्थत्वात् सर्वथापीत्यर्थः । एतत्परत्वसम्पादने एव तात्पर्यं न तु द्वितीयपक्षप्रतिपादने तच्चैकव्युत्पत्त्या सिद्धं, फलवदागमस्यापि तत्करणत्वादिति भावः । क्लीबोऽपर इति पाठः । एकवचनं बोध्यमिति निश्चः पाठः । तथा पाठे त्वर्थः स उत्तरे इत्यग्रे योज्यः । प्रागुक्तक्लीबैकशेषानुवादको वा यथाश्रुतः । तत्र = रक्षादीनां मध्ये । एवमग्रेऽपि । भाष्यस्थलघुशब्दस्य धर्मपरत्वमित्याशयेनाह । **लाघवेति । फलानीति ।** फलफलानीत्यर्थः । एवमग्रेऽपि ।

तत्र = चतुर्णां फलानां मध्ये । ननु साधुरक्षा नास्य फलमत आह । **वेदेति ।** ननु नियतानुपूर्वीकस्य शिष्याचार्यपरम्परया धार्यमाणशरीरकस्य वेदस्य शिष्याचार्यसम्बन्ध एव महान्

---

१. छायां पृ.सं. २० प्रथमो भागः ।

२. सू.रत्न. पृ.सं. ३१ ।

**दृश्यन्ते। ते केवलप्रयोगशरणैः प्रामादिकाः सम्भाव्येरन्। वैयाकरणस्तु लक्षणदर्शी तदेव रूपं स्थापयति।**

**तत्र लोपोदाहरणम्-त्मना देवेषु विविदे मितद्रुः। त्मना आत्मनेत्यर्थः। ''मन्त्रेष्वाङ्यादेरात्मनः'' इत्याकरलोपः।**

**आगमो यथा-देवासः, ब्राह्मणासः। ''आज्जसेरसुक्'' इत्यसुगागमः।**

**लोपागमौ यथा-देवा अदुह। अदुहतेत्यर्थः। दुहेर्लङो झस्यादादेशे कृते ''लोपस्त आत्मनेपदेषु'' इति तलोपः, 'बहुलं छन्दसि'' इति रुडागमः। एतेन 'नाशिरं द्रुहे' 'विश्वा इत्ते' 'धेनवो दुह्रे' इत्यादिलडन्तमपि व्याख्यातम्।**

**वर्णविकारो यथा-गृभ्णामि ते सौभगत्वाय। ''हृग्रहोर्भश्छन्दसि'' ''हस्येति वक्तव्यम्'' इति भकारः।**

---

रक्षाहेतुरिति न कापि रक्षा व्याकरणेनेति किमनेनेत्यत आह। **तथा हीति।** भाषायां = लोके आत्मनेत्यादौ। **लोपागमेति।** भावरूपस्यैवादेशस्यात्र विकारत्वेनाभिमतत्वाल्लोपस्य चातत्वमिति पृथग्गणितः सः। छन्दसि 'त्मना देवेष्वित्यादौ'। **केवलप्रेति।** अवैयाकरणैरित्यर्थः। **प्रामादिका इति।** तथा च पाठान्तरकल्पनाया अप्यापत्तिः। न चाचार्यवचनात्तन्निवृत्तिः। भ्रंशशङ्कया तेष्वविश्वासादिति भावः। ननु व्याकरणाव्याकृतवाक्यसन्दर्भसंरक्षणवत् अध्येतृपरम्परयैव पदरक्षणस्याप्युपपत्तिरत आह। **सम्भाव्येरन्निति। स्थापयतीति।** तथा च वेदार्थज्ञानपूर्वकं शुद्धतन्मन्त्रैतद्विहितकर्मानुष्ठानेन धर्मोऽर्थः स्वर्गसुखं च उपनिषदर्थज्ञानादिना मोक्षश्च पुरुषार्थो व्याकरणाध्ययनस्य फलमिति वेदार्थावगमद्वारापि व्याकरणस्य पुरुषार्थसाधनत्वमिति भावः। तत्र = लोपादीनां मध्ये। **मन्त्रेष्विति।** आङिति टासंज्ञा प्राचाम्। मन्त्रेषु आङिपरे आत्मन आदेराकारस्य लोप इत्यर्थः। **आज्जसेरिति।** अवर्णात्परस्य अङ्गसंज्ञानिमित्तस्य जसोऽसुक् स्यादित्यर्थः। एवं लोपागमयोरसङ्कीर्णमुदाहरणं दत्वा सङ्कीर्णं कैयटोक्तमाह। **लोपेति। झस्यादेति। आत्मनेपदेष्वनत** (पा०सू० ७-१-५) इत्यनेनेति भावः। **लोपस्त इति।** छन्दसि आत्मनेपदवृत्तितकारस्य हल्मात्रस्य लोपो भवतीत्यर्थः। एतेन = उक्तव्याख्यानेन। **व्याख्यातमिति।** तथा चेदमपि प्रथमपुरुषबहुवचनान्तत्वात् अनयोरुदाहरणं। 'अतो गुण' इति त्वत्रापि तत्रेव सममिति भावः। **गृभ्णामीति।** जभारेत्यपि बोध्यम्। एवं छन्दोवर्णविकारमुदाहृत्य

**प्रत्ययोऽपि छान्दसोस्ति। यथा-उद्ग्राभं च निग्राभं चेति। ''उदि ग्रह'' इति सूत्रे ''उद्ग्राभनिग्राभौ च च्छन्दसि स्रुगुद्यमननिपातनयोः'' इति वचनादुन्निपूर्वाद्ग्रहेर्घञ्। तत्र उत्पूर्वात्सूत्रेण लोकेऽपि सिद्धो घञ्। निपूर्वात्तु वार्तिकोक्तश्छन्दस्येव। सन्निवेशविशेषयुक्ताः पात्रविशेषाः स्रुचः। इह तु जुहूपभृतोरेव ग्रहणम् ''उद्ग्राभं चेति जुहूमुद्यच्छति, निग्राभश्चेत्युपभृतं नियच्छति'' इति वचनात्। भकारादेशः प्राग्वत्।**

**ऊहोऽपि प्रयोजनम्। तथा हि, यत्राङ्गजातं सम्पूर्णमुपदिष्टं सा प्रकृतिः। यथा-दर्शपूर्णमासौ। यत्र नोपदिष्टं सा विकृतिः यथा - ''सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः''**

---

मिश्रितं तदुक्तमुदाहरति। **प्रत्ययोऽपीति।** अपिना भकाररूपवर्णविकारसंग्रहः। निपूर्वाद् ग्रहेर्घञ्विधायकाभावादाह। **उद्ग्राभनिग्राभौ चेति।** अनयोरर्थयोरिमौ निपात्येत यथासंख्यमित्यर्थः। अत्र निग्राभ इत्येव प्रकृतलक्ष्यं, न तूद्ग्राभ इतीत्याह। **तत्रेति।** तयोर्मध्य इत्यर्थः। सूत्रेण = उदि ग्रह (पा०सू० ३-३-३५) इत्यनेन। लोकेऽपीत्यपिना वेदसमुच्चयः। अत एवाग्रे तुः। स्रुगर्थमाह। **सन्नीति।** विलक्षणाकारयुक्ता इत्यर्थः। स चाकारो याज्ञिकप्रसिद्धो ग्राह्यः। इह तु = वार्तिके तु। **भकारादेशः प्राग्वदिति।** गृभ्णामीत्याद्यर्थमावश्यकेन 'हृग्रहो'रित्यादिनेत्यर्थः। एतेनोद्ग्राभनिग्राभौ चेत्यनेनैव भस्यापि सिद्धत्वादेवमुक्तिश्चिन्त्येति परास्तम्। अन्यार्थमावश्यकेन तेनैव भस्य सिद्धौ तदंशे निपातनाश्रयणस्य वैयर्थ्यात् इति भावः।

## १.३.२ ऊहस्य प्रयोजनत्वविचारः

**ऊहोऽपीति।** अन्यथापाठ इत्यर्थः। ननु यत्र प्रकरणे यादृशा ये मन्त्रा पठितास्तत्र तेषां तथैव प्रयोग इष्ट इति अन्यथापाठस्यैवाभावात् नोहेन प्रयोजनमित्याशङ्क्य प्रकृतावूहाभावेऽपि विकृतावूह आवश्यक इति दर्शयितुं प्रकृतिविकृतिशब्दार्थमाह। **तथा हीति।** यत्तु कैयटादयः[1] यस्मिन्नाग्नेयादियागे इतिकर्तव्यतोपदिष्टा, यागान्तरेण सौर्यादिना उपजीव्यते, विकृतिः यतोऽङ्गानि गृह्णातीति यावत् सा प्रकृतिः। येनोपजीव्यते सा विकृतिरिति। तन्न। गृहमेधीये प्रकृतिताया अप्राप्तिप्रसङ्गात्। न हि गृहमेधीया काचन विकृतिरङ्गानि गृह्णाति। मानाभावात्। तदुपयोगस्त्वन्यत्र पूर्वतन्त्रे स्पष्टः। तदेतद्ध्वनयन्नन्यथा तदर्थमाह। **यत्राङ्गेति।** आग्नेयादावङ्गसमूह इत्यर्थः। पूर्णं चोदकावधिकाङ्गप्राप्त्यनपेक्षं। **पूर्णमासाविति।** यागनामधेये। तत्र हि न

---

१. म.भा.प्र.पृ.सं. २२ प्रथमभागः।

**इति विहितो यागः। तत्र वैकृतस्य विधेर्विषयभूतायां भावनायां करणीभूते यागे उपकारकाकाङ्क्षायां तन्मुखेन प्राकृतमङ्गजातं प्राप्यते। वैदिके करणे तादृशानामेवाङ्गानामपेक्षितत्वात्। तेषामेव प्रकृतौ क्लृप्तसामर्थ्यात्। तद्विशेषस्य चैकदेवतात्वादिना**

---

चोदकादङ्गप्राप्तिः, प्रकरणपठितैरेवाङ्गैर्नैराकाङ्क्ष्यात्। एवं क्रतौ प्रकारैरेवाज्यभागादिभिर्नैराकाङ्क्ष्यात्। गृहमेधीयादिष्वपि तत्वं बोध्यम्। **यत्र** सौयादियागे। **नोपदिष्टं** पूर्णं नोपदिष्टं, चोदकावधिकाङ्गप्राप्तिसापेक्षमिति यावत्। **इति विहिति इति।** ननु यजेरत्रानुपात्तत्वात्कथमनेन यागविधानमिति चेन्न कर्मणो द्रव्यदेवतान्यतरस्वरूपत्वेन तदन्यतरदपि यत्रोपलभ्यते तत्र कर्मस्वरूपविधिरिति मीमांसकसिद्धान्तात् यजेरसत्वेऽपि कल्प्यमानत्वात्। **अत्रेदं बोध्यम्।** इह सर्वेष्वपि यागेषु प्रत्येकमितिकर्तव्यतादि श्रूयते। न हि निरितिकर्तव्यतादिकं कर्म भवति। तथा हि। सर्वत्राख्याते भावनाया विधेयत्वात्तस्याश्चांशत्रययोगित्वात्, किं केन कथमिति साध्यसाधनेतिकर्तव्यताकाङ्क्षायां यथायथं सम्बन्धः। यत्र तु सौर्यं चरुमित्यादौ किञ्चिदेव श्रूयते साध्यं साधनं चेति तत्रेतिकर्तव्यताऽवश्यमपेक्षणीया। तदन्तरेण साध्यसाधनान्वयायोगात्। न च तत्र सा श्रूयते। अतः प्रकृतितस्तत्र सा सम्बध्यते। प्रकृतिवद्विकृतिः कर्तव्येत्यतिदेशात्। एवञ्च न कोऽपि दोष इति। तदेतदाह। **तत्रेति।** सौर्यं चरुमिति विहितयागरूपविकृतौ इत्यर्थः। यद्वा तयोर्मध्य इत्यर्थः। वैकृतस्य = विकृतियागसम्बन्धिनः। **विधे**र्विधिवाक्यस्य **सौर्यं चरुं निर्वपेदि**त्यस्य। **विषयभूतायां** वाक्यैकदेशभूतनिर्वपेदित्यंशोपात्तायामार्थीभावनायां फलीभूतस्य यागस्य समानपदोपात्तत्वेन करणत्वेनान्वय इति भावः। **उपकारकाङ्क्षायां** कथमित्याकारायां इतिकर्तव्यताकाङ्क्षायां, **तन्मुखेन** उपकारद्वारा, **प्राकृतं** प्रकृतियागसम्बन्धि। ननु यागस्य साधनीयत्वात्तत्राप्येषामेव[1] लौकिकानामङ्गानां समावेशो भवत्वत आह। **वैदिक इति।** करणे = यागे। तादृशानां = वैदिकानां। **अपेक्षितेति।** तथा चाकाङ्क्षया तेषामेव सम्बन्धो नान्येषामिति भावः। नन्वेवमप्यन्येषामेव वैदिकानां कुतो न सम्बन्ध इत्यत आह। **तेषामेवेति।** वैदिकाङ्गानां प्रकृतिपठितानामेवेत्यर्थः। [2]**(प्रकृतौ क्लृप्तेति।** तत्तदुपकारद्वारा प्रकृतियागनिष्पादकत्वरूपसामर्थ्यस्य क्लृप्तत्वादित्यर्थः।) तथा **चाक्लृप्तकल्पनात** इति न्यायेन लाघवात्तदेव वरमिति भावः। ननु एवमपि कथं प्रकृतिविकृतिभावविशेषावगम एवेत्यत आह। **तद्विशेषेति।** प्रकृतिविकृतिभावविशेषस्य चेत्यर्थः। **देवतात्वादिनेति।** एकत्वसंख्यावच्छिन्नदेवताकत्वेनेत्यर्थः।

---

१. तदन्येषामिति खपाठः।

२. इत आरभ्य 'क्लृप्तत्वादित्यर्थ' इत्यन्तः ( ) चिह्नान्तर्गतः पाठः क पाठे नास्ति। लेखकानवधानं तत्र बीजम्। ख पाठे घ पाठे तूपलभ्यते।

**शक्यज्ञानत्वात्। तस्मात् ''प्रकृतिवद्विकृतिः कर्त्तव्या'' इति पूर्वमीमांसायां स्थितम्। तत्र यस्याङ्गस्य प्रकृतौ य उपकारः क्लृप्तस्तस्य विकृतावसंभवे निवृत्तिः। यथा प्रकृताववघातस्य वैतुष्यमुपकारतया क्लृप्तं तस्य कृष्णलेष्वसंभवादवघातस्य निवृत्तिः। मन्त्रा अप्यङ्गम्। तेषां चानुष्ठेयार्थप्रकाशनं कार्यम्। तत्र प्रकृतौ यस्य मन्त्रस्य यदभिधेयं तच्चेद्विकृतौ साकल्येन नास्ति तदा कृत्स्नस्य मन्त्रस्य निवृत्तिः। यथा ''अवरक्षो दिवः सपत्नं वध्यासम्'' इत्यवघातमन्त्रस्य कृष्णलेषु। यस्य त्वेकदेशस्याभिधेयं नास्ति तस्य**

---

साम्येनेति शेषः। बहुव्रीहिः। वैकल्पिकत्वात्कप् न। प्रकृत्यादिरन्यपदार्थः। आदिना द्विदेवतात्वादिसाम्यपरिग्रहः। नन्वेवमपि अन्यत्र पठितानामङ्गानां कथमन्यत्र गमनमचेतनत्वादत उपसंहरन् आह। **तस्मादिति।** तथा चाकाङ्क्षामूलकातिदेशात् तत्र तदन्तर्भावेण प्रयोगकल्पनमिति भावः। **प्रकृतिवदिति।** यथा सोपकारा प्रकृतिरनुष्ठीयते तथा विकृतिरपीति तदर्थः। तदनेनोपकारातिदेशे तत्पृष्ठभावेन पदार्था अप्यतिदिश्यन्ते। इतिकर्तव्यतायां भावनायाः साकाङ्क्षत्वात्। एतन्मूलकमेव प्रकृतिवदितीति मीमांसकसरणिस्तदेतदाह। **पूर्वमीमांसायामिति।** एवञ्चोपकारसत्वे एवानुवृत्तिरन्यथा न सामान्यातिदेशसत्वेऽपि इति बोध्यम्। तदेवाह। **तत्रेति।** चोदकप्राप्ताङ्गानां मध्ये इत्यर्थः। **उपकारः** फलम्। उदाहरति। **यथेति।** तत्र व्रीहीनवहन्तीति विहितस्य कण्डनस्येत्यर्थः। वैतुष्यं = तुष्यविमोकता। उपकारतया = फलतया। तस्य = फलस्य। कृष्णलेषु = **कृष्णलान् श्रपये**दित्यादिविहितकृष्णलयागसमाम्नातेषु गुञ्जापरिमितसुवर्णेषु। नन्वेवमपि प्रकृतौ मन्त्राणामुपकाराभावेनानङ्गत्वात्कथमुक्तरीत्या तेषामतिदेश इति [1]मन्त्राणां तत्राप्राप्त्योहस्य सुतरामभावेन नास्य फलं स इति प्रकृतासिद्धिरेवात आह। **मन्त्रा अप्यङ्गमिति।** अपिः प्रयाजादिसमुच्चायकः। प्रकृताविति शेषः। तदुपकारमाह। **तेषां चेति।** मन्त्राणामित्यर्थः। **कार्यं** फलम्। अन्यथा दृष्टाभावेनेष्टसिद्ध्यभावापत्तिः। एवञ्चोपकारपृष्टभावेन[2] पदार्थातिदेशे[3] तेषामपि पदार्थान्तर्गतत्वादन्याङ्गजातवद्विकृतौ मन्त्रा अपि प्रकृतित अतिदेशेनैव लभ्यन्ते। अत एवोपकारसत्वे एव सम्बन्धो नान्यथा। तदाह। **तत्रेति।** तेषां मन्त्राणां मध्य इत्यर्थः। साकल्येन = सर्वावयवावच्छेदेन। **अवघातेति।** तत्प्रकाशकमन्त्रस्येत्यर्थः। कृष्णलेषु निवृत्तिरित्यस्यानुषङ्गः।

---

१. मन्त्राणामप्राप्त्या, तत्रेति नास्ति घ पा०।

२. उपकारस्पृष्टभावेन इति घ पा०।

३. पदार्थानतिदेशे इति घ पा०।

**तावन्मात्रं निवर्तते। यथा - ''अग्नये त्वा जुष्टं निर्वपामि'' इत्यस्य मन्त्रस्यावयवभूतं देवताभिधायि पदमौषधद्रव्यकत्वेन एकदेवताकत्वेन चाग्नेयविकारभूते सौर्ये निवर्त्तते अग्निशब्दे च लुप्तद्धारकतया निवर्तमाने एकारोऽपि निवर्त्तते। अकारान्तेतरप्रकृति-सन्निधानेनैव हि एकारस्य सम्प्रदानं वाच्यम्, अकारान्तात्तु यशब्दस्य। ततश्चतुर्थ्यन्तसूर्यायेत्याद्युदात्तमग्नय इत्यस्य मध्योदात्तस्य स्थाने ऊह्यम्। सोऽयं प्रकृत्यूहः।**

---

यस्य = मन्त्रस्य। व्यधिकरणषष्ठीद्वयम्। तु वैलक्षण्ये। **तावन्मात्रं** एकदेशमात्रं। **पदम्** अग्नय इत्यत्राग्निरूपप्रकृतिभूतं शक्तं। अत एव देवताभिधायीति विशेषणसङ्गतिः अग्रिमग्रन्थसङ्गतिश्च। सौर्ययागस्य तद्विकृतित्वे हेतुमाह। **औषधेति।** फलपाकान्तरूपौषधिसम्बन्धिव्रीह्यादिरूप-द्रव्यकत्वेनेत्यर्थः। **चाग्नेयेति।** आग्नेययागेत्यर्थः। **सौर्ये** तद्यागे। ननु विरुद्धार्थप्रतिपादकत्वात्प्रकृते-र्निवृत्तावपि अविरुद्धार्थकत्वेनैकारसत्वापत्तौ सूर्य इति प्रयोगापत्तिरत आह। **अग्नीति।** ननु शास्त्राभावात्कथं निवृत्तिरेवात आह। **लुप्तेति।** भावे क्तः। अन्यथानुपपत्तिकल्पितलोपेत्यर्थः। तन्निवृत्तौ हेतुमाह। **अकेति।** हि यतः। नैवमकारान्तप्रकृतिसन्निधान इत्याह। **अकारान्तादिति।** अत एव तुः प्रयुक्तः। परस्येति शेषः। **यशब्देति।** सम्प्रदानं वाच्यमित्यस्यानुषङ्गः। तथैवानादिप्रयोगेण साधुत्वकल्पनादिति भावः। तथा चाग्निसम्बन्धिनिर्वापप्रकाशकमन्त्रघट-काग्निशब्दस्य चतुर्थ्यन्तस्य सूर्यसम्बन्धिनिर्वापप्रकाशनासमर्थत्वात्तदपहाय तत्स्थाने सूर्यायेत्यूह्यम्। तदाह। **ततश्चेति।** फलतो विशिष्टनिवृत्तिसिद्धेश्चेत्यर्थः। न केवलं रूपभेदः किन्तु स्वरभेदोऽपि इत्याह। **आद्युदात्तमिति।** अत एवाह। **सोऽयमिति।** प्रत्ययोहस्तु नान्तरीयक इति भावः। लिङ्गस्य = सप्रकृतिवचनस्य। अत एव वक्ष्यति। **प्रत्ययमात्रस्येति।** वचनमात्रस्येति तदर्थः। तस्य = मन्त्रस्य। एवमग्रेऽपि। माभेरिति लुङन्तम्। छान्दसत्वादवृद्धिः। वदानमन्त्रः = ग्रहणमन्त्रः। विनियुक्त इति शेषः। आदिना शेषभूतमन्त्रग्रहणम्। हरदत्तादय इत्यनेन सूचितामरुचिं युक्तं चैतदित्यादिना कथयितुं मतान्तरमाह। **याज्ञीति।** तामरुचिं प्रतिपादयन्, एतन्मतं सिद्धान्तयन्नुपपत्तिं**र्नारायणा**[1] नुरोधेनाह। **युक्तमिति।** प्रकृतौ **मा भेर्मा संविक्था**[2] इत्यत्र। **प्रयोग इति।** यद्यपि **वेदभाष्ये**[3] ओ विजीत्यस्यैवैतद्रूपं इडभावश्छान्दसत्वादागमशास्त्रानित्यत्वाद्वा मा

---

१. सू.रत्न. पृ.सं. ३७।

२. शत.ब्रा.पृ.सं. २१९ (ना.प्र.)

३. शत.ब्रा.वेद.भा. २१९।

**लिङ्गस्य क्वचिदूहः। यथा - ''देवीरापः शुद्धाः स्थ'' इत्यप्सु विनियुक्तो मन्त्रः। तस्याज्ये ऊहः देवाज्यशुद्धमसीति।**

**प्रत्ययमात्रस्य क्वचिदूहः। यथा - ''मा भेर्मा संविक्थाः'' इति पुरोडाशेऽवदान-मन्त्रः। तस्य धानासूहः - ''माभैष्ट मा संविजिध्वम्'' इत्यादिरिति हरदत्तादयः। याज्ञिकास्तु संविग्ध्वमित्यूहमाहुः। युक्तं चैतत्, प्रकृतावनिट्कतया ''विजिर् पृथग्भावे'' इत्यस्य प्रयोगो न तु ''ओविजी भयचलनयोः'' इत्यस्येत्यवधारणात्।**

**लाघवमपि प्रयोजनम्। तथा हि, अध्यापनं ब्राह्मणस्य वृत्तिः। तन्निर्वाहश्च वैदुष्याधीनः। वैदुष्यं च साध्वसाधुविवेकः। स च न प्रतिपदपाठादिना सम्भवति, शब्दानामानन्त्यात्। तस्मादुत्सर्गापवादरूपलक्षणद्वारा तद्बोधने लाघवम्। अन्यथा तु गौरवम्।**

---

कम्पिष्ठा इत्यर्थ इत्युक्तम्। विजिरः कम्पनार्थत्वाय धातूनामनेकार्थत्वमित्यस्याश्रयणापत्तिरिति तद्भावः। तथापि तदपेक्षया छान्दसत्वादिकल्पना गरीयसीत्याशयः। वस्तुतस्तु याज्ञिकोक्तमेव युक्तं न तु मिश्रोक्तमिति यद्यपि, तथापि नोक्तप्रकारेण, उक्तदोषापत्तेः। किन्तु प्रकारान्तरेण। **वेदभाष्यरत्नकृदाद्युक्तिस्तु** चिन्त्यैवेति सर्वं स्फुटं **भाष्यादिव्याख्यायां** [१]**छायाया**मिति बोध्यम्। एवञ्च यथायथमूहस्यावैयाकरणेन कर्तुमशक्यत्वात्तस्य तत्वं सिद्धम्। एवञ्च ऊहज्ञस्यार्त्विज्यलाभेन द्रव्यप्राप्तिद्वारा ऐहिकसुखसिद्धिः स्वर्गादिसुखसिद्धिश्च परम्परया फलमिति बोध्यम्।

भाष्यस्थलघुशब्दो लाघवपरः, अन्यथाऽनुपपत्तेरित्याशयेनाह। **लाघवेति।** प्रकृत्यादि-विभागेनान्वाख्यातस्येति भावः। प्रयोजनं = प्रयोजनप्रयोजनम्। नन्वेतदध्ययनस्य तस्य तत्वं कथं फलमतस्तत्वं व्युत्पादयति। **तथा हीति।** तन्निर्वाहः अध्यापननिर्वाहः। वैदुष्यपदार्थं निर्वक्ति। **वैद्विति। विवेक इति।** तद्भेदबोध इत्यर्थः। स च = तद्विवेकबोधश्च। आदिना तद्विषयकलक्षणादिसंग्रहः। उपसंहरति। **तस्मादिति।** तद्बोधने = प्रकृत्यादिविभागेनान्वाख्यान-द्वारकसाध्वसाधुविवेकबोधने। अन्यथा = प्रतिपदपाठादिना तद्बोधने। **गौरवमिति।** इति तदपि प्रयोजनं भवत्येवेति शेषः।

---

१. छाया. प्रथमो भागः पृ.सं. २३।

**असन्देहोऽपि प्रयोजनम्। तथा हि, ''स्थूलपृषतीमनड्वाहीमालभेत'' इति**

## १.३.३ असन्देहस्य प्रयोजनत्वविचारः

क्रमप्राप्तमसन्देहरूपं फलमाह। **असन्देह इति।** नन्वसन्देहो नाम सन्देहाभावः। स च नात्यन्ताभावस्तस्य नित्यत्वेनाफलत्वात्। न च ध्वंसः। तत्तद्विषयकव्याकरणज्ञानवतः सन्देहस्यैवाभावेन तदसम्भवात्। यस्य त्वधीतव्याकरणस्यापि क्वचित् सन्देहः स तद्विषयकवैयाकरणत्वाभाववानेव। न च तदध्ययनसत्वेन कथं तत्वम्। तत्रापि प्रत्ययसत्वादिति वाच्यम्। शुद्धाध्ययनस्याफलत्वेन निन्दितत्वेन चाप्रयोजकत्वेन वेदनार्थे तत्र प्रत्ययसत्वात्। तथा च वैयाकरणत्वमव्याप्यवृत्ति। न वा वैयाकरणतादशायां जातसंशयस्याध्ययनेन ध्वंसः। न च तदा बहुव्रीहित्वादेरज्ञानात्कथं सः, काव्यपाठादिना तत्सम्भवादिति वाच्यम्। यथा वैयाकरणतादशायामेव रक्षादिफलत्रयमन्यथा तदभाव एवैवं तदैवासन्देहस्य फलत्वमिति तस्य तदनुत्पत्त्या तदसम्भवात्। तदुक्तं **कैयटेन**[1]**।** ''न हि वैयाकरणस्य संशय उत्पद्य विनश्यति, इतरस्यैव तदुत्पादादि''ति। किञ्च तस्यान्यथा नाशेनानेन नाशासम्भवात् कालान्तरभावित्वात्तदुत्तरविशेषदर्शनादिनैव तस्य नाशाङ्गीकारात्तदभावे तस्यैवावस्थितेः। एवञ्च वैयाकरणस्य तदध्वंसो दुर्वचः। अवैयाकरणस्य तु सन्देह एव। परोक्त्यादिना विशेषनिश्चयादितस्तन्निवृत्तिस्तु रक्षादिवदेव क्वचिदित्यन्यदेतदिति चेन्न। सन्देहप्रागभावस्यैवात्र विवक्षितत्वात्। तत्परिपालनं च व्याकरणशास्त्राध्ययनफलम्। न तु तत्स्वरूपं तस्याजन्यत्वात्[2]। तत्परिपालनं च प्रतियोगिसन्देहजनकप्रतिबन्धकाभावरूपकारणविध्वंसनं, प्रागभावस्य [3]प्रतियोगिजन्मनाश्यत्वात्। एवञ्च कोटिद्वयोपस्थितिः सुतरां न। अत एव वक्ष्यति ततश्चेत्यादिनेतीति ध्येयम्। प्रयोजनमित्युक्तार्थकम्। ननु क्वावैयाकरणस्य सन्देहो यत्प्रागभावपरिपालनस्य फलत्वमतस्तमुपपादयति। **तथा हीति।** पृषतीमाग्निवारुणीमनड्वाहीमिति पाठः। श्रूयते श्रुतिः। तत्र श्रुतौ योऽयं स्थूलपृषतीति समासः स्थूला चासौ पृषती चेति विग्रहकः स्थूलानि पृषन्ति यस्यास्सेति विग्रहको वा। ननु कर्मधारयस्य स्वपदार्थप्राधान्येन लघुभूतत्वात्सन्देहानुपपत्तिरिति चेन्न अन्यपदार्थप्रधानाग्निवारुणीशब्दस्य सत्वेन बहुव्रीहेरपि

---

१. पस्पशाह्निके (म.भा.प्र.पृ.सं. २७) प्रथमो भागः।

२. तस्यासत्यत्वात् इति घ पा०।

३. प्रतियोगिजन्यनाश्यत्वात् इति घ पा०।

**श्रूयते। तत्र सन्देहः – कर्मधारयोऽयं बहुव्रीहिर्वेति। तत्र कर्मधारयपक्षे पृषतीशब्देन मत्वर्थलक्षणया पृषत्त्वती बिन्दुमती गौरेवाभिधीयते, स्थूलापि सैव, बिन्दूनां स्थौल्यं तानवं वा यथा तथाऽस्तु। बहुव्रीहौ तु स्थौल्यं पृषत्स्वेवेति। गौस्तु स्थूला कृशा वेत्यत्रानादरः। तत्र लकाराकारे उदात्तत्वं दृष्ट्वा पूर्वपदप्रकृतिस्वरेण बहुव्रीहिं वैयाकरणो निश्चिनोति। ततश्च निश्चयेन प्रतिबन्धात्संशयानुत्पादः। स एवासन्देहः। अर्थाभावेऽव्ययीभावादसन्देहमिति स्यादिति चेत् ? न, पर्यायेणाव्ययीभावतत्पुरुषसंज्ञाद्वयमपीह भवतीति द्वितीये उपपादयिष्यमाणत्वात्। अत एवोभयथा मुनिप्रयोगः –**

---

सन्देहप्रसङ्गात्। न च व्याख्यानान्निर्णयः। पौरुषेये तथा सम्भवेप्यपौरुषेयवेदे[1]ऽदृष्टार्थविषये तथाऽसम्भवादिति भावः। तत्र = द्वयोर्मध्ये। ननु विभिन्नार्थकत्वेनासामानाधिकरण्यात्तदनुपपत्तिरत आह। **पृषेति।** गौरादित्वान्ङीषिति भावः। एवमग्रेऽपि। पृषत्वतीत्यस्य व्याख्यानं **बिन्दुमतीति।** सैव = गौरेव। एतेन **कृष्णो**क्तव्याख्यानमपास्तमिति स्पष्टं भाष्यादिव्याख्याने। तानवं = कृशता। यथा तथेति शब्दात्तथाऽप्रतीत्या तत्र नाग्रह इति भावः। **पृषत्सु** बिन्दुषु। **अनादरः** तदभावः। शब्दात्तथाऽप्रतीतेः। क्वचिद्व्यक्त एव पाठः। कस्तर्हि निश्चयः तत्राह। **तत्रेति।** स्थूलपृषतीति शब्द इत्यर्थः। **निश्चिनोतीति।** अवैयाकरणस्तु विपरीतं। तत्पुरुषमेवोक्तयुक्त्याऽध्यवस्येदिति कश्चित्। वस्तुतस्तु तस्य सन्देह एव। वर्तिपदार्थादिज्ञानस्याप्यभावेन विपरीतनिर्णयस्याप्यभावात्। प्रकारान्तरेण कस्यचिन्निश्चय इति त्वन्यदेतदिति बोध्यम्। असन्देहपदार्थं निर्वक्ति। **ततश्चेति।** तन्निश्चयाच्चेत्यर्थः। **प्रतिबन्धादिति।** संशयत्वावच्छिन्नं प्रति निश्चयत्वेन प्रतिबन्धकत्वाङ्गीकारादिति भावः। **अनुत्पादः** तदुत्पत्तिप्रागभावः। **स एवेति।** तदुत्पत्तिप्रागभाव एवासन्देहपदवाच्य इत्यर्थः। शब्दसाधुत्वं प्रतिपादयितुं शङ्कते। **अर्थाभाव इति।** अत्राभावपदेन विनिगमनाविरहात्सर्वस्य ग्रहणम्। न चार्थभेदात्कथं तत्प्राप्तिः। तत्रापि अघटमित्यत्रारोपितो धट इत्येव बोधात्। भेदेन तदारोपबोधेऽत्यन्ताभावबोधः, तादात्म्येन तदारोपबोधे भेदबोधः। अत्र च प्रकरणादिकं नियामकम्। तस्य तत्प्रधानत्वं त्वौत्सर्गिकमिति बोध्यम्। **असन्देहमिति।** तथा च तेन द्वन्द्वे परवल्लिङ्गेनासन्देहानीत्यस्यौचित्येनासन्देह इत्यनुपपन्नमिति भावः। **पर्यायेणेति।** पूर्वपदार्थप्राधान्येऽव्ययीभाव उत्तरपदार्थप्राधान्ये तत्पुरुष इति रीत्येति भावः। अपीह = ईदृशविषये। द्वितीये = द्वितीयाध्याये। **अत एवोभेति।** संज्ञाद्वयाङ्गीकारादेवेत्यर्थः।

---

१. औषौरुषेये वेदे इति घ पाठः।

**अद्रुतायामसंहितमिति, अथासंहितयेति च। एवं ''इन्द्रपीतस्योपहूतो भक्षयामि'' इत्यादावपि स्वरेणैव बहुव्रीहिनिर्णये इन्द्रपीताधिकरणमवैयाकरणान्प्रति सार्थकम्। कृत्वाचिन्तान्यायेन वा नेयमिति दिक्।**

---

**अद्रुतायामिति**। संहितासंज्ञासूत्रे वार्तिकमिदम्। द्रुताभिन्नयोर्मध्याविलम्बितावृत्त्योरसंहिताभाव इति तदर्थः। एवं = स्थूलपृषतीत्यत्र स्वराद्बहुव्रीहिनिर्णयवत्। स्वरेणैव = इन्द्रशब्देकारोदात्त-स्वरेणैव। **अधिकरणं** ''विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्। निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृत''मिति लक्षणलक्षितं तन्निर्णायकं प्रघट्टकम्। वैयाकरणान् प्रत्यपि तदाह। **कृत्वेति।** यद्येवं स्यात्तर्हि किं स्याद्धि इति रीत्येति भाव इति कश्चित्। वस्तुतस्तु स न्यायो दशविधस्तत्र प्रतिपादित इति स्पष्टं वेदभाष्ये[१]। तथा हि :-

भक्षे हीत्यनुवाकोऽयं सर्वो भक्षणयोग्युत।
ग्रहणादौ यथालिङ्गं विभज्य व्यवतिष्ठते।

अविधेर्ग्रहणादीनां भक्षणे निखिलोऽस्तु सः।
अर्थाक्षिप्तेषु तेष्वेव यथालिङ्गं विभज्यते।

किञ्च, इन्द्रपीतस्येति भक्षमन्त्रांशः किमिहैन्द्रके।
केवलेऽन्यत्र चोहाद्वा सर्वत्रोत यथाश्रुतम्।

ऐन्द्र एव समर्थत्वात्तूष्णीमेवान्यभक्षणम्।
ऊहोवान्येषु कर्मैक्येऽप्यस्तूहो भक्षभेदतः।

इन्द्रेण यस्मिन् सवने सोमः पीत इतीरणात्।
सवनस्थेषु सर्वेषु मन्त्रोऽनूहेन पठ्यते।

अत्रान्त्यः पक्षो राद्धान्तः, तदुपपत्तिर्मञ्जूषायां स्पष्टा।

किञ्च, ऊहपक्षे यदूह्यं तच्चिन्त्यते न्यायपञ्चके।

ऐन्द्रे हुतेऽथ तच्छेषे होत्रकैश्चमसस्थिते।
सोमोऽभ्युन्नीय देवेभ्यो हुत्वा सम्भक्ष्यते तदा।

---

१. अत्र 'स्पष्टं वेदभाष्य' इति ख ग पाठे अस्ति। क घ पाठयोस्तु 'स्पष्टं चेदं भाष्ये' इत्यस्ति। यजुर्वेदभाष्ये सायणकृते तृतीयकाण्डे द्वितीयप्रपाठके पञ्चमानुवाके। (आ.सं.पृ.सं. १५६० पञ्चमो भागः)

इन्द्रो न लक्ष्यो लक्ष्यो वा न शेषेऽन्यार्थता यतः ।
उन्नीत एव सम्बद्धो न पूर्वो देवतान्तरैः ।

अत इन्द्रस्य सिद्ध्यर्थं लक्ष्योऽसावितरैस्सह ।
किञ्च, द्विदेवशेष आदित्यस्थाल्या आग्रायणाभिधाम् ।
स्थालीं प्राप्तस्ततः पात्नीवतस्य ग्रहणे सति ।

तद्भक्षणे द्विदेवाः किं सार्धं पात्नीवतेन ते ।
उपलक्ष्या न वा पूर्वन्यायेनास्तूपलक्षणम् ।

अन्यमाग्रायणात्पात्नीवतो नैतस्य विद्यते ।
आकाङ्क्षा पूर्वदेवेषु पत्नीवानेव लक्ष्यते ।

किञ्च, सह पत्नीवता त्वष्टा तद्ग्रहे लक्ष्यते न च ।
सह त्वष्ट्रा पिबेत्युक्तेर्देवत्वात्सोऽपि लक्ष्यते ।

सहत्वभावं त्वष्टुः स्यान्नो पातृत्वमशब्दनात् ।
चोदनाया अभावाच्च न देवोऽतो न लक्ष्यते ।

किञ्च, पत्नीवन्तस्त्रयस्त्रिंशद्देवास्तान् मादयेत्यमी ।
लक्ष्या न वा याज्ययोक्तेर्देवत्वादुपलक्षणम् ।

एकोऽग्निर्यजमानेन मादितोऽन्ये तु वह्निना ।
अतोऽग्नेरेव देवत्वान्नान्येषामुपलक्षणम् ।

किञ्च, सोमस्याग्न इति प्रोक्ताऽनुवषट्कारदेवता ।
लक्ष्या न वा देवतात्वाल्लक्ष्या त्रिंशद्विलक्षणा ।

प्रकृतौ विद्यमानोऽग्निरनुद्देशादलक्षितः ।
उद्देश्येन्द्रो लक्षितोऽतो विकृतावपि तत्तथा ।

किञ्च, अमन्त्रयजिमाश्रित्य कृत्वा चिन्तान्तरत्रयम् ।
ऊहोऽस्ति नो वा सोऽस्त्यत्र विकृतौ तस्य सम्भवात् ।

सोमेनेति विधिः सर्वप्रदानेषु समत्वतः ।
अविकारेऽप्यनूहोऽतो नैन्द्रे निर्मन्त्रभक्षणम् ।

किञ्च, समन्त्रकममन्त्रं वा स्यादैन्द्रा[१]ग्नादिभक्षणम् ।
ऐन्द्राग्नेऽपीन्द्रपीतत्वसम्भवात् तत्समन्त्रकम् ।

न पानमशरीरस्य युक्तं [२]दानं तु मिश्रितम् ।
मन्त्रोऽयं तु न मिश्रार्हस्तस्मादेतदमन्त्रकम् ।

किञ्च, ऐन्द्रदानेऽपि गायत्रमात्रयुक्तेऽथवे[३]तरैः ।
छन्दोभिरपि युक्ते स्यादाद्यो मन्त्रो तथोक्तितः ।

द्वयोस्समो बहुव्रीहिरेकच्छन्दास्तु न क्वचित् ।
नानाछन्दस्यैन्द्र एव कृत्वा चिन्तेत्थमीरिता ।

सवनार्थेन्द्रपीतोक्तिरित्युद्घाटनमीरितम् ।
तेन सर्वप्रदानेषु मन्त्रपाठो यथास्थितः । इति ।

तृतीयद्वितीयस्थमिदं । मन्द्रेत्यादितृतीयभक्षयामीत्यन्तस्यार्थः[४] । मुखस्था वाग्देवता सोमस्य जुषाणा सोमं सेवमाना तृप्यतु । को वा मन्द्रा हर्षहेतुः अभिभूतिः विघ्नानामभिभवित्री यज्ञानां केतुः कारणभूता । आदरार्थं पुनरपि मन्द्रेत्यादिना प्रार्थ्यते । सा स्वर्वाची सुष्ठु आभिमुख्येन वर्तमाना अदितिरखण्डनीया [५]अनाहतशीर्ष्णी शिरःशब्देन प्राधान्यत्प्रारम्भो लक्ष्यते ।

---

१. इन्द्रेति क ख ग पाठः ।

२. दानाम्बु इति घ पाठः ।

३. अन्यथेति घ पाठः ।

४. मन्त्रस्तु - केतुर्यज्ञानां वाग्जुषाणा सोमस्य तृप्यतु मन्द्रा स्वर्वाच्यदितिरनहतशीर्ष्णी वाग्जुषाणा सोमस्य तृप्यत्वेहि विश्वचर्षणे (१) शंभूर्मयोभू स्वस्ति मा हरिवर्ण प्र चर क्रत्वे दक्षाय रायस्पोषाय सुवीरतायै मा मा राजन्वि वीभिषो मा मे हार्दि त्विषा वधीः । वृषणे शुष्मायाऽऽयुष वर्चसे । वसुमद्गणस्य सोम देव ते मतिविदः प्रातः सवनस्य गायत्रछन्दस इन्द्रपीतस्य नराश९संपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि रुद्रवद्गणस्य सोम देव ते मतिविदो माध्यंदिनस्य मवनस्य त्रिष्टुप्छन्दस इन्द्रपीतस्य नराश९संपीतस्य (२) पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयाम्यादित्यवद्गणस्य सोम देवते मतिविदस्तृतीयस्य सवनस्य जगतीछन्दस इन्द्रपीतस्य नराश९संपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि ।।

५. आहनशीर्षा इति मातृकासु पाठः । परन्तु वेदे भाष्ये च शीर्ष्णी इति वर्तत इति कृत्वा तथैव परिवर्तितम् । शीर्षा इति तु लेखकप्रमाद एव ।

अप्रतिबुद्धप्रारम्भवागित्यादि प्राग्वत्। चर्षणयो मनुष्या विश्वेचर्षणयः स्वभूता यस्यासौ विश्वचर्षणिस्तथाविध हे सोम एहि आगच्छ, कीदृशः सोमः शम्भूः शान्तेर्भावयिता मयोभूः सुखस्य भावयिता तादृशः सन्नित्यन्वयः। हे हरिवर्ण हरिद्वर्ण स्वस्ति मा प्रचर यथा वान्तिरूपो विनाशो न भवति तथा मां प्रविश। किमर्थं क्रत्वादिसिद्ध्यर्थं। दक्ष उत्साहः हे राजन् मां वान्त्युपद्रवेण मा विबीभिष विशेषेण मा भीषय। हृदन्तेऽवस्थितं मनो हार्दि तच्च मनस्त्विषा त्वदीयया दीप्त्या मावधीः, हिंसां मा कुरु। मनसि हिंसारहिते सति वृषादयः सिद्ध्यन्ति। वृषेन्द्रियं, शुष्म बलं, आयुर्दीर्घायुः, वर्चः कान्तिः, हे सोम देव ते तव सम्बन्धि यत्प्रातःसवनं तस्य सम्बधी यो मधुमान् सः इतरैरुपहूतोऽनुज्ञातस्तस्योपहूतस्याहमप्युपहूतो भक्षयामि। कीदृशस्य ते वसुमद्गणस्य अष्टसंख्या वसवो यस्मिन् यागे सोऽयं वसुमान् तथाविधो गणो यस्य तव स त्वं वसुमद्गणः तथाविधस्य मतिविदः श्रद्धायुक्तयजमानानां मतिं वेत्ति तस्य। कीदृशस्य प्रातःसवनस्य। गायत्रच्छन्दसः बहिष्पवमानादिमन्त्रेषु गायत्र्याख्यं छन्दो यस्य तस्य, इन्द्रपीतस्य, इन्द्रेण पीतः सोमो यस्मिन् सवने तस्य। नरेत्यादिपदद्वयं नराशंसचमसभक्षणे एव प्रयोज्यं नान्यत्रेत्येकः पक्षः। सर्वत्र पाठ्यमित्यपरः। नरैः शंस्यत इति नराशंसाः पितृविशेषाः तैः पीतस्सोमो यस्मिन् सवने तस्य। अयमेव पितृपीत्यनेन स्पष्टीकृतः रुद्रवदित्यादिमन्त्रावपि प्राग्वद्व्याख्येयौ। तत्रोभयत्र मन्द्रादिमन्त्रेषु गायत्र्याख्यं छन्दो यस्य तस्येन्द्रपीतस्य इन्द्रेण पीतस्सोमो यस्मिन् सवनैरनुषज्यत इति सिद्धान्तस्तूक्त एव। एतेन पाधातुना देवताव्यापारः ततो भावे क्तेन फलं, ततो मत्वर्थः वा सोमस्तृतीयासमास इति यजमानव्यापारार्थकात्कर्मणि क्तस्तृतीयासमासश्चतुर्थ्यर्थबोधो लक्षणयेति, कर्मणि क्तः धर्मनियमवच्चतुर्थ्यर्थषष्ठीसमास इति, कर्मणि क्तः साधनं कृतेति सम्प्रदानचतुर्थ्यन्तेन समास इति चापास्तम्। उक्तदोषात् दोषान्तराणामपि **मञ्जूषायां**[१] स्पष्टत्वाच्चेति दिक्। **दिगिति।** तदर्थस्तु न तत्र स्वरतो निर्णयः, इन्द्रेण पीत इति तृतीयातत्पुरुषेऽपि तृतीयाकर्मणी(पा०सू० ६-२-४८)ति तत्स्वरस्यैव सत्वात्। देवानामग्निमुखत्वेनेन्द्राय स्वाहेत्यादिमन्त्रेणाग्नौ दाहस्यैवेन्द्रकर्तृकपानत्वान्न तदनुपपत्तिः। अतः पाधातोर्दाने न लक्षणेति शङ्काशयः। तन्मते दानलक्षणायामपि चतुर्थ्यर्थे बहुलमिति तृतीयान्तेनैव समासाच्च। तस्मात्तत्रत्यानुवादिमञ्जूषोक्तिरीत्यैव बहुव्रीहिनिर्णयः। सर्वान् प्रतीति न प्रकृतसाम्यं तत्रेति सम्यगेव तत्। किञ्चैवं पूर्वोत्तरमीमांसयोः स्वरेण निर्णयसम्भवे तत्र तत्र विचारानर्थक्यम्। किञ्च **नञ्सूत्र - अव्ययं विभक्तीति** सूत्रभाष्यप्रामाण्यान्नञोऽव्ययीभावो नेति तस्य शङ्कैव न। असंहितमिति तु सन्धानं संहितमिति भावे क्तः, आरोपितं सन्धानं

---

१. ल.मञ्जू. (बहुव्रीहिप्रकरणे) पृ.सं. १४६८।

**तदेवं रक्षोहलाघवासन्देहाख्यानि चत्वारि फलानि व्याख्यातानि। आगमस्तु प्रवर्तक इत्युक्तम्। भाष्ये तु सन्दर्भशुद्ध्यर्थं फलचतुष्टयस्य प्राक् पश्चाद्वा प्रवर्त्तके वक्तव्ये मध्ये तदुक्त्या फलसन्दंशेन नित्यानामपि फलपर्यवसानमस्तीति सूचितम्। फलं तु पापक्षयः प्रत्यवायानुत्पत्तिर्वा, ''धर्मेण पापमपनुदति'' –**

**विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्।**
**अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति।। (या.स्मृ.पृ.सं. ४०४)**

**इत्यादिवचनानीह साधकानीति दिक्।**

---

आरोपितः परः सन्निकर्ष इत्यर्थ इति साधु। संहितशब्दः **पर इति** सूत्रबलात् स्त्रीलिङ्गो वार्तिकबलात् क्लीबोऽपि। अत एव **संहितवदिति प्रातिशाख्यभाष्ये** प्रयुक्तमिति। उपसंहरति। **तदेवमिति।** तस्मादुक्तरीत्येत्यर्थः। फलानि फलफलानि। इत्युक्तं = इति हेतोः पृथग्व्याख्यानसहितं पूर्वं कथितम्। नन्वेवमुक्तभाष्यमसङ्गतं स्यादत आह। **भाष्ये त्विति। सन्दर्भो** रचना। फलचतुष्टयस्य रक्षोहादेः उक्तेरिति शेषः। यथाश्रुतेऽनुपपत्तिस्स्पष्टैव। प्रवर्तके = आगमे। मध्ये = अर्थात्फलद्वयद्वययोः। तदुक्त्या = आगमोक्त्या। फलसन्दंशेन = संदंशवदुभयतः फलसम्बन्धेन। नित्यानां सन्ध्यावन्दनव्याकरणाध्ययनादीनां। फलपर्यवसानं = पर्यवसितफलकत्वं। ननु किं तत्फलमत आह। **फलन्त्विति।** क्षयः ध्वंसः। ननु तत्कुर्वतो नैव पापमतस्तद्ध्वंसो दुर्लभ इत्यत आह। **प्रत्येति।** तदुत्पत्त्यभाव इत्यर्थः। तत्प्रागभावपरिपालनमिति यावत्। एवं सप्रमाणेऽर्थे साधकान्तरमप्याह। **धर्मेणेति।** अपनुदति = विनाशयति तत्प्रागभावं परिपालयति वा। विहितस्य = सन्ध्यावन्दनादेः। निन्दितस्य = कलञ्जभक्षणादेः। अनिग्रहात् = अनिरोधात्। पतनं = अधोगतिं। ऋच्छति = प्राप्नोति। **वचनेति।** तान्यप्युक्तेऽर्थे इत्यर्थः। एवञ्च न ह्यफलं नित्यं किन्तु यदकरणे प्रत्यवायस्तत् इति प्रागुक्तं सिद्धम्। स्पष्टं चेदं **मत्कृतपाषण्डखण्डने**[१]। अत एव **सन्ध्यामुपासते ये तु सततं संशितव्रता** इत्यादिना नित्यस्थले फलकथनं सङ्गच्छते। तदाह। **दिगिति।**

---

१. एतावता अमुद्रितं वैद्यनाथविरचितं पिष्टपशुमीमांसाविचारात्मकं पुस्तकं मैसूरुनगरे प्राच्यसंशोधनालये Ms. No. C. 1962 उपलभ्यते।

**"इमानि च भूयः" इत्यादिभाष्येण प्रवर्त्तकवचनान्तराणि उदाहृत्य व्याख्यातानि। तद्यथा - "तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुस्तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्दः" इति ब्राह्मणम्। अत्र न म्लेच्छितवै इत्यस्य विवरणं नापभाषितवै इति। उभयत्रापि "कृत्यार्थे तवैकेन्केन्यत्वनः" इति तवैप्रत्ययः। धातूनामनेकार्थतया निन्दावचनान्म्लेच्छधातोः कर्मणि घञ्।**

---

## १.३.४ शेषावान्तरप्रयोजननिरूपणम्

ननु भाष्ये एतदनन्तरं **इमानि भूयः शब्दानुशासनस्य प्रयोजनानी**त्यादिग्रन्थेनान्यानि प्रयोजनान्युक्तानि। तत्र चानुपपत्तिः, वक्ष्यमाणम्लेच्छत्वादीनां बहुत्वाद्बहूनामनुग्रहो न्याय्य इति न्यायेन प्रथमतोऽभिधानस्य युक्तत्वादिति चेत् सत्यं रक्षादीनां प्रधानत्वादेव प्रथमतोऽभिधानम्। तेषां प्रधानत्वं च पदपदार्थज्ञानमात्राधीनत्वेनान्तरङ्गत्वात्। वक्ष्यमाणानां च बहिरङ्ग-शब्दापशब्दप्रयोगविधिनिषेधविषयत्वादानुषङ्गिकत्वम्। अत एव तेषामानुषङ्गिकत्वं तेषां प्रधानत्वमिति परं प्रति बोधयितुं वर्गद्वयेन पृथगुक्तिः। एतेन रक्षादिभिः सहैव तानि तत्क्रमेण कुतो न पठितानीति शङ्काऽपि परास्ता। ननु तथापि भूय इत्येकवचनमनुपपन्नम्, प्रयोजनानीत्यनेनासामानाधिकरण्यादिति चेन्न भूय इत्यस्य पुनरर्थकाव्ययत्वात्। तदुक्तिफलं तु निवेदितप्रायमनुपदमेव। चः समुच्चये। प्रयोजनानीत्यस्य प्रवर्तकानि फलानि चेत्यर्थः। तत्र वक्ष्यमाणवाक्यानि प्रवर्तकानि, तद्बोध्यानि फलानीति विवेकः। तदेतत्सर्वं मनसि निधायाह। **इमानि चेत्यादि।** वचनान्तराणि = ब्राह्मणेनेत्यतो भिन्नानि वाक्यानि। क्रमेण तान्येवाह। **तद्यथेति।** अत्र ब्राह्मणेन न म्लेच्छितवै इत्येतत् म्लेच्छभाषानिषेधविषयकमिति भ्रमनिवृत्त्यर्थं तद्विवरणं नापभाषितवै इतीत्याह। **इत्यस्येति। उभयत्रापि** म्लेच्छितवै अपभाषितवै इत्यनयोः। ह वा इति प्रसिद्धाविति बोध्यम्। ननु म्लेच्छ इति शब्दस्य यौगिकत्वेऽस्फुटापशब्दान्यतररूपाव्यक्त-शब्दानुकूलव्यापारार्थकस्य म्लेच्छधातोर्धात्वर्थसङ्गृहीतकर्मकत्वेनाकर्मकतया द्वितीयकर्माभावेनाप-शब्दस्य तत्वासम्भवेन तद्रूपे कर्मणि घञो दौर्लभ्येन भावघञि कथमपशब्दसामानाधिकरण्यम्। तस्य रूढत्वेऽपि म्लेच्छशब्दस्य यवनरूपपुरुषविशेषपर्यायत्वादेशविशेषबोधकत्वाद्वा तस्या-पशब्दत्वाभावेन कथमनेन सामानाधिकरण्यमित्यन्वयानुपपत्तिरत आह। **धातूनामिति। निन्दावचनादिति।** निन्दा च शास्त्रबोधितविपरीतत्वेन तदुच्चारणस्य निषिद्धत्वेन च पापसाधनत्वात्। अत एव वक्ष्यमाणं निषेधस्य क्रत्वङ्गत्वमुपपन्नम्। अन्यथा

**तेनापशब्दसामानाधिकरण्यं न विरुध्यते। अत्र 'न म्लेछितव्यम्' इति निषेधस्य ''तेऽसुराः'' इत्यर्थवादः। न चेह रात्रिसत्रन्यायेन आर्थवादिकं फलमस्त्विति वाच्यं, ''द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यात्'' इति न्यायेन अपापश्लोक-**

---

यथाश्रुतेऽप्यपशब्देऽव्यक्तत्वस्य मन्दोच्चारणेन सम्भवात् मन्दोच्चारणस्य धात्वर्थतया मन्दत्वरूपफलाश्रयत्वेन तस्य कर्मतया तत्र प्रत्ययेन सामानाधिकरण्योपपत्त्या तेषामनेकार्थतया निन्दार्थकत्वपर्यन्तानुधावनमफलं स्यात्। क्रत्वङ्गता तु तदा न सम्भवति। न हि क्रतोर्मन्दोच्चारणेन किञ्चिद् दृष्टादृष्टवैगुण्यं भवतीति भावः। **कर्मणीति।** अकर्तरि च कारके संज्ञाया(पा०सू० ३-३-१९) मित्यनेनेति भावः। एतेन करणे घञिति **दण्ड्या**द्युक्तमपास्तम्। तत्र तस्य दौर्लभ्यात्। तेन = तदर्थकघञङ्गीकारेण। ननु **पराबभूवुस्तस्माद्ब्राह्मणेनेति** श्रुतौ पराभवस्यापशब्दभाषणफलत्वं प्रतीयते। एवञ्च पराभवनिवृत्त्यर्थं व्याकरणाध्ययनं न तु निन्दानिवृत्त्यर्थमिति किमर्थं लक्षणाश्रयणेन निन्दार्थकत्वमत आह। **अत्रेत्यादि।** अत्र श्रुतौ। तस्य विध्यर्थत्वसूचनायाह। **म्लेच्छितव्यमिति।** निषेधस्य = म्लेच्छननिषेधस्य। अर्थवादः = निन्दार्थवादः। नन्वेवमपि तेऽसुरा इत्यादेरर्थवादत्वे निर्बाधत्वेन तदुक्तपराभव एव फलमस्त्विति किं तस्य निन्दापरत्वमङ्गीकृत्य तदर्थवादत्वेन निन्दारूपफलकल्पनयेत्याशयेन आशङ्कते। **न चेहेति।** उक्तविधावित्यर्थः। **रात्रिसत्रेति।** रात्रिसत्राधिकरणे[1] हि रात्रिसत्राख्ययागविशेषस्य फलबोधकस्वतन्त्रविध्यभावात् फलान्तरा-श्रवणेनासम्भवात् सम्भवतीति न्यायेन तस्यायुक्तत्वात् शुद्धविधस्याप्यभावादर्थवादवाक्यान्यथानुप-पत्तिकल्पितविध्युद्देशे तावन्मात्रे स्वीक्रियमाणे, तत्रापि फलाश्रवणात् फलमन्तरेण च विधिश्रुतेरनुपपत्तेरवश्यं फले कल्पनीये **क्लृप्तकल्पने**ति न्यायाल्लाघवात् **'प्रतितिष्ठन्ति ह वा एता रात्रीरुपयन्ती'**त्यर्थवादवाक्यबोधितप्रतिष्ठात्मकश्रौतफलसम्बन्धो यागस्य यथा उक्तस्तथेति भावः। तत्र ह वा इति प्रसिद्धौ। एता रात्रीस्तन्नामकयागविशेषान् ये उपयन्ति प्राप्नुवन्ति कुर्वन्तीति यावत् ते प्रतितिष्ठन्ति प्रतिष्ठां प्राप्नुवन्तीति तदर्थः। अयं तु न विधिः, यच्छब्दघटितत्वादिति बोध्यम्। आर्थवादिकफलं पराभवरूपम्। एवञ्चागत्या तत्रोभयपरत्वमेवमत्रापीति भावः। नन्वन्यथानुपपत्त्या सर्वतो बलीयस्या तत्र तथा कल्पनेऽपि प्रकृते तथा दुर्वचः। अत्र विधेः सत्वेन ततो वैषम्यात्। किञ्च **प्रधाने फलसम्बन्धकल्पन**मिति [2]**द्रव्येत्या**दिन्यायासञ्चारात्। इह त्वङ्गे फलसम्बन्धकल्पनेति

---

१. पू.मी. (४-३-८)

२. द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः (जै.सू. ४-३-१) इति न्यायः।

**श्रवणवत्प्राशस्त्यमात्रपरत्वात् । प्रकरणात्क्रत्वङ्गो ह्ययं निषेध इति ''यर्वाणस्तर्वाणो नाम'' इत्यादावुत्तरग्रन्थे भाष्यकारैरेव स्फुटीकरिष्यते । अत एव इहापि पराभूता मा भूमेत्यध्येयं व्याकरणमिति नोपसंहृतं, किन्तु म्लेच्छा माभूमेत्येव । म्लेच्छा निन्द्याः,**

---

स्पष्टमेवेत्याशयेन समाधत्ते । **द्रव्येति ।** एतेषु त्रिषु या फलश्रुतिः स विध्युपकारकत्वादर्थवाद इत्यर्थः । तत्र द्रव्ये फलश्रुति**र्यस्य पर्णमयी जुहूर्भवति न स पापः श्लोकः शृणोती**त्येवमाद्याः । संस्कारे फलश्रुति**र्यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्** इत्येवमाद्याः । कर्मणि फलश्रुति**र्कर्म वा एतद्यज्ञस्य क्रियते यत्प्रयाजान् याजा**इत्यन्त इत्याद्याः । कर्मपदश्चारादुपकारककर्मपरम् । संस्कारकर्मणः पृथगुल्लेखादिति बोध्यम् । **न्यायेनापापेति ।** दर्शपूर्णमासप्रकरणपठितवाक्ये यस्य पर्णमयीत्यादौ पापश्लोकश्रवणाभावस्य पर्णमयजुहूप्राशस्त्यमात्रपरत्ववदस्य तन्निन्दामात्रपरत्वादित्यर्थः । नन्वेवं पापश्लोकश्रवणाभावस्य तत्प्राशस्त्यमात्रपरत्ववदस्य तन्निन्दामात्रपरत्वादिति वक्तुं युक्तमिति चेत् सत्यं संस्तुत्यर्थवादस्थले प्रवर्तनाविषयार्थस्तुतिरूपप्राशस्त्यपरत्वं, निन्दार्थवादस्थले तु निवर्तनाविषयार्थनिन्दारूपप्राशस्त्यपरत्वमित्यविरोधः । तथा चापापश्लोकश्रवणवत् पापश्लोकश्रवणाभावस्य तत्प्राशस्त्यमात्रपरत्ववत् प्राशस्त्यमात्रपरत्वान्निन्दाप्राशस्त्यमात्रबोधनपरत्वादित्यर्थो बोध्यः । मात्रपदेनोभयपरत्वनिरासः । ननु निषेधे द्रव्यत्वाभावेनानङ्गत्वेन कर्मत्वसंस्कारान्यतरत्वस्याप्यभावेन दृष्टान्तवैलक्षण्येन कथं द्रव्येत्यादिन्यायसञ्चारोऽत्रात आह । **प्रकरणादिति ।** अङ्गशब्दो नित्यनपुंसकलिङ्गः । अङ्गं प्रतीकोऽवयवोऽपघन **इत्यमरोक्तेः**[1] **। अपघनोऽङ्ग(पा०सू० ३-३-८१)** मिति पाणिन्युक्तेश्च । हि यतः । एवञ्चात्र कर्मत्वेन तन्न्यायसञ्चारो युक्त इति भावः । अस्य क्रत्वङ्गत्वे च तत्रातथानुष्ठाने विहिताननुष्ठानान्निषिद्धानुष्ठानाच्च प्रत्यवायः, लोके तु तदभावः । अत एव यर्वाण इत्याद्यसाध्वपि वदन्तो यर्वाणस्तर्वाणो नाम ऋषयस्ते बभूवुरिति श्रुत्या प्रत्यवायानुत्पादेनैव व्याख्याताः । एतेन क्वाप्यशब्दभाषणं न स्यादित्यपास्तम् । **यर्वाण इति ।** यद्वानस्तद्वान इत्यर्थः । उक्तं समूलयति । **अत एवेहापीति ।** आर्थवादिकफलाभावेनोक्तरीत्या निन्दारूपप्राशस्त्यमात्रबोधनपरत्वादेव **तेऽसुरा** इत्यादिग्रन्थव्याख्यावसरेऽपीत्यर्थः । नोपसंहृतं भाष्यकृता । मा भूमेत्येव उपसंहृतमित्यस्यानुषङ्गः । यत्तु भाष्ये म्लेच्छा इत्यादेर्निन्द्याः अपशब्दभाषणकर्तारो माभूमेत्यर्थः । कर्तरि पचाद्यजिति [2]**रत्न**कृत्तदभिप्रेत्याह । निन्द्या इतीति ।

---

१. अ.को. मनुष्यवर्गे श्लो.सं. ७०. पृं.सं. २२६ ।

२. महाभाष्यव्याख्याता रत्नप्रकाशकारः शिवरामेन्द्रसरस्वती । (French Universioty Pondichery पृ.सं. ४२)

**शास्त्रबोधितविपरीतानुष्ठानादिति भावः। अत्र ''हैहेप्रयोगे हैहयोः'' इति प्लुते प्लुतत्वप्रयुक्ते प्रकृतिभावे च कर्त्तव्ये तदकरणं म्लेच्छनमित्त्येके। ननु ''सर्वः प्लुतः साहसमनिच्छता विभाषा कर्त्तव्यः'' इति भाष्यकृता वक्ष्यमाणत्वान्नैष दोष इति चेत् ? सत्यम्, अत एवापरितोषाद् 'वाक्यद्विर्वचनं म्लेच्छनम्' इत्यपरैर्व्याख्यातम्। ''सर्वस्य द्वे'' इत्यत्र पदग्रहणस्य चोदितत्वादिति तेषां भावः।**

**ननु नेदं शास्त्रीयं द्विर्वचनं किन्तु तात्पर्यद्योतनार्थमैच्छिकः पुनः प्रयोगः 'अनावृत्तिः शब्दादनावृत्तिः शब्दात्' इतिवदिति चेत् ? तर्ह्याम्रेडितस्वरानुपपत्तिः। यदि तु तत्राम्रेडितस्वरविनिर्मुक्त एव पाठस्तर्हि अरिशब्दे रेफस्य लत्वमपशब्द इत्यवधेयम्। इदं च भाष्यादिषु प्रसिद्धं श्रुतिपाठमनुसृत्य व्याख्यातम्। अयं च पाठः क्वचिच्छाखायामन्वेषणीयः। माध्यन्दिनानां शतपथब्राह्मणे तु ''हेलवो हेलव इति वदतः'' इति पठित्वा ''तस्माद् ब्राह्मणो न म्लेच्छेत्'' इति पठ्यते। तत्र यकारस्थाने वकारोऽपशब्द इति स्पष्टमेव।**

---

**तन्न।** प्रागुक्तरीत्या स्वत एव तेषां तद्विषयत्वसम्भवेऽन्यनिन्दया निन्द्यत्वप्रतिपादनानौचित्यात्। तद्ध्वनयन् तत्र हेतुमाह। **शास्त्रेति। इति भाव इति।** उपसंहर्तुर्भगवत इति शेषः। ननु कोऽत्र दोषो यत्प्रयुक्ता निन्दाऽत आह। **अत्रेत्यादि।** अत्र = श्रुतिप्रतिपाद्ये तद्वाक्ये। साहसं = शास्त्रत्यागमनुष्ठानक्लेशं वा। इति इत्यस्य। नैषः = प्लुताद्यकरणरूपः। **चोदितत्वादिति।** वार्तिककृता कृतत्वादित्यर्थः। तस्य नित्येत्यादावनुवृत्तेरिति भावः। तेषां = अपरेषाम्। **तात्पर्येति।** स्वोत्कर्षेत्यर्थः। अत्र दृष्टान्तमाह। **अनावृत्तिरिति।** शास्त्रान्ते व्याससूत्रमिदम्। येऽर्चिरादिमार्गेण ब्रह्मलोकं प्राप्तास्तेषामनावृत्तिरेव तेषां न पुनरावृत्तिरित्यादिमुक्ताभिधायकशब्दादित्यर्थः। शास्त्रसमाप्तिद्योतनाय सूत्रावृत्तिरिति भावः। **आम्रेडितस्वरेति। अनुदात्तं चे**(पा०सू० ८-१-३)त्यादिसूत्रविहितेत्यर्थः। **तत्र** श्रुतौ। **मुक्त एवेति।** ब्राह्मणपाठस्यास्वरकस्यापि सत्वादेकश्रुतिप्रवृत्तेरिति भावः। **तर्हि** तदा। लत्वं अशास्त्रसिद्धतत्करणं। **अपशब्द इति।** तत्वहेतुरित्यर्थः। तत्वं च व्याकरणानुगतशब्दस्यैव भ्रंशेऽपि प्रसिद्धमिति भावः। रलयोरैक्यस्य समानश्रुतित्वस्य च स्मरणमिति तु लक्ष्यानुरोधीति तत्वम्। इदमित्यस्योक्तवचनमित्यर्थः। व्याख्यातमित्यत्रान्वयः। उक्तरीत्येति तदाशयः। यद्वा इदं उक्तप्रकाररूपं व्याख्यातमित्यर्थः। अयं पूर्वोक्तः। चो वाक्यालङ्कारे। **शतपथेति।** तद्ब्राह्मणसंज्ञा। **तत्रेति।** तस्मिन् पाठ इत्यर्थः।

**तथा शिक्षासु पठ्यते –**

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात् ।। इति ।**(पा.शिक्षा. ५२)

**स्वरेण स्वरतः 'हीयमानपापयोगाच्च'(पा०सू० ५-४-४७) इति तसिः । मिथ्या-प्रयुक्तः यदर्थप्रतिपादनाय प्रयुक्तस्ततोऽर्थान्तरं स्वरवर्णदोषात्प्रतिपादयन् अत एव तमर्थं नाहेत्यर्थः । वागेव वज्रः हिंसकत्वात् । यजमानं हिनस्तीति । यथाध्वर्युकृताद्धोमाद्यजमाने धर्मोत्पत्तिः एवमध्वर्युकृतादपशब्दप्रयोगाद्यजमाने प्रत्यवाय इत्यर्थः । यथेत्युदाहरणे ।**

---

शिक्षानुसारेणाह । **मन्त्रो हीन इति ।** अत एवोक्तं शिक्षास्विति । तत्रैतत्त्यागफलं तु स्फुटीभविष्यति मूले एव । अपशब्दप्रयोगे प्रत्यवायप्रतिपादनार्थेयं शिक्षा । **यत्तु** स्वरेण वर्णेन वा योऽन्यथाभूतो दुष्टः प्रयुक्तः स मिथ्या मृषेत्यर्थः । कुत इत्यत आह । न तमिति । न तदर्थमिति क्वाचित्कः पाठो भाष्यादि विसंवादादुपेक्ष्यः । न केवलं तमर्थमेव नाह अपि तु स वागेव सन् वज्रः स्यात् । कुतस्तत्वमत आह । यजेति । यतो यजमानं मारयेदित्यर्थः । हिनस्तीति लेडिति **कृष्णः** । तन्न । तत्र लेटो युक्तत्वेऽपि व्याख्यानानौचित्यस्य भाष्यादिव्याख्यायामुक्तत्वात् । तदेतद् ध्वनयन्नन्यथा व्याचष्टे । **स्वरेणेत्यादिना ।** तत्रादावसर्वनामत्वात्तसिल अप्राप्तेराह । **स्वरत इति । आद्यादित्वात्तसि**रिति तु न युक्तम् । तस्यागतिकगतित्वादिति ध्वनयन्नाह । **हीयमानेति ।** भाष्ये तु दुष्टः शब्द इति पाठादस्याप्राप्त्या तथा कैयटेन व्याख्यातम् । अनेन वर्णत इत्यपि व्याख्यातम् । मिथ्याप्रयुक्त इति प्रतीकम् । तस्यैव विवरणमग्रे ततोऽर्थान्तरमित्यादिप्रतिपादयन्नित्यन्तम् । तमित्यस्य यच्छब्दापेक्षत्वादाह । **यदर्थेति ।** अस्याकथने हेतुत्वं ध्वनयन्नाह । **अत एवेति ।** अनभिमतार्थप्रतिपादकत्वादेवेत्यर्थः । **तमिति ।** अभिमतमित्यर्थः । **नाहेत्यर्थ इति ।** पूर्वार्द्धस्येति भावः । अत एव न केवलं तमर्थमेव नाहेत्येतावत् किन्तु यजमानस्य प्रत्यवायोत्पादनत्वाद् हिंसकोऽपीत्युत्तरार्द्धार्थमाह । **वागेवेति ।** रूपकमिदम् । द्वन्द्वबहुव्रीही तु न । दोषात्, सस्वरादिहीनत्वात् । दुष्टःशब्दो वागेव सन् वज्रो भूत्वा तं मारयेदित्यर्थः । तत्रोपस्थितत्वाद्धिंसारूपसाधारणधर्ममाह । **हिंसेति ।** ननु अन्यापराधेन कथमन्यनाशः । किञ्च दृष्टान्ते न यजमाननाशः किन्तु तत्पुत्रस्यैवेति वैषम्यमतो यजेति प्रतीकं धृत्वा तदाशयमाह । **यथेति । इत्यर्थ इति ।** इत्यभिप्राय इत्यर्थः । एवञ्च न तत्र तात्पर्यं किन्तु प्रत्यवायोत्पत्तौ । सा च स्वस्य नाशिका स्वीयस्य नाशिका वेत्यन्यदेतत् । तत्र दृष्टान्तमाह । **यथा इति ।** उदाहरणमिति

**इन्द्रशत्रुः इन्द्रशत्रुशब्दः। पुरा किल विश्वरूपाख्ये त्वष्टुः पुत्रे इन्द्रेण हते सति कुपितस्त्वष्टा इन्द्रस्य हन्तारं वृत्राख्यं पुत्रान्तरमुत्पिपादयिषुराभिचारिकं यागं कृतवान्। तत्र च इन्द्रस्य शातयिता शत्रुः हिंसक इति यावत् तथाभूतः सन् वर्धस्वेति प्रतिपादितुं 'इन्द्रशत्रुर्वर्धस्व' इति प्रयुक्तम्। ण्यन्ताच्छदेरौणादिकः क्रुन्प्रत्ययः। प्रज्ञादिगणे निपातनाद् ह्रस्वत्वम्। इन्द्रशत्रुत्वस्य विधेयत्वान्न सम्बोधनविभक्तिः तस्या अनुवाद्यविषयकत्वात्। अत एव राजन् युध्यस्व राजा भव युध्यस्वेत्यनयोर्व्यवस्थयैव प्रयोगः। राजत्वस्य सिद्धत्वे सम्बोधनविभक्तिर्न तु विधेयत्वेऽपीति। एवं स्थिते इन्द्रशत्रुशब्दे तत्पुरुषसमासप्रयुक्तेऽन्तोदात्ते वक्तव्ये प्रमादादाद्युदात्तः किलोक्तः। तथा च**

---

पाठः। सप्तम्यन्तपाठे यथा इति शब्द उदाहरणे दृष्टान्ते वर्तते इत्यर्थः। यद्वा इन्द्रशत्रुरित्यनेनान्वये एकं वाक्यं, तत्र इन्द्रशत्रुशब्दाय इन्द्रशत्रुशब्दपरत्वम्, अन्यथा दृष्टान्तासङ्गतिरर्थासङ्गतिश्चेत्याह। **इन्द्रशत्रुशब्द इति।** तमुपपादयति। **पुरेत्यादि।** स्पष्टश्चायमर्थ**स्तैत्तिरीयसंहितायां** द्वितीयकाण्डपञ्चमप्रश्ने **विश्वरूपो वै त्वाष्ट्र** इत्याद्यनुवाके। **त्वष्टेति।** वृत्रेणारब्ध इति कैयटे तु फलरूपहेतौ वृत्रेणेति तृतीया बोध्या। ननु शत्रुशब्दस्यामित्रपर्यायत्वे बहुव्रीहितत्पुरुषयोरविशेष इति कथं दृष्टान्ततेत्यत आह। **तत्र चेति।** याग इत्यर्थः। प्रयुक्तमित्यत्रान्वयः। **शातयितेति।** तथा च क्रियाशब्दोऽत्र शत्रुशब्द आश्रितो न तु रूढः। तद्व्युत्पत्तिः शातयितेत्येव। तत्र चेन्द्रस्य शातयिता भूत्वा वर्द्धस्वेति षष्ठीसमासेऽर्थ इति भावः। तदेतद् ध्वनयन्नाह। **हिंसेति।** प्रयुक्तं अध्वर्युणेति शेषः। **क्रुन्निति।** कर्तरीति भावः। **ह्रस्वत्वमिति।** शमे रूपमिति केचित्। तत्र पक्षे निपातनात्तत्वं बोध्यम्। ननु सम्बोधनविभक्त्यौचित्येन तदसङ्गतमेवात आह। **इन्द्रेति।** साम्भूयस्यैवासिद्धत्वादिति भावः। एतेन तत्कृतमपि दुष्टत्वमित्यपास्तम्। अत एव स्वरतोऽपराधादित्युक्तिसङ्गतिरिति बोध्यम्। अत एव = तस्या अनुवाद्यविषयकत्वादेव। व्यवस्थयैव न तु एकत्र। इच्छया व्यवस्थामेव सूचयन् तद्धेतुमाह। **राजत्वेति।** इतिर्हेतौ। यद्वा इतिः तत्कृतदोषाभावसमाप्तौ। तदा व्यवस्थयैवानेन प्रतिपाद्यत इति बोध्यम्। वैपरीत्यं प्रतिपादयितुमिष्टानिष्टस्वरावाह। **एवमिति।** तदभिप्रायेण प्रयुक्तत्वे सतीत्यर्थः। **अन्तोदात्ते इति। समासस्ये**(पा०सू० ६-१-२२३)**ति** सूत्रकृते इति भावः। **आद्युदात्त इति। बहुव्रीहौ पूर्वपदं प्रकृत्येति** (पा०सू० ६-२-१) विहित इति भावः। **तथा च** आद्युदात्तोक्तौ च। **बहुव्रीह्यर्थः** इन्द्रशातयितृकरूपः। आद्युदात्तत्वं दृढयन् सस्वरेन्द्र-शब्दव्युत्पत्तिमाह। **इन्देर्हीति।** हि यतः। **आद्युदात्त इति। ञ्नित्यादिर्नित्य**(पा०सू० ६-१-१९७)मित्यनेनेति भावः। सिद्धान्ते तु **ग्रामादीनां चेति** तत्वं बोध्यम्। विपरीतं

**पूर्वपदप्रकृतिस्वेरण बहुव्रीह्यर्थो लब्धः। इन्देर्हि धातोरौणादिके ''ऋज्रेन्द्र'' इत्यादिना रन्प्रत्यये कृते इन्द्रशब्द आद्युदात्तो व्युत्पादितः। तेनेन्द्र एवास्य हिंसकः सम्पन्न इति श्रुतीतिहासपुराणादिषु प्रसिद्धम्। तदिहोदाहरणतयोक्तम्।**

**स्यादेतत्, ''यज्ञकर्मणि'' इत्येकश्रुत्येह भवितव्यम्। सा च तत्पुरुषबहुव्रीह्योरविशिष्टेति। आत्राहुः-जपादिपर्युदासेन मन्त्रेष्वेव एकश्रुतिर्विधीयते। स्वेच्छया प्रयुज्यमानश्च मन्त्रो न भवति। तदुक्तं भेदलक्षणे जैमिनिना – ''अनाम्नातेष्वमन्त्रत्वम्'' इति। आपस्तम्बश्चाह-अनाम्नाता अमन्त्रा यथा प्रवरोहनामधेयग्रहणानि'' इति। अत एव ''मन्त्रो हीनः'' इति पाठस्य शिक्षायां प्रसिद्धत्वेऽपि ऊह्यमानस्यामन्त्रतया यथेन्द्रशत्रुरिति वाक्यशेषोऽसङ्गतः स्यादतो मन्त्रशब्दः शब्दमात्रपर इत्याशयेन भाष्ये ''दुष्टः शब्दः'' इति पठितम्। ननु स्वाहेन्द्रशत्रुर्वर्द्धस्वेति वेदे पठ्यत एवेति ? सत्यम्, ऊहितं**

---

फलितार्थमाह। **तेनेन्द्र इति।** वास्य = वृत्रस्य। श्रुतिरुक्ता। इतिहासो भारतादिः। पुराणं भागवतादिकम्। तच्च हि 'इन्द्रशत्रो विवर्द्धस्व विद्वेषं जहि माचिर'[1] मित्युक्तमिति भावः। सम्बोधनविभक्तिकरणं तु तत्रार्षमेवेति बोध्यम्। इह = व्याकरणाध्ययनविषये। इदं च सर्वमुणादीनां व्युत्पन्नत्वस्वीकर्तृशाकटायनादिरीत्या बोध्यम्।

नन्वत्र **यज्ञकर्मणी**त्येकश्रुतौ प्राप्तायां तदकरणं पूर्वपदप्रकृतिस्वरकरणं स्वरापराध इति वक्तुं युक्तं, नत्वन्तोदात्ताकरणं तत्करणमिति। न च तथैवास्तु। **शतपथब्राह्मणतद्भाष्यवि**रोधात्। तत्र हि तदकरणं आद्युदात्तत्वकरणमेव स्वरापराध उक्तः। स्पष्टं चेदं **गुरुचरणकृतैकश्रुत्यवादे**[2] इत्यभिप्रायेणाशङ्कते। **स्यादेतदिति। तत्पुरुषेति।** क्रमप्रतिपादने तात्पर्यादस्य पूर्वनिपातः। **जपादीति।** तेषां मन्त्रेष्वेव यज्ञकर्मणि सम्भव इति भावः। स्वशब्द आत्मीयवाची। **प्रयुज्यमानः** इन्द्रशत्रुशब्दः। **ष्वमन्त्रत्वमिति।** नन्वस्यामन्त्रत्वे लौकिकशब्देन क्रियमाणस्य कर्मणः कथं फलजनकत्वमिति चेन्न **सूर्याय त्वे**त्यादेर्लौकिकघटितस्योहविधायकशास्त्रबलेन फलजनकत्ववदत्रापि शिक्षाश्रुत्यादितस्तदुपपत्तेरित्याहुः। **अनाम्नाता इति।** वेदेऽपठिता इत्यर्थः। दृष्टान्तमाह। **यथेति।** प्रवरा आङ्गीरसेत्यादयः प्रसिद्धाः। ऊहस्तूक्तः। नामधेयं संज्ञाशब्दाः देवदत्तादयः। एतेषां ग्रहणानि यागे तत्र तत्र मन्त्रेषु इतिहासिकप्रसिद्धम्। अत एव = ऊह्यमानस्य सर्वस्यामन्त्रत्वादेव। पाठस्य = प्रागुक्तस्य। इह = प्रागुक्तशिक्षायां। शब्दमात्रपरः = बोधकमात्रपरः। **इत्याशयेनेति।** इति

---

१. भाग (६-९-११) पृ.सं. ३३९।  २. एतवत्कालं अश्रुतप्रायः अयं ग्रन्थः पण्डितसमाजे।

**यदमन्त्रभूतम् अनुकार्यं तदनुकरणस्य पाठेऽपि अर्थपरस्यानुकार्यस्य लौकिकत्वानपायात्। नन्विन्द्रशत्रुशब्दस्य लौकिकत्वे कथं स्वरप्रयुक्तयोर्गुणदोषयोः प्रसक्तिः स्वरस्य वेदमात्रविषयकत्वादिति चेत् ? न, स्वरविधौ छन्दोधिकाराभावात्। एतावानेव हि भेदः – यच्छन्दसि त्रैस्वर्यमेकश्रुतिश्च व्यवस्थयाऽऽश्रीयते, लोके त्वैच्छिको विकल्पः। अत एव एकश्रुत्या सूत्रपाठस्त्रैस्वर्येण वेति पक्षद्वयमपि तत्र तत्रोपन्यस्तमिति वक्ष्यामः।**

**नन्वेवं ''उच्चैस्तरांवा'' इतिसूत्राद्विकल्पानुवृत्त्यैव सिद्धौ ''विभाषा छन्दसि'' इत्यत्र विभाषाग्रहो व्यर्थः स्यात्। प्रसज्यप्रतिषेधे तु नायं दोषः। यज्ञकर्मणीत्यस्य**

---

सूचयितुमित्यर्थः। **वेद इति। त्रैधातवीयेष्टेरर्थवादप्रकरणे** तैत्तिरीयसंहितायामुक्तस्थलेऽयमर्थवादः पठ्यते। अन्यथोच्चारणेन यागस्य वैगुण्यबोधनायेति तद्व्याख्यायां **भट्टभास्करे** स्पष्टम्। ऊहितं = प्रथमतस्त्वष्ट्रभिमतमध्वर्युच्चारितम्। तेन तद्विधया प्रयुक्तमिति यावत्। न तु वेदपठितमन्त्रे सूर्यायेत्यादिवदूहोऽयमिति बोध्यम्। अत एवाह। **यदमन्त्रभूतमिति।** तदनुकरणस्य = शब्दपरस्य। पाठेऽपि वेदे इति शेषः। संसारस्यानादित्वादिति भावः। नन्वेवं स्वरतोऽपराधादित्ययुक्तमेवेत्याशयेन शङ्कते। **नन्विन्द्रेति।** ननु तर्हि वेदवत् लोकेऽपि स्वरविनिर्मुक्तपाठस्यासाधुत्वं स्यादत आह। **एतावेति।** व्यवस्थया मन्त्रे त्रैस्वर्यं, ब्राह्मणे एकश्रुतिर्बह्वृचानां, तैत्तिरीयाणां तूभयत्रापि त्रैस्वर्यमित्यादिरूपव्यवस्थितविकल्पेन तथैव विभागादनादिप्रयोगाच्चेति तत्वम्। **विकल्प इति।** आश्रीयत इत्यस्यानुषङ्गः। इतीति शेषः। स च भेदसमासौ। अत एव = भाषायां विकल्पस्यैच्छिकत्वादेव। **तत्रेति।** भाष्यव्याख्यायां कैयटादिभिरिति भावः।

एवञ्च कैयटादिरीत्येदम्। तत्खण्डिकां हरदत्तोक्तिं खण्डयति। **नन्वेवमित्यादिना।** एवं = अजपेत्यादिपर्युदासेन मन्त्रेष्वेव तत्प्रवृत्त्यङ्गीकारे। ग्रहो ग्रहणम्। **व्यर्थ इति।** पर्युदासपक्षेऽजपादिशब्देन जपादिभिन्नं तत्सदृशं छन्दः। तथा च **यज्ञकर्मे**(पा०सू० १-२-३४) त्यनेन छन्दसि नित्यमेकश्रुतिविधानात् **विभाषे**(पा०सू० १-२-३६)ति सूत्रेण च छन्दस्येव विकल्पविधानाद्विषयभेदरूपव्यवस्थाया अलाभेऽन्यतरसामर्थ्याद्यज्ञकर्मणीत्यस्य पदस्य निवृत्तावनुवृत्तेन वाशब्देन यज्ञकर्मणोऽन्यत्र छन्दसि विकल्प इत्यर्थलाभे विभाषाग्रहणं व्यर्थम्। प्रसज्यप्रतिषेधे तु सर्वत्रोहितानूहितादौ पूर्वेण तत्प्राप्तौ छन्दसि यज्ञकर्मण्येव विभाषेति व्यवस्थापत्तौ तन्निवृत्तये विभाषाग्रहणमिति शङ्काशयः। नायं = विभाषाग्रहणवैयर्थ्यरूपः। निवृत्तये **विभाषा**

**निवृत्तये पुनर्विभाषाग्रहणात्। न च पर्युदासपक्षेऽप्येवमेवास्त्विति वाच्यं, नित्यविकल्पविध्योर्विषयभेदस्यावश्यकतया आरम्भसामर्थ्यादेव तन्निवृत्तिसिद्धेः। प्रसज्यप्रतिषेधे तु नारम्भसामर्थ्यं, ऊहादिष्वमन्त्रेषु चरितार्थस्य पूर्वविधेरुत्तरेण छन्दोमात्रविषयकेण बाधसम्भवात्। न ह्यूहादीनां छन्दस्त्वमस्ति, मन्त्रब्राह्मणेतरत्वात्। तस्मादसमर्थसमासमाश्रित्यापि प्रसज्यप्रतिषेध एवागत्या स्वीकर्त्तुमुचित इति चेत्? न, पर्युदासपक्षेऽपि मन्त्रे नित्यं ब्राह्मणे वेति विषयविभागसंभवेन यज्ञकर्मनिवृत्तये**

---

**छन्दसी**त्यत्रेति शेषः। प्येवमेव = तद्ग्रहणस्य तन्निवृत्त्यर्थत्वमेव। **नित्यविकल्पेति। यज्ञकर्मणि विभाषा छन्दसीति** नित्यविकल्पविध्योर्विषयभेदस्यावश्यकतयाऽन्यतरारम्भसामर्थ्यादेव विभाषाग्रहणनिवृत्तिसिद्धेरित्यर्थः। तदनुवृत्तौ त्वन्यतरवैयर्थ्यं स्पष्टमेवेति भावः। नारम्भसामर्थ्यं अन्यतरस्येति शेषः। पूर्वविधेः = यज्ञकर्मणीत्यस्य। उत्तरेण = विभाषा छन्दसीत्यनेन। **छन्दोमात्रेति।** अनेन विषयभेदः प्रदर्शितः। **बाधेति।** पूर्वत्र प्रसज्यप्रतिषेधाङ्गीकारे छन्दोऽछन्दउभयसाधारणत्वादछन्दःसु चरितार्थस्य **यज्ञकर्मे**त्यस्य छन्दःसु परत्वा**द्विभाषा छन्दसी**त्यनेन बाधसम्भवादित्यर्थः। ऊहादीनामन्त्रत्वे कथितेऽपि ब्राह्मणान्यत्वं कथयन्नाह। **न ह्यूहेति। तरत्वादिति।** अनेन मन्त्रब्राह्मणान्यतरत्वं छन्दस्त्वमिति छन्दोलक्षणमपि सूचितम्। हरदत्तोक्तिमुपसंहरति। **तस्मादिति।** उक्तदूषणादित्यर्थः। **असमर्थेति।** इदं चान्यत्राङ्गीकृतमेवेति भावः। वस्तुतो दुष्टत्वेन क्वाचित्कत्वादाह। **आश्रित्यापीति।** वागत्या = तद्वैयर्थ्यान्यथानुपपत्तिरूपया। **मन्त्र इति।** अजपादिशब्देन मन्त्रः, तत्रैव तेषां सम्भवात्। तथा च मन्त्रे नित्यं ब्राह्मणे विभाषेत्येवं पर्युदासपक्षेऽपि विशेषापेक्षत्वेन व्यवस्थालाभोऽस्त्येवेत्यधिकं तत्क्रियमाणं तन्निवृत्त्यर्थमिति न तस्य वैयर्थ्यमित्युत्तराशयः। **यज्ञकर्मेति।** तत्पदनिवृत्तय इत्यर्थः। विनिगमनाविरहेण व्यापकत्वेन छन्दोमात्रग्रहणेन च सामान्यविषयस्य तस्य विशेषविषयेण पूर्वसूत्रेण बाधेन व्यवस्थाया यज्ञकर्मणि सिद्धाया अनङ्गीकारे तद्ग्रहणवैयर्थ्यं स्पष्टमेवेति तत्वम्। तथा च न कश्चिदुक्तदोषस्तत्पक्षेऽपीति भावः। केचित्तु इदमयुक्तम्। यज्ञकर्मणीति सूत्रे एव वाग्रहणेन व्यवस्थितविभाषाया आश्रयणेन च शङ्काकारोक्तरीत्या सिद्धे छन्दसीत्येतत्सामर्थ्येन यज्ञकर्मणीत्यस्य निवृत्तिसिद्धेः। किञ्च वाग्रहणमपि नानुवर्त्यम्। एवञ्च तत्सन्नियोगशिष्टस्य यज्ञकर्मणीत्यस्यापि निवृत्तिः सिद्धा। विकल्पलाभस्तु छन्दसीत्यनेनैकश्रुत्यं विधाय न सुब्रह्मण्येति सूत्रे नेति योगविभागेन तत्रैव तस्य निषेधात् ग्रहणाग्रहणन्यायेन सिद्ध इति तस्य व्यर्थत्वमेवेत्याहुः। तन्न।

**विभाषाग्रहणसम्भवात्। उक्तापरितोषादेव तु केचिज्जपादिषु प्रसज्यप्रतिषेधमाश्रित्य**

तन्त्रादिना विभाषा अच्छन्दसीति पदच्छेदार्थं तस्यावश्यकत्वात्। तेन भाषायामपि [1]पक्षे एकश्रुतिः। इदमेवाभिप्रेत्य लोके त्वैच्छिको विकल्प इत्युक्तम्। किञ्च सिद्धान्तोक्तरीत्या पर्युदासेन मन्त्रस्यैव लाभेन ब्राह्मणे अप्राप्त्या तदर्थं छन्दसीत्यस्यावश्यकत्वाद्योगविभागस्य भाष्यानारूढत्वाच्च। स्पष्टं चेदमन्यत्रेति। विस्तरस्तत एव बोध्यः। ननु त्वदुक्तविषयविभागे ऊहान्तस्य छन्दसीत्यस्य सङ्कोचकल्पनापेक्षयेष्टानुरोधेन व्याख्यानत एव यज्ञकर्मणीत्यस्यासम्बन्धकल्पने लाघवात् पुनर्विभाषाग्रहणं व्यर्थमेवात आह। **उक्तापरितोषेति।** विभाषाग्रहणवैयर्थ्यरूपादित्यर्थः। **केचिदिति। हरदत्ता**दय इत्यर्थः। अत्र तुकेचिच्छब्दाभ्यामरुचिः सूचिता। तद्बीजं तु **विभाषा छन्दसी**त्यत्राछन्दसीति छेदाय विभाषाग्रहणं [2]सर्वमतेऽप्यावश्यकम्। किञ्च प्रसज्यप्रतिषेधपक्षेऽपि अन्यतरसामर्थ्यादेव यज्ञकर्मणीत्यस्य निवृत्तिसिद्धौ विभाषाग्रहो व्यर्थः। नचोहितेषु नित्यमनूहितेषु तत्रैव वेति व्यवस्थासम्भवः। [3]एवञ्च तन्निवृत्तये तदावश्यकत्वमिति वाच्यम्। कर्मग्रहणसामर्थ्येनोहितानूहितयोरुभयोरपि यज्ञकर्मेत्येतत्प्रवृत्तेरावश्यकत्वात् हरदत्तोक्तत्वाच्चेति। तस्मात् कैयटोक्तपर्युदासपक्ष एव ज्यायान्। लघुत्वाच्च। अत एव [4]**शतपथब्राह्मणतद्भाष्या**द्युक्तसङ्गतिः। एवं हि तत् 'अथ यदब्रवीदिन्द्रशत्रुर्वर्द्धस्वेति तस्मादुहैनमिन्द्र एव जघान अथ यद्ध शश्वदवक्ष्यदिन्द्रस्य शत्रुर्वर्धस्वेति शश्वदु ह स एवेन्द्रमहनिष्यदिति'। आद्येऽनुकरणं पूर्वपदप्रकृतिस्वरविशिष्टस्यान्त्ये वैतदर्थकमन्तोदात्तं यदवक्ष्यदित्यर्थ इति तद्भाष्यम्। न च पर्युदासपक्षे **यज्ञकर्मे**ति सूत्रे कर्मग्रहणं व्यर्थम्। जपादीनामकरणत्वादिना करणमन्त्रत्वेन साक्षात्क्रत्वङ्गमन्त्रत्वेन वा साजात्यं मा ग्राहीति तत्सार्थक्यात्। अत एवेषेत्वेत्यादि-शाखाछेदनादिकरणयजुर्मन्त्रादावप्येकश्रुतिर्भवत्येव। केषाञ्चित् त्रैस्वर्येण तत्र पठनं तु प्रामादिकं सूत्रविरुद्धं च। सम्पूर्णेषु यजुर्षु नैवैकश्रुतिः। ते ऊहा हि न मन्त्रा इति पूर्वमीमांसापास्तम्बौ[5]।

अत्रत्यकैयटः विभाषा छन्दसीतिसूत्रस्थहरदत्तादीनां सर्वेषां सम्मतमेव। इन्द्रशत्रुप्रस्तावे

---

१. पाक्षिकैकश्रुतिः इति ख ग पाठः।

२. सर्वमते एवेति ख पाठः।

३. एवञ्चेत् ख पाठः।

४. श.ब्रा. पृ.सं. २१९।

५. 'अनाम्नाता अमन्त्रा' इत्याबस्तम्बसूत्रम्।

**इहाप्येकश्रुतेः प्राप्तौ सत्यां तदकरणं बहुव्रीहिस्वरकरणं च स्वरतोऽपराधादित्यस्यार्थ इत्याहुः ।**

**श्रूयते च—**

**यदधीतमविज्ञातं निगदेनैव शब्द्यते ।**
**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हि चित् ।। (म.भा. १-१-१-३२)**

**निगदेन पाठमात्रेण । शुष्कैध इति सान्तेन क्लीबेन एधस्शब्देन अकारान्तेन वा पुल्लिङ्गेन निर्वाह्यम् । न ज्वलति न प्रकाशते निष्फलं भवतीत्यर्थः । निरुक्ते तु – "अथापि ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च" इत्युपक्रम्य –**

**"स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।**
**योर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ।।" (निरू १-६-१८)**

---

**भट्टभास्कर**स्वरासोऽप्येवमेव । यत्किञ्चिदूहितपदघटिते तु मन्त्रत्वमेव । तन्मध्यपतितादिन्यायात् । जपशब्दश्चाकरणमन्त्रेषु रूढः अन्यत्प्रसिद्धमित्यलं क्षुद्रोपद्रवेणेति दिक् । इहापि = इन्द्रशत्रुशब्देऽपि = वस्तुतस्तु लोकवद्वेदेऽपि ऐच्छिक एव विकल्पो न तूक्तरीत्या व्यवस्थितः, तास्वपाठात् । अत एव तैत्तिरीयाणां तथा सर्वत्र पाठः सङ्गच्छते । बह्वृचानां तथापाठस्य तु छान्दसत्वेन निर्वाहः । स्पष्टश्चेदमन्यत्रेति बोध्यम् ।

तृतीयं तदाह । **श्रूयते चेति ।** श्रुतिश्चास्तीत्यर्थः । नन्वधीतमविज्ञातमिति विरुद्धमधीतस्य स्वरूपेण विज्ञातत्वादिति चेन्न सुबादिसंस्काराज्ञानादर्थापरिज्ञानाद्वाऽविदितत्वस्य विवक्षितत्वात् । शब्द्यते पुनः पुनः कथ्यते । **शुष्कैध इति ।** इत्यस्य निर्वाह्यमित्यत्रान्वयः । दृष्टान्ते यथाश्रुतार्थसम्भवेऽपि दार्ष्टान्तिकेऽसम्भवादुभयसाधारणमर्थमाह । **न प्रकेति । निष्फलमिति ।** अनेन निन्दार्थवादेन निष्प्रयोजनाध्ययनानौचित्यलाभेन निष्प्रयोजनं नाध्येयमिति निषेधकल्पनान्निषिद्धं अध्ययनं मा भूदिति व्याकरणमध्येयमिति तात्पर्यम् । ज्ञानशब्दोऽर्शआद्यजन्तः । अज्ञानेत्यत्र बहुव्रीहिः स्पष्टः । एवं धर्मिद्वारा धर्मयोरेव तत्प्रतिपादने तात्पर्ये तु यथाश्रुतमेव साधु । स्थाणुर्वृक्षविशेषः । स्थाणुर्वा ना ध्रुवः शङ्कुरि**त्यमरः**[1] । इत्पादपूरणे । ऐहिकं फलमाह । **सकलमिति ।** पारलौकिकमाह । **नाकमिति ।** तत्र हेतुं सूचयितुमाह । **ज्ञानेति ।** यतः ज्ञानेन

---

१. अ.को. वनौषधिवर्गे पृ.सं. १२९ श्लो.सं. ८ .

**इति मन्त्रमुदाहृत्य ‘‘यद्गृहीतमविज्ञातम्’’ इत्यादि पठितम्। तत्रापि गृहीतं शब्दतः, अविज्ञातं तु अर्थतः प्रकृतिप्रत्ययादिविभागेन वेत्यादि ; शेषं प्राग्वत्।**

**अन्यत्रापि श्रूयते – ‘‘एकः शब्दः सम्यक् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवति’’ इति। एतच्च ‘‘एकः पूर्वपरयोः’’ इति सूत्रे भाष्यकृद्वक्ष्यति। एतन्मूलकमेव कात्यायनप्रणीतेषु भ्राजाख्येषु श्लोकेषु स्मर्यते –**

**यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद्व्यवहारकाले।**
**सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ॥ इति ॥(म.भा.३३)**

**दुष्यति चापशब्दैरित्यत्र अवैयाकरणः कर्त्ता सामर्थ्याद् बोध्यः।**

---

विधूतो नाशितो पाप्मा पापा यस्य स इत्यर्थः। तत्रापि = तस्मिन् मन्त्रेऽपि। अपिः पूर्वपाठसमुच्चायकः। आदिना सुबादिसंस्कारपरिग्रहः। एवञ्चाध्ययनजन्यकर्मानुष्ठानजफलसम्पादकवेदार्थज्ञानायाध्येयं व्याकरणम्। तादृशज्ञानपूर्वकानुष्ठाने एव हि फलमिति भावः।

चतुर्थं तदाह। **अन्यत्रेति।** एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति पाठः। सम्यग्ज्ञातः सम्यक्त्वेन साधुत्वेन ज्ञातः। शास्त्रान्वितः शास्त्रव्युत्पादनमार्गेणानुसंहितः। सुप्रयुक्तः शिक्षोक्तरीत्या प्रयुक्तः। तस्य च कोशव्याकरणशिष्टप्रयोगाद्यनुमापकम्। ननु नेदं वाक्यमत्र भाष्ये उदाहृतमत आह। **एतच्चेति।** उक्तश्रुतिरूपं चेत्यर्थः। नन्वेवमपि प्रतिज्ञाभङ्गापत्त्या नास्यात्रोपयोगोऽत आह। **एतन्मूलेति।** उक्तश्रुतिमूलेत्यर्थः। **प्रणीतेषु** उपनिबेद्धेषु। **यस्तु प्रयुङ्क्त इति।** अनेनादृष्टद्वारा पुरुषार्थसाधनत्वरूपाभ्युदयहेतुत्वं व्याकरणाध्ययनस्य दर्शयति। **कुशलः** अधीतव्याकरणः। लक्षणस्मरणपूर्वकं यः प्रयुङ्क्ते इति फलति। **विशेष इति।** अर्थविशेषे शक्त्याद्यन्यतम इत्यर्थः। अयं भावः। एक एव शब्द एकस्मिन्नेवार्थे केनचिद्धेतुना प्रयुक्तः साधुरन्यथा त्वसाधुः। यथा गवि गोणीशब्दः साधर्म्यमूलकाभेदारोपात्प्रयुक्तः साधुर्जातिप्रयुक्तस्त्वसाधुरिति। यथावत् = अम्बूकृतादिदोषरहितम्। **स इति।** परलोकेऽतिशयितं सुखमित्यर्थः। वाचो योगः प्रकृतिप्रत्ययविभागेनार्थविशेषपरत्वं तद्वेत्तीति वाग्योगवित्। **सामर्थ्यादिति।** यतः सन्निधो तत्प्रबलमिति भावः। स्पष्टं चेदं भाष्यादौ।

---

१. म.भा.पृ.सं. ३३ (पस्पशाह्निकम्)

**तथा –**

**अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः ।**
**कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ।।** **(मा.भा. १-१-१-३७)**

**अयमहमित्यस्य ''अनुकरणं चानितिपरम्'' इति गतिसंज्ञा । ततोऽगतिसमासेऽपि 'अस्यवामीयम्' इत्यादाविवानुकरणत्वादेव विभक्तेर्लुङ् न ।**

---

पञ्चमं तदाह । **तथाऽविद्वांस इति ।** अत्र योग्यत्वाद्व्याकरणं कर्म बोध्यम् । अभिवादानन्तरप्रयोज्याशीर्वचनवाक्ये उपात्तेऽ**स्य नाम्नो**ऽभिवादकनाम्नष्टेः **प्लुतिं** प्लुतं कर्तुं तादृशा **ये** न जानन्ति **तेषु कामं** यथोक्तं निश्शङ्कमिति यावत्, **कामं** विध्यनुसारमन्तरैव वा, **विप्रोष्य** प्रवासादेत्य स्त्रीष्विवायमहमिति वदेदित्यर्थः । प्रत्यभिवादे हि गुर्वादिना प्लुतः कार्यः । यस्तु प्लुतं कर्तुं न जानाति स स्त्रीवद्वक्तव्योऽयमहं नमामीति एतदभिनयेन कृताञ्जलिपुटस्य स्वहृदयदेशप्रापणादभिवादनभ्रान्तिजननेन तान्प्रीणयेत्, न तु **अभिवादये देवदत्तोऽहं भारद्वाजगोत्रो भो'** इत्यादिना संस्कृतेन वाक्येन नामगोत्रोच्चारणपूर्वकं पादग्रहणं कुर्यात् । यद्वाऽ**यमहमागतोऽस्मि' 'अयमस्मी'**त्येव वोक्तरीत्या वदेन्न तु नमामीत्याद्यपि । प्रत्यभिवादेन ह्यसौ संस्कृतोऽभिवाद्यधर्महरो न भवति, स्वयं वाऽभ्युदयेन युज्यते । तेन तदनभिज्ञा नाभिवाद्या इति भावः । तदर्थमेतदध्ययने तत्प्लुतज्ञानेन तत्र तत्करणात् स्त्रीसाम्यं नेति तत्फलकमिदमध्येयम् । अन्यथा तु तत्साम्यं स्यादिति फलितोऽर्थः । शास्त्राज्ञानित्वकृतापमानप्रयुक्तदुःखभाजो मा भूमेत्यध्येयं व्याकरणमिति परमतात्पर्यम् । अत एव वैलक्षण्यसूचकस्तुशब्दः । प्लुतस्य व्याकरणलक्षितस्यान्यथा कथमपि न ज्ञानमिति तत्वम् । तस्यासमुदायस्यानुकरणस्य संज्ञा । अ इति छेदः । स च निषेधे । **अमानोनेति** वचनात् । संज्ञा नेत्यर्थः । अनतिपरत्वेऽपि कृद्योगाभावादिति शेषः । ततः गतित्वाभावात् वदेदित्यस्य तिङन्तत्वाच्चेत्यपि बोध्यम् । **अगतिसमासेऽपीति ।** गतिसमासाभावेऽपीत्यर्थः । अनन्तरं अनुकार्यानुकरणयोर्भेदविवक्षायामर्थवत्वात् समुदायस्य प्रातिपदिकत्वात् प्राप्नोतीति शेषः । **अस्यवामीयमिति । अस्यवामस्य पलितस्ये**त्यादि-सूक्तमित्यर्थः । केचित्तु यथाश्रुतमेव योजयन्ति । तच्चिन्त्यम् । अस्य कृद्योगाभावादगतित्वेन वदेदित्यस्य तिङन्तत्वेन च समासाप्राप्तेः । तदाप्यपिररुचिसूचकः । समासाभावे बाधकाभावः कृद्योगाभावाच्च कथं गतिसंज्ञेतीति केचित् ।

**याज्ञिकाः पठन्ति प्रयाजाः सविभक्तिकाः कार्या इति ।। यद्यपि प्रकृतौ प्रयाजमन्त्राः सविभक्तिका एव पठ्यन्ते, तथापि यदि आधानादनन्तरं यजमान उदरव्यथावान् स्याद्यदि वा संवत्सरमध्ये तस्य महती विपत्स्यात्तदा नैमित्तिकीं पुनराधेयेष्टिं विधाय तत्रेदमाम्नातं – ''प्रयाजाः सविभक्तिकाः'' इति । तत्र केवलविभक्तेः प्रयोगानर्हत्वात्प्रकृतिराक्षिप्यते । सा चाग्निशब्दरूपा न तु या काचित् । निरुक्ते देवताकाण्डे - ''अथ किंदेवताः प्रयाजानुयाजाः'' इति प्रश्नमवतार्य मन्त्रवर्णादीनुदाहृत्य ''आग्नेया इति तु स्थितिः''**

---

षष्ठं तदाह । **याज्ञिका इति ।** यज्ञकाण्डभवा वैदिकाः शब्दा इत्यर्थः । ऋषिः पठति शृणोति ग्रावाण इति वत्प्रयोगः । तत्र ऋषिर्वेदः । **सन्सूत्रे** भाष्ये एषः प्रयोगः । ननु प्रकृतौ प्रयाजमन्त्राः सविभक्तिका एव पठ्यन्त इत्यतिदेशतस्तत्र तथैव तेषां प्राप्तिरिति विधायकेन किमनेन वाक्येनेत्यभिप्रायेणाशङ्कते । **यद्यपीति । प्रयाजमन्त्रा इति ।** प्रयाजेषु तदाख्ययागेषु श्रूयमाणं सविभक्तिकत्वमानर्थक्यात्तदङ्गेष्विति न्यायेन मन्त्रेष्ववतरतीति विधायकवचनस्थप्रयाजपदं सामर्थ्यान्मन्त्रपरमिति भावः । **पठ्यन्त इति ।** तथा च कार्या इति विध्यानर्थक्यमिति भावः । तदभिप्रायेणैव समाधत्ते । **तथापीति । आधानात्** तत्करणात् । तस्य = यजमानस्य । **महती विपदिति ।** अर्थपशुपुत्रादिनाशरूपेत्यर्थः । विधायेत्यस्याम्नातमित्यत्रान्वयः । **तत्रेदमिति ।** तादृशेष्टावुक्तविधिवाक्यमित्यर्थः । स्फुटत्वाय पुनस्तदाह । **प्रयेति ।** तत्र वचने । **प्रयोगार्हत्वादिति ।** न केवलः प्रत्यय इति निषेधात् । तथा चापूर्वविभक्तिविधानेन सार्थक्येऽपि तन्मात्रविधानमेवाशक्यमिति भावः । आक्षिप्यते = अनुमीयते । ननु तर्हि यत्किञ्चित्प्रातिपदिकप्रकृतिकाः सर्वा विभक्तयः प्रयोक्तव्या इति प्राप्नोतीत्यत आह । **स चेति ।** तत्र हेतुमाह । **निरुक्त इति । काण्डे** सर्वेषां देवताप्रतिपादकप्रकरणे । अथेत्यस्य पृच्छ्यत इति शेषः । तदेवाह । **किं देवेति ।** का देवता येषां त इत्यर्थः । **अवतार्येति ।** आग्नेया इत्येके इत्युक्त्वेति शेषः । **मन्त्रवर्णेति ।** 'त्वमग्ने प्रयाजानुयाजानां पुरस्तात्पश्चादि'ति मन्त्रवर्णेत्यर्थः । आदिना 'प्रयाजान्मे अनूयाजांश्च केवला'नित्यादिमन्त्राणां 'आग्नेया वै प्रयाजा' इति च, ब्राह्मणमित्यस्य अतः परं च तेषां छन्दोदेवतात्वमित्यादिब्राह्मणावाक्यानां च सङ्ग्रहः । मन्त्रवर्णादेरप्यत्र स्वातन्त्र्येण हेतुत्वं बोध्यम् । **अत्रेदं बोध्यम् ।** विभक्तिमुक्त्वा प्रयाजेन वषट्करोतीति वचनात् तन्मन्त्रात् पूर्वं तत्प्रयोगः । तत्राग्नेर्देवताया एकत्वादेकवचनमेव । तत्रापि सम्बुद्धिटाङेङस्यन्तानां न प्रयोगः । वचनात्तथोत्तमप्रयाजेऽपि वचनान्निषेध इति तत्रापि न प्रयोगः । स्फुटीकृतं चैतद्भाष्यादिव्याख्याने[1] इति ।

---

१. भाष्यादि व्याख्याने उद्योते छायायां च । (पृ.सं. ३८, प्रथमो भागः)

**इत्युपसंहारात्। तस्मादादितश्चतुर्षु प्रयाजेषु चतस्रो विभक्तयोऽग्निशब्दप्रकृतिकाः पठ्यन्ते इत्यादिश्रौतग्रन्थेषु द्रष्टव्यम्।**

**तथान्यत्रापि ''यो वा इमां पदशः स्वरशोऽक्षरशो वाचं विदधाति स आर्त्विजीनः'' इति। पदं पदमिति ''संख्यैकवचनाच्च वीप्सायाम्'' इति शस्। स्वर उदात्तादिः। अक्षरं व्यञ्जनसहितोऽच्। ऋत्विजमर्हतीत्यार्त्विजीनो यजमानः, ऋत्विक्कर्मार्हतीत्यार्त्विजीनो याजकः, ''यज्ञर्त्विग्भ्यां घखञौ'' इति सूत्रेण ''यज्ञर्त्विग्भ्यां तत्कर्मार्हतीति चोपसंख्यानम्'' इति वार्त्तिकेन च खञ्। यजने याजने च विदुष एवाधिकार इति भावः।**

**ऋग्वेदेऽपि बहवो मन्त्रवर्णाः - चत्वारिशृङ्गा, चत्वारिवाक्, उतत्वः पश्यन्,**

---

तदभिप्रेत्योपसंहरति। **तस्मादिति। चतस्र इति।** प्रथमाद्वितीयाषष्ठीसप्तमीनामेकवचनान्येवेत्यर्थः। **पठ्यन्त इति।** तत्रेष्टाविति भावः। यद्यप्यन्यत्रान्या अपि ता आम्नातास्तथापि यथाश्रौतसम्प्रदायं ताः प्रयोज्यास्तदाह। **इत्यादिश्रौतेति।**

सप्तमं तदाह। **तथेति।** अन्यत्रापीत्यस्य वार्णी विदधाति संस्करोति स आर्त्विजीनो भवतीत्यर्थः। बाह्वल्पार्थादित्यस्याप्राप्तेराह। **पदमिति।** ननु परिमाणशब्दा वृत्तावेकार्था एवेति तेषामेव तत्र ग्रहणमिति वृत्त्याद्युक्तत्वात्कथमिदमिति चेन्न अस्मादेव प्रयोगाज्जातिशब्देभ्योऽपि वृत्तौ यदैकत्वविशिष्टस्यैव बोधस्तदा शसङ्गीकारात्। द्वित्वादिबोधे शसोऽसाधुत्वाय **एकवचनादिति।** यद्वा संख्याभिन्नार्थानां परिगृहीतैकत्वानामेव वीप्सेत्यर्थः। अग्रेऽपि अक्षरश इत्यस्य पृथगुक्तेरज्व्यावृत्तये आह। **उदात्तेति।** ब्रह्मादिव्यावृत्तये आह। **व्यञ्जनसहित इति।** यथा **ये यजामहे इति पञ्चाक्षर**मिति हलामप्राधान्याद्वैपरीत्यशङ्का न कार्या। **वर्णं वाऽहुः पूर्वसूत्र** इति भाष्यात्। वर्णमात्रमित्यपरे। वार्तिकेन तत्रत्येनैव सकृत्प्रयुक्तार्त्विजीनशब्दस्योभयपरत्वे युक्तिं सूचयन्नाह। **यजन इति। विदुष इति।** वेदार्थज्ञस्येत्यर्थः। विद्वान् यजेतेत्यादिश्रुतेः। तथा चार्त्विजीनत्वसिद्धिद्वारा ऐहिकामुष्मिकफलार्थमेतदध्येयमिति तत्वम्।

तथान्यत्तच्चतुष्टयमाह। **ऋगिति।** अपिना वेदान्तरसमुच्चयः। वर्णा इत्यस्य सन्तीति शेषः। इत्यादय इत्यनेन भाष्यीयन्यूनता परिहृता। तथा च भाष्यं दिक्प्रदर्शनपरं, न तु परिगणनपरम्। आदिसङ्ग्राह्यं तु **तस्मादेषा व्याकृता वागुद्यत** इत्यादि बोध्यम्। तत्रापीत्यादयो बहवो मन्त्रवर्णाः सन्तीत्यन्वयः। चत्वारीत्यादीनामर्था भाष्यादितोऽवगन्तव्याः। इदं च ऋक्चतुष्टयं व्याकरणस्य

**सक्तुमिव, इत्यादयः। ''तितउ परिपवनं भवति'' इति भाष्यम्। ''चालनी तितउः पुमान्'' इति तु अमरस्य प्रमाद इत्येके। वस्तुतस्तूक्तभाष्यानुरोधादमरग्रन्थे पुंस्त्वायोगमात्रं व्यवच्छेद्यं न त्वन्ययोगोऽपि। तथा च पुंनपुंसकवर्गे – ''स्याद्वास्तु हिंगु तितउ'' इति त्रिकाण्डशेषः। अत एव 'तितउमाचष्टे तितापयति' इत्यभियुक्तग्रन्था अपि संगच्छन्ते इति दिक्।**

**याज्ञिकाः पठन्ति – ''आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीया सारस्वतीमिष्टिं निर्वपेत्'' इति।**

**तथा- दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद्घोषवदाद्यन्तरन्तस्थमवृद्धं**

---

मोक्षजनकत्वं प्रतिपादयतीति स्पष्ट**मुद्योते**[1]। यद्यपि भाष्ये चत्वारीति सकृदेव पठितं, तथापि तद्व्याख्यावसरे मतभेदेन द्वितीयोऽपि मन्त्र उक्त इत्याशयेनेह चतुष्टयोपन्यास इति बोध्यम्। तत्र चरमे विशेषमाह। **तितविति।** तुर्वैलक्षण्ये। एके इति सूचितामरुचिं प्रकटयन्नाह। **वस्तुतस्त्विति। स्त्वयोगेति।** तदसम्बन्धमात्रेत्यर्थः। सर्वं वाक्यमिति न्यायलभ्यैव नेति भावः। तत्र हेतुमाह। **तथा चेति।** यत इत्यर्थः। **अत एवेति।** उभयलिङ्गत्वादेवेत्यर्थः। अत्र **तितापयतीति।** तत्प्रयोगोऽयुक्त एवेत्यग्रे स्फुटीभविष्यति। तदाह। **दिगिति।**

द्वादशं तदाह। **याज्ञिका इति।** प्राग्वदर्थः। यद्यपि तत्प्रयोगे पुरुषस्य सर्वत्र दोषस्तथापि तत्र क्रतुवैगुण्यमधिकमित्याशयेनाह। **आहिताग्निरिति।** क्रतुमध्य इति शेषः इति केचित्। वस्तुतस्तु अन्यत्र दोषाभावसूचकमेवात्राहिताग्निपदमित्यन्यत्र स्पष्टम्। स्फुटीभविष्यति चाग्र इति बोध्यम्। प्रायश्चित्तीया भवार्थे छः। अन्तःकरणशुद्धिरूपप्रायश्चित्तसाधनत्वेन तद्भवत्वम्। तथा चात्र प्रायश्चित्तपदं तत्परम्, न तु प्रसिद्धकर्मपरमिति बोध्यम्।

नामकरणे उपयोगं सूचयन् त्रयोदशं तदाह। **तथेति।** यद्यपि दशम्यां पुत्रस्येति प्रयोजनस्वरूपगणने उक्तं, गृह्येऽपि तथैव पठ्यते तथापि दशमतिथेरशौचान्तर्गतत्वादौपश्लेषिक-सप्तम्या तदर्थं भाष्योक्तमाह। **दशेति।** सुप्सुपेति समासपूर्वकबहुव्रीहिः। क्रियाविशेषणमेतत्। घोषवान् हशादिर्वर्ण यस्य तत्। घोषशब्दो धर्मपरः। अन्तर्मध्येऽन्तस्थाः यणः यस्येत्यर्थः। अन्तस्थाशब्द आकारान्तः। **अवृद्धं** वृद्धसंज्ञाक्षररहितं **अनरि** अमनुष्येऽरिभिन्ने वेत्यर्थः। अत एव

---

१. पस्पशायां (म.भा.प्र.उ. पृ.सं. ४७)

**त्रिपुरुषानूकमनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितमिति। नामकरणे अधिकारिणः पितुर्ये त्रयः पुरुषास्ताननु कायति अभिधत्ते इति त्रिपुरुषानूकम्। ''अन्येषामपि दृश्यते'' इति दीर्घः। त्रिपुरुषेत्यत्र पात्रादित्वात्स्त्रीत्वाभावः, मूलविभुजादित्वात्कः। यत्तु उपपदाविवक्षया ''आतश्चोपसर्गे'' इति कं कृत्वा ततः षष्ठीतत्पुरुष इति, तत्तु ''कर्मण्यण्'' इतिसूत्रे ''अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेन'' इति वार्तिकस्य नदीसूत्रे स्त्र्याख्याविति मूलविभुजादित्वात्क इति भाष्यस्य च अननुगुणम्। अत एव गङ्गाधरादिशब्दानां संज्ञाशब्दत्वमिति प्राञ्चः। वस्तुतस्तु प्रथमं कर्माविवक्षायामनूकपदं व्युत्पाद्य पश्चात्कर्मसम्बन्धेऽप्यदोषः। वार्तिकादिकं तु प्रथममेव कर्मविवक्षामभिप्रेत्य। अन्यथा**

---

स्तौति। **तद्धीति।** कृतं तदन्तमेव। एवमग्रेऽपि। तेन नियमापूर्वं फलति। तदनिच्छायां तत्प्राप्तौ तन्निषेधति। **न तद्धिति।** तथा च तत्करणे तद्धानिः पापं चेत्यर्थः। संस्कार्यस्य त्रिपुरुषेत्यर्थभ्रमवारणायाह। **नामेति। तानिति।** प्रत्येकमिति शेषः। **दीर्घ इति।** उपसर्गस्येति भावः। उक्तः फलितार्थः, शब्दार्थस्त्वन्य इति सूचयन् त्रिपुरुषशब्दस्य द्विगुत्वादाह। **त्रिपुरुष इति।** नन्वेवं **कर्मण्यणि**(पा०सू० ३-२-१)त्यणि अनूकाय इति स्यादत आह। **मूलेति।** विशिष्टपाठकल्पनयेति भावः। एतदनभिज्ञ**नारायणो**[१]क्तिमत एव खण्डयति। **यत्तूपपदेति।** अन्यथाऽणि **आतो लोप इटि** चे(पा०सू० ६-४-६४)त्यालोपाप्राप्त्या **आतो युगि**(पा०सू० ७-३-३३)ति युगागमे त्रिपुरुषानुकाय इति स्यादिति भावः। **अकारादिति।** ओदनपाक इति तदुदाहरणम्। नदीसूत्रे **यूस्त्र्याख्या**विति सूत्रे। **स्त्र्याख्याविततीति।** इत्यत्रेत्यर्थः। **चाननुगुणमिति।** ओदनपच इति प्रयोगस्य तथाप्यवारणात्। तथाविग्रहं कृत्वा तथोक्तेर-साङ्गत्यापत्तेश्च। **आतश्चोपे**(पा०सू० ३-१-१३६)ति केन सिद्धत्वादिति भावः। अत्रैकदेशि-सम्मतिमाह। **अत एवेति।** भाष्यादिविरोधादेवेत्यर्थः। अस्यैव प्राञ्च इत्यत्रान्वयः। **संज्ञेति।** समुदायरूढिरित्यर्थः। प्राञ्च इत्यनेनारुचिः सूचिता। तद्बीजं तु उक्तरीत्या गतिसम्भवे संज्ञाशब्दत्वकल्पनं व्यर्थमिति, न त्विदं सर्वस्य पूर्वोक्तार्थस्यारुचिसूचकं, तस्य सिद्धान्तत्वादत एव यथाश्रुतयोजनमयुक्तमिति बोध्यम्। दिगर्थत्वेन दोषं सूचयितुं कस्यचित् सिद्धान्तमनुवदति। **वस्त्विति। प्यदोष इति।** रूपासिद्धिरूपदोषाभाव इत्यर्थः। नन्वेवमपि तद्विरोधरूपदोष एवात आह। **वार्तिकेति।** अन्यथा= अविवक्षाया अनङ्गीकारे। **अत एव** अविवक्षाविवक्षयोरङ्गीकारादेव

---

१. सू.रत्न. पृ.सं. ५९।

**कृतपूर्व्यादिषु का गतिः ? अत एव ''शक्यं च क्षुदुपहन्तुम्'' इति भाष्यव्याख्यायां बहिरङ्गस्त्रीत्वप्रतीत्या अन्तरङ्गः पदसंस्कारो न विहन्यते इति कैयटोपि वक्ष्यति। विवक्षा च लोकप्रसिद्ध्यनुसारिणी न तु स्वायत्तेति ''विपराभ्यां जेः'' इत्यादावपि पूर्वं धातुः साधनेन युज्यत इति पक्षमुपष्टभ्य विजयतीत्यादि नापादनीयमिति दिक्।**

**तथा च ऋग्वेदे एव पठ्यते - ''सुदेवो असि वरुण यस्य ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव'' इति। अस्यार्थः - हे वरुण ! सत्यदेवोऽसि। यस्य ते काकुदं तालु काकुर्जिह्वा सा उद्यते उत्क्षिप्यतेऽस्मिन्निति काकुदम्। वदेरुत्क्षेपणमर्थो धातूनामनेकार्थत्वात्। ततो घञर्थे कविधानमित्यधिकरणे कः, सम्प्रसारणं, षष्ठीतत्पुरुषे शकन्ध्वादित्वात्पररूपम्। नुद प्रेरणे इत्यस्मादधिकरणे कः पृषोदरादित्वान्नुशब्दस्य लोप इत्यन्ये। निरुक्तस्वरसोऽप्येवम्। सप्त सिन्धव इव सिन्धवो विभक्तयः। अनुक्षरन्ति तालु प्राप्य प्रकाशन्ते इत्यर्थः। अत्र दृष्टान्तः – यथा सच्छिद्रां लोहमयीं**

---

पदसंस्कारः नपुंसकत्वम्। अतिप्रसङ्गं निराचष्टे। **विवक्षेति। दिगिति।** तदर्थस्तु वस्तुतस्त्वित्यादि चिन्त्यम्। उक्तभाष्यादिविरोधात्। कृतपूर्व्यादौ त्वगत्या भाष्यप्रामाण्यात्तथा कल्प्यत इति विजयतीत्यादिदोषशङ्कैव न। शक्यमित्यादिसिद्धिस्तु पदान्तरनिरपेक्षैवेति न दोषलेशोऽपीति। विवेचितं चेदमस्माभि**र्भावप्रकाशे**[१] प्रारम्भे।

चतुर्दशं तदाह। **तथेति।** सुदेवो असीत्यसन्धिः पाठः। **प्रकृत्यान्त**(पा०सू० ६-१-११५)रिति सूत्रेण प्रकृतिभावात्। तस्य व्याख्या सत्यदेवोऽसीति। सत्येन साधुशब्दप्रयोगाख्येन दीव्यति द्योतत इत्यर्थः। तथा चोक्तरीत्या वरुणे यथा यौगिकोऽयं शब्दो न त्वश्वकर्णादिवद्रूढः तथान्येष्वपीति भावः। यस्येति पञ्चम्यर्थे षष्ठी। यस्मात्तवेत्यर्थः। काकुदपदार्थमाह । **तात्विति।** ननु कथं स तदर्थ इत्याशङ्कायां वाक्यार्थं पूरयितुं काकुदशब्दमादौ व्युत्पादयति। **काकुरित्याद्येवमित्यन्तेन।** तदुपपादयति। **वदेरिति।** ततः = उत्क्षेपणार्थाद्वदेः। **सम्प्रेति। वचिस्वपी**त्यनेन पूर्वरूपमपि बोध्यम्। **षष्ठीति।** काकोरुदमितीति भावः। एवञ्च प्रागुक्तोऽर्थः फलितः, न तु शाब्दः। अत एव घञर्थ इत्यस्य प्राप्तिरिति बोध्यम्। **पररूपमिति।** पृषोदरादित्वादेकस्य लोपो वा बोध्यः। भाष्यस्य साधारणत्वात्सम्प्रसारणाद्यभावानेकार्थत्वाकल्पनजलाघवान्मतान्तरमाह। **नुदेति।** एवमित्यग्रे प्राप्य सप्त सिन्धव इव सप्तविभक्तयोऽनुक्षरन्ति प्रकाशन्त इत्यर्थः इति पाठः। एवं तं व्युत्पाद्य वाक्यार्थं पूरयति। **प्राप्येति।** इदं

---

१. 'प्रौढानां मनो रमयतीत्यर्थिकां मनोरमां' इति शब्दरत्नव्याख्यानानवसरे विवेचितमित्यर्थः। (प्रौ.म. चौ.सं. संस्था) प्रौ.म.श.भाव. पृ.सं. ४।

**प्रतिमां प्रविश्याग्निः प्रकाशते तथेति। अग्निर्हि तत्रत्यं मलं भस्मीकृत्य प्रतिमां शुद्धां करोति तथा विभक्तयोऽपि शारीरं पापमपाकुर्वन्तीति भावः। सूर्मी स्थूणाऽयःप्रतिमेत्यमरः। स्मर्यते च –**

**सूर्मीं ज्वलन्तीमालिङ्गेन्मृत्यवे गुरुतल्पगः। इति।**

**''अमि पूर्वः'' इत्यत्र ''वा छन्दसि'' इत्यनुवृत्तेर्यणादेशः। सुषिरामित्यत्रार्श- आद्यच् अभेदोपचारो वेत्याहुः। वस्तुतस्तु ''ऊषसुषिमुष्कमधो रः'' इति मत्वर्थीयो रप्रत्ययः। ''रन्ध्रं श्वभ्रं वपासुषिः'' इत्यमरः ''सरन्ध्रे सुषिरं त्रिषु'' इति च। सुष्टु स्यतीति सुषिरिति क्षीरस्वामी। गर्त्ते गर्त्तान्विते वाद्ये विशेषे सुषिरं त्रिषु। इति शाश्वतः॥ इति प्रयोजनप्रपञ्चः॥**

**इत्येवं विषयप्रयोजनयोरुक्तयोः सम्बन्धाधिकारिणावुक्तप्रायावेवेति पृथङ्नोक्तौ।**

---

चाध्याहारादिलभ्यम्। इव तद्रूपाः। सादृश्यं च जगद्व्यापकत्वेन पुण्यजनकत्वेन पापनिवारकत्वेन वा बोध्यम्। प्रकाशन्ते अत इति शेषः। यथाश्रुतपाठेऽनुपपत्तिः स्पष्टैव। सुषिरामित्यस्यार्थः **सच्छिद्रामिति।** सूर्मिमित्यस्यार्थो **लोहेति।** शोभनामित्यादिः। एतस्यैव दृष्टान्तस्य दाने हेतुं सूचयन्नेवमर्थमुक्त्वा भावमाह। **अग्निरिति।** हि यतः। तां यथा प्रविश्येति शेषः। **विभक्तयोऽपीति।** विभक्त्यन्ताः शब्दा अपीत्यर्थः। तालुदेशे प्रकाशं प्राप्येति शेषः। अनेन स्वर्गप्राप्तिः फलमित्युक्तम्। **सूर्मीति।** अत्र सुः शोभनार्थकः। अन्यत्संज्ञा। ननु भाष्ये ह्रस्वान्तपाठादमरासङ्गतिरत आह। **स्मर्यते चेति।** तस्य तदर्थत्वं स्मृतिमतमपीत्यर्थः। तल्पं शय्याट्टदारेष्वि**त्यमरः**[1]। नन्वेवं सूर्मीमित्युचितमत्रापीत्यत आह। **अमीति।** यद्यपि भाष्यप्रामाण्यात् स ह्रस्वान्तः तथापि स्मृत्यादिप्रामाण्यात् ङीषन्तत्वेन दीर्घान्तोऽपि बोध्यः। अत एव प्रागुक्तसङ्गतिः। अन्यथाऽनेकत्र शक्तिकल्पनापत्तिरिति बोध्यम्। सुषिरशब्दस्य छिद्रवाचकत्वेन धर्मिपरत्वायाह। **वस्त्विति।** ननु सुषिपदार्थः कोऽत आह। **रन्ध्रमिति।** उक्तार्थे मानमाह। **सरन्ध्र इति।** ननु कथं रन्ध्रे सुषिरत आह। **सुष्ठ्विति।** योगरूढ इति भावः। अत एव पूर्वमते मानमपि सूचयन्नाह। **गर्त इति।** इति प्रयोजनविस्तारनिस्तारः। उक्तः शब्द इत्यादिभाष्यार्थं वदन् न्यूनतां निराचष्टे। **इत्येवमिति। नोक्ताविति।** भाष्यकृतेति भावः। **इति प्रयोजनविस्तारनिस्तारः**

---

१. अ.को. तृतीयकाण्डे नानार्थवर्गे श्लो.सं. १३१, पृं.सं. ४१९।

**इह येन प्रयोजनं पृष्टं ततोऽन्य एव तटस्थ इत्थं प्रत्यवतिष्ठते। ननु यथा 'अधीष्व' इत्याचार्येणोक्ते प्रयोजनप्रश्नमकृत्वैव वेदमधीयते, तद्वदङ्गभूतं व्याकरणमप्यध्येष्यन्ते तत्किं प्रयोजनवर्णनक्लेशेनेति ? अत्रेदमुत्तरम्, प्रायेणेदानीन्तनानामल्पायुष्कत्वाद्विघ्न-बहुलत्वाच्च प्रधानभूतो वेदस्तावत्पाठ्यते। तदध्ययनकाले च बाल्यात्प्रयोजनादिकं प्रष्टुमसमर्थाः शिष्या गुरुणा उपदिश्यमानं वेदं गृह्णन्तीति युक्तम्। ततो गृहीतवेदाः प्रौढिमापन्ना विवाहार्थं त्वरमाणा व्याकरणाध्ययनाय गुरुणा प्रेर्यमाणा अपि न सहसा प्रवर्त्तन्ते। ''वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः, अनर्थकं व्याकरणम्'' इति प्रत्यवतिष्ठन्ते। तान्प्रति युक्तमेव प्रयोजनादिवर्णनम्। पूर्वकल्पेषु तु व्याकरणशिक्षादीनि लक्षणानि प्रथमं पाठयित्वा तत्तल्लक्षणानुसन्धापनपूर्वकं लक्ष्यभूतं वेदं ग्राहयन्तः स्थिताः। तदा परं बाल्यावस्थायां व्याकरणपाठात्प्रयोजनप्रश्नविरहे तत्प्रतिपादनमपि न कर्त्तव्यमेवेति। यद्यपि —**

---

### १.३.५ प्रयोजनोक्तेः प्रयोजननिरूपणम्

**किं पुन**रित्यादिभाष्यार्थं वदन् सा भाष्यकारोक्तिरिति कैयटासङ्गतिं सूचयंश्च शङ्कावतरणमाह। **इहेति।** भाष्ये इत्यर्थः। व्याकरणविषय इत्यर्थो वा। **ततोऽन्य एवेति।** तस्यैतत्प्रश्नासम्भवादिति भावः। ननु तर्हि तत् वक्तुः प्रश्न इत्यागतम्। तच्च बाधितमत आह। **तटस्थ इति।** तथा चोभयभिन्नस्य तृतीयस्य प्रश्न इति भावः। **इत्थं** वक्ष्यमाणप्रकारेण। प्रत्यव-तिष्ठते = शङ्कते। **उत्तरमिति।** भाष्योक्तमिति भावः। **अल्पेति।** शतन्यूनेत्यर्थः। अत एव शतायुषोऽपि सम्भवात्प्रायेणेत्युक्तम्। नन्वेवमपि बुद्धिमता तत्सुकरमत आह। **विघ्नेति।** षष्ठीतत्पु-रुषः। **भूत इति।** तत्वं प्राप्त इत्यर्थः। तावदादौ। सहसा = अविचार्य। न केवलं तावन्मात्रं किन्तु शङ्कापीत्याह। **वेदादिति।** नोऽस्माकं। कर्तुः शेषत्वविवक्षया षष्ठी। **सिद्धाः** ज्ञाताः। **लोकात्त**द्व्यवहारात्। स्थानादिज्ञानमध्यापकशिक्षयैवाक्षरग्रहणवदित्याशयेनाह। **अनर्थेति। च प्रत्यवतिष्ठन्त इति।** इति प्रत्यवतिष्ठन्ते चेत्यर्थः। पूर्वकल्पेषु त्विति पाठः। युगान्तरेष्विति तदर्थः। तुर्वैलक्षण्ये। तच्छून्योऽपपाठः। **स्थिताः** गुरव इति शेषः। **परं** केवलम्। इतिरुत्तरसमाप्तौ। भाष्योक्तौ मन्वादिविरोधं परिहरति। **यद्यपीत्यादि।** उपाकृत्य = उपाकर्माख्यं कर्म कृत्वा। **यथाविधि** यथाशास्त्रं। **युक्तो** गुरुप्रेरितः समाहितचित्तस्तत्परो वा। अर्द्धपञ्चमान् = अर्धः पञ्चमो

**श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधि।**
**युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्द्धपञ्चमान्॥**
**ततः परं तु छन्दांसि शुक्लेषु नियतः पठेत्।**
**वेदाङ्गानि रहस्यं च कृष्णपक्षेषु सम्पठेत्॥ (मनु. ४-९५)**

**इति मनुवचनस्य ''इत ऊर्ध्वमनध्यायेष्वङ्गान्यधीयीत'' इत्यादिस्मृत्यन्तराणां च पर्यालोचनया वेदवेदाङ्गाध्ययनसमकालता लभ्यते, तथापि ऋषिवचनत्वाविशेषाद्भाष्यकारोक्तेर्मानवादेश्च व्रीहियववद्विकल्प एवेति तत्त्वम्। तदेवमनुबन्धचतुष्टयस्य सुस्थत्वात्साधुशब्दव्युत्पादनं कर्त्तव्यमिति स्थितम्।**

**ननु किमिदं साधुत्वम्? साधयति बोधयतीति साधुरिति व्युत्पत्त्या बोधकत्वं तदिति चेत्? गाव्यादावपि तत्सत्त्वात्। शक्तत्वं तदिति चेत्? न, 'पचति' इत्यादौ विकरणानामसाधुतापत्तेः, तेषामनर्थकत्वात्; डुपचष् लट् इत्यादीनां साधुतापत्तेश्च, लाक्षणिकेष्वव्याप्तेश्च तेषामपि लक्ष्येऽर्थेऽशक्तेः। क्वचिच्छक्ततायास्तु अश्वास्वादिष्वति-**

---

येषु तान्। सार्द्धचतुर इति यावत्। रहस्यमुपनिषदं मन्वादिस्मृतीर्वा। **ततः परं** सार्धचतुर्मासानन्तरं। **वेदाङ्गेति।** वेदाङ्गयोरध्ययनस्यैवेत्यर्थः। वेदवेदाङ्गेति पाठस्तु सुगम एव। उपसंहरति। **तदेवमिति। अनुबन्धेति।** विषयादिचतुष्टयस्येत्यर्थः। लाघवादाह। **साधुशब्देति। स्थितं** भाष्यादौ।

## १.३.६ साधुत्वनिरूपणम्

प्रसङ्गादाह। **नन्विति। इदं** साधुशब्देतिशब्दघटकसाधुशब्दप्रवृत्तिनिमित्तभूतम्। तत्र समादधानस्तटस्थः शङ्कते। **साधेति।** पूर्वपक्षी आह। **गाव्यादावपि तत्सत्वादिति।** तथा च तत्रातिव्याप्तिरिति भावः। प्राग्वच्छङ्कते। **शक्तेति।** गाव्यादौ शक्तेरभावमभिप्रेत्याह। **पचतीति। मनर्थेति।** तथा च शक्तत्वाभाव इति भावः। **साधुतापत्तेश्चेति।** तत्वस्य शास्त्रेण बोधितत्वादिति भावः। किञ्च वक्ष्यमाणरीत्याऽपभ्रंशेष्वपि शक्तिस्वीकारेण तेष्वतिव्याप्तेरित्यपि बोध्यम्। **तेषामपीति।** लाक्षणिकानामपि लक्ष्येऽर्थे शक्त्यभावादित्यर्थः। अपिर्विकरणादिसमुच्चायकः। ननु शक्तिर्न विशेषणं किन्तूपलक्षणमिति क्वचित्स्थलविशेषे लाक्षणिकानां गङ्गादिपदानामपि शक्तिरस्त्येवेति न चरममात्रदोषः। न चार्थभेदाच्छब्दभेद इति मतेन तेषां तत्रापि शक्तिरिति वाच्यम्। तज्जातीये तत्सत्वात्, पूर्वं तत्रैव शक्तिग्रहस्यावश्यकत्वाच्च। न चार्थभेदेऽपि शब्दैक्यमिति

**प्रसक्तेः । वृत्तिमत्त्वं तदिति चेत् ? न, द्योतकेषु निपातेष्वव्याप्तेः । औपसंदानिकी शक्तिरेव द्योतनेति चेत् ? न, प्रोत्तरजित्वघोत्तरटत्वयोरविशेषेण विनिगमनाविरहाच्छक्ततापत्तौ व्यासज्यवृत्तिशक्तौ विश्रान्तेः । ततश्च अट्द्विवचनाद्यव्यवस्थापत्तिः । न च जातिविशेषे एव साधुतेति वाच्यं, कत्वादिना सङ्करापत्तेरिति ।**

**अत्राहु :—**

**अनपभ्रष्टताऽनादिर्यद्वाऽभ्युदययोग्यता ।**
**व्याक्रियाव्यञ्जनीया वा जातिः काऽपीह साधुता ।। इति ।।**

---

मतेनैवाऽयं ग्रन्थोऽस्तु किमुपलक्षणया तयेति वाच्यम् । इष्टापत्तेरत आह । **क्वचिदिति । अतिप्रसक्तेरिति ।** तद्रूपत्वस्य दूर्वचत्वादिति शेषः । तथा चार्थविशेषान्तर्भावेणैव तत्वस्य तद्रूपत्वस्य वक्तव्यतया पक्षद्वयेऽपि स दोषस्तदवस्थ एवेति भावः । तन्मात्रमुद्धरन् शङ्कते । **वृत्तिमत्वमिति ।** शक्तिलक्षणान्यतरत्वमित्यर्थः । द्योतकेषु तत्र व्यञ्चनासत्वेऽपि शक्तिलक्षणयोरभावात् । प्राग्वदाह । **औपसन्दानिकीति ।** उपसन्दीयत इत्युपसन्दानमिति व्युत्पत्तेर्धात्वादिप्रकृतिकसमभिव्याहृतपदं उपसन्दानम् । तत्र भवा सा । अध्यात्मादित्वाट्ठञ् । यद्वा **तेन संस्कृतम् प्राग्वहतेष्ठगि**त्यधिकारे तेनेत्यनुवर्तमाने **संस्कृत**(पा०सू० ४-४-३)मित्यनेन ठक् । यद्वा **प्राग्वतेष्ठगार्हादि**त्यधिकारे **तत्र विदित इति चे**(पा०सू० ५-१-४३)ति ठक् । यद्वा तत्रैव तदर्हतीति ठक् । तादृशपदसमभिव्याहारबोध्येति तदर्थः । तेन स्फुटं प्रतीयमानेति यावत् । तथा च सा प्रादावस्तीति भावः । एवेन व्यञ्जनाख्यतृतीयवृत्तिनिरासः । **प्रोत्तरेति ।** तथा सतीत्यादिः । **शक्ततापत्ताविति ।** शक्ततावच्छेदकत्वापत्तावित्यर्थः । यद्वा शक्यतावच्छेदके शक्यत्ववत् शक्ततावच्छेदकेऽपि तत्वं बोध्यम् । **व्यासज्यवृत्तिशक्तौ विश्रान्तेरिति ।** व्यासज्यवृत्तिशक्तौ समभिव्याहारस्य पर्यवसानादित्यर्थः । शक्तेर्व्यासज्यवृत्तित्वविश्रान्तेरिति यावत् । इष्टापत्तिस्तु नेत्याह । **ततश्चेति ।** शक्तेर्व्यासज्यवृत्तित्वविश्रान्तेश्चेत्यर्थः । आदिना आट्परिग्रहः । एतेन सामान्यविशेषभावसत्वात् प्रोत्तरजित्वेन तत्र शक्तिरिति **द्वैतनिर्णये**[1] वाचस्पतिमिश्रोक्तमपास्तम् । **जातिविशेष एवेति ।** अनुगतप्रतीत्या पुण्यजनकतावच्छेदकतया वा सिद्ध इति भावः । **कत्वादिनेति ।** कत्वाभाववति गादौ साधुत्वस्य तदभाववत्यपभ्रंशे कत्वस्य सत्वेन तयोरेकत्र तत्र समावेशादित्यर्थः । तस्मात् साधुत्वं दुर्वचमित्युपसंहारं सूचयति पूर्वपक्षी **इतीति ।**

**व्याक्रियेति ।** व्यक्रियया व्यञ्जनीयेति तृतीयासमासः । **इह** शब्दविषये ।

---

१. द्वैतनिर्णयः एतावताऽमुद्रितोऽयं ग्रन्थः अन्वेषणीयः ।

**अस्यार्थ :– शक्तिवैकल्यादिप्रयुक्तमन्यथोच्चारणमपभ्रष्टता, तद्विरहोऽनपभ्रष्टता, सैव साधुता। सा चार्थविशेषान्तर्भाविणैव। तथा हि, यमर्थं शक्त्या लक्षणया वा बोधयितुं द्योतयितुं वा यादृक्शब्दोऽनादिः प्रयुक्तस्तस्मिन्नर्थे दोषादन्यथात्वं प्राप्तः सोऽसाधुः, अन्यथा तु साधुरिति। येऽपि गाव्यादिष्वेव प्रथमं व्युत्पन्नाः सन्तस्तान्प्रयुञ्जते तेषामप्यन्यथोच्चारणमस्त्येव। तत्र च दोषप्रयोज्यतास्त्येव, मूलप्रयोक्तुर्भ्रमाद्यन्यतमत्वात्।**

**यद्वा, अनादिता साधुता। अनादिरिति तु श्लोके भावप्रधानो निर्देशः। आदेरभावोऽनादिरिति वा। असन्देह इति वत्तत्पुरुषः। अभ्युदययोग्यता वाऽस्तु साधुता।**

**रत्नतत्त्ववच्छास्त्रपरिशीलनशालिभिर्गम्यो जातिविशेषो वेति। यत्तु जातिसङ्कर**

---

अन्योन्याश्रयपरिहारायाह। **शक्तीति।** आदिना भ्रमादिपरिग्रहः। नन्वेवं सर्वेषां सर्वत्र साधुतापत्तिरत आह। **स चेति।** विशेषान्तर्भाविनैवेति दन्त्यपाठः। क्वचिन्मूर्धन्यपाठोऽपि। **प्रातिपदिकान्ते**(८-४-११)ति णत्वविकल्पात्। **द्योतयितुं वेति।** द्योतकाभिप्रायम्। **दोषादिति।** स च त्रिधा, ईश्वरेच्छाव्यतिक्रमरूपः, स्वशक्तिवैकल्यरूपो, भ्रमरूपश्च। आद्यो गवि अश्वशब्दप्रयोगे। द्वितीयो ऋतके लृतकशब्दप्रयोगे। तृतीयोऽश्वतर्य्यां वडवाशब्दप्रयोगे। अत एव वक्ष्यति। **भ्रमाद्येति।** उक्तं च **शक्तिवैकल्यादीति।** जातावेकवचनम्। दोषान्यथात्वमिति समस्तपाठः प्रचुरः। **सोऽसाधुरिति।** अपभ्रष्टत्वादिति भावः। अन्यथा तु = अनपभ्रष्टस्तु, इतिरुक्तसमासौ। नन्विदं प्रथमतो साधुशब्दे एव शक्तिग्रहे न सम्भवतीत्यत आह। **येऽपीति।** नन्वेवमपि तेषु दोषाभावेन तज्जन्यमन्यथोच्चारणं चेति तत्वं कथमत आह। **तत्र चेति।** तदीयान्यथोच्चारणे इत्यर्थः। तथा च न तत्र जन्यत्वनिवेशः। अत एव प्रयुक्तमित्युक्तम्। अन्यतमत्वमुक्तरीत्या बोध्यम्। श्लोके यद्वेति माध्यमणिन्यायेन सम्बध्यत इत्याशयेनाह। **यद्वाऽनादीति।** श्लोके बहुव्रीहिणा धर्मिपरस्य पूर्वोत्तरानुरोधेन यथाश्रुतार्थासम्भवेन च धर्मपरत्वेन व्याख्याने तदविरोधमाह। **अनादिरितीति।** तुना लोके श्लोके तु द्विविधः। लाघवादाह। **आदेरित्यादितत्पुरुष इत्यन्तेन एकग्रन्थेन।** अत्रादेरभाव इति फलितार्थकथनम्। आरोपितादिरित्यस्य शब्दत्वात्। विग्रहस्तु न आदिरिति। तदाह। **असन्देह इति।** तत्पुरुषांशे दृष्टान्तः। अर्थस्तु भिन्न एव। तत्र प्रागभावप्रतीतेरत्रात्यन्ताभावप्रतीतेः। व्याक्रियेत्यस्यार्थमाह। **शास्त्रेति।** व्याकरणेत्यर्थः। कापीत्यस्यार्थमाह। **विशेषो वेतीति।** न च क्रमिकवर्णसमुदायात्मकपदपक्षे तस्य यौगपद्यासम्भवादनारब्धे तु गोशब्दे गोशब्दत्वं कथं भवेदिति न्यायेन

**इत्युक्तम्। तन्न; गुणगतजातौ तस्यादोषत्वात्। तथा हि, यस्य देवदत्तादेरनोष्ठ्या वर्णा पूर्वं श्रुतास्तस्य कुड्यादिव्यवहितस्य ओष्ठ्यवर्णेषु श्रुतेषु यदनुमानं जायते तदोष्ठ्या-नोष्ठ्यसाधारणतदनुमापकजात्यङ्गीकारे सत्येव घटते न तु तत्तद्व्याप्यनानाजातिस्वी-कारे, ओष्ठ्यवर्णवृत्त्यसाधारणजातेः प्रागगृहीतत्वेनानुमितिसामग्रीवैकल्यात्। वस्तुतस्तु उपाधिसङ्करवदेव जातिसङ्करोऽपि सर्वत्रास्तु, दूषकताबीजानिरुक्तेः, विनिगमकाभावेन**

---

गोपदत्वादिजातिवत् साधुत्वमपि जातिर्वक्तुमशक्येति वाच्यम्। बौद्धस्य तस्य सम्भवेन तस्यास्सुवचत्वादिति भावः। इदमग्रेऽपि बोध्यम्। **गुणेति।** वर्णस्य शब्दत्वाद्गुणत्वमिति परमताभिप्रायेणेदम्। सिद्धान्ते तु शब्दगतजाताविति बोध्यम्। नन्वत्र मानाभावोऽत आह। **तथा हीति। पूर्वमिति।** सम्मुखमिति भावः। वर्णेषु तेष्वेव। **अनुमानमिति।** ओष्ट्यवर्णपक्षकं देवदत्तीयत्वसाध्यकं तादृशजातिहेतुकमित्यर्थः। **तत्तद्व्याप्येति।** औष्टयत्वव्याप्यानौष्टयत्वव्याप्ये-त्यर्थः। हेतुज्ञानव्याप्तिस्मृतिपरामर्शासम्भवादाह। **सामग्रीति।** तथा च क्वचित्तदङ्गीकारावश्यकत्वेन व्यभिचाराच्छब्दगतजातौ तस्यादोषत्वं कल्प्यत इति भावः। एवं सङ्करस्य तद्बाधकत्वमाश्रित्य [1]क्वचित्तदनङ्गीकारेण समाहितम्। वस्तुतस्तदेव नेत्याह। **वस्त्विति। सङ्करवदेवेति।** विभुत्व-भूतत्वभावत्वानित्यत्वघटान्यत्वपटान्यत्वाद्योः सङ्करवदेवेत्यर्थः। **निरुक्तेरिति।** स्वसामानाधिक-रण्यस्वाभावसामानाधिकरण्योभयसम्बन्धेन जातिविशिष्टजातित्वं यत्र तत्र स्वसमानाधिकरणा-भावाप्रतियोगित्वम्। अस्ति चैतद्व्याप्यजातिविशिष्टव्यापकजाताविति जीर्णनैयायिकोक्तनियम-भङ्गस्तद्बीजं भूतत्वमूर्तत्वादेर्जातित्वाङ्गीकारे तत्र मिथः स्वसमानाधिकरणाभावप्रतियोगित्वसत्वात्। स एव न। मानाभावात् अनुकूलतर्काभावात् इति तन्नवीनाः, एवं नियमस्य व्याप्यव्यापकोपाध्योरपि सुवचत्वेन तत्रापि तद्दोषेण तेषामुपाधित्वानापत्तेर्घटत्वपृथिवीत्वादेरपि जातित्वानापत्तेश्च, घटस्य तैजसस्यापि सत्वादिति भावः। ननु गोत्वाश्वत्वाद्यनन्तविरुद्धजातीनां परस्परसामानाधिकरण्याभावः सर्वानुभवसिद्धः। तत्र च परस्परात्यन्ताभावसमानाधिकरणजातित्वमवच्छेदकं, न तु गोत्वत्वा-श्वत्वत्वादिरूपमननुगमादिति परस्परपरिहारिण्योर्जात्योरसमावेशसिद्धिर्वाच्या। न चावच्छेदके गौरवाज्जातित्वं न निवेश्यं किन्तु धर्मत्वमेवेत्युपाधिसङ्करस्यापि दोषत्वापत्तिरिति वाच्यम्। एवं हि घटान्यत्वपटान्यत्वयोर्घटपटयोरेव परस्परपरिहारिणोरन्यत्राप्यसमावेशापत्तौ कुड्यादीनां घटाद्यन्यता-पत्त्योपधिसंङ्करस्य परिहर्तुमत्रान्यत्वादेस्तावतीषु व्यक्तिषु ग्रहणानुपपत्त्याऽवच्छेदकसापेक्षत्वेप्य-

---

१. क्वचिदनङ्गीकारेण इति ख पाठः।

**भूतत्वमूर्त्तत्वयोरिव शरीरत्वपृथिवीत्वयोर्द्वयोरपि जातित्वभङ्गापत्तेश्च । तस्माच्चतुर्विधमपि साधुत्वं निर्दोषं व्याकरणैकगम्यं च ।**

**एवमसाधुत्वमपि चतुर्द्धा-अपभ्रष्टता, सादिता, प्रत्यवाययोग्यता, तदवच्छेदक-**

---

सामानाधिकरण्यस्यावच्छेदकसापेक्षत्वे मानाभावात् । अनुगतावच्छेदकाभावेऽप्युपाध्यसामानाधिकरण्यवज्जात्यसामानाधिकरण्यस्यात्मलाभोपपत्तेः । किञ्च परस्परात्यन्ताभावसामानाधिकरण्यस्यापि परस्परशब्दार्थाननुगमादननुगतस्यैव सत्वात् । तस्माद्गोत्वाश्वत्वादिषु पृथक् तेन तेन रूपेणासमावेशो ग्राह्य इति क्वचित्सङ्करेऽपि न दोष इति तात्पर्यमभ्युपेत्याह । **विनीति ।** ननु मूर्तत्वपृथिवीत्वयोर्जातित्वं तेषामपीष्टमेवात आह **। द्वयोरपीति ।** साङ्कर्यभियेति भावः । वस्तुतस्तु मानाभावात्साङ्कर्यस्य सर्वथा जात्यभावकल्पकत्वाभावेऽपि आश्रययोर्भेदभङ्गापत्तेरेव साङ्कर्यस्य तद्दूषकताबीजत्वेन ययोर्जात्योर्मिथोऽसामानाधिकरण्येनैव सिद्धिर्मिथ आश्रयभेदकता च लोकसिद्धा तयोः साङ्कर्यस्य तद्दोषत्वाङ्गीकारेण, यत्र नृसिंहाश्वतरादौ तादृशजात्योः साङ्कर्यप्रसङ्गस्तत्रोभयवैलक्षण्यस्वीकारः, ययोस्तु मिथः सामानाधिकरण्येन सिद्धिस्तयोस्साङ्कर्यस्य व्याप्यव्यापकभावापन्नजात्योरसाङ्कर्यस्यैकत्र समावेशमात्ररूपस्येवादोषत्वम् । एवञ्च साङ्कर्यमुपाध्योरपि दोषाय यदि तत्रापि आश्रयभेदप्रसङ्ग इति स्पष्टं **श्रीहर्षकृतखण्डने**[१] **।** एवञ्च भूतत्वादेरपि जातित्वमेव नोपाधित्वम् । क्रियासमवायिकारणतावच्छेदकतया मूर्तत्वादेरिव भूतादिपदशक्यतावच्छेदकतया भूतत्वादेरपि जातित्वस्य सुवचत्वात् । नहि कारणतावच्छेदकतयैव जातिसिद्धिर्न शक्यतावच्छेदकतयेति राजाज्ञाऽस्ति । किञ्च भौतिकसृष्टिकारणतावच्छेदकतया भूतत्वजातिसिद्धेर्निष्प्रत्यूहत्वात् । एवं गन्धसमवायिकरणतावच्छेदकतया पृथिवीत्वजातेरिव भोगकारणतावच्छेदकतया शरीरत्वजातिसिद्धेरपि निष्प्रत्यूहत्वादिति बोध्यम् । उपसंहरति । **तस्मादिति।।** व्याकरणेत्युपलक्षणं कोशशिष्टप्रयोगयोरपि । एवञ्च व्याक्रियेति विशेषणं पद्ये सर्वस्य बोध्यम् । उपलक्षणता च तद्व्याख्याने च बोध्या । गम्यमनुमेयम् ।

प्रसक्तप्रसङ्गादार्थिकमाह । **एवमिति । तदवच्छेदकेति ।** पापजनकतावच्छेदकेत्यर्थः । एतेन प्रागुक्तजातिविशेषः पुण्यजनकतावच्छेदको ग्राह्य इति सूचितम् । अर्थविशिष्टशब्दनिष्टत्वमुभयत्रापि विशेषणमित्यपि बोध्यम् । आद्ययोर्द्धितीययोश्चान्यतरसत्वात्तृतीयचतुर्थसाधुत्वासाधुत्वविषये शङ्कते ।

---

१. एषैव पङ्क्ति मञ्जूषायामपि वर्तते । परन्तु 'साङ्कर्यमुपाध्योरपि दूषकम्' इत्यंशः खण्डने इदानीं नोपलभ्यते इति सभापतिशर्माः तद्व्याख्याने ।

**जातिविशेषो वेति। टिघुभादिसंज्ञासु यद्यपि पुण्यपापजनकतारूपे साधुत्वासाधुत्वे न स्तस्तथापि अनपभ्रष्टत्वरूपं साधुत्वमस्त्येव। तदेवानुशासनप्रवृत्तावुपयोगि, ''भस्य'' इत्यादिसौत्रनिर्देशात् ''कुत्वं कस्मान्न भवति'' इत्यादिभाष्याच्चेत्याहुः। एवं चानादित्वमभ्युदययोग्यत्वं वा अनपभ्रष्टतामात्रेण न सिध्यति, किन्तु पौरुषेयसङ्केतविरहविशिष्टेनेत्यवधेयम्। तदेतदुक्तम् —**

**यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्ते टिघुभादयः।**
**कथं नु तासां साधुत्वं नैव ताः साधवो मताः।।**

**अनपभ्रंशरूपत्वान्नाप्यासामपशब्दता।**
**हस्तचेष्टा यथा लोके तथा सङ्केतिता इमाः।।**

**ततश्च — नासां प्रयोगेऽभ्युदयः प्रत्यवायोऽपि वा भवेत्।**
**लाघवेनार्थबोधार्थं प्रयुज्यन्ते तु केवलम्।। इति।**

---

**टिघुभेति न स्त इति।** शिष्टप्रयुक्तत्वात्पापाजनकत्वं अविहितत्वात्पुण्याजनकत्वम्। तथा च तत्तदवच्छेदकजातिविशेषोऽपि नेत्युभयबहिर्भूतत्वात् कथं तत्र शास्त्रप्रवृत्तिरिति भावः। द्वितीयस्यापि तस्याभावादाह। **अनपेति।** तथाऽनुच्चारणात्। नन्वेवमपि सादित्वरूपं द्वितीयमसाधुत्वमप्यस्तीत्युभयाक्रान्तत्वादुक्तदोष एवात आह। **तदेवेति।** अनपभ्रष्टतारूपसाधुत्वमेवेत्यर्थः। तथा च तथा तदुभयबहिर्भूतत्वेऽपि तत्सत्वेऽपि च न क्षतिरिति भावः। एवेन त्रितयव्यावृत्तिः। **भस्येत्येति।** संज्ञानां त्रितयसाधुत्वाभावादेव कुत्वस्याप्राप्तेः प्रश्नवैयर्थ्यमिति भावः। नन्वज्ञानेन प्रश्नोऽत आह। **आदीति।** तेन सिद्धान्तपरिग्रहः। उक्त एवाशयः। अत्र आहुरिति सूचितारुचिबीजं तु **व्यवहारायेे**त्यादिना स्फुटीभविष्यति। एवञ्च अनपभ्रष्टत्वस्यानादित्वाद्यभाववदद्वृत्तित्वे च। योग्यत्वं वेत्युपलक्षणं तद्वदेव जातिविशेषस्यापि। पुरुषो ऋषिरनृषिश्च। उक्तं **हरिणेति** शेषः। क्रियन्ते पाणिनिनेति शेषः। कथं नु तासां साधुत्वमिति प्रश्ने अनादित्वाद्यभावाशयके उत्तरं, तदाशयेनैवाह। **नैवेति।** उक्तत्रितयसाधुत्वाभाववत्य इत्यर्थः। कथं नु तेषामित्यपपाठः। असम्बद्धत्वात्। ननु तर्ह्यसाधुत्वमेव स्यादत आह। **अनपेति।** प्रागुक्तरूपनपभ्रष्टतारूपधर्मवत्वादासामसाधुतापि नेत्यर्थः। नन्वेवमुक्तरूपसाध्वसाधुबहिर्भूतत्वात्कथं बोधकत्वमन्यत्रादृष्टत्वादत आह। **हस्तचेष्टेति।** एतद्देहमेतत्पाणि एतत्पादौ। एतेन वृत्तिमत एव बोधकत्वमिति निरस्तम्। उक्तार्थसारांश एवाग्रिमपद्येनोच्यते। इति बोधयन् ग्रन्थकृत्। चूर्णिकामध्ये आह। **ततश्चेति।** उक्तरूपसाध्व-

**तदयं निर्गलितोऽर्थ :–**

**यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्त इति पक्षे**
**अनिदंप्रथमाः शब्दाः साधवः परिकीर्त्तिताः ।**
**त एव शक्तिवैकल्यप्रमादालसतादिभिः ।**
**अन्यथोच्चारिताः पुम्भिरपशब्दा इतीरिताः ।।**

**इति च साध्वसाधुलक्षणे आश्रीयमाणे टिघुभादीनां साध्वसाधुबहिर्भावः स्पष्ट एव । तेषामप्यनादितेति पक्षे तु चतुर्विधाऽपि प्रागुक्ता साधुताऽस्त्येव । उक्तञ्च –**

**व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित् ।**
**नित्य एव तु सम्बन्धो डित्थादिषु गवादिवत् ।। (वा.प. २-३६४)**

---

साधुबहिर्भूतत्वाच्चेत्यर्थः । निर्गलितोऽर्थ इत्यस्य निर्विवादेतीत्यन्तेनान्वयः । **अनिदमिति ।** न अयं प्रथमो येषां ते इत्यर्थः । कीर्तिता इत्यस्य इतीति शेषः । अत एवेति चेत्यग्रिमसङ्गतिः । यद्वा शेषो मास्तु । इति एवं साध्वसाधुलक्षणे चेति तदर्थः । आश्रयणे पक्षसमुच्चायकश्चः । यद्वा एवार्थे चः । साधुलक्षणमुक्त्वाऽसाधुलक्षणमाह । **त एवेति ।** अनादिशब्दानामित्यर्थः । आदिना दोषान्तर-समुच्चयः । लक्षणे इत्यादि जातावेकवचनम् । **तेषामिति ।** संज्ञाभूतटिघुभादिशब्दानामित्यर्थः । अपिर्घटादिशब्दसमुच्चायकः । **चतुरिति ।** एवं चेदं सर्वविधमप्यनुशासनप्रवृत्त्युपयोगीति पूर्वतो भेदः । अत एव तुः प्रयुक्तः । इयमेवारुचिराहुरित्यनेन पूर्वत्र सूचिता । अनादित्वे हरिसम्मतिमाह । **उक्तं चेति । डित्थादिष्विति । सर्वे सर्वार्थवाचका** इति पक्षेणेदम् । सामान्येनोक्तमेवार्थं विशिष्याह । **वृद्ध्यादीति ।** एतेन शास्त्रानर्थक्यं परिहृतम् । अवच्छेदः सङ्कोचः । अभिमतातिरिक्तार्थव्युदासाय च नियमः । अत्र केचित् । **व्यवहारायेति** क्वचित्संज्ञिनि संज्ञानां नियमः व्यवहारायेत्यन्वयः । ननु विधिरेव किं न स्यादत आह । **नित्य एव त्विति ।** डित्थादिष्वर्थेषु डित्थादिपदानां नित्य एव सम्बन्धो, यथा गवादिपदानां गवाद्यर्थेष्वित्यर्थः । अस्मिन् शास्त्रे व्याकरणे वृद्ध्यादीनां शब्दानां शक्तिसङ्कोचलक्षणो नियमो व्यवहारायेत्यन्वयः । तत्र हेतुः । **अकृत्रिम इति ।** यत इत्यादिः । कृत्रिमत्वमाधुनिकत्वम् । यथा गुणद्रव्ययोर्गुणे विशेषणत्वं द्रव्ये विशेष्यत्वम् । अकृत्रिम-मनादिसिद्धमेव नत्वाधुनिकं तद्वत्संज्ञासंज्ञिसम्बन्धोऽकृत्रिम एवेत्यर्थ इत्याहुः । **परे तु** नियमः शक्तिबोधनम् । शक्तिस्तु नित्येत्याह । **नित्य एवेति ।** एवञ्च वृद्धिशब्दस्याप्यनेकेष्वर्थेषु

**वृद्ध्यादीनां च शास्त्रेऽस्मिञ्छक्त्यवच्छेदलक्षणः ।**
**अकृत्रिमोऽभिसम्बन्धो विशेषणविशेष्यवत् ।। (वा.प. २-३६५)**

**पक्षद्वयेऽप्यनुशासनविषयता निर्विवादेति । नामकरणे त्वयं विशेषः - कृतं कुर्यान्न तद्धितमित्यादिगृह्यसूत्राविरोधिनामेव साधुता । तद्विरोधिनां तु देशभाषानुसारेण क्रियमाणानां कूचीमश्वीत्यादिनामधेयानामसाधुतैव । तदेतद् ऋलृक्सूत्रे वार्तिकव्याख्यावसरे स्फुटीकरिष्यते ।। इति साधुत्वनिर्वचनम् ।।**

**व्युत्पादनं च प्रकृतिप्रत्ययादिकल्पनया उत्सर्गापवादरूपलक्षणैरेव, न तु साध्वसाध्वोर्वा अन्यतरस्य वा प्रतिपदपाठेन, शब्दानामानन्त्येन तदसम्भवादित्युक्तम् ।**

---

शक्तिरस्त्येव । तद्बोधनफलकं शास्त्रं, अज्ञातशक्तिबोधकत्वात् । **अपत्यं पौत्रप्रभृती**(पा०सू० ४-१-१६२)ति सूत्रस्थकैयटोक्तनियमत्वानुपपत्तेस्तदाह । **वृद्ध्यादीनां चेती**त्यर्थमाहुः । स्पष्टं चेदमन्यत्र । वस्तुतस्सर्वेषां शब्दानां सर्वार्थवाचकत्वेऽपि वृद्धिरित्यादीनामज्ञातशक्तिज्ञापकसङ्केतरूपतया विधित्वेन तत्र तत्र सङ्केते कृते तत्सङ्केतज्ञानरूपप्रकरणवशात्तस्य तस्यैवोपस्थितिर्नान्यस्येति फलितविषयपरमिदम् । अवच्छेदो निश्चयः । **शब्दार्थस्यानवच्छेदे** इत्यादौ तस्य तदर्थकत्वस्य दर्शनात् । तदेतद्विशेषणविशेष्यवदित्यनेन सूचितम् । यथा नीलो पट इत्यनेन विद्यमान एव पटे नीलसम्बन्धो बोध्यते, न तु तेन नीलयोगः क्रियते, नील एव न पीत इति नियमश्च फलति तद्वदित्यर्थादिति स्पष्टं **मञ्जूषायाम्**[1] । परिसंख्यायां चात्र शास्त्रे प्रायेण नियमव्यवहार इति बोध्यम् । उपसंहरति । **पक्षेति ।** अस्य तस्मादित्यादि । उक्त एवाशयः । आदिना आप्यकोण्डेत्यादिपरिग्रहः । ननु कथं तेषां तत्वमत आह । **तदेतदिति ।** तेषां तद्विरोधादेव शास्त्रतात्पर्याविषयत्वेनेश्वरेच्छाभावानुमानेन तद्व्यतिक्रमदोषप्रयोज्यत्वादिति भावः । इति **साधुत्वनिर्वचननिस्तारः ।**

## १.३.७ शास्त्रनिर्माणरीतिनिरूपणम्

**अथ किं शब्दोपदेश** इत्याद्यग्रिमभाष्यसिद्धान्तमाह । **व्युत्पादनं चेति ।** सुशब्दस्येत्यादिः । चस्त्वर्थे । **लक्षणैरेवेति ।** तद्द्वारा तैरेवेत्यर्थः । एवव्यवच्छेद्यमेवाह । **न त्विति ।** समविकल्पत्वसूचनायां वाकारः । **अन्यतरस्येति ।** साधोरेवासाधोरेव वेत्यर्थः । अव्युत्पन्नोऽयं द्विविषये निर्द्धारणे वर्तते । तत्र सुशब्दोपदेशस्साधुबोधनद्वारा प्रयोगविध्यर्थोऽनुवादः ।

---

१. देशभाषिकानामसाधुत्वनिरूपणावसरे (ल.म.पृ.सं. ९१)

**स्यादेतत्, लक्षणप्रणयनमपि किं जातिपक्षमाश्रित्य उत व्यक्तिपक्षम् ? आद्ये सकृद्गतौ यद्बाधितं तद्बाधितमेवेति न सिद्ध्येत्। तथा हि, जातौ पदार्थे द्वयोर्विध्योः परस्परपरिहारेण तत्तज्जात्याक्रान्तव्यक्तिविशेषे चरितार्थयोः क्वचिदेकत्र प्रसङ्गे परस्पर-प्रतिबन्धादप्रतिपत्तिरेव स्यात् सत्प्रतिपक्षवत्। तथा च वक्ष्यति – ''अप्रतिपत्तिर्वोभयो-स्तुल्यबलत्वात्'' इति। तत्र च विप्रतिषेधसूत्रं विध्यर्थं - परं तावद्भवतीति। तस्मिंश्च कृते यदि पूर्वस्य निमित्तमस्ति तर्हि भवत्येव तत्। यथा 'भिन्धकि' इत्यत्र भिनद् हि इति स्थिते परत्वाद्धिभावे कृते पुनःप्रसङ्गविज्ञानादकज्भवति। तदेवं जातिपक्षे पुनः प्रसङ्गविज्ञानं यद्यपि सिद्ध्यति तथापि सकृद्गताविति न सिध्यति। तथा च 'जुहुतात् त्वम्' इत्यत्र जुहु हि इति स्थिते धिभावं बाधित्वा परत्वात्तातङि कृते स्थानिवद्भावेन**

---

अपशब्दोपदेशस्तु प्रयोगनिषेधार्थ इति बोध्यम्। **उक्तमिति।** भाष्यादाविति शेषः। तथा चात्रैव भाष्यं **बृहस्पति**रित्यादि । एतेन लघुत्वादिष्टान्वाख्यानाच्च सुशब्दोपदेश एव कार्य इत्यपास्तम्। तथा चोत्सर्गापवादरूपलक्षणवच्छास्त्रप्रणयनमावश्यकमिति, तथा तदुपदेशप्रवृत्तिः पाणिनेरुचितैवेति तत्वम्। अथ **किं पुनराकृतिः पदार्थ** इत्याद्यग्रिमभाष्यं प्रसङ्गसङ्गत्योत्थापयति। **स्यादेतदिति। लक्षणेति।** शास्त्रेत्यर्थः। जातिपक्षं तमेव। एवमग्रेऽपि। उत्सर्गापवादलक्षणगतानां पदानां सर्वत्र जातिमात्रपरत्वमुत व्यक्तिमात्रपरत्वमिति भावः। अत्रत्यकैयटाद्यनुरोधेनाह। **आद्येत्यादि पक्षे न सिद्ध्यतीत्यन्तेन। तत्तज्जात्येति।** तत्तदुद्देश्यजातीत्यर्थः। क्वचिदेकत्र = विरोधस्थले। अप्रतिपत्तिरप्रवृत्तिः । **सत्प्रतीति।** साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः। **अप्रतीति।** विप्रतिषेधसूत्रे वार्तिककृत्। तत्र च = विरोधस्थले च। यद्वोभयोरप्राप्तौ च। तावदादौ। **परत्वादिति।** कुत्साद्यविवक्षायां धिभावश्चरितार्थः। हेरन्यत्राकच्चरितार्थः। न चान्तरङ्गो धिभावः, कुत्सनाद्यर्थसापेक्षत्वेनाकचो बहिरङ्गत्वात्। स्पष्टं चेदं **हुजल्भ्य** (६-४-१०१) इति सूत्रे **कैयट**[१] इति कथं परत्वोल्लेख इति वाच्यम्। अङ्गसंज्ञासापेक्षत्वेन धिभावस्यापि तत्वात् प्रकृतिप्रत्ययविशेषसापेक्षत्वाच्चेति भावः[२]। उपसंहरति **तदेवमिति।** नियमाभावेनेत्यर्थः। इष्टापत्तिं निराचष्टे। **तथा चेति।** हिमभिव्यज्य त्वमित्यस्योल्लेखः **परत्वादिति।** अनाशिषि धिस्सफलः

---

१. 'हुझल्भ्य' इति सूत्रभाष्ये रुदिहि 'स्वपिहि' इत्यत्र धित्वमाशङ्क्य 'इटः प्रतिषेधो वक्तव्य' इति प्रतिषेधोपसंख्यानं कर्तव्यमित्युक्त्वा 'निर्दिश्यमानस्यादेशा भवन्ति' इति प्रकारान्तरेण धित्वनिवृत्तिर्भवतीति प्रतिषेधोपसंख्यानं न कर्तव्यमित्युक्त्वा, यदि निर्दिश्यमानपरिभाषया धित्वं वार्यते तदा भिन्धकीत्यत्र धित्वं न स्यादित्याशङ्क्य 'उभयोरनित्ययोः परत्वाद्धित्वं धित्वे कृतेऽकज्भवति' इति परिहृतम् । तत्र कैयटेन 'अङ्गाताद्यर्थापेक्षत्वाद्बहिरङ्गोऽकजिति पूर्वं धित्वं पश्चादकच्' इति व्याख्यातमिति भावः।

१. भाव इति। इदमुपलक्षणम्। अर्थापेक्षबहिरङ्गत्वस्यात्र शास्त्रेऽनाश्रयणादिति परिभाषेन्दुशेखरोक्तमपि ग्राह्यम्।

**स्यादेव धिः। व्यक्तिपक्षे तु सकलव्यक्त्युद्देश्यकस्य शास्त्रस्य व्यक्त्यन्तरे चरितार्थत्वासम्भवाद्विकल्पप्रसङ्गे नियमार्थं सूत्रं परमेव भवति न तु पूर्वमिति। तथा चैतत्सूत्रबलेन तत्र पूर्वलक्षणस्य व्यक्त्यन्तरमात्रविषयकत्वं कल्प्यत इति एतद्व्यक्तिविषयकलक्षणाभाव एव पर्यवस्यति। तथा च जुहुतात्त्वमित्यादेः सिद्धावपि भिन्धकीत्यादि व्यक्तिपक्षे न सिध्यति। तस्मादशक्यमन्यतरपक्षाश्रयणेन लक्षणप्रणयनमिति चेत्? सत्यम्, अत एव लक्ष्यानुरोधात्पक्षद्वयमप्याश्रीयते। क्वचित्कश्चित्पदार्थ इति। तत्र जातिवादिनामयं भावः– लाघवाज्जातिर्वाच्या। व्यक्तीनामानन्त्येन तासां वाच्यत्वे गौरवम्। वाहदोहाद्यन्वयस्तु लक्षितायां व्यक्ताविति।**

**व्यक्तिवादिनस्त्वाहुः- अनुपपत्तिं विनापि व्यक्तिप्रतीतेरनुभवसिद्धतया व्यक्तिरेव वाच्या। त्वप्रत्ययादिकं विना जातेः प्राधान्येनाप्रतीतेश्च। वाहाद्यन्वयोऽप्येवं समञ्जसः। यत्तूक्तं व्यक्तीनामानन्त्यमिति, नैतद्बाधकं, शक्यतावच्छेदिकाया जातेरैक्यात्। नन्वेवं**

---

तोस्तातङिति भावः। **सकलव्यक्ती।** तत्तद्व्यक्तिविषयकलक्षणानां भिन्नत्वादिति भावः। **उद्देश्य-कस्येति** हेतुगर्भविशेषणम्। **शास्त्रस्येति** जातावेकवचनम्, एवं व्यक्त्यन्तर इत्यपि। विकल्पप्रसङ्गे = पर्यायेणोभयप्राप्तौ। ननु नियमे पूर्वलक्षणानर्थक्यापत्तिरिति तस्याप्रमाणत्वं स्यादत आह। **तथा चैतत्सूत्रेति।** पूर्वप्रक्रान्त**विप्रतिषेधे पर**मिति सूत्रेत्यर्थः। इतिर्हेतौ। लक्षणाभाव एवेत्यस्य तदित्यादिः। **न सिद्ध्यतीति।** वस्तुत एतत्सर्वस्यायुक्तत्वमत्रत्यं तत्वं च **गुरुचरण**ग्रन्थतोऽव-गन्तव्यम्। पूर्वपक्षमुपसंहरति। **तस्मादिति।** अत एव = उक्तदोषादेव। प्रसङ्गात्तत्र जातीत्यादि-कैयटोक्तिमाह। **तत्रेति।** तयोः पक्षयोर्मध्य इत्यर्थः। तासां वाच्यत्वे इति पाठः। तासां प्रयोग इत्यपाठः। **गौरवमिति।** अनन्तशक्तिकल्पनापत्तेरिति भावः। इदमुपलक्षणम्। तासामानन्त्येन सम्बन्धग्रहणासम्भवो व्यभिचारश्च तत्र बोध्यः। ननु जातेर्वाच्यत्वे गौर्वहति गां वहति दोग्धीत्यादौ वाहदोहाद्यन्वयस्य तत्रासम्भवः। तस्या अमूर्तत्वादत आह। **वाहदोहेति।** मीमांसकादिमतेनाह। **लक्षितायामिति।** अत्रत्यं तत्वं तु [१]**मञ्जूषायां** द्रष्टव्यम्। **विनेति।** तां विना लक्षणाया अप्रसङ्गा-दिति भावः। अभ्युपेत्य दोषान्तरमाह। **त्वप्रत्ययेति।** ननु **जात्याख्याया(पा० सू० १-२-५८)**मिति सूत्रस्यैव भावप्रत्ययं विनापि प्राधान्येन जातिबोधे गवादिशब्दानां साधुत्वे मानत्वेनेदमयुक्त-मिति चेन्न आदिना तलादिवत्तद्बहुवचनस्यापि परिग्रहात्। अत एव तत्र दोषान्तरमपि सूचयन्नस्य फलमाह। **वाहेति। एवं** व्यक्तेर्वाच्यत्वे सति, समञ्जसः बाधाशङ्काया एवाभावात्। **ऐक्यादिति।**

---

१. ल.म.पृ.सं. ४७२ (जातिस्फोटनिष्कर्षवादे)

**जातेरपि वाच्यत्वमायातमिति चेत् ? न, अकार्यत्वेऽपि कार्यतावच्छेदकत्ववदशक्यत्वेऽपि शक्यतावच्छेदकत्वसम्भवात्। अत एव लक्ष्यतावच्छेदके लक्षणा नेति नैयायिकाभ्युपगमः। तस्माज्जातिरुपलक्षणं व्यक्तिमात्रं तु वाच्यमिति।**

**यत्तु सरूपसूत्रे भाष्ये वक्ष्यते - ''नह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः'' इत्यादि, तत्तु जातिव्यक्त्योरन्यतरेण विशिष्टस्यापरस्य वाच्यतेत्येवं रूपं मतान्तरम्। तथा चाकृत्यधिकरणे भट्टैरुक्तम् –**

**नियोगेन विकल्पेन द्वे वा सह समुच्चिते।**
**सम्बन्धः समुदायो वा विशिष्टा वैकयेतरा ।। इति। (तन्त्र.वा.पृ.सं.२३४)**

**तत्र जातिरेव व्यक्तिरेव वा वाच्येति इहत्यं मतद्वयं नियोगेनेत्यनेनोपनिबद्धम्।**

---

एतेन व्यभिचाराद्यप्युद्धृतम्। एवं = तस्याः शक्यतावच्छेद-कत्वाङ्गीकारे। **आयातमिति।** तथा च तन्मतप्रवेशो मतान्तरसिद्ध्य स्वमतहानिर्वेति भावः। कारणतावच्छेदकस्यापि कारणत्वस्य कैश्चित्परैरङ्गीकारादाह। **अकार्यत्वेऽपीति।** यद्वेदमुपलक्षणं तस्यापि घटत्वादेरिति भावः। अत एव = उक्तरीत्या अलक्ष्यस्य लक्ष्यतावच्छेदकत्वसम्भवादेव। **व्यक्तिमात्रं तु वाच्यमिति।** अस्य व्यक्तिवादिनो मते व्यक्तिबोधो निर्विकल्पक एव। यद्वा अलक्ष्यस्यापि लक्ष्यतावच्छेदकस्य शाब्दे भानवदुपलक्षणतया शक्यतावच्छेदके जातेरेव प्रकारतया भानम्, व्यक्तिज्ञानस्य तादृशबोधे एव कारणत्वादित्याहुः। स्पष्टं चेदं सर्वं **मञ्जूषायाम्।**

## १.३.८ अत्र भाष्यान्तरविरोधपरिहारः

अत्रत्यभाष्यस्य **सरूप**सूत्रस्थभाष्यविरोधमाशङ्क्य परिहरति। **यत्त्वित्यादिना। पदार्थकस्य** कर्मधारयान्मत्वर्थीयष्ठन्। **असुब्बत** इतिवत् प्रयोग इति भावः। **अन्यतरेणेति।** जातिविशिष्टव्यक्तेर्व्यक्तिविशिष्टजातेर्वेत्यर्थः। स्वोक्तेऽर्थे मीमांसावार्तिककारसम्मतिमाह। **तथा चेति।** सर्वत्र जातिरेव व्यक्तिरेव वेति नियोगः, जातिर्व्यक्तिर्वेति विकल्पः जातिव्यक्त्योर्युगपत् समप्राधान्येन वाच्यत्वमिति चतुर्थः पक्षः, जातिव्यक्त्योः सम्बन्धो वाच्य इति पञ्चमः, जातिव्यक्तिसम्बन्धरूपत्रितयरूपसमुदायो वाच्य इति षष्ठः, एकया विशिष्टेतरेति द्वौ यथासम्भवं जातिव्यक्त्याद्यध्याहारेण श्लोकवाक्यार्था उपपादनीयाः। तत्र = तेषामष्टानां मध्ये। सर्वत्रेति शेषः। सरूपसूत्रोक्तमिति पाठः । सरूपसूत्रीकमिति पाठे मत्वर्थीयष्ठन्। नन्वेवं तत्र तत्र शास्त्रेऽन्यतरपक्षस्यैव सिद्धान्तः, किं च तावताऽपि कथं सर्वेष्टसिद्धिरिति तदाश्रयेन निर्वाहो न युक्त

**चतुर्थचरणेन तु सरूपसूत्रोक्तं मतद्वयमुपनिबद्धमिति विवेकः। यद्यपि जातिव्यक्तिपक्षयोरन्यतरस्य न्यायेन बाध आवश्यकस्तथापीह शास्त्रे संज्ञापरिभाषादिवल्लक्ष्यसिद्ध्युपायतया उभयाश्रयणे किमपि बाधकं नास्तीत्यवधेयम्। वस्तुतस्तु भट्टोक्ताष्टपक्षीमध्ये विकल्पेनेति तृतीयः पक्षोऽत्र प्रक्रियादशायां स्थितः। विकल्पश्च लक्ष्यानुरोधाद्व्यवस्थितो न त्वैच्छिक इत्यन्यदेतत्। समुच्चयपक्षं चतुर्थमाश्रित्यापि क्वचित्कस्यचिद्विवक्षा अपरस्य त्वविवक्षेति गृहीत्वा प्रक्रियानिर्वाहः सुकर इति दिक्। यदि हि व्यक्तिरेवेत्येतत्सार्वत्रिकमभिमतं स्यात्तर्हि ''जात्याख्यायाम्'' इति सूत्रं नारभेत। यदि च जातिरेवेति, तर्हि सरूपसूत्रं नारभेतेति भाष्यम्।**

---

इत्याशयेनाह। **यद्यपीति।** न्यायेन = पूर्वोक्तलाघवादिना। बाधः अन्यतरेणेति शेषः। अनाश्रयणमेव चात्र बाधः। **संज्ञापरिभाषादिवदिति।** आदिना कार्यकालादिग्रहणम्। सप्तम्यन्ताद्वतिः। तथा च संज्ञापरिभाषयोर्यथा क्वचित्कार्यकालः क्वचिद्यथोद्देशः तद्वदित्यर्थो बोध्यः। यद्वा षष्ट्यन्ताद्वतिः। आदिना विध्यादिपरिग्रहः। तथा च संज्ञापरिभाषयोरुभयोर्यथा तत्वेनाश्रयणं न त्वन्यतरस्य तथेत्यर्थः। एवमाद्यपादा [1]..... त्पपादोक्तमतीशयेन स्वसिद्धान्तं यथाकथञ्चित्संयोज्य तदुक्तमतान्तराशयेन स्वरसतः सुयोज एव स्वसिद्धान्त इत्याशयेनाह। **वस्तुतस्त्विति।** अस्य स्थित इत्यत्रान्वयः। अत्र शास्त्रेऽन्यत्र व्युत्पत्त्यनुसारेण कस्याप्यङ्गीकारे न बाधकमित्याशयेनाह। **प्रक्रियेति।** नन्वेवमनिष्टलक्ष्यसिद्ध्यापत्तिरपीत्यत आह। **विकल्प इति।** तद्व्यवस्थायामपि तत्वाहानेरयमेव ततो विशेष इति भावः। तदुक्तान्यमतेनापि निर्वाहमाह। **समुच्चयेति।** अर्श आदित्वादच्। समुचितजातिव्यक्त्योस्तत्वमिति पक्षमित्यर्थः। अत एवाह। **चतुर्थमिति।** एतेन षष्ठनिरासः, तत्र सम्बन्धस्याधिक्यात्। अन्यथा यथाश्रुतार्थेन तस्यैव ग्रहणं स्यादिति भावः। **क्वचिदिति।** लक्ष्यानुरोधेनेति भावः। कस्यचिदित्यादि सामान्ये नपुंसकम्। वस्तुतस्तु इह सरूपसूत्रे च व्यवस्थितपक्षद्वयाश्रयणमेव प्रतिपाद्यते। न तु **भट्टो**क्तरीत्या। अत **एवोभयमित्याह, कथ**मित्याद्यग्रिमात्रत्यभाष्यसङ्गतिः। एवञ्च न कापि शङ्कात्रेति बोध्यम्। तदाह। **दिगिति।** नन्वत्र भाष्ये उभयाश्रयणे ज्ञापकद्वयोपन्यासात्कुतस्तत्त्यक्त्वा लक्ष्यानुरोधपर्यन्तधावनमिति चेन्न अस्य भाष्यस्यैकदेशयुक्तित्वात्। तदेतत्प्रतिपादयितुं दिगर्थं ध्वनयितुं च भाष्यमर्थतोऽनुवदति। **यदि हीति। अभिमतमिति।** पाणिनेरिति शेषः। **नारभेतेति।** व्यक्तौ पदार्थे सम्पन्ना व्रीहय इत्यत्र

---

१. अत्र ग्रन्थः त्रुटितः।

**ननु यस्मिन्वने एक एवाम्रवृक्षस्तत्रापि लक्षणया जातिपरत्वे इह आम्राः सन्तीति प्रयोगं साधयितुं ''जात्याख्यायाम्'' इति सूत्रमस्तु। तथा जातिपक्षेऽपि नानार्थानुरोधात्सरूपसूत्रमस्तु। वक्ष्यति हि वार्तिककृत्-व्यर्थेषु च मुक्तसंशयमिति। सत्यम्, लक्ष्यानुरोध एव पक्षद्वयाश्रये शरणम्। अत एवोदाहृतसूत्रयोर्भाष्यकृता प्रत्याख्यास्यमानत्वेप्यदोषः।**

---

व्यक्तिबहुत्वात् बहुवचनं सिद्धमेवेति व्यर्थमेव तत्स्यादिति भावः। जातिरेवेतीत्यस्य सार्वत्रिकमभिमतं स्यादित्यस्यादिरिति भावः। भाष्ये दोषमाह। **नन्विति।** ननु भावप्रत्ययान्ते तत्र तत्सिद्धये तदावश्यकमिति चेन्न एकस्मिन्नित्यस्य वैयर्थ्यापत्तेरत आह। **यस्मिन्निति।** व्यक्तिपक्षेऽपीत्यादिः। एक एवेत्यस्य वृक्षान्तरसत्वेऽपीत्यादिः। **जातिपरत्व इति।** जातेर्विशेष्यत्व इत्यर्थः। सूत्रे तथैव विवक्षितत्वात्। अन्यथाऽतिप्रसङ्गापत्तेः। अत्र चेदमेव सूत्रं मानमिति प्रागुक्तम्। इह = तत्र वने। **सूत्रमिति।** तत्र तदाख्यत्वं च शक्तिलक्षणान्यतरसम्बन्धेन, न तु शक्त्यैव। तथा सति सूत्रवैयर्थ्यापत्तेरिति भावः। **नानार्थेति।** अक्षा पादा इत्यादीत्यर्थः। तत्र द्वितीये सम्मतिमाह। **वक्ष्यतीति।** सरूपसूत्र इति शेषः। हि यत। विविधा अर्था येषां तेषु व्यर्थेषु नानार्थेषु विजातीयानेकार्थकसरूपशब्देषु विषये मुक्तसंशयं सरूपसूत्रैकशेषाङ्गीकरणमित्यर्थः। यद्यपि नानार्थस्थले नानाजातिनिष्ठकाश्चिदेकां जातिं स्वीकृत्य तस्या एव शब्दवाच्यत्वं स्वीक्रियतां, परम्परया चात्र व्यक्तिप्रत्ययः, जातौ न जातिरिति परेषां दर्शनं नास्माकमिति [1]**सरूपसूत्रस्थकैयटो**क्त्या निर्वाहः। किञ्च तन्त्रेण तत्र निर्वाह इति सरूपसूत्रानर्थक्यम्। एवं जात्याख्यायामित्यपि व्यर्थं। सूत्रमते एकत्वस्य बहुवचनार्थत्वेन तत्सूत्रावश्यकत्वेऽपि भाष्यमते जातौ संख्यान्वये एकवचनं, व्यक्तौ तदन्वये बहुवचनमिति, तत्प्रत्याख्यानेन 'यथोत्तरं मुनीनां प्रामाण्यात्' सूत्रोक्तार्थे प्रयोगाणामसाधुत्वबोधनेन तत्प्रयोगस्यासाधुत्वादिति परिहारः सुकरः। तथापि तथा परिहारे प्रत्याख्यानमेव तयोः फलितमिति तत्सिद्धान्ताभिप्रायेणैव समाधत्ते। **लक्ष्येति।** अत एव प्राक् तथैवोक्तम्। एवेन ज्ञापकद्वयनिरासः। तदेवाह। **अत एवोदेति।** तदाश्रयणे लक्ष्यानुरोधस्यैव बीजत्वादेवेत्यर्थः। अत्रत्यभाष्यापेक्षयाऽस्य भविष्यत्वादाह। **ख्यास्येति।** एवञ्चात्रत्यं भाष्यं सूत्रमताभिप्रायमिति बोध्यम्। अत एवाह। **अदोष इति।** अन्यथा मिथो विरोधाद्भाष्यासङ्गतिरेव स्यादिति भावः।

---

१. इत्थं हि तत्र कैयटग्रन्थः - 'निः सामान्यानि सामान्यानीति तार्किकदर्शनं न वैयाकरणैर्नियोगत आस्थेयाम्। कार्योन्नीयमाना हि तेषां पदार्था सामान्येष्वपि सामान्यमस्ति। अभावश्चत्वार इत्यत्रापि निरूपाख्यत्वं सामान्यं कल्पनीयम्। तदेवं सर्वत्राकृतिसद्भावात्सिद्धमेकशब्दम्' इति। म.भा.प्र.पृ.सं. १०१ (द्वितीयो भागः)

**इदानीं वार्तिककारः शास्त्रस्य नियमविधिरूपतया सार्थक्यमाह– सिद्धे शब्दार्थसम्बन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु। लोकादेव हि प्रथमव्युत्पत्तिः अव्युत्पन्नं प्रति व्याकरणादीनामप्रवृत्तेः। ''अर्थवदधातुः'' इत्यादि हि व्याकरणं शक्तिग्रहोपजीवकम्। तथा च समर्थसूत्रेऽपि वार्त्तिकम् - ''अर्थानादेशनात्'' इति। ''अनेकमन्यपदार्थे'' इत्यादिकं हि लोकसिद्धमर्थमनूद्य**

---

## १.३.९. 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकव्याख्यानम्

अथ पाणिनिसूत्रव्याख्यानभूताद्यवार्तिकमवतारयति। **इदानीमिति।** पाणिन्याद्यनुक्त-विषयादिकथनानन्तरमित्यर्थः। एतेनेतः पूर्वं स वार्तिकपाणिनीयशास्त्रविषयप्रयोजनप्रदर्शनपरो भाष्यकारस्यैव ग्रन्थ इति सूचितम्। अत एवादौ मङ्गलार्थसिद्धशब्दो वार्तिककृता प्रयुक्तः। अन्यथा निःसन्देहाय **नित्यशब्दार्थसम्बन्ध इति** (वदेत्)[1]। शब्दाश्चार्थाश्च सम्बन्धाश्चेति समाहारद्वन्द्वात् सप्तमी। सम्बन्धश्च प्रत्यासत्त्या शब्दार्थयोरेव। षष्ठीतत्पुरुषे तु शब्दार्थयोर्नित्यत्वं न प्रतिज्ञातं स्यात्। त्रयाणामात्यन्तिकाविश्लेषप्रदर्शनाय समाहारनिर्देशः। एवञ्च नापूर्वशब्दार्थ-सम्बन्ध-बोधकत्वमिति नियामकत्वमिति भावः। **लोकतः** तद्व्यवहारतः। इदं मध्यमणिन्यायेनोभयान्वयि। तथा चावृत्तिर्बोध्या तस्य। **अर्थप्रयुक्त इति।** अर्थज्ञानप्रयोजनेन कृत इत्यर्थः। फलमपीह हेतुः। अत एव वक्ष्यति अर्थबोधनायेति। प्रयोगे इत्यत्र सिद्धे इत्यस्यानुषङ्गः। गामश्वमिति वत्समुच्चयः। **नियम इति।** क्रियत इत्यध्याहारः। लोकतः सिद्धत्वमुभयोरुपपादयति। **लोकादेव हीति।** हि यतः। अत एव तस्य शक्तिग्राहकशिरोमणित्वं। एवव्यवच्छेद्यं ध्वनयन् ह्यर्थमाह। **अव्युत्पन्नमिति।** व्याकरणादीनां केषाञ्चित्। इदमेव ध्वनयन् तत्र हेतुमाह। **अर्थवदधातुरित्यादि हीति।** हि यतः। **शक्तिग्रहोपजीव्यकमिति बहुव्रीहिः।** उपजीवकमिति पाठे तु षष्ठीतत्पुरुषो बोध्यः। अर्थवत्वशरीरे तन्निवेशादिति भावः। न केवलमत्रैव वार्तिककृतेत्थमुक्तं किन्त्वन्य-त्रापीति स्वोक्त्येकदेशे सम्मतित्वेनाह। **तथा चेति।** अर्थस्य सिद्धत्वे चेत्यर्थः। तथेति पाठे मानान्तरोक्तिः, अपिरस्यैव समुच्चायकः। अर्थस्याविधानादिति तदर्थः। ननु केषाञ्चिदप्रवृत्ता-वप्यन्येषां प्रवृत्तिरस्त्येवेति कथं लोकत एव सिद्धिः। किञ्चार्थस्य विधानमेव शास्त्रे दृश्यत इति तदप्ययुक्तमत आह। **अनेकमिति।** हि यतः। तथा च केषाञ्चिदुक्तरीत्योपपत्त्या तदविधायकत्वेन तत्रापि लोकसिद्धत्वस्यैव सत्वेनान्यत्र तेषामप्रवृत्त्या तदावश्यकत्वेन च सर्वत्र लोकसिद्धत्वमेवेति

---

१. एवं पाठेन भाव्यमिति भाति।

**साधुत्वान्वाख्यानपरम्। ततश्च लोकादेव शब्दे अर्थे तयोः सम्बन्धे च सिद्धे अर्थबोधनाय शब्दप्रयोगेऽपि प्रसक्ते गवादय एव प्रयोक्तव्या न तु गाव्यादय इति नियमार्थं शास्त्रम्। नियमफलं तु धर्मः। तत्र स्मार्त्तो दृष्टान्तः - ''प्राङ्मुखोऽन्नानि भुञ्जीत'' इत्यादि-लौकिकशब्देनोक्तः। ''व्रीहीनवहन्ति'' इत्यादिश्च वैदिकशब्देनोक्तः। धर्मनियम इति च षष्ठीतत्पुरुषोऽश्वघासादिवत्, न तु चतुर्थीतत्पुरुषः प्रकृतिविकृतिभावविरहात्। ननु यदि प्रयुक्तानामिदमन्वाख्यानं तर्हि किमर्थमप्रयुक्ता अपि ऊष तेर चक्र पेचेत्यादयो व्युत्पाद्यन्ते इति चेत्? न, आर्षज्ञानं विना अप्रयुक्तताया दुरवधारणत्वात्। महान्हि प्रयोगविषयः।**

---

भावः। यद्यपि भाष्यकृता न्यूनतानिरासाय वाक्यत्रयेणेदं व्याख्यातम्। तथापि वार्तिकादेकवाक्यतयैवान्वयप्रतीतिरित्याशयेनाह। **ततश्चेति।** उक्तरीत्या तस्यावश्यकत्वाच्चेत्यर्थः। प्रत्यासत्तिलभ्यमाह। **तयोरिति।** अर्थप्रयुक्त इत्यादेरर्थमाह। **अर्थेति।** समुच्चेयद्वयसत्वादाह। **प्रयोगेऽपीति।** अनुषक्तसिद्ध इत्यस्यार्थमाह। **प्रसक्त इति। गवादय एवेति।** अस्येयं प्रकृतिरयं प्रत्यय इत्यादिप्रकृत्यादिविभागज्ञानद्वारेत्यादिः। अत एव तेषामेव धर्मजनकत्वमिति भावः। ननु शास्त्रस्य नियामकत्वे कथं धर्मनियम इत्युक्तिरत आह। **नियमफलन्त्विति।** लौकिक-वैदिकशब्दद्वयोक्तिस्वारस्यमाह। **तत्रेत्यादिना। तत्र** धर्मफलकनियमे। तयोर्मध्ये इत्यर्थ इति कश्चित्। **स्मार्तः** स्मृत्युक्तः। भाष्योक्तातिरिक्तं तमाह। **प्राङ्मुखोऽन्नेत्यादिना। उक्त इति।** वार्तिककृतेति शेषः। एवञ्च न पुनरुक्तत्वशङ्केति भावः। नन्वेवमपि तत्र कथं समासोऽत आह। **धर्मेति।** चो ह्यर्थे। **न त्विति।** चतुर्थीति योगविभागो हि न भाष्यारूढः। **सुप्सुपे**त्यप्य-गतिकगतिरिति भावः। अर्थप्रयुक्ते शब्दप्रयोग इत्यत्र शङ्कते **अस्त्यप्रयुक्त**[1] इत्याद्यग्रिमभाष्योक्तं कथयन्। **नन्विति। यदीति।** तेन तथैव बोधनात्। अन्यथा तदानर्थक्यमेव स्यादिति भावः। **अप्रयुक्ता इति।** लोकतोऽर्थप्रयुक्त इत्यादिना प्रयुक्तेषु साध्वसाधुषु प्रयुक्तसाध्वन्वाख्यानेन तेषु धर्मः प्रयुक्तासाधुष्वधर्म इत्यर्थकेनेदं सूचितम्। तथा चाप्रयुक्तानामप्रयोगेणैवासाधुत्वानुमानात्तेषा-मप्यनेनान्वाख्यानेऽप्रामाण्यं वार्तिकोक्तनियमानुपपत्तिश्चेति भावः। **आर्षेति।** ऋषिसम्बन्धिज्ञानं दिव्यं ज्ञानमित्यर्थः। **महान् हीति।** यत इत्यर्थः। शब्दस्येति शेषः। भाष्ये तथैव पाठात्। क्वचिद् [2]......पि तथैव पाठ इति केचित्। वस्तुतस्तु प्रयोगशब्देनैव शब्दग्रहणम्। अत एवाग्रे तथैव व्यत्यस्ततया वक्ष्यतीति न दोषलेश इति बोध्यम्। इतरलोकापेक्षया भुवि शब्दबाहुल्याद्वसुमत्याः

---

१. म.भा.पृ.सं. ६८ (प्र.भागः)।  २. अत्र ग्रन्थः त्रुटितः।

**तथा च भाष्यम् - ''सप्तद्वीपा वसुमती, त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्ना एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेद एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदः वाको वाक्यमितिहासः पुराणं वैद्यकमित्येतावान् प्रयोगस्य विषयः'' इति। बह्वृचानामाम्नायो बाह्वृच्यम्। ''छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः'' इति ञ्यप्रत्ययः। ''चरणाद्धर्माम्नाययोः'' इत्युक्तत्वादाम्नाये। अथर्वणा प्रोक्तो वेदो अथर्वा। उपचारात्प्रयोग इत्येके। वसन्तादिषु अथर्वन् आथर्वण इत्युभयोः पाठसामर्थ्या-त्प्रोक्तप्रत्ययस्य वैकल्पिको लुगिति तु तत्त्वम्। अत एव भाष्ये वक्ष्यते-तेन प्रोक्तमिति प्रकृत्य ऋषिभ्यो लुग्वक्तव्यः। वसिष्ठोऽनुवाकः। ततो वक्तव्यमथर्वणो वेति। तमधीते आथर्वणिकः वसन्तादित्वाट्ठक्। दाण्डिनायनादिसूत्रे निपातनाट्टिलोपाभावः। आथर्वणिकस्याम्नाय आथर्वणः ''आथर्वणिकस्येकलोपश्च'' इति आथर्वणिकादण् तत्सन्नियोगेनेकलोपश्च।**

---

पृथग्ग्रहणम्। **त्रयो लोकाः** भूर्भुवः स्वः भुवरित्यनेनाधस्तनस्य स्वरित्यनेनोपरितनस्य सर्वलोकस्य संग्रहः। रहस्यमुपनिषत् मन्वादिस्मृतयो वा। वेदनिगूढार्थप्रकाशकत्वात्। तादृशा वेदा बहुधा भिन्ना इत्यर्थः। तं भेदमेवाह। **एकेति।** एकाधिकशतमित्यर्थः। उक्तिप्रयुक्तिरूपो ग्रन्थो **वाकोवाक्यम्।** यथा **किंस्विदावपनं महद्भूमिरावपनं महदि**ति। पूर्वचरितसङ्कीर्तन**मितिहासः।** वशांद्यनुकीर्तनं **पुराणम्। इत्येतावानिति।** काव्यनाटकादिकं तु नात्यन्तं वर्जितापशब्दमिति न परिगणितम्। काव्यदोषेष्वपशब्दत्वगणनं तु प्रक्रान्तानपभ्रष्टशब्दहानेः प्रक्रमभङ्गे एवान्तर्भवति इति केचित्। वस्तुत इदं दिक्प्रदर्शनमिति स्पष्टीकृतं [1]**छायाया**मिति बोध्यम्। बाह्वृच्यशब्देनाध्येतृधर्मग्रहणेऽसङ्गतेराह। **बह्वृचानामिति।** आथर्वण इत्यस्य प्रोक्तप्रत्ययान्तमात्रत्वे छन्दोब्राह्मणानीति नियमात् रूपाद्यसङ्गतेराह। **अथर्वेति।** नन्वेवमाथर्वण इत्युचितमतो **उपचारादिति।** एके इति सूचितामरुचिबीजं प्रकटयन्नाह। **वसन्तादिष्विति।** एवञ्चैतदर्थे तस्य साधुत्वबोधकशास्त्रसत्वे तेनैव निर्वाहे तेन तत्र लक्षणया तस्यासाधुत्वबोधने चोपचाराश्रयणमयुक्तमित्येक इति मतासङ्गतिरेवेति भावः। अत एव वक्ष्यति। **तत्वमिति।** अत एव वैलक्षण्यसूचकस्तुः पाठः। आथर्वण इत्युभयोरिति पाठे संहिताऽविवक्षया सन्ध्यभावः। **पाठसामर्थ्यादिति।** अप्रोक्तप्रत्ययान्तस्याध्ययनार्थेनान्वया-सम्भवादिति भावः। इदं द्रढयति। **अत एवेति।** अस्य तत्वादेवेत्यर्थः। **वक्ष्यत इति।** णो वेतीत्यन्तेन। अथर्वणो वेतीति पाठः। तमथर्वाणं।

---

१. छायायां शब्दविषयप्रदर्शनाधिकरणे पस्पशायां पृ.सं. ७१ स्पष्टम्। प्रथमभागः।

**प्रकृतमनुसरामः। एतावन्तं प्रयोगविषयं पर्यालोचयितुमशक्तैरेवास्मदादिभिर्लक्षणानुगतानां प्रयोगो स्तीत्यनुमेयम्। अस्ति च त्वयोदाहृतानामपि वेदे प्रयोगः - सप्तास्ये रेवती रेव दूष। यन्मे नरः श्रुत्यं ब्रह्म चक्र। यत्रानश्चक्राजरसं तनूनामिति। ननु यदि लक्षणेनानादितासिद्धिस्तर्हि वचन्त्यादीनामपि स्यादिति चेत् ? न, ''न हि वचिरन्तिपरः प्रयुज्यते'' इत्यभियुक्तानामविगीतव्यवहारेण सामान्यशास्त्रस्य सङ्कोचात्। अभ्युपगतो विशेषविषयिण्या पतितस्य कर्मानधिकारस्मृत्या अग्निहोत्रादिश्रुतीनां सङ्कोचः, विशेषविषयेण शिष्टाचारेण सामान्यस्मृतेः सङ्कोचश्च। तदुक्तम्- आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति। यत्र तु अप्रयोगः सन्दिग्धः शास्त्रानुगमश्च तत्र निष्प्रत्यूहमनुमानम्। तदुक्तम् - ''यथालक्षणमप्रयुक्ते'' इति। अप्रयुक्ते अनिश्चितप्रयोगे इत्यर्थः। निश्चिताप्रयोगे तु लक्षणं न प्रवर्त्तते एवेति निष्कर्षः। न चैवं**

---

महान्हीत्यादीदं सर्वं प्रासङ्गिकमुक्तमिति सूचयन्नाह। **प्रकृतमिति।** भेदमेवाह। **एवेति।** रप्येति पाठेऽपिरेवार्थे, लोचयितुमित्यग्रे वा योज्यो यथाश्रुतः। शक्तैरस्मदादीति पाठस्तु सुगम एव। एवञ्चाप्रयुक्तत्वमेव नेति न प्रागुक्तदोषरूपमिति भावः। प्रत्यक्षसत्वेऽनुमित्यनुपयोग इत्याशयेनाह। **अस्ति चेति।** अपिः प्रसिद्धसमुच्चायकः। **लक्षणेनेति।** तेनापीत्यर्थः। पूर्वं तथा प्रतिपादनादिति भावः। स्यात् अनादितासिद्धिरित्यनुषज्यत इति चेन्नेति पाठः। **अन्तिपर इति।** बहुवचनपर इत्यर्थः। **अभीति।** भाष्यकृतादीनामित्यर्थः। ननु विपरीतो बाध्यबाधकभावो न दृष्टोऽत आह। **अभ्युपेति।** हि यतः। **पतितस्येति।** अन्धादेरप्युपलक्षणमिदम्। नन्वेवमपि प्रकृते आचारे नैवं दृष्टमत आह। **विशेषेति। स्मृतेरिति।** यथा तीर्थसामान्ये जीवत्पितृकसधवादीनां सामान्यस्मृत्या मुण्डनप्राप्तावपि शिष्टानां प्रयागातिरिक्तेषु तदकरणरूपविशेषाचारेण तस्याः सामान्यस्मृतेः सङ्कोच इत्यर्थः। अत्र मानमाह। **तदुक्तमिति।** जैमिनिनेति शेषः। **अनार्थक्येति।** तद्युक्तानां श्रुतिस्मृत्याचाराणां प्रसिद्धपूर्वपूर्वबलवत्वस्य विपरीतमित्यर्थः। एवञ्च तत्सिद्धान्तविरोधो नेति भावः। स्वसिद्धान्ताविरोधायाह। **यत्र त्विति।** तुरुक्तवैलक्षण्ये। **शास्त्रानुगमश्चेति।** अनुगमकं शास्त्रं चेत्यर्थः। **तदुक्तमिति।** भाष्यकृतेति शेषः। **अनिश्चितेति।** तदर्थान्तर्भावेणात्र वृत्तिः सन्दिग्धप्रयोग इत्यर्थः। यथालक्षणमित्यस्य लक्षणमनतिक्रम्येत्यर्थः। एवं कैयटाद्युक्तमर्थमुक्त्वा सिद्धान्तभूतमर्थमाह। **निश्चितेति।** यथालक्षणमित्यत्र नञ् प्रश्लिष्टः। लक्षणाभावस्य योग्यतेति तदर्थः इति भावः। स्पष्टीकृतं चेदमन्यत्र। **चैवं** विपरीतबाध्यबाधकभावाङ्गीकारे। ब्रवणात् वचनात्

**'ब्राह्मणो ब्रवणाद् इति कल्पसूत्रप्रयोगरूपेणापि विशेषविषयकाचारेण ''ब्रुवोवचिः'' इत्यादीनां सङ्कोचापत्तिः। त्रिशङ्क्वाद्ययाज्ययाजनेनापि स्मृतिसङ्कोचापत्तेस्तुल्यत्वात्। तत्र धर्मबुद्ध्यानुष्ठानं नास्तीति चेत् ? इहापि साधुत्वबुद्ध्या प्रयोगो नास्तीति तुल्यम्। यर्वाणस्तर्वाण इतिवदभियुक्तानामपि असाधुप्रयोगस्य क्रतोर्बहिरुपपत्तेश्च। अत एवेतिहासपुराणादिष्वपशब्दा अपि सन्तीति हरदत्तः। नदीसंज्ञासूत्रे भाष्येऽपि स्पष्टमेतत्। केचित्तु आर्षग्रन्थेष्वपि छन्दसि विहितस्य व्यत्ययस्य प्रवृत्त्या साधुतां समर्थयन्ति। न च गौणमुख्यन्यायेन मुख्ये छन्दस्येव तत्प्रवृत्तिः, स्वरितत्वप्रतिज्ञया तद्बाधात्। वक्ष्यति हि ''स्वरितेनाधिकारः'' इति सूत्रेऽविशेषायाधिकं कार्यमिति। गौणमुख्यन्यायो हि स्वरितत्वप्रतिज्ञास्थले न प्रवर्त्तते इत्यर्थः। उपपादयिष्यते चेदम्। अत एवार्षत्वात्साधुतेति तत्र तत्रोद्घोषः सङ्गच्छते इति दिक्।**

---

व्युत्पत्तिरियं ब्राह्मणशब्दस्य। **कल्पसूत्रेति।** निरुक्तेति प्रचुरः पाठः। अपिः प्रागुक्तसमुच्चायकः। प्रतिबन्धीमाह। **त्रिशङ्केति।** वसिष्टप्रत्याख्यातेत्यादिः। **याजनेनाद्यापीति।** विश्वामित्र-कृतेनेत्यादिः। तदीयतद्रूपविशेषविषयकाचारेणापीति यावत्। **स्मृतीति।** अयाज्यो न याज्य इत्यर्थकसामान्यस्मृतीत्यर्थः। प्रतिबन्दीमुद्धरति। **तत्रेति।** त्रिशंक्वादावित्यर्थः। इहापि = निरुक्तेऽपि। प्रकारान्तरेण प्रतिबन्दीवैलक्षण्येनापि सङ्कोचापत्तिं वारयति। **यर्वाण इति। अभीति।** ऋषीणामित्यर्थः। अपिनान्यसंग्रहः। न चैवं तेषां दोषापतिः। त्रिशंक्वाय याज्ययाजनादाविव तपोमाहात्म्येनासाधुप्रयोगेऽपि बाधकाभावात्। याज्ञे कर्मण्येवासाधुप्रयोगे दोषश्रवणाच्च। अनारभ्याधीतस्त्वर्थानृतपर एव। अस्माकं तु स्मृतिपुराणाध्ययनविधिबलात्तेषां तपोबलाच्च यज्ञमध्येऽपि तदन्तर्गततत्पाठे न दोषः। स्वातन्त्र्येणेदृशप्रयोगे त्वस्माकं प्रत्यवाय एवेति भावः। **अत एवेतीति।** क्रतोरन्यत्र तेषां तत्प्रयोगे बाधकाभावादेवेत्यर्थः। आदिना स्मृतिपरिग्रहः। **अपेति।** पतये सरिवनेत्यादिव्याकरणासंस्कृता इत्यर्थः। **नदीसंज्ञेति** मध्यमणिन्यायेनान्वेति। **भाष्येऽपीति।** तत्र हि 'छन्दोवत्कवयः कुर्वन्तीत्युक्त्वा नह्येषेष्टिरस्ती'त्युक्तम्[1]। भाष्यस्य पूर्वपक्षिमतावलम्बनेनाह। **केचित्त्विति।** तत्रैव शङ्कते। **न चेति।** तत्प्रवृत्तिः = व्यत्ययप्रवृत्तिः। **स्वरितत्वेति।** छन्दसीति पद इति भावः। तद्बाधात् = गौणमुख्यन्यायबाधात्। ननु कथं तावता तद्बाधोऽत आह। **वक्ष्यति हीति।** यत इत्यर्थः। भाष्यकृदिति शेषः। अधिकः कारोऽधिकार इति व्युत्पत्तिलभ्यमर्थमाह। **विशेषायेति।** प्रयोगविशेषसिद्ध्यर्थमित्यर्थः। भाष्यतात्पर्यार्थमाह। **गौणेति।** हि यतः स्वरितत्वात्। **इत्यर्थ इति** । इति परमार्थ इत्यर्थः। **उपेति।** तत्रैव सूत्रे इति

---

१. म.भा.पृ.सं. २१९ (द्वितीयो भागः)

**यद्यपि अप्राप्तांशपूरणफलको नियमविधिः, इतरव्यावृत्तिफलकस्तु नित्यप्राप्तिविषयकः परिसंख्याविधिरिति पूर्वोत्तरमीमांसयोर्व्यवहारस्तथापीह शास्त्रे परिसंख्याऽपि नियमशब्देन व्यवह्रियते। तेन "पञ्च पञ्चनखा भक्ष्याः" इत्यस्य नियमोदाहरणतया उपन्यासो न विरुद्धः। न चासौ मीमांसकरीत्याऽपि नियमो भवत्विति**

---

भावः। **अत एव** तस्योक्तार्थमूलकत्वादेव। तत्र तत्र = ग्रन्थे। **दिगिति।** तदर्थस्तु स्वरितत्वेन तन्न्यायाप्रवृत्तिरित्यस्य सिद्धान्तत्वेऽपि केचित्त्विति मतोक्तिर्न सम्मता। प्रागुक्त**नदीसंज्ञासूत्रस्थभाष्य**विरोधात्। एवञ्चार्षत्वादुक्तप्रयोगेप्यसाधुत्वमेव तेषामितीति दिक्।

## १.४ नियमविधि - परिसंख्याविधिनिरूपणम्

ननु वार्तिके धर्मनियम इत्ययुक्तमुक्तम्। साध्वासाधुप्रयोगस्य युगपत्प्राप्तत्वेन परिसंख्याविषयत्वात्। तथा च धर्मपरिसंख्येत्युचितमित्याशयेनाशङ्कते। **यद्येति।** अयं भावः। 'विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति। तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयत' इति न्यायविदः। अस्यार्थः। सर्वथाऽप्राप्तेऽपूर्वविधिः। यथा **व्रीहीन्प्रोक्षति। सन्ध्यामुपासीते**त्यादिः। यस्य पक्षे प्राप्तिस्तद्विषयको नियमविधिः। **यथा व्रीहीनवहन्ती**त्यादिः। वैतुष्यस्य तु नानोपायेन साध्यत्वाद्यस्यां दशायामवघातं परित्यज्योपायान्तरं गृहीतुमारभ्यते, तस्यां दशायामवघातस्याप्राप्तत्वेन तद्विधानमेव तेन क्रियते। उभयोर्युगपत्प्राप्तौ यो विधिः स परिसंख्याविधिः। यथा **पञ्च पञ्चनखा भक्ष्या** इत्यादिः। अत्र पञ्चपञ्चनखापञ्चपञ्चनखयोर्भक्षणस्य युगपत्प्राप्तत्वादपञ्चपञ्चनखभक्षणव्यावृत्तिस्तेन क्रियत इति। तदाह। **अप्राप्तांशेति।** पक्षेऽनुवादकत्वेऽपि पक्षान्तरे विधिसम्भवेन तस्यैव शाब्दत्वमित्यप्राप्तांशपरिपूर्त्तिः फलतीत्याशयेनाह। **पूरणफलक इति।** परिसंख्यायामार्थ्येवेतरव्यावृत्तिरित्याशयेनाह। **व्यावृत्तिफलक इति।** अत एवात्रेवेतरव्यावृत्तिफलकत्वस्य नियमेऽपि सत्वादाह। **नित्येति।** स तु पाक्षिकप्राप्तविषयक इति भावः। अत एव तुः प्रयुक्तः। **तथापीति।** इतरव्यावृत्तिफलकत्वरूपधर्ममात्रसाम्येनाभेदमाश्रित्येति भावः। नियमवत्परिसंख्यायामपि शाब्दत्वं तस्यैव, न त्वितरव्यावृत्तेरिति सूचनयापि तस्यास्तत्वेन व्यवहारोऽत्रेत्यपि बोध्यम्। तथा च धर्मनियम इति नासङ्गतमिति भावः। नन्वस्त्वेवमत्र शास्त्रे, तथापि **पञ्च पञ्चनखा भक्ष्या** इत्यस्य परिसंख्योदाहरणस्य कथं तत्वेनोक्तिरत आह। **तेनेति।** अत्र शास्त्रे तथा व्यवहारसत्वे तद्रीत्यनुसरणेनेत्यर्थः। **इत्यस्य** इत्यस्या। **उपन्यास इति।** अत्रैव भाष्यकृता कृत इति भावः। **न चासाविति।** पञ्च पञ्चनखभक्षणविधिरित्यर्थः। **रीत्येति।** रीत्यैवेत्यर्थः। रीत्यापीति

**वाच्यं, पञ्चातिरिक्तभक्षणे प्रायश्चित्तविधेरसङ्गतत्वापत्तेः, पञ्चानामभक्षणे प्रायाश्चित्तापत्तौ**

**गृहेऽपि निवसन् विप्रो मुनिर्मांसविवर्जनात्। (या.स्मृ.पृ.सं. ६१, १-१८९)**

**इत्यादिस्मृतिव्याकोपाच्च। अत एव त्रिदोषाऽपि परसंख्यैव तत्राश्रितेति दिक्।**

---

पाठेऽपिः स्वरीतिसमुच्चायकः। पृथग्भक्षणस्यापि सम्भवेन तथाप्रसङ्गे पक्षेऽप्राप्तांशपरिपूरणफल-कत्वसम्भवादिति भावः। अत्र पञ्चनखा एव भक्ष्यास्ते च पञ्चैवेति द्विविधौ नियमस्तमभिप्रेत्याह। **पञ्चेति।** एवमग्रेऽपि। यद्वा विशिष्टनियमो बोध्यः। **असङ्गतेति।** तस्या निषिद्धत्वादिति भावः। ततोऽदृष्टाभावेऽपि दृष्टमस्त्येवेति तत्वम्। दोषान्तरमाह। **पञ्चानामिति। प्रायश्चितेति।** विहिताकरणादिति भावः। अपिर्वने तथा निवसन्मुनिर्भवतीति किमु वाच्यमित्यर्थसमुच्चायकः। **अत एवेति।** तथानियमत्वे उक्तदोषद्वयादेवेत्यर्थः। **अयं भावः।** पञ्च पञ्चनखा भक्ष्या इति वाक्यं न भक्षणापूर्वविधिपरम्। तस्य रागतः प्राप्तत्वात्। नापि नियमविधिपरम्। पञ्च पञ्चनखापञ्च-नखभक्षणस्य युगपत्प्राप्तिसम्भवेन पक्षप्राप्त्यभावात्। अत इदमपञ्चपञ्चनखभक्षणनिवृत्तिपरमिति भवति परिसंख्याविधिः। सा च द्विविधा श्रौती लाक्षणिकी चेति। **तत्र ह्येवावपंती**त्यत्र श्रौती परिसंख्या। एवकारेण गायत्री बृहत्यनुष्टुप्व्यावृत्तेरभिधानात्। पञ्चेत्यादौ तु लाक्षणिकी। इतरनिवृत्तिवाचकस्य पदस्याभावात्। अत एवैषा परिसंख्या त्रिदोषग्रस्ता। दोषत्रयं च श्रुतहानिर-श्रुतकल्पना प्राप्तबाधश्चेति। श्रुतस्य पञ्चपञ्चनखभक्षणस्य हानिः। अश्रुतापञ्चपञ्चनखभक्षणस्य निवृत्तिकल्पनम्। प्राप्तस्य चापञ्चपञ्चनखभक्षणस्य बाधश्चेत्येवं रूपम्। अस्मिंश्च दोषत्रये दोषद्वयं शब्दनिष्ठम्। प्राप्तबाधस्तु शब्दार्थनिष्ठ इति। विस्तरस्तु अन्यत्र बोध्यः । **तत्राश्रितेतीति।** पञ्चेत्यादौ जैमिनीयैरित्यर्थः। वस्तुतस्तु इदमयुक्तम्। पदद्वये लक्षणापत्त्या गौरवापत्तेः। किञ्चैवं शास्त्रप्राप्तस्य शास्त्रीयनियमे विकल्पवारणाय सामान्यविशेषन्यायेन विधेस्तद्विषयत्वाभावकल्पन-मित्यतिगौरवापत्तेः। किञ्च 'किमासेव्यं पुंसां सविधमनवद्यं द्युसरित'[1] इत्यार्थपरिसंख्योदाहरणमिति **प्रकाशादि**ग्रन्थासङ्गत्यापत्तेः। त्वद्रीत्या हि द्युसरित्सविधातिरिक्तमनासेव्यमिति बोधेन तस्याः शाब्दीत्वात्। अत एव शाब्दपरिसंख्यायां[2] 'किं भूषणं सुदृढमत्र यशो न रत्न'मित्युदाहृतं तैः।

---

१. का.प्र.पृ.सं. ४६० परिसंख्योदाहरणे इदं पद्यमुट्टङ्कितम्। किमेकान्ते ध्येयं चरणयुगलं कौस्तुभकृतः। किमाराध्यं पुण्यं किमभिलषणीयं च करुणा यदासक्त्या चेतो निरवधिविमुक्त्यै प्रभवति। इति तच्छेषः ।।

२. किं कार्यमार्यचरितं सुकृतं न दोषः।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम् ।। इति एतच्छेषः ।। का.प्र.पृ.सं. ४६०

**अत्रेदमवधेयम्, नियमातिक्रमे कृते अपूर्वं परं न भवति, दृष्टस्त्वर्थावबोधो भवत्येव अवहननातिक्रमे कृतेऽपि वैतुष्यवत् दिगन्तराभिमुखभोजने तृप्तिवच्च। न चापभ्रंशाना-मवाचकतया कथमर्थावबोध इति वाच्यं, शक्तिभ्रमवतां बाधकाभावात्। विशेषदर्शिनस्तु**

---

किञ्च 'भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यत' इति भाष्यविरोधापत्तेः। किञ्च भाष्ये दृष्टान्तदार्ष्टान्तिकयोरत्यन्तवैषम्यापत्तेः। किञ्चान्यनिवृत्तिफला परिसंख्येत्यभियुक्तोक्तिविरोधापत्तेः। तस्माद्विधिमुखेनैव प्रवृत्तिः। अवधारणविषयबुद्धिस्थवृत्तिपञ्चत्वसंख्यावति पञ्चपदस्य लक्षणा। अवधारणं चात्र स्वातिरिक्तसंख्याधिकरणासम्बन्धिसमभिव्याहृतप्रकारकज्ञानरूपम्। तेन अन्ये भक्ष्या इति फलति। तदर्थलक्षणाया फलं तु प्रापकप्रमाणबोधितस्य तदतिरिक्तविषयत्वा-भावकल्पनमितीष्टसिद्धिः। एवञ्चैवकारसमभिव्याहारेऽप्यार्थ्येव परिसंख्या। सा चोपात्तातिरिक्ते समभिव्याहृतपदार्थाभावप्रत्ययरूपा। यथा 'पार्थ एव धनुर्धर' इत्यादौ नान्यो धनुर्धर इति। स च नैवकारघटितवाक्यार्थः। कित्वार्थ एव। उक्तरीतेः। शाब्दी तु 'त्वन्मुखं त्वन्मुखेनैव तुल्यं, नान्येन केनचित्, 'किं भूषणं सुदृढ'मित्यादावेव[1]। तस्मात् सिद्धस्य पुनर्विधानात्सामान्यप्रापकप्रमाणस्य तदितराविषयकत्वरूपसङ्कोचकल्पनं, तेनार्थस्तत्कार्याभावः, तमादाय नियमादिशास्त्रे प्रतिषेधत्वव्यवहारो नान्यत्रेत्यादिप्रतिनिर्देशश्च, अत एवान्येषां भक्षणाभावस्तद्भक्षणे प्रायश्चितं च। अन्ययोगव्यवच्छेद एवकारार्थ इति तु सामान्यप्रमाणसङ्कोचफलितमर्थमादाय नेयम्। एवमेव स्वार्थहानि - परार्थकल्पना - प्राप्तबाधरूपदोषत्रयमपि यथाश्रुते प्रतीयमाने स्वार्थे तात्पर्याभावात्तात्पर्यतस्त्यागोऽन्यार्थे तात्पर्याङ्गीकारेण तात्पर्यतः परार्थकल्पना प्राप्तबाधश्चेति सूपपादम्। अत एव पञ्चानामभक्षणे प्रायश्चित्तापत्यभावः स्मृतिव्याकोपाभावश्चेति सूपपादं बोध्यम्। विस्तरस्तु **मञ्जूषायां**[2] बोध्यम्। तदाह **दिगिति।**

## १.५ अपभ्रंशेषु वाचकत्वसाधनम्

नन्वपभ्रंशानामवाचकतया ततोऽर्थाबोधेन तद्बोधनाय तत्प्रयोगस्यैवाप्राप्तिरिति कथं शास्त्रस्य नियामकत्वमत आह। **अत्रेदमिति।** शब्दप्रयोगविषय इत्यर्थः। **नियमेति।** वार्तिकोक्तेत्यादिः। **अपूर्वं परमिति।** अदृष्टं केवलमित्यर्थः। अत्र श्रौतं दृष्टान्तमाह। **अवेति।** स्मार्त्तं तमाह।

---

१. इत्यादिष्वेवेति क पाठः।

२. एवकारार्थनिरूपणे (ल.म..पृ.सं. ७१५)

**द्विविधाः – तत्तद्वाचकसंस्कृतविशेषज्ञानवन्तस्तद्विकलाश्च। तत्र आद्यानां साधुस्मरण-द्वारा अर्थवोधः, द्वितीयानां बोध्यार्थसंबद्धार्थान्तरवाचकस्य स्मृतौ सत्यां ततो लक्षणया बोधः, सर्वनामस्मृतेर्वा, तदर्थज्ञापकत्वेन रूपेण साधुस्मृतेर्वा, अर्थाध्याहारपक्षा-श्रयणाद्वेति यथायथं बोध्यम्।**

**अपरे त्वाहुः – अपभ्रंशा अपि वाचका एव। तथा हि, अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरेच्छा शक्तिरिति मते भगवदिच्छायाः सन्मात्रविषयकत्वादपभ्रंशैस्तु बोधजननस्य शक्तिभ्रमदशायां तेनाप्यभ्युपगमाद् दुर्वारा शक्तिः। पदार्थान्तरं तदिति मतेऽपि कल्पकं**

---

**दिगिति।** प्रागन्येत्यर्थः। **भोजने** भोजनेऽपि। दृष्टमपि प्रकृते नेत्याशयेन शङ्कते। **न चेति।** ततश्च दृष्टान्तवैषम्यमिति भावः। **शक्तिभ्रमेति।** अयं च बोधः विशेषादर्शिनाम्। तद्दर्शिनां तु प्रकारान्तरेणापि बोधसम्भवेन न भ्रम इत्याह। **विशेषेति। ज्ञानेति।** विशेषरूपेणेति भावः । तत्र तयोर्मध्ये साध्वित्यर्थः। तत्तद्रूपेणेति भावः। **सम्बद्धार्थान्तरेति।** सम्बद्धपदार्थान्तरेति पाठान्तरम्। विशिष्टबुद्धिस्थले विशेष्याद्यन्यविशेषणीभूतादेः कस्यचित् पदार्थस्यावश्यंभावादिति भावः। अनेन स्मृतिसामग्री उक्ता एकसम्बन्धीति न्यायप्रतिपाद्यरूपा। तस्य तत्राशक्तेराह। **लक्षणयेति।** ननु तद्विकल्पस्येदं दुर्घटमत आह। **सर्वेति।** विशेषाज्ञानेऽपि सामान्यज्ञानसत्वादिति भावः। विनिगमनाविरहादाह। **तदर्थेति।** विशेषरूपेण ज्ञानासत्वेऽपि सामान्यरूपेण तत्सत्वादिति भावः। एवं शब्दाध्याहारपक्षे उक्त्वा पक्षान्तरे आह। **अर्थेति।** पदार्थोपस्थितिमात्रं शाब्दबोधे हेतुर्न तु पदजन्यत्वस्य तत्र निवेश इति न तत्र शब्दापेक्षेति भावः। यथायथं यथायोग्यम्। उक्तरीत्येति शेषः। सर्वथापि दृष्टफलसत्तासिद्धेति भावः।

एवं परमतेनोक्त्वा सिद्धान्तमतमाह। **अपरे त्वाहुरित्यादिना न भवतीतीत्यन्तेन। वाचक एवेति।** शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वादिति भावः। नन्वेवमपि न तथा, तत्तद्देशभेदभिन्नेषु शक्तिकल्पने गौरवात्। न च पर्यायतुल्यता शङ्क्या। तेषां हि सर्वदेशेष्वेकत्वेन विनिगमनाविरहेण सर्वत्र शक्तिकल्पना। नह्यपभ्रंशेषु तथा। अन्यथा भाषाशब्दानामपि पर्यायतया गणनापत्तेश्चात आह। **तथा हीति। सन्मात्रेति।** व्यावहारिकसत्ताश्रययावद्विषयकत्वादित्यर्थः । हेत्वन्तरमाह। **अपेति।** तुश्चार्थोऽभ्युपगमादित्यनन्तरं योज्यः। तेनापि = परेणाऽपि। **दुर्वारा शक्तिरिति।** तत्तद्देशीयशिष्टानां तत्तद्भाषाशब्देष्वजायमानस्य निर्विचिकित्सशक्तत्वप्रत्ययस्य बाधकं

**साध्वसाध्वोस्तुल्यमेव। असाधुस्मरणद्वारा साधुर्बोधक इति वैपरीत्यस्यापत्तेश्च। स्वीकृतं हि परेण तिबादिस्मारितानां लादीनामसाधूनामपि बोधकत्वम्। ननु साधूनामल्पत्वात्तत्रैव लाघवाच्छक्तिः कल्प्यते इति चेत् ? न वयमपूर्वं किञ्चित्कल्पयामः, किन्तु यथा घटजननसामर्थ्यमेव दण्डादेः शक्तिः, तथा घटबोधजननसामर्थ्यमेव घटादिपदानां शक्तिः। सा च कारणत्वापरपर्याया शक्तिभ्रमाद् बोधं वदता त्वयाऽप्यभ्युपेयैव। शक्तिग्रहस्य भ्रमत्वं परं त्यज्यतां विषयाबाधादिति ब्रूमः। नन्वेवं गौणमुख्यविभागोच्छेदः ''सर्वे सर्वस्य वाचकाः'' इति पर्यवसानादिति चेत् ? त्वत्पक्षेऽपीश्वरेच्छाया गौणादावतिप्रसङ्गस्य तुल्यत्वात्। सुहृद्भावेन पृच्छामीति चेत् ? प्रचुरतरप्रयोगतद्विरहाभ्यां गौणमुख्यविभाग इति गृहाण। ननु जनकत्वेनागृहीतादपि तर्हि कारणात्कार्योदयः स्यादेवेति चेत् ? पदार्थस्मृतिरापाद्यते वाक्यार्थबोधो वा ? नाद्यः,**

---

विना भ्रमत्वकल्पनस्यायुक्तत्वादित्यपि बोध्यम्। लक्षणादेस्त्वप्रसङ्ग एव, तस्या अर्थान्तर-शक्तिपूर्वकत्वादिति भावः। **तत्** शक्तिरूपं कल्पकं। ततो जायमाना[१]र्थावबोधप्रयोजकरूपं व्यवहारादिकम्। शक्तेरिति शेषः। साधुस्मरणाद्बोध इति खण्डयति। **असध्विति।** अत्र स्मारणं साधुनिष्ठो धर्मः। नन्वसाधोर्बोधकत्वं न दृष्टमिति न वैपरीत्यमत आह। **स्वीकृतमिति।** हि यतः। परेण = नैयायिकेन। एवेनासाधुव्यावृत्तिः। यक्षानुरूपो बलिरिति न्यायेनाह। **न वयमिति।** नेत्यग्रे यत इति शेषः। किन्त्वित्यस्य ब्रूम इत्यत्रान्वयः। घटादिपदानामिति पाठः। आदिना कलशादि। तस्या नामान्तरमाह। **सा चेति।** सा त्वयापि दुर्निवारेत्याह। **शक्तीति।** एवञ्च न किञ्चित्कल्प्यमिति भावः । नन्वेवं तर्हि किमुच्यतेऽत आह। **शक्तीति।** परं केवलम्। **विषयेति।** बोधजनकत्वरूपशक्तिरूपविषयस्याबाधादित्यर्थः। एवमसाधूनामपि उक्तरीत्या शक्तत्वे। **पर्यवसा-नादिति।** इत्यत्र पर्यवसितेरित्यर्थः। पूर्वोक्तयुक्तिद्वयेनेति भावः। चेन्नेति पाठः। प्रतिबन्दीमाह। **त्वत्पक्षेऽपीति। तुल्यत्वादिति।** तथा च सर्वत्र मुख्यत्वमेवेति न्यायोच्छेदस्तवापीति भावः। **विरहाभ्यां** तस्य विभागेऽन्वयः, अतो यथासंख्याभावेऽपि न दोषः, **तर्हि** शक्तेः कारणतापरपर्यायत्वेन तज्ज्ञानस्याकारणत्वे। यथा स्वरूपसद्दण्डादितो घटोत्पत्तिस्तथा स्वरूपसच्छब्दाद्बोधापत्तिः, शक्तेः सत्वादिति भावः। एवेनेष्टतदभावव्यवच्छेदः। कार्यस्य द्वैविध्यादाह। **पदार्थेति।** किमित्यादिः। **सम्बन्धेति।** पदतदर्थयोरिति शेषः। एतस्यावश्यं हेतुत्वं

---

१. अर्थान्तरावबोधेति क पाठः।

**सम्बन्धग्रहं विना तदयोगात्। नान्त्यः, द्वाराभावात्। पदार्थस्मरणं हि द्वारम्। एवञ्च महदेव लाघवम्। साधुस्मारणकल्पनाक्लेशश्च न भवतीति। साधुत्वं तु जातिविशेषात्मक-मित्युक्तमेव। समानायामर्थावगतौ शब्दैश्चापशब्दैश्चेति भाष्यमप्येतत्पक्षपातीति दिक्॥ इति अपशब्दानां वाचकत्वावाचकत्वविचारः।**

**प्रयोगशब्दमुपाददानो वार्त्तिककारः प्रयोगाद्धर्मो न तु ज्ञानमात्रादिति सूचयति।**

---

वाच्यम्। अन्यथा गङ्गातीरयोः सम्बन्धाग्रहवतो गङ्गापदशक्तिं जानतोऽपि गङ्गायां घोष इति वाक्यात्तीरबोधप्रसङ्गः। शक्तिज्ञानरूपहेतोः सत्वादिति भावः। एवञ्च = कारणतारूपशक्तेः सर्वत्राङ्गीकारे च। **महदेवेति।** अतिरिक्तस्ततः पृथक् लक्षणादेश्चानङ्गीकारादिति भावः। लाघवान्तरमाह। **साध्विति।** चः पूर्वोक्तपक्षचतुष्टयकृतक्लेशसमुच्चायकः। अपरे त्विति मतसमाप्तिवितिः। नन्वेवं साधुताऽपि तेषां स्यादत आह। **साधुत्वं त्विति।** जातिविशेषज्ञापकं च कोशव्याकरणादिकमित्यप्युक्तमेव। तथा च न तेषां साधुत्वमिति भावः। **भाष्यमिति।** अन्यथा साम्योक्तिरयुक्ता स्यादिति भावः। **एतत्पक्षेति।** असाधूनां वाचकत्वपक्षेत्यर्थः। इतिरत्रेदवधेयमिति सिद्धान्तसमाप्तौ। वस्तुतस्तु शक्तिः पदार्थान्तरम्। न कारणतारूपा, नापीच्छादिरूपा दुर्वचत्वात्। सा च शक्तिरपभ्रंशेष्वपि युक्तैव। उक्तयुक्तेः। साधुस्मरणं विनाऽपि बोधानुभवात्। तद्वाचकसाधुशब्दमजानतां बोधानापत्तेश्च। तदर्थज्ञापकत्वेन स्मरणं तु नार्थोपस्थापकम्। शक्ततावच्छेदकानुपूर्व्यग्रहात्। तद्वाचकसर्वनामस्मरणाननुभवाच्च। उच्चारितस्यैव बोधकत्वेन स्मृतसाधुतो बोधासम्भवाच्च। भ्रमाद्बोध इत्यपि न। घटत्वादिविशिष्टघटादिरूपार्थनिरूपिताया घटादिपदवृत्तित्वेन गृहीताया भिन्नानुपूर्वीकत्वरूपविशेषदर्शनसत्वेन साधारणधर्मदर्शनाभावेन च गगरीपदादौ भ्रमानुपपत्तेरिति बोध्यम्। [१]आर्यम्लेच्छाधिकरणमप्यत्र पक्षे सङ्गतमेवेत्याद्यूह्यम्। विस्तरस्तु **मञ्जूषायां** द्रष्टव्यस्तदाह। **इति दिगिति।**

## १.६. शब्दप्रयोगस्य ज्ञानद्वारा धर्मजनकतानिरूपणम्

**किं पुन**रित्यादि अग्रिमभाष्यार्थमाह। **प्रयोगशब्दमिति। सिद्धे शब्दार्थेति** वार्तिके इति भावः। **प्रयोगादिति।** ज्ञानपूर्वकप्रयोगादित्यर्थः। अत एवाह। **न तु ज्ञानमात्रादिति।**

---

१. आर्या यवशब्दं दीर्घशूकेषु प्रयुञ्जते, तमेव च बुध्यन्ते। म्लेच्छास्तु प्रियङ्गौ तमेव बुध्यन्ते। म्लेच्छपदेनानार्याः। तथापि आर्यप्रसिद्धेर्बलवत्वाद्दीर्घशूकपरतैवेति सिद्धान्त इति तदधिकरणम्। अत्राधिकविचारः मञ्जूषायां भट्टपादैः प्रतिपादितः। (ल.म.पृं.सं. ७०) अत एव अनुपदं 'विस्तरस्तु मञ्जूषायां' इत्युक्तं वैद्यनाथेन॥

**युक्तं चैतत्, एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्त इत्यत्र ज्ञानप्रयोगयोरुपादानस्याविशेषेऽपि प्रतिपदाधिकरणन्यायेन यदैकस्मादपूर्वं तदेतरत्तदर्थमिति प्रयोगात्फलं, ज्ञानं तु तदङ्गमित्यभ्युपगमात् प्रयोगस्य फलम्प्रति सन्निहितत्वाच्च। ज्ञानस्य तु व्यवहितत्वात् ज्ञानस्य प्रयोगाङ्गतायां दृष्टार्थतालाभाच्च। उक्तं च भट्टैः –**

**सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते।**
**पराङ्गं चात्मविज्ञानादन्यत्रेत्यवधार्यताम्॥ इति॥ (तन्त्र.वा.पृ.सं. २२७)**

---

मात्रादित्यनेन हि ज्ञानस्य प्रयोगाङ्गत्वं सूचयति। अत्र ज्ञानं साधुत्वप्रकारकं, प्रयोगश्च शिक्षोक्तरीत्येति बोध्यम्। ननु भाष्ये तथाप्युक्तमत आह। **युक्तमिति। एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्त** इति पाठः। एकः पूर्वपरयो (६-१-८४) रित्यत्र भाष्योक्ता श्रुतिरियमिति प्रागुक्तम्। **उपादानस्येति।** द्वयोर्मिथस्तत्साधनेऽनपेक्षतयोपादानस्येत्यर्थः। **प्रतिपदेति। सोमेन यजेत, श्येनेनाभिचरन् यजेत** इत्यादौ किं सर्वेषां पदानामर्थाः फलभावनायां करणमुतैकस्यैव पदस्यार्थ इति सन्दिह्य तत्र प्रधानसम्बन्धलाभादवैरूप्याच्च सर्वेषां तेषां तत्र करणत्वम्। अन्यथा यत्फलभावनाकरणं तस्य फलं प्रत्युपादानविधानगुणभावात्, तदकरणं च प्रत्युद्देश्यानुवाद्यप्रधान-भावाद्वैरूप्यं स्यादिति पूर्वपक्षं कृत्वा सर्वेषां फलभावनाकरणत्वे नानाऽदृष्टकल्पनापत्तेरेक एव यागरूपपदार्थः समानपदोपात्तत्वप्रत्यासत्त्या फलभावनायां करणम्। इतरे सोमादयस्तदर्थाः। न च वैरूप्यम्। श्येनादिपदानां नामत्वसम्भवात्। सोमादिपदेषु मत्वर्थलक्षणाश्रयणाच्चेति **द्वितीया-ध्यायाद्याधिकरणे** उक्तम्। तदुक्तरीत्योभयोः साम्येन फलसम्बन्धाभावात्। अत एव तुल्यार्थत्वा-भावेन विकल्पायोगेनैकस्य प्रयोगस्य प्राधान्यमपरस्य ज्ञानस्य तदङ्गत्वं कल्प्यत इत्याकूतम्। ननु दृष्टान्ते उक्तयुक्तिसत्वाद्धात्वर्थस्यैव तत्वमस्तु। प्रकृते तूक्तरीत्या एकस्यैव तत्वेऽपि प्रयोगस्यैवेति कुतः, प्रत्युत **प्रथमं वा नियम्येत कारणादतिक्रमः स्यात्** (पू०मी० ११-१-४३) इति तन्न्याया-श्रयणेन ज्ञानस्यैव तत्वापत्तिरत आह। **प्रयोगेति।** स्वर्गे लोक इत्यनेन सुप्रयुक्त इत्यस्य सन्निहितत्वादित्यर्थः। सम्यग्ज्ञात इत्यस्य तु तेन व्यवहितत्वमिति भावः। न केवलं तेनैव व्यवहि-तत्वं, किन्तु शास्त्रान्वित इत्यनेनापीत्याह। **ज्ञानस्येति।** तुश्चार्थे व्युत्क्रमे च। तेन व्यवहितत्वाच्चेत्यर्थः। हेत्वन्तरमाह। **ज्ञानस्येति। सम्भवति दृष्टेति** न्यायादिति भावः। ज्ञानस्य ज्ञेयशेषतया धर्महेतुत्वासम्भवाच्चेत्यपि बोध्यम्। तदेव हेत्वन्तरं सूचयन्नाह। **उक्तं चेति।** संस्कारित्वेन = उपकारित्वेन। आत्मविज्ञानादन्यत्र तस्य पराङ्गत्वं च, आत्मज्ञानस्य तु

**अत एव ''तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद'' इत्यादिष्वपि ज्ञानपूर्वकानुष्ठानात्फलमित्येव सिद्धान्तः। तदुक्तं वार्तिककृता- ''तत्तुल्यं वेदशब्देन'' इति। वेदः शब्दो विधायको यस्यार्थस्य अश्वमेधादेस्तेनेदं तुल्यमित्यर्थः। तेन वैदिक-शब्दानामपि पक्षकोटिप्रविष्टतया दृष्टान्तासङ्गतिरिति नाशङ्कनीयम्। ''तेऽसुराः'' इति पूर्वोदाहृतश्रुतिरपि अपशब्दप्रयोगात्प्रत्यवायं बोधयन्ती साधुप्रयोगाद्धर्मं गमयति। वाजसनेयिनां ब्राह्मणे- ''तस्मादेषा व्याकृता वागुद्यते'' इति श्रुतिरप्येवम्। भाष्ये तु अभ्युपेत्यवादेन साधुज्ञानात्फलमित्ययमपि पक्षः समर्थितः। न चैवमपशब्दज्ञानादधर्मोऽपि**

---

प्राधान्येनेष्टजनकत्वमिति भावः। प्रथमं वेति न्यायस्तूक्तान्यविषयक इति तात्पर्यम्। सर्वत्रैवेत्यस्योदाहरणमाह। **अत एवेति।** सर्वत्र ज्ञानस्याङ्गत्वादेवेत्यर्थः। सिद्धान्त इत्यत्रान्वयः। अन्यथोक्तरीत्या सिद्धान्तासङ्गतिरेव स्यादिति भावः। अपिस्तत्समुच्चये। पूर्वं वार्तिककृता सूचितोऽर्थोऽग्रे स्पष्टमुक्त इत्याशयेनाह। **तदुक्तमिति। तत्तुल्यमिति।** यथा तस्य वेदतो ज्ञात्वाऽनुष्ठानं फलायेति **य उ चैन**मित्यनेनोक्तं तथाऽस्यापि शास्त्रज्ञानपूर्वकः प्रयोगः फलायेत्ये**कः शब्द** इत्यादिनोक्तमित्यर्थः। ननु सुशब्दमात्रे ज्ञानपूर्वकप्रयोगाद्धर्मजनकत्वस्य पूर्वोक्तहेतुभिः साध्यतया वेदशब्दानां पक्षान्तर्गतत्वेन दृष्टान्तत्वाभावाद्वार्तिकासङ्गतिः। किञ्चोक्तार्थालाभोऽत आह। **वेद इति।** शब्दपदार्थमाह। **विधायक इति।** लाक्षणिकोऽर्थोऽयम्। बोधक इति प्रमाणमिति वाऽर्थ उचितः। अभिधायक इति पाठस्तु सम्यगेव। वार्तिके वेदशब्देनेत्यत्र बहुव्रीहिरिति भावः। तेन = तथाऽर्थकरणेन। श्रुत्यन्तरमप्याह। **तेऽसुरा इति। बोधयन्तीति।** सतीति शेषः। न त्वपशब्दज्ञानात्। 'इति कुर्वन्त' इत्युक्तेरिति भावः। अन्यश्रुतिरप्यत्र मानमित्याह। **वाजेति।** तैत्तरीयब्राह्मणेऽपि **वाग्वै पराच्य व्याकृताऽवदत्। ते देवा इन्द्रमब्रुवन्। इमां नो वाचं व्याकुर्विति। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। तस्मादियं व्याकृता वागुद्यत** इति। अनया च व्याकरणस्योपादेयताप्रामाण्यं च प्रतिपादितमित्यन्यत्र स्पष्टम्। **व्याकृतेति।** व्याकरणसंस्कृतेत्यर्थः। **एवमिति।** तथा वागुद्यतेत्युक्त्या तादृश्यास्तस्याः फलजनकत्वं न तु तज्ज्ञानस्येति बोधयतीत्यर्थः। एवं वार्तिकसिद्धान्ते प्रतिपादितेऽपि भाष्यसिद्धान्तमाह। **भाष्ये त्विति।** तुरुक्तवैलक्षण्ये। **नारायणा**द्यनुरोधेनाह। **अभ्युपेत्यवादेनेति।** उक्तश्रुत्यादिविरोधा-दुक्तदोषगणसत्वाच्चास्याभ्युपेत्यवादत्वम्। **साधुज्ञानादिति।** तन्मात्रादित्यर्थ इति केचित्। वस्तुतस्तु वादेन युक्तिजातेनोक्तश्रुत्याद्यविरोधमभ्युपेत्य निश्चित्य ज्ञानात्प्रयोगद्वारेत्यर्थः। तथा हि। **एकः शब्दः सम्यग्ज्ञात** इत्यादिः श्रुतिरूपो शब्दो ज्ञाने धर्ममाह। नापशब्दज्ञानेऽधर्मम्। **हेलयो**

**स्यादिति वाच्यं, 'यावद्वचनं वाचनिकम्' इत्यभ्युपगमात् ''न म्लेच्छितवै'' इत्यादिना असाधुप्रयोगस्यैव निषेधाच्च। न च व्याकरणाध्ययने प्रवृत्तस्य परिनिष्ठितपचत्यादिबोधार्थं डुपचष्प्रभृतीनां प्रयोगोऽप्यावश्यक एवेति वाच्यं, तदीयज्ञानमात्रेण निर्वाहात्। अत एवालौकिकंप्रक्रियावाक्यमूहमात्रस्य गोचर इति नित्यसमासेष्वस्वपदविग्रहाभ्युपगमः। अथ व्युत्पादनार्थं तत्प्रयोग आवश्यक इत्याग्रहस्तथापि न क्षतिः, अनपभ्रष्टत्वेन तेषां प्रत्यवायाजनकत्वात्। नह्येते शक्तिवैकल्यादिप्रयुक्ताः, येन गाव्यादिसाम्यं भजेरन्। अथ सादित्वादसाधुतेत्याग्रहस्तथापि न क्षतिः शब्दस्वरूपपरत्वात्। अनुकरणानां सर्वत्र साधुताभ्युपगमात्। न हि ''हेलयो हेलयः'' इति श्रुतिपाठोऽपि प्रत्यवायजनकः। शब्दस्वरूपमात्रपरा एते भिन्ना एव साधवश्चेति तु तुल्यम्। अत एव ''स्वाहेन्द्रशत्रुर्वर्द्धस्व'' इति श्रुतावाद्युदात्तस्य पाठेऽपि तत्प्रत्याय्यस्यार्थपरस्य**

---

**हेलय** इत्यादिस्तु अपशब्दप्रयोगेऽधर्ममाह। न तु तज्ज्ञाने। यद्यपि तत्र सुप्रयुक्त इत्यप्युक्तम्, तथापि अवैयाकरणस्य सम्यक्प्रयोगादपि स्वर्गसम्पादकधर्माभावेन शास्त्रानुगततज्ज्ञानमेव प्राधान्येन तद्धेतुः। प्रयोगस्तु तस्य द्वारम्। वार्तिके प्रयोगशब्द एतस्याप्युपलक्षणम्। वाजसनेयिश्रुत्यादि-स्तूक्तपक्षाश्रया, अश्वमेधादावपि ज्ञानमेव तद्धेतुः प्रयोगो द्वारमिति न कस्याप्यानर्थक्यम्। एवमत्रापि शास्त्रानर्थक्यं न। उक्तदोषगणस्यान्यत्रोद्धृतत्वाच्च न कोऽप्यत्र पक्षे दोष इत्ययमपि युक्त एवेति भाष्याशय इति बोध्यम्। तदाह। **समर्थित इति।** तदेवाह। **न चैवमित्यादिना।** चैवं = साधुशब्दज्ञानाद्धर्माङ्गीकारे। एवेन ज्ञानव्यवच्छेदः। अन्यथा तथैव वदेत्। तथा च निषिद्धादेवाधर्मो, नानिषिद्धादिति भावः। शब्दानां नित्यत्वाभिप्रायेणाह। **बोधार्थमिति। आवश्यक एवेतीति।** एवञ्च तन्निषेधोऽपि दुर्वच इति ततोऽधर्मोऽपि स्यादेवेति भावः। **तदीयेति।** डुपचष्प्रभृतीयेत्यर्थः। **अत एवेति।** ज्ञानमात्रेण निर्वाहे तत्प्रयोगाभावादेवेत्यर्थः। मात्रपदेनोक्त एवार्थः उक्तः। अन्यथा तद्बोधार्थं तस्यावश्यकत्वे तदभ्युपगमासङ्गतिरेव स्यादिति भावः। अभ्युपेत्यवादेनाह। **अथापीति।** बालानामिति शेषः। क्वचिदथेत्येव पाठः। तदापि स एवार्थः। तेषां डुपचष्प्रभृतीनां अनपभ्रष्टत्वं सङ्गमयति। **न ह्येत इति। सादित्वादिति।** कल्पितत्वादिति भावः। **परत्वादिति।** अनुकरणत्वादिति भावः। ननु तथाप्यसाधुत्वं तत्कुतो नेत्यत आह। **अनुकरणेति। सर्वत्रेति।** लोके वेदे चेत्यर्थः। तत्र द्वितीये उपपत्तिमप्याह। **न हीति। ति तु तुल्यमिति।** इत्यङ्गीक्रियते यदि तत्र हेतुस्तर्हि अलौकिकप्रक्रियावाक्येऽपि तत्तुल्यमित्यर्थः। **अत एवेति।** शब्दस्वरूपमात्रपराणां ततो भिन्नादित्वादेवेत्यर्थः। एवमग्रेऽपि।

**ऊहितस्यानाम्नानादमन्त्रतया जपादिपर्युदासेन मन्त्रे विधीयमाना एकश्रुतिर्न प्रसक्तेति प्रागुक्तम्। अत एव साधुत्वासाधुत्वयोरेकस्मिन् सद्भावो अभावश्चेति विरुद्धस्य दुरुपपादतया अर्थभेदाच्छब्दभेद इति दर्शनं प्रवृत्तम्। न च "प्रकृतिवदनुकरणम्" इत्यतिदेशेन अपशब्दानुकरणस्य असाधुता शङ्क्या, असाधूनां शास्त्रीयप्रकृतित्वाभावात् असाधुत्वस्य शास्त्रीयकार्यत्वाभावाच्च। न ह्यशास्त्रीयमप्यतिदिश्यते इति ऋलृक्सूत्रे भाष्ये स्फुटमेतत्।**

**डुपचष्प्रभृतिप्रयोगादपशब्दज्ञानाद्वा प्रत्यवायो नास्तीति प्रागुक्तरीत्या स्थितेऽपि अभ्युपेत्यापि प्रत्यवायं भाष्ये कूपखानकन्याय उदाहृतः। तथा हि, कूपं खनन् यद्यपि कर्दमेन लिप्यत एव तथापि ततो लब्धेन जलेन तं मलं दूरीकरोति फलान्तरं च लभते, तथेहापि परिनिष्ठितरूपज्ञानात्पूर्वोत्पन्नप्रत्यवायनिरासं फलान्तरं च लभते इति। सोऽयं**

---

प्रागुक्तमित्यत्रान्वयोऽस्य। अग्रिमस्य प्रवृत्तमित्यत्रान्वयः। **आद्युदात्तस्येति।** बहुव्रीह्यनुकरणस्य शब्दपरस्येति भावः। हि तस्या त्वष्ट्राज्ञयाऽध्वर्युणेति शेषः। **अनाम्नानात्** वेदेऽपाठात्। **विरुद्धस्येति।** तयोर्युगपदेकत्र प्रत्येकं सद्भावाभावयोर्विरोधेन दुरुपपादतयेत्यर्थः। दर्शनं = मतम्। **शास्त्रीयेति।** न हि क्वचिदपि शास्त्रे प्रत्ययविधावसाधूनामुद्देश्यत्वं उक्तरूपाणामस्तीति भावः। नन्वशास्त्रीयत्वेऽपि तस्य कुतो नातिदेशोऽत आह। **न ह्येति।** शास्त्रेण शास्त्रीयकार्यातिदेशस्यैवौचित्येन तदसम्भवादिति भावः। इतिरुक्तग्रन्थसमाप्तौ। अत एवैतदित्यस्याग्रे सङ्गतिः। इदं च **ऋलृक्सूत्रे** एव विशदीभविष्यतीत्यलम्।

## १.७. कूपखानकन्यायप्रदर्शकभाष्याशयवर्णनम्

अग्रिमभाष्यमवतारयति। **डुपचषिति।** अस्य भाष्येऽनुक्तत्वादाह। **अपशब्देति।** अपशब्दत्वावच्छिन्नज्ञानाद्वेत्यर्थः। **अभ्युपेत्यापि प्रत्यवायमिति।** तुष्यतु दुर्जन इति न्यायेन तन्नान्तरीयकापशब्दज्ञानस्य विपरीतत्वमात्रेणाधर्मसाधनत्वमभ्युपगम्यापीत्यर्थः। तन्निवारणायेति शेषः। हि यतः। **फलान्तरं चेति।** पिपासानिवृत्त्यादिरूपं दृष्टमदृष्टं चेत्यर्थः। अग्रे फलान्तरमदृष्टमात्रं बोध्यम्। तथेहापि = शब्दविषयेऽपि। रूपं स्वरूपम्। **सोऽयमिति।** भाष्ये यः कूपखानकन्याय उदाहृतः सोऽयं इतीत्यन्तेनोक्ताभिप्रायक इत्यर्थः। यत्कर्म नान्तरीयकर्मजन्यो यो विपरीतत्वमात्रेण कल्प्योऽवैधो दोषः स तत्कर्मजन्यफलनाश्य इति सामान्यतो

**कूपखानकन्यायः। कूपं खनतीति विग्रहे कर्मण्यणि प्राप्ते वासरूपन्यायेन ण्वुल्। नित्यसमासत्वाभावात्कूपस्य खानक इति स्वपदविग्रहः। न च शिल्पिनिष्वुना सरूपेण ण्वुलो बाधः स्यादिति वाच्यम्, इह खननकर्तृत्वमात्रस्य विवक्षया शिल्पित्वस्या-विवक्षितत्वात्। तस्मात्सर्वथापि गाव्यादिप्रयोगे प्रत्यवाय इति स्थितम्। तत्रेदं भाष्ये सिद्धान्तितम् याज्ञे कर्मण्येवायं, ''न म्लेच्छितवै'' इत्यस्य क्रतुप्रकरणे पाठात्। क्रतुप्रयोगाद्बहिस्तु अपशब्दं प्रयुञ्जानो न दुष्यति। एवं हि श्रूयते – ''यर्वाणस्तर्वाणो**

---

दृष्टानुमानात्तन्नाशानुमानमिति बोध्यम्। **कूपं खनतीति विग्रहे कर्मण्यणीति।** इति कृत्प्रत्ययविग्रहे ण्वुलोऽपवादे **कर्मण्यणि**त्यणीत्यर्थः। यतो ण्वुलतः समासे आह। **नित्येति। उपपदमतिङ्** (२-२-१९) इत्यस्याप्राप्तेरिति भावः। ष्वुना सरूपेणेति पाठः। इति विशेषविहितष्वुना सरूपेणेत्यर्थः। प्राग्वदत्र नेति सूचनाय विशेषणम्। ष्वुना वासरूपेणेत्यपपाठः। तथा च कूपखनक इति स्यादिति भावः। अग्रिमविचाराय पूर्वं फलितमुपसंहरति। **तस्मादिति।** सर्वथापि अपशब्दज्ञानादेरधर्मसाधनत्वेन, तदसाधनत्वे च। नन्वेवं सर्वेषां सदा प्रत्यवायापत्तिरत आह। **तत्रेदमिति।** गाव्यादिप्रयोगविषय इत्यर्थः। वायं = तत्प्रयोगजन्यः प्रत्यवायः। इत्यस्य = इत्यादेः। तेन नानृतमित्यादेः। **क्रत्विति।** ज्योतिष्टोम इत्यर्थः। उभयाकाङ्क्षा प्रकरणम्। **न दुष्यतीति।** तन्निषेधाप्रवृत्तेः। नानृतमित्यनारभ्याधीतनिषेधस्त्वर्थानृतमात्रविषयक इति भावः। तत्र श्रुतिं प्रमाणयति। **एवं हीति।** यत एवमित्यर्थः। आदिना **विदितवेदितव्या अधिगतयाथातथ्या** इत्यादि। ननु लौकिकसन्निकर्षेण धर्मस्याप्रत्यक्षत्वमिति कथं तत्वं तेषामत आह। **योगजेति।** अलौकिकसन्निकर्षेणेत्यर्थः। साक्षात्कृतधर्मा इत्यत्र त्रिपदबहुव्रीहौ केवलपूर्वपदत्वाभावादनिच् न। द्विपदबहुव्रीहौ प्रत्यक्षधर्माण इत्यत्र स इति बोध्यम्। वस्तुतस्त्वस्य योगिलौकिकप्रत्यक्षेण सर्वं विदितवन्त इति कैयटीयव्याख्यानं बोध्यम्। **परावरज्ञाः** विद्याऽविद्याप्रविभागज्ञाः। विदितवेदितव्या इत्यनेन श्रवणमनननिदिध्यासनसम्पदुक्ता। अधिगतयाथातथ्या इत्यनेन साक्षात्कार उक्तः। याथातथ्ये स्वार्थे ष्यञ्। वेदितव्यस्य यद्यथातथारूपसत्यस्वरूपं शुद्धचिदानन्दरूपं तदधिगतं प्रत्यक्षेण प्राप्तं यैरित्यर्थः। **अत्रेति।** उक्तायामिति शेषः। श्रुतिस्थे प्रयुञ्जत इत्यत्र वर्तमानसमीपे भूते लडित्यभिप्रेत्याह। **त्यूचुरिति। याज्ञे कर्मणीति।** अनेन तत्वज्ञानामपि कर्माधिकारं सूचयति। पुनः तु। श्रुतिस्थे नापभाषन्त इत्यत्राप्युक्तैव रीतिरित्याशयेनाह। **प्रयुक्तेति।** अत एव लेभिर इत्यर्थसङ्गतिः। अत एव च तन्नामानो बभूवुरिति भाष्ये उक्तम्। तेन = तथावचनेन। **यर्वाणस्तर्वाण इति।** यतस्ते एवं प्रयुक्तवन्तोऽतस्ते यर्वाणस्तर्वाणसिति सकारान्ततदप-

**नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परावरज्ञाः'' इति। प्रत्यक्षधर्माणो योगजधर्मबलेन साक्षात्कृतधर्माः। अत्रायं श्रुतेराशयः – योगिन एते विरक्त्यतिशयाल्लौकिकेष्वर्थेष्वा-ग्रहविरहेण यथा तथास्माकं भवत्विति विवक्षवो यद्वानस्तद्वान इति वक्तव्ये यर्वाणस्तर्वाण इत्यूचुः। याज्ञे कर्मणि पुनः साधूनेव प्रयुक्तवन्तस्तेन यर्वाणस्तर्वाण इत्येवंरूपामेव संज्ञां मुनयो लेभिर इति। भट्टाश्चाहुः –**

> **स्त्र्युपायमांसभक्षादिपुरुषार्थमपि श्रितः।**
> **प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात्॥ इति। (तन्त्र.वा.पृ.सं. २२३)**

**अपरे त्वाहुः। क्रतोर्बहिः प्रयोगेऽपि पुरुषः प्रत्यवैतीति। तेषामयमाशयः –**

---

शब्दरूपबालककृतामुपहासपरां संज्ञामेवेत्यर्थः। एवेन प्रत्यवायनिरासः। **लेभिर इति।** दोषसत्वे तु तथोक्तेरसम्भवेन श्रुतौ तथाऽऽख्यानासङ्गतिरिति भावः। अत्र केचित्। णान्ताज्जसि यवार्णस्तर्वाणो नामेति प्रयुक्तम्। अत एव रुत्वोत्वादि, बभूवुरित्यनेन सामानाधिकरण्यं च। प्रकृति-प्रत्यययोरुभयोरपि शास्त्रविषयत्वे एव साधुत्वं, नत्वन्यतरस्य। गगरीत्यादि च घट इति पदस्यैवापभ्रंश इति न ततः सुः। गगरीमित्यादि प्रयुञ्जते चेत्याहुः। **परे तु** 'साध्वनुशासनेऽत्र शास्त्रे' इति भाष्योक्तेरर्थवत्वेन साधूनामेव संज्ञाविधावुद्देश्यत्वमिति नासाधुषु प्रातिपदिकसंज्ञा। यर्वाणस्तर्वाण इत्यादौ सुबप्यसाधुरेव। एवञ्च भाषानुसारेण क्रियमाणनामोत्तरविभक्तिरप्यसाधु-रित्याहुः। इतिराशयसमाप्तौ। एवं श्रुतिसिद्धेऽर्थे भट्टोक्तिमपि प्रमाणयति। **भट्टाश्चेति।** स्त्र्युपायः स्त्रीगमनम्। इणो घञि रूपम्। स्त्र्युपायमांसभक्षादिरूपो यः पुरुषार्थस्तं समाश्रितोऽपि, प्रतिषेधः प्रकरणाश्रयात् क्रतोरङ्गमिष्ट इत्यर्थः। तस्य तदाश्रितत्वे निषेधस्यापि तदाश्रितत्वम्। अयं च निर्विसर्गपाठेऽर्थः। सविसर्गपाठे तु मांसभक्षादिस्तद्विषयक इत्याद्यर्थो बोध्यः, अविरोधात्। विरोधे एव बलाबलचिन्ताप्रवृत्तेरिति भावः। अत्रेदं बोध्यम्। योऽपि याज्ञे कर्मणि निषेधस्सोऽपि तदङ्गभूतसङ्कल्पोहादावेव। तेऽसुरा इति श्रुतौ हेलयो नश्यध्वमित्यूह एवेति स्पष्टं [1]**मञ्जूषाया**मिति।

## १.८ सूक्तिरत्नाकरमतनिरूपणं - परीक्षणं च

[2]**नारायणा**द्यनुरोधेनाह। **अपरे त्वाहुरिति।** प्रयोगेऽपीत्यपिस्तदन्तःप्रयोगसमुच्चायकः। इतिरेतन्मतसमाप्तौ। ननु प्राक् तत्र तदभावस्य प्रतिपादनात्कथमिदमत आह। **तेषामिति।**

---

१. ल.म.पृ.सं. ८६ (अपभ्रंशवाचकत्वप्रकरणे) २. सू.रत्न.पृ.सं. ८९।

**''नानृतं वदेत्'' इत्यनारभ्याधीतः पुरुषार्थोऽपि निषेधस्तावदस्तीति निर्विवादम्। तत्र निषेध्यमनृतं द्विधा – शब्दानृतमर्थानृतं चेति। शब्दस्यार्थस्य वा विपरीतप्रतिपत्ति-हेतुभूतमुच्चारणमनृतवदनम्। एवञ्च यथार्थानृतं वदतः प्रत्यवायस्तथा शाब्दानृतमपीति तुल्यम्। क्रतुमध्ये पुनरपभाषणे पुरुषोऽपि प्रत्यवैति क्रतुरपि विगुण इति वचनद्वयबलात्सिध्यतीति दिक्। यथा च प्रयोगे साधूनां नियमस्तथा साधुत्वज्ञानेऽपि व्याकरणस्य नियम एवेत्यवधेयं, ''व्याकृता वागुद्यते'' इति प्रागुक्तश्रुतेः। व्याकृता व्याकरणसंस्कृतेति हि तदर्थः।**

---

**अनारभ्याधीतः** कस्यचित्प्रकरणेऽपठितः उपनयनकाले वट्युपदेशाय पठितः स्मार्त्त इति बोध्यम्। अत एव पुरुषार्थः। अपिना तादृशोऽप्यस्तीति सूच्यते। तत्र = तादृशनिषेधवाक्ये[1]। उभयोः स्वरूपं सूचयन् अनृतवदनपदार्थमाह। **शब्दस्येति। एवञ्चा**नृतद्वैविध्ये च। नन्वेवं तर्हि क्रतुतो बहिर्वैलक्षण्यं किमत आह। **क्रतुमध्य इति।** पुनस्त्वर्थे । **वचनद्वयेति।** नानृतमित्युभयत्र पठितवचनद्वयबलादित्यर्थः। सिध्यतीतीति पाठः। **दिगिति।** तदर्थस्तु अनारभ्याधीतः स्मार्त्तो निषेधोऽर्थानृतपर एव। प्रत्यक्षधर्माण इत्येतद्भाष्यस्वरसात्। तद्भाष्यादेव दर्शपूर्णमासप्रकरणपठित-स्योभयनिषेधकत्वं, तेऽसुरा इत्यादिभाष्योक्तक्रतुप्रकरणपठितश्रुतेश्च। अत एव शिष्टा व्यवहारकाले स्वदेशभाषया व्यवहारन्ते न प्रत्यवायं मन्यन्त इति केचित्। परे तु अथ ब्रह्मचारिणो व्रतमित्युपक्रम्य 'नेक्षेतोद्यतमादित्य'मितिवदस्यापि पाठात्तत्तत्सङ्कल्पपरम्। द्वितीयं तु संयोगान्तरात्क्रतुप्रकरण-पाठाद्धेतोः प्रक्रमाभावादनुवादफलाभावादुक्तप्रयोजनसम्भवाच्च प्रतिषेधविधायकमेव। अत एव ब्रह्मचारिप्रकरणे :– ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन्।

मधुमांसाञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम्।

भास्करालोकनाश्लीलपरिवादादि वर्जयेत्। इति।

[2]याज्ञवल्क्य इत्याहुः। सर्वथापीदमपरेत्वित्यादिना **नारायणा**नुरोधेनोक्तं मतमयुक्तमिति स्पष्टं चेदं **मञ्जूषायाम्।** वक्ष्यमाणविवारस्य सङ्गतिं दर्शयन्नुपसंहरति। **यथा चेति। साधूनां नियम इति।** साधव एव प्रयोक्तव्या नासाधव इत्येवं **सिद्धे शब्दार्थे**ति वार्तिकेन प्रागुक्त इत्यर्थः।

---

१. तादृशनिषेधे वाक्ये इति क ख पाठः।

२. याज्ञ.स्मृ.पृं.सं. १० (नाग् पब्लिशर्स्)
आचाराध्याये ब्रह्मचारिप्रकरणे श्लो.सं. ३२-३३।

**व्याकरणशब्दश्च योगरूढ्या लक्ष्यलक्षणसमुदायपरः सूत्रमात्रपरो वेति पक्षद्वयमपि भाष्ये स्थितम्। तत्राद्ये पक्षे सूत्रमात्रमधीयाने वैयाकरणशब्दप्रयोगो भाक्तः। समुदायवाचका हि शब्दाः क्वचिदवयवेपि प्रयुज्यन्ते। यथा पूर्वे पञ्चालाः, उत्तरे पञ्चालाः, इति। द्वितीयपक्षे तु व्याकरणस्य सूत्रमिति प्रयोगो 'राहोः शिरः' इतिवन्नेयः। अष्टाध्याय्या एकदेशः सूत्रमित्यवयवावयविभावे षष्ठीति वाऽस्तु। अस्य वनस्यायं वृक्ष इत्यादिवत्। न चैवमपि सूत्रमात्राच्छब्दाप्रतिपत्तेर्नियमानुपपत्तिः, पदच्छेदविग्रहयोजना-**

---

**व्याकरणस्येति।** व्याकरणजन्यमेव साधुत्वज्ञानमदृष्टाय न कोशादिजन्यमित्येवं रूप इत्यर्थः। तदपि वेदाङ्गत्वात्पाणिनीयमेवेत्यपि बोध्यम्। **व्याकृतेति।** विपरीतव्यावृत्तिः। सदृशसङ्ग्रहश्च व्याकृतिरिति भावः। तदाह। **व्याकरणेति।** हि यतः।

## १.९ व्याकरणाधिकरणनिरूपणम्

तमेव विचारमाह। **व्याकरणेति।** व्याक्रियतेऽनेनेति योगरूढिः, पाणिनीयेऽत्र व्याकृतिरुक्तैवे। **सूत्रमात्रेति।** अष्टाध्यायीमात्रेत्यर्थः। मात्रपदेन लक्ष्यनिरासः, प्रत्येकं तु योगव्यवहार इति भावः। एवमग्रेऽपि सर्वत्र। तत्र = तयोर्मध्ये। भाक्तः = गौणः। तत्र हेतुमाह। **समुदायवाचका हीति।** हि यतः अवयवे समुदायधर्मारोपेणेति भावः। सामान्य-विशेषभावात्सहप्रयोगानुपपत्तिरिति शङ्कैव नेत्याशयेनाह। **व्याकरणेति।** द्वाभ्यामष्टाध्याय्येवोच्यत इति भावः। **राहोः शिर इति।** अनेकावस्थायुक्तं शिरो राहुशब्दार्थः यत्किञ्चिदेकावस्थायुक्तं तत् शिरशब्दार्थ इति तस्य स अवयव इति यथा तथा अनेकावस्थायुक्तं तस्य व्याकृति-क्रियाकरणावस्थाविशिष्टमवयव इति तदुपपत्तिरिति भावः। ईदृशव्यपदेशिवद्भावविषयेऽप्येवमेव। तथा योगशास्त्रे **पतञ्जल्यु**क्तेरिति परे। ननु राहोः इति वन्मात्रावस्थाकृतो भेदोऽवस्थायाश्चेतनधर्मत्वात्। किञ्च गत्यन्तरसम्भवेऽगतिकगतितदाश्रयण-मयुक्तमत आह। **अष्टेति।** व्याकरणशब्देनाष्टाध्याय्यत्मकं सूत्रसमूह उच्यते। सूत्रपदेन त्वत्र केवलं योग एवोच्यत इति भावः। तदेव दृष्टान्तेनाह। **अस्येति।** द्वितीयपक्षे एव शङ्कते। **न चैवमपीति।** प्रागुक्तदोषवारणेऽपीत्यर्थः। **नियमेति।** उक्तद्वितीयनियमेत्यर्थः। **पदच्छेदेति।** तथा चेदमेव द्वारमित्येतत् द्वारा ततस्तत्प्रतिपत्तेस्तदुपपत्तिरिति भावः। आदिना आक्षेपसमाधानादिग्रहणम्। अत

---

१. परे = भाष्यतत्वविदो नागेशादयः। मञ्जूषायां बौद्धार्थस्य वाच्यत्वनिरूपणे। पृ.सं. ३७६।

**दिभिः सूत्रार्थस्यैवाभिव्यञ्जनात्। अत एव ह्युत्सूत्रमुच्यमानमप्युपेक्ष्यते। यत्रैव तु सूत्रस्य तात्पर्यलेशोऽप्यस्ति तत्तदेव तु गृह्यते। तदुक्तम् —**

**सूत्रेष्वेव हि तत्सर्वं यद् वृत्तौ यच्च वार्त्तिके। इति।**
**अत एव बहुलग्रहणादिकं सार्थकमिति दिक्॥**

**नन्वेवं किं वर्णोपदेशेन ? न हि तद्बलेन कस्यचिच्छब्दस्य साधुत्वमवगम्यते। न च कलध्मातादिदोषरहितवर्णस्वरूपप्रतिपत्तिरेव तत्फलमिति वाच्यं, लोकत एवाविप्लुतवर्णप्रतीतेरवश्यं वाच्यत्वात्। अन्यथा प्लुतादिपाठस्यापीह कर्त्तव्यतापत्तेः। तदुक्तम् – ''इष्टबुद्ध्यर्थश्चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः'' इति।**

---

एव = तैः सूत्रार्थप्रकाशनादेव। हि यतः। उत्सूत्रं = अतिक्रान्तसूत्रं। उपेक्ष्यते = त्यज्यते। **यत्रैवेति।** यत्र यत्रैवेत्यर्थः। अत एवाग्रे वीप्सासङ्गतिः। तुरुक्तव्यवच्छेदे। अपिना सम्पूर्णतात्पर्यादिमतः समुच्चयः। **तत्तदेवेति।** एवेनोत्सूत्रव्यावृत्तिः। **तदुक्तमिति।** प्राचीनैरिति शेषः। अत एव = तात्पर्यलेशादिमत एव ग्रहणादेव। आदिना इतिशब्दयोगे विभागादिसंग्रहः। **सार्थकमिति।** तात्पर्यग्राहकत्वादिति भावः। **दिगिति।** तदर्थस्तु यद्यपि भाष्ये पक्षद्वयमपि समर्थितमत्रापि तथैवोक्तम्, तथाप्यल्पसमाधेयत्वादाद्यपक्ष एव युक्तः। व्याकृतिस्तु प्रागुक्तैवेति न दोष इति।

## १.१० वर्णोपदेशाधिकरणनिरूपणम्

ननु लोकप्रसिद्धमातृकापाठेनैव वर्णज्ञानसम्भवान्माहेश्वरो वर्णसमाम्नायः किमर्थमित्याशये-नाशङ्कते। **नन्वेवमित्यादि। एवं** उक्तरीत्या व्याकरणत एव साधुशब्दप्रतिपत्तौ, **वर्णोपदेशेन** पाणितले ढक्कानिनदाद्वारा महादेवकृतेन। ननु साधुत्वान्वाख्यानं तत्फलमत आह। **न हीति। तद्बलेन** तत्सहकारेण। आदिना एणीकृताम्बूकृताऽर्धकग्रस्तादयः। एवमग्रेऽपि। एवः प्रसिद्धौ। तत्फलं = वर्णोपदेशफलम्। **लोकत इति।** तत्प्रसिद्धमातृकापाठत एवेत्यर्थः। **अविप्लुतेति।** निर्दुष्टेत्यर्थः। आवश्यकत्वमेवाह। **अन्यथेति।** लोकप्रसिद्धमातृकापाठतस्तदनङ्गीकारे इत्यर्थः। **पीह** वर्णसमाम्नाये। **तदुक्तमिति।** वार्तिककृतेति शेषः। एवमग्रेऽपि। **इष्टेति।** इष्टानां निर्दुष्टानां वर्णानां बोधनार्थमित्यर्थः। तेषां लोकतः सिद्धौ तु दोषरहितानामपि तत एव सिद्धेरुपदेश-वैयर्थ्यापत्तिरिति भावः। नन्वन्यतमस्य पाठात् द्वयोस्तत्वे प्रतिपाद्ये किं वार्तिके त्रयाणामुल्लेखे

**एकश्रुत्या सूत्रपाठादुदात्तादिस्वरत्रयस्यापि कर्त्तव्यः पाठ इत्युक्तम्। त्रैस्वर्येण पाठे हि अन्यतमस्य उच्चारणादेव सिद्धौ द्वयोरेव कर्त्तव्यतां ब्रूयात् । अत एव च लोके त्रैस्वर्यमेकश्रुत्या सह विकल्प्यत इति ज्ञाप्यते। एतच्च "विभाषा छन्दसि" इत्यत्र स्फुटीकरिष्यामः। ननु निर्देशस्य जातिपरत्वात्प्लुतादिसंग्रहः सेत्स्यतीति चेत् ? न, संवृतकलप्रभृतीनामपि संग्रहापत्तेः। तदुक्तम् "-आकृत्युपदेशात् सिद्धमिति चेत्संवृतादीनां प्रतिषेधः" इति। तत्र ह्रस्वस्य अवर्णस्य संवृतगुणकत्वेऽपि तदितरेषामचां संवृतत्वं दोषः। आदिशब्दात्कलः। स च स्वोचितस्थानभ्रष्टः। तथा श्वासभूयिष्ठतया ह्रस्वोऽपि दीर्घवल्लक्ष्यमाणो ध्मातः। एवं दीर्घेऽपि ह्रस्ववत्कालसंकोचेनोच्यमानोऽर्धकः। एवं करणादिभ्रंशादपि बहवो दोषाः शिक्षाप्रातिशाख्यादिषु प्रसिद्धाः। तत्तद्दोषविशिष्टानामपि अत्वादिजात्याक्रान्तत्वाज्जातिपरनिर्देशपक्षे तेष्वतिव्याप्तिरिति स्थितम्। न च गर्गादिबिदादिपाठस्य तन्त्रेणोभयार्थतया वर्णशुद्धिलाभः, अपठितेषु प्रातिपदिकेषु तथाप्यगतेः।**

**स्यादेतत्, सर्वा अज्व्यक्तयो हल्व्यक्तयश्च शास्त्रान्ते शुद्धाः पठिष्यन्ते "अ अ"**

---

बीजमत आह। **एकेति।** हिस्त्वर्थे । **अत एव चेति** = वार्तिकवचनेनैव च। ज्ञायत इत्यत्रान्वयः। अन्यथोक्तरीत्या तथोक्तिरफलेति स्पष्टमेवेति भावः। इदं च [१]**नारायणा**द्यनुरोधेन। वस्तुतश्चिन्त्यमिदम्। यतस्त्रैस्वर्येण पाठेऽपि अन्यतमपाठेऽन्ययोः कर्तव्यत्वाभिप्रायेण सर्वेषां ग्रहणमिति परे। नन्वेवमपि सूत्रात्कथमिदं लब्धमत आह। **एतच्चेति।** तद्विकल्पनं चेत्यर्थः। **निर्देशस्य** अ ईत्यादिनिर्देशस्य। **संवृतेति।** दुष्टानामपीत्यर्थः। ननु संवृतत्वस्य ह्रस्वावर्णगुणत्वाददोषत्वेन कथं तत्प्रतिषेधोक्तिरत आह। **तत्रेति।** सकलानामचां मध्ये इत्यर्थः। इतरेषां आकारादीनां। **आदीति।** वार्तिके गृह्यत इति शेषः। तल्लक्षणमाह। **स चेति।** कलश्चेत्यर्थः। द्वितीयं तद्ग्राह्यं सलक्षणमाह। **तथेति।** तृतीयं तादृशमाह। **एवमिति।** उपसंहरति। **एवमिति।** करणादिभ्रंशात् = प्रयत्नादिभ्रंशात्। वार्तिकतात्पर्यमाह। **तत्तदिति। गर्गादीति।** संवृतादिदोषरहितानामेव तत्र पाठादिति भावः। **उभयेति।** वर्णशुद्धिप्रत्ययकरणरूपेत्यर्थः। शिवोक्तलघुभूतप्रकारतोऽपि लघुतरप्रकारेण भगवान्।

एवं पर्यवसितमेकं दोषमुद्धर्तुमाह। **स्यादेतदिति।** तत्र पाठमात्रे दृष्टान्तमाह। **अअ इति**

---

१. सू.रत्न.पृ.सं. ९४।

**इतिवत्। न चैवं गौरवं, तद्बलेन सर्वेषामनुबन्धनां प्रत्याख्यानात्। इत्संज्ञालोपयोरपि त्यागात्। तथा हि, शीङ् धातोर्ङकारं परित्यक्ष्यामः। ईकारं च कलं पठिष्यामः। ङित आत्मनेपदमित्यस्य स्थाने कलादात्मनेपदमिति पठिष्यामः। कलश्च प्रक्रियादशायामेव यथा ङकारः। प्रयोगे तु शुद्ध एव। प्रत्यापत्तेः शास्त्रान्ते करणमपि शास्त्रीयसकलकार्यं प्रत्यसिद्धतालाभाय। एवञ्च प्रक्रियायां दोषस्य कलादेराश्रयणेऽपि परिनिष्ठितरूपे न कश्चिद्दोषः। यथा यथान्यासपक्षेऽपि अकारस्य विवृतता प्रक्रियामात्रविषया न तु प्रयोगसमवायिनी तद्वदिह पक्षे कलादयोपीति न कश्चिद्विशेषः। धर्मिकल्पनात इति न्यायश्चेह बोध्यः। ङकारादयो हि धर्मिण एव त्वया पाठ्याः। मया तु उभयपठनीयस्य ईकारस्य कलत्वमात्रं कल्प्यमिति। नन्वस्मिन्पक्षे ''स्वरितञितः'' इत्यत्र कथं कार्यमिति चेत्? ''ध्मातात्कर्त्रभिप्राये'' इति। एवम् ''आद्यन्तौ टकितौ'' इत्यत्र ''आद्यन्तौ कलध्मातौ'' इति। इडाद्यागमाश्च निरनुबन्धाः कलाः पाठ्याः, आनुगादयो ध्माताः। डुकृञित्यस्य स्थाने कृ इति द्विदोषं पाठ्यम्। ''आदिरन्त्येन'' इत्यत्रापि ''आदिकलौ सह'' इत्युक्त्वा 'अ उ' इत्यादिकाः संज्ञाः करिष्यन्ते। कलेनेति तृतीयानिर्देशे सति तु अप्राधान्यात्सिद्धान्त इव चरमवर्णस्य संज्ञा न स्यात्। ''द्रलोपे'' इत्यादौ अण इत्यपनीय अ ओरिति करिष्यते। स्वरसन्धिस्त्वसन्देहाय न करिष्यते।**

---

**वदिति।** चैवं तत्र सर्वपाठे। तद्बलेन = तत्पाठमाश्रित्य। तथा च ततो लाघवमेवेति भावः। **प्रत्यापत्तेरिति।** शास्त्रान्ते शुद्धव्यक्तिपाठादिति भावः। नन्वेवं तर्ह्यादावेव तथा पठ्यतामत आह। **शास्त्रान्त इति।** एवञ्च शास्त्रान्ते तथाकरणे च। उक्तमेव सदृष्टान्तमाह। **यथा यथान्यासेति।** अइउणित्यादिरूपे आदौ पाठ इत्यर्थः। पक्षेऽपीति अपिर्व्युत्क्रमे। तस्य विवृततापीत्यर्थः। अत एवाग्रेऽप्यपिः, मिथः समुच्चायकौ तौ। **न्यायश्चेह बोध्य इति।** सोऽपीह पक्षे गमकतयाऽनुसन्धेय इत्यर्थः। तं योजयति। **ङकारेति।** हि यतः। इतिः तत्समाप्तौ। **प्राय इति।** कार्यमित्यस्यानुषङ्गः। एवमग्रेऽपि। **कलाः** कलत्वदोषविशिष्टाः। **ध्माता इति।** पाठ्या इत्यस्यानुषङ्गः। **द्विदोषमिति।** एकोऽर्द्धकोऽन्यो ध्मातः, एवं वार्धकाक्रिरिति पाठ्यम्। ध्मातफलं तूक्तमेवेति भावः। एवं द्वितोग्रस्तात्पठित्वा ग्रस्तादथुजिति पाठ्यमिति बोध्यम्। **अ उ इति।** अण्स्थानीयेयं संज्ञा। न च 'आदिः कलैः सह' इति कैयटोक्त एव कुतो न न्यास उक्तो, **नारायणो**क्तः किमित्युक्तोऽत आह। **कलेनेतीति।** वस्तुतोऽत्र पक्षे तथासूत्रपाठेऽपि न दोष इति प्रारम्भे प्रपञ्चितमिति कैयटो युक्त एवेति तदनुरोधेनोक्तिः चिन्त्यमिदमिति बोध्यम्। **अ ओरितीति** षष्ट्यन्तम्। नन्वेवं पररूपाद्यापत्तिरत

**तस्मात्सर्वमनुबन्धकार्यादिकङ्कलादिभिरेव सिध्यतीति चेत् ? सत्यम्, सिध्यत्येवम्। अपाणिनीयं तु भवतीति चेत् ? अत्रोच्यते, इष्टसिद्ध्यर्थो वर्णोपदेशः। एवञ्चाकृत्युपदेशादेव उदात्तादिसिद्धिमङ्गीकृत्य कलादिष्वतिप्रसङ्ग इत्थं परिहार्यः।**

**आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः।**
**उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः।। इति। (म.भा.पृ.सं. ८५)**

**यत्तु अग्रहणेषु प्रातिपदिकेषु प्राप्ता एवेति। तन्न, त्वयापि प्रतिपदपाठस्यावश्याश्रयणीयत्वात्। अन्यथा 'शशः' इत्यत्र 'षषः' इत्यपि स्यात्, मञ्चके 'मञ्जक' इति, पलाशे 'पलाष' इति। स्यादेतत्। स्वरवर्णानुपूर्वीनिर्णयाय यदि प्रतिपदपाठस्तर्हि कलादिनिवृत्तिरपि तत एवास्तु। उणादिसूत्रात्पृषोदरादिसूत्राद्वा साधुत्वाभ्यनुज्ञानं विशेषावधारणं तु निघण्ट्वादिनेति चेत् ? कलादिनिवृत्तिरपि शिक्षादिग्रन्थेनास्तु। सत्यम्, आनुषङ्गिकी कलादिनिवृत्तिः। वर्णोपदेशस्य मुख्यं फलं तु**

---

आह। **स्वरेति।** स्यादेतदिति पूर्वपक्षमुपसंहरति। **तस्मादिति।** एवञ्च अइउणित्यादिवर्णसमाम्नायो न पाठ्यः, सर्वपाठे न कस्याप्यसंग्रहः, नात्र पक्षे शुद्धपाठेन दोषनिवृत्तिरपीति भावः। तदाह। **कलादिभिरेवेति। अपाणिनीयमिति।** वर्णसमाम्नायसमर्थनाय प्रवृत्तस्य प्रसक्तैकदोषपरिहाराय सकलशास्त्रस्य व्याख्यानसापेक्षगुरुप्रकारेणान्यथाकरणे **वृश्चिकभियेत्यादिन्याय** आपततीति भावः। एवं स्यादेतदिति शङ्कानिरासे वर्णोपदेशेन किमिति मूलशङ्कां परम्परयाऽवशिष्टां स समाधत्ते। **अत्रोच्यत इति।** इष्टबुद्ध्यर्थ इति पाठः। सिद्ध्यर्थ इति पाठेऽप्ययमेवार्थः। **एवञ्च** वर्णोपदेशस्येष्टबुद्ध्यर्थत्वे च। उदात्तादिसिद्धिं = तद्ग्रहणसिद्धिं। **इत्थं** वक्ष्यमाणप्रकारेण। तमेवाह। **आगमाश्चेति।** एवञ्च कलादिदोषाणां न क्वापि प्रसक्तिरिति भावः। **अग्रहणेष्विति।** कार्यविधावकृतानुवादेष्वित्यर्थः। **प्राप्ता एवेतीति।** कलादय इति भावः। **त्वयापीति।** ग्रहणप्रातिपदिकेषु गर्गादिपाठाद्वर्णशुद्धिं कुर्वताऽग्रहणप्रातिपदिकार्थं वचनमङ्गीकुर्वतापीत्यर्थः। व्यञ्जनादिप्रयुक्तदोषनिरासायेति भावः। अपि स्यादित्यस्याग्रेऽप्यनुषङ्गः। तस्मात्प्रतिपदपाठेनैव निर्वाह इति न दोष इति स्थितम्। तत्र शङ्कते। **स्यादेतदिति। स्वरेति।** उदात्तादीत्यर्थः। तत एव = प्रतिपदपाठादेव। प्रतिपदपाठस्याशक्यत्वस्य प्रतिपादितत्वेन दुर्वचत्वेन तदभावेनेतोऽपि लघुभूतं पक्षमाह। **उणेति।** अथेत्यादिः। वाशब्दः समुच्चये। यद्वा वाशब्दः पक्षान्तरे। अत एव शेषपूरणं न। समुच्चयधीस्तु गामश्वमिति वत्। **आनुषङ्गिकीति।** एवञ्च संवृतादीनां प्रतिषेध

**प्रत्याहारनिष्पत्तिः। प्रत्याहारशब्दस्तु अणादिसंज्ञापरः प्रत्याह्रियन्ते वर्णा एष्विति व्युत्पत्तेः। न च ग्रहणकशास्त्रेण निष्पादितासु कारादिसंज्ञास्वतिप्रसक्तिः, योगरूढ्यभ्युपगमात्। तस्मादादिरन्त्येनेत्येतत्सूत्रसिद्धः। संज्ञाः प्रत्याहारशब्दवाच्यास्तन्निष्पत्तये च वर्णोपदेश इति स्थितम्।**

**इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमपादे प्रथममाह्निकं समाप्तम्॥ १ ॥**

---

इत्यस्मिन्प्रत्याख्याते इष्टबुद्ध्यर्थ इत्यपि प्रत्याख्यातप्रायमेव। तद् ध्वनयन्नाह। **वर्णोपेति।** ननु तस्य वर्णसमाम्नायपरत्वस्य **प्रत्याहारेऽनुबन्धाना**मिति वार्तिके दृष्टत्वात्कथमिदमत आह। **प्रत्येति।** तत्र तु तादर्थ्यात् ताच्छब्द्यमिति भावः। अत एव तुः प्रयुक्तः। **प्रत्येति।** संक्षिप्यन्त इत्यर्थः। **ग्रहणकशास्त्रेण** अणुदित्सूत्रेण। उपसंहरति। **तस्मादिति।** एवञ्चेष्टबुद्ध्यर्थत्वादिकमपि न वर्णोपदेशस्य मुख्यं फलमिति भावः। चस्त्वर्थे। तथा च लाघवेन शास्त्रप्रवृत्त्यर्थं वर्णोपदेश इति तत्वम्। **स्थितमिति।** भाष्यादाविति भावः।

**इति श्रीमन्महादेवसुतवेणीगर्भजपायगुण्डोपाख्यवैद्यनाथविरचितकौस्तुभव्याख्यायां प्रभाख्यायां [१]प्रथममाह्निकम्**

---

१. प्रथमाह्निकेऽन्ते - ग्रन्थसंख्या १३२१ श्रीसंवत् १८४६ डेहरवीनायक ग्राममण्डली इति क पाठे दृश्यते।

**अइउण्। संज्ञासूत्रमिदम् ''आदिरन्त्येन सहेता'' इत्यनेन सहैकवाक्यत्वात्। अइउणित्येषामादिरकारः अन्त्येन णकारादिना सहितः सन् आद्यन्ताभ्यामाक्षिप्तानां मध्यगानां स्वस्य च संज्ञेति हि वाक्यार्थः। अत्र अकारादीनां स्वरूपेण अनुकार्येण वा सतोप्यर्थवत्त्वस्याविवक्षितत्वात्प्रातिपदिकत्वं नेति 'गवित्ययमाह' इत्यादाविव विभक्तेरनुत्पत्तिः ''सुपां सुलुग्'' इति लुग्वा ''छन्दोवत्सूत्राणि'' इति भाष्यकारेष्ट्या**

---

# २. प्रत्याहाराह्निकम्

## २.१ माहेश्वरसूत्रे विभक्त्यनुत्पत्तिनिरूपणम्

**अइउण्।** सूत्राणामनेकविधत्वादाह। **संज्ञेति।** एवमग्रेऽपि। संज्ञिस्वरूपनिर्देशेऽपि भेदेन संज्ञास्वरूपानिर्देशेन क्रमबोधकत्वेन वाऽस्य केवलस्य तत्वासम्भवादाह। **आदिरिति।** तथा च वृत्तिपरिच्छेदकत्वेन तत्वम्। क्रमस्य संज्ञाद्वारैवोपयोगादिति भावः। एकवाक्यत्वे हेतुमाह। **अइउणिति।** [1]अणुसिद्ध्यर्थमाह। **णकारादिनेति।** नन्वाद्यन्तयोः संज्ञास्वरूपनिवेशेऽवशिष्टयोरेव संज्ञा स्यादत आह। **आद्यन्तेति।** अवयवत्वेन बोधकाद्यन्त्यपदाक्षिप्तानामाद्यादीनां सर्वेषामित्यर्थः। अन्त्यस्य मध्यानुबन्धानां च यथा न तथाऽन्यत्र स्पष्टम्। तत्फलितमाह। **मध्येति।** हिर्हेतौ। प्रत्येकं च वर्णेभ्यो विभक्तिशङ्कायामाह। **अत्रेति।** वर्णसमाम्नाय इत्यर्थः। पठितानामिति शेषः। तत्रादावननुकरणत्वे आह। **स्वरूपेणेति।** शब्दजन्यज्ञानविषयविशेषो हि शब्दस्यार्थः। एवञ्च सत्कार्यवादे बौद्धपदार्थाङ्गीकारेण ज्ञाने विषयस्य कारणत्वात्परस्पर्शोक्तरीत्या वा स्वरूपमपि स्वजन्यबोधविषयत्वेनार्थः। एतेनातीतादिस्थले विषयाभावात्कथं तस्य तत्र तत्व (मिति) चिन्त्यम्। स्वस्वजन्यबोधविषयस्य तत्वेऽतिप्रसङ्ग इत्यपास्तम्। पाणिनिरप्याह **स्वं रूपं शब्दस्याशब्दसंज्ञेति** भावः। प्राचामनुरोधेनानुकरणत्वपक्षेऽप्यनुकार्यानुकरणयोरभेदविवक्षापक्षे आह। **अनुकार्येण वेति।** अनुकार्यमर्थ इति स्पष्टमेव। **अविवक्षितत्वादिति।** एवं विद्यमानस्याप्यर्थवत्वस्यार्थवत्सूत्रेऽग्रहणादित्यर्थः। तत्र स्वरूपस्य श्रोत्रगृहीतस्यैव शाब्दबोधे भानोपपत्तौ न तत्र शक्तिः कल्प्या। अर्थवत्सूत्रे च वृत्त्याऽर्थबोधजनकत्वमर्थवत्वं विवक्षितं, न तु यथाकथञ्चित् अतिप्रसङ्गापत्तेः। 'अपदं न प्रयुञ्जीत' इति निषेधस्त्वनुकरणान्यविषयो परिनिष्ठितविषयो वा। प्रकृतिवदित्यातिदेशस्त्वनित्य इति भावः। भेदपक्षे आह। **सुपामिति।** ननु सुपामिति छन्दसि

---

१. अगादिसिद्ध्यर्थं इति ख पाठः।

**छन्दोगेषु व्याकरणसूत्रेष्वपि छान्दसकार्यातिदेशात् ''यूस्त्र्याख्यौ'' इति सूत्रे छन्दःप्रदेशेषु गौणमुख्यन्यायो न प्रवर्त्तते इति वक्ष्यमाणत्वाद्वा।**

**स्यादेतत्, स्वरसन्धिनेह भाव्यम्। तत्र अ इत्यत्र विभक्तेः रुत्वयत्वलोपेषु ''वृक्ष इह' इत्यादाविव लोपासिद्ध्या सन्धिर्नेति समाधानेऽपि इकारस्य ''इकोऽसवर्णे'' इति ऋकारस्य ''ऋत्यक'' इति प्रकृतिभावसम्भवेऽपि एदैतोरयायौ दुर्वारौ। यत्तु वर्णोपदेशकाले अजादिसंज्ञानामनिष्पादात्सन्धिर्नेति। तच्चिन्त्यं, वर्णोपदेशे इत्संज्ञायामच्प्रत्याहारे च निष्पन्ने प्रवर्त्तमानानां यणादीनां 'सुध्युपास्य' इत्यादौ तटस्थे इव उद्देश्यतावच्छेदकरुपाक्रान्ते वर्णोपदेशादावपि प्रवृत्तेरावश्यकत्वात् । अन्यथा तुल्यास्यप्रयत्नमित्यादौ सवर्णदीर्घो न स्यात्। तथाऽर्थवत्सूत्रान्तर्गतानां प्रातिपदिकत्वं,**

---

भवत्यत आह। **छन्दोवदिति।** अनतिप्रसङ्गायाह। **छन्दोगेष्विति।** अपिरत्र योज्यते। तदध्ययीत्यर्थः। **व्याकरणेति।** इष्टावुपस्थितत्वात्तेषामेव ग्रहणम्। तत्राप्येतान्येव सूत्राणीति भावः। अतिदेशो नापूर्वः किन्तु सूत्रसिद्धार्थकथनमेवेत्याशयेनाह। **यूस्त्र्येति।** अस्य वक्ष्यमाणेत्यत्रान्वयः। **न प्रेति।** तत्र स्वरितत्वप्रतिज्ञयेति भावः। वस्तुतस्तु इयमेवमानुपूर्वीका श्रुतिरेवेति प्रथमपक्षेणातत्वेऽपि छान्दसत्वादेव सुपामिति लुगिति बोध्यम्।

## २.२ माहेश्वरसूत्रे स्वरसन्ध्याक्षेपः - कैयटविमर्शश्च

नेह = वर्णसमाम्नाये। तत्र = तेषामचां मध्ये। यद्यपि विभक्तेरभावो लुग्वा प्रागुक्तः, तथाप्यकारांशे तत्सत्वेऽपि न दोष इति तृतीयं समाधिं सूचयितुमाह। **विभक्तेरिति। लोपेति।** यलोपासिद्ध्या आद्गुणो नेत्यर्थः। अत एव तदव्यवहितमियमाशङ्केति बोध्यम्। इकाराद्यंशे लुक्पक्षाशयेनाह। **पीकारेत्यादि।** उकारस्याप्राप्तेरेवाह। **ऋकारेति।** एवमग्रेऽपि। कैयटोक्तिं खण्डयति। **यत्त्वित्यादि।** तदा तदभावात्। निष्पन्ने इत्यस्य सर्वत्रान्वयः। अत एव चः। **तटस्थ इति।** संशयानास्पद इत्यर्थः। सर्वसिद्धलक्ष्यक[1] इति यावत्। **वर्णोपेति।** करणव्युत्पत्त्या वर्णसमाम्नायेत्यर्थः। अपिस्तस्यैव समुच्चायकः। आदित्यत्रास्वं सूचयन्नावश्यकत्वमाह। **अन्यथेति।** तदाक्रान्तेऽत्र प्रवृत्त्यभावे इत्यर्थः। सर्वोपप्लव इत्यत्रान्वयोऽस्य। दोषान्तराण्याह। **तथेति।** चः प्रातिपदिकत्वादिसमुच्चायकः। अत एव न स्यादिति चरमे सकृदुक्ताम्। शङ्कते। **स्वाध्येति।**

---

१. सर्वसिद्धलक्ष्यत्वके इति ख पाठः।

**''प्रत्ययः'' ''परश्च'' इत्यादौ सुप्रत्ययो, ''ङ्याप्प्रातिपदिकात्'' ''द्व्येकयोर्द्विवचनैकवचने'' ''बहुषु बहुवचनम्'' इत्यादौ तत्तद्विभक्तिः, ''ससजुषो'' इत्यत्र रुः, ''खरवसानयोः'' इति सूत्रे विसर्गश्च न स्यादिति सर्वोपप्लवः स्यात्। ''स्वाध्यायोऽध्येतव्यः'' इत्यस्य ''नेह नाना'' इत्यादिश्रुतेश्च स्वस्मिन्नपि यथा प्रवृत्तिस्तथा दीर्घादीनामपीति चेत् ? तुल्यं यणादावपि। नन्वेवं ग्रहणकशास्त्रमपि ''अणोप्रगृह्यस्य'' इत्यादौ तटस्थे इव स्वस्मिन्नपि प्रवर्त्तेत, ततश्च दीर्घाणामनणत्वेन सवर्णग्राहकत्वं नास्तीति सिद्धान्तोऽपि भज्येतेति चेत् ? न, वैषम्यात्। पदार्थसंसर्गो हि वाक्यार्थः। तद्बोधश्च पदार्थबोधोत्तरभावी। तथा च अण्शब्देन ये उपस्थितास्तेषां सवर्णग्राहकत्वं सूत्रार्थः। अण्शब्दश्च ''आदिरन्त्येन'' इति सूत्रेण अक्षरसमाम्नायपठितेषु संज्ञितेति इति तानेवात्रोपस्थापयति। तथा च अष्टादशानामपि अकारः संज्ञेति पर्यवसन्ने सूत्रान्तरेषु ''अस्य च्वौ'' इत्यादिषु अकारोऽष्टादशानामुपस्थापक इत्युचितं, न तु ग्रहणकसूत्रेपि एतद्वाक्यार्थबोधात्प्रागष्टादशस्वगृहीतशक्तिकत्वात्। न हि ''सिचि**

---

**त्यादिश्रुतेश्चेति।** अध्ययनविधेर्निषेधस्य चेत्यर्थः। अन्यथा सर्वस्य वेदस्य प्रयोजनवदर्थपर्यवसायित्वानापत्तिः द्वैतापत्तिश्चेति भावः। **यणादावपीति।** इदं कथनं यणादावपि तुल्यमित्यर्थः। तेषामपि स्वांगे वर्णोपदेशे च प्रवृत्तिसम्भव इति भावः। यणादेर्वारितत्वादुक्तमादाविति। तेनायादिपरिग्रहः। एवमग्रेऽपि। **एवं** उद्देश्यतावच्छेदकाक्रान्तत्वात्स्वस्मिन् स्वाङ्गे च तेषामन्यत्रेव प्रवृत्यङ्गीकारे। अपिस्तत्समुच्चायकः, द्वितीयाऽपिः स्वाङ्गसमुच्चायकः। इष्टपत्तावाह। **ततश्चेति।** अपिना दोषान्तरसमुच्चयः, तच्चेत्थं-दीर्घे हलामपि ग्रहणं स्यात्। तथा चाज्हल्प्रतिषेधे शकारप्रतिषेध इति वार्तिकोक्तदोषः। न च **नाज्झला**(१-१-१०)विति निषेधात् सवर्णत्वमेव न। स्वात्मनि स्वक्रियाविरोधात्। तद्वाक्यार्थबोधोत्तरमन्यत्र निषेधेऽपि स्ववाक्यार्थबोधात्प्राक् स्वघटकपदार्थोपस्थितिवेलायां स्ववाक्यार्थबोधरूपसावर्ण्याभावान्न तत्रेकारशकारयोस्तदभावबोधनम्। किञ्च दिशादिशब्दानां हलन्तानां नदीसंज्ञायामाडाद्यापत्तिः। यदि तु तद्वार्तिकरीत्या न, सिद्धान्तरीत्या **नाज्झला**विति निषेधात् द्वितीयदोषोऽपि नेत्युच्यते तर्हि आकारप्रश्लेषपरसिद्धान्तरीत्या अकः सवर्णे (पा०सू० ६-१-१०१) इत्यत्राच्पदानुवृत्तिरूपसिद्धान्तस्य चानेन समुच्चयः, तथा च तद्भङ्गापत्तिरपीति भावः। वैषम्यमुपपादयति। **पदार्थेति।** हि यतः, अग्रेऽस्यान्वयः। चस्त्वर्थे। एवमग्रेऽपि। **तथा चेति।** ततश्चेत्यर्थः। **सूत्रार्थ इति।** अणुदिदिति सूत्रार्थ इत्यर्थः। पठितेषु ह्रस्वादिसमुच्चायकः। **ग्रहणेति।** ग्राहकेत्यर्थः। **एतदिति।** ग्रहणकशास्त्रेत्यर्थः। **अगृहीतेति।** जनितबोधत्वाच्च

**वृद्धिः'' इत्यादावादैचामुपस्थापकोपि वृद्धिशब्दो ''वृद्धिरादैच्'' इति संज्ञासूत्रे तानुपस्थापयति। किन्तु स्वरूपमेव। संज्ञासूत्रे च सामानाधिकरण्यादादैचां वृद्धिशब्दवाच्यत्वावधारणे सूत्रान्तरेषु संज्ञिनामुपस्थितिर्निर्बाधेति दिक्।**

**तस्मादइउणित्यादौ स्वरसन्धिः प्राप्नोत्येवेति चेत् ? सत्यम्, संहिताविरहान्न यणादयः। अनित्या हि वाक्ये संहिता। उक्तञ्च –**

**संहितैकपदे नित्या नित्या धातूपसर्गयोः।**
**नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ।। इति।**

**समासस्य पृथग्ग्रहणं गोबलीवर्द्धन्यायेन, एकपद इत्यनेनैव तत्सङ्ग्रहसिद्धेः। इयं च प्राचां परिभाषा एकदेशानुमतिद्वारा संहिताधिकारेणैव ज्ञापिता। असंहितायां यणादि-**

---

न पुनर्बोध इति भावः। [1]उक्तमेव दृष्टान्तोक्त्या द्रढयति। **न हीति।** नन्वेवं व्युत्पत्तिविरोधाद्बाधाच्च भेदाभेदाभ्यामन्वयासम्भवात् कथं संज्ञासूत्रबोधः, कथं च तत्वमत आह। **संज्ञेति**। इदं चाग्रे सूत्रे स्फुटीभविष्यति। **नाज्झला**विति सूत्रभाष्यमप्युक्तार्थे गमकम्। तदाह। **दिगिति।** पूर्वपक्षमुपसंहरति। **तस्मादिति।** कैयटोक्तेरसाङ्गत्यादित्यर्थः।

## २.३. सिद्धान्तरीत्या स्वरसन्ध्यभावनिरूपणम् ।

विरहे हेतुमाह। **अनित्या हीति।** हि यतः। इदं समूलयति। **उक्तं चेति।** प्राचेति शेषः। **सा** संहिता। ननु पदसमूहस्यैव वाक्यत्वात्प्रकृतेऽर्थवत्वाविवक्षया विभक्त्यभावस्योक्तत्वेन प्रत्येकमपदत्वात्तत्समूहस्यावाक्यत्वमिति कथं तदभाव इति चेन्न विभक्तियोग्यत्वरूपविभक्त्यन्तत्वेनात्र पदत्वात्। विभक्त्यन्तपदघटकशब्दसजातीयघटितत्वात् अपदमित्यत्रेव तत्र पदशब्दस्य परिनिष्ठितपरत्वाच्च वाक्यत्वात् प्रागुक्तलुक्पक्षाभिप्रायेण वा योज्यम्। वस्तुतस्त्विति मते तु न काप्यनुपपत्तिरिति तत्वं बोध्यम्। एतेनोक्तरीत्या चिन्त्यमिदमित्यपास्तम्। **गोबलीवर्द्धेति।** ब्राह्मणवसिष्ठन्यायोपलक्षणमिदम्। एकदेशेति तुर्यपादोक्तार्थेत्यर्थः कथं ज्ञापिता, तत्राह। **असंहीति।** हि यतः। यदि तत्रापि सा नित्या स्यात्तर्हि व्यावर्त्याभावात्तदानर्थक्यं स्पष्टमेव। अत एव = वाक्ये संहिताया अनित्यत्वादेव। हे रोहिणीति पतिव्रतायाश्चन्द्रपत्नीं प्रत्युक्तिः। अत्र

---

१. उक्तामिति क पाठः।

**निवृत्त्यर्थो हि संहिताधिकारः। अत एव–**

**हे रोहिणि त्वमसि शीलवतीषु धन्या एनं निवारय पतिं सखि दुर्विनीतम्।**
**जालान्तरेण मम वासगृहं प्रविष्टः श्रोणीतटं स्पृशति किं कुलधर्म एषः॥**

**इत्यत्र धन्या एनमित्यस्य नासाधुता। अत एव आलङ्कारिकैश्च्युतसंस्कृतित्वापेक्षया पृथगेव विसंधिता नाम दोषान्तरङ्गणितम्। तच्चेहास्तीत्यन्यदेतत्। नन्वेवमप्यसंहितायां कालव्यवायादेव यणादेरप्राप्तौ किं संहिताधिकारेणेति चेत्? न, संहिताधिकारबहिर्भूतानां कालव्यवायेऽपि प्रवृत्तिं ज्ञापयितुं तदारम्भात्। तेन "अग्नाविष्णू इत्यग्ना विष्णू" इत्यादाववग्रहेऽप्यानङादयः, "अग्निमीळे" इत्यत्र पदविभागेऽपि निघातः, "ते नो रासन्ताम्" इत्यादौ नसादयश्च सिद्ध्यन्ति।**

---

जालान्तरेण वासगृहं प्रविष्टः मम श्रोणीतटं स्पृशति, किं कुलधर्मः अतः हे रोहिणि सखि दुर्विनीतमेनं पतिं निवारय, यतस्त्वं शीलवतीषु धन्याऽसीत्यन्वयः। अत एवैनादेशोपपत्तिरिति बोध्यम्। अत एव = असाधुत्वाभावादेव। **च्युतसंस्कृतित्वेति।** व्याकरणजसंस्कारशून्यत्वेत्यर्थः। असाधुत्वेति यावत्। विसन्धिता = सन्धिशून्यत्वं। **दोषान्तरं** तद्विशेषरूपम्। [१](**तच्चेहेति।** दोषान्तरमुक्तरूपे इत्यर्थः। अन्यदेतत् विचारान्तरं न तु प्रसक्तम्। असाधुत्वविचारस्यैव प्रक्रान्तत्वात्। ज्ञापकत्वविघटनायाचारितार्थ्यं) प्राचामनुरोधेन वक्तुं शङ्कते। **नन्वेवमपीति।** तेन तथा ज्ञापितेऽपीत्यर्थः। **तस्मिन् तस्मादिति** परिभाषाभ्यां विनिगमनाविरहात् वर्णकालाभ्यां व्यवाये यणादेरप्रवृत्तिसिद्धौ किं तत्र तन्निवर्तकाधिकारसूत्रेणेत्यर्थः। न ह्येकेनैकमेव ज्ञाप्यमिति नियमः, यावता विनाऽनुपपत्तिस्तावत्सर्वं ज्ञाप्यमिति सिद्धान्ताशयेन समाधत्ते। **संहितेति।** इदं च स्वस्मिन् चारितार्थ्यबललब्धार्थकथनं, न तु ज्ञाप्यकोटिप्रविष्टम्। तत्वासङ्गतेः। तस्मात् ज्ञाप्यं सामान्यमेव। अत एव उभयव्यवाय इति ज्ञापने निर्दिष्टपरिभाषानर्थक्यादाह। **कालेति।** अर्धमात्राधिक-कालेत्यर्थः। सिद्धान्वाख्यानाद्वैपरीत्यं न। तथा च कालव्यवधानाय तावत्साधुत्वं प्राप्तं निर्वत्यत इति भावः। अपिस्तद्व्यवायसमुच्चायकः। ज्ञापयितुं ज्ञापयितुमपि, तेनोक्तज्ञाप्यसमुच्चयः। तदारम्भात् = संहिताधिकारारम्भात्। यद्वा तत् ज्ञाप्यकोटिप्रविष्टमेव। उभयव्यवाय इति तु ज्ञापयितुमशक्यम्। द्वितीये फलाभावात्। अत एव वर्णव्यवाये इत्यपि न। तथा च तदभावे यणादीनामपि तत्

---

१. अत्र मैसूरुपुस्तके क पाठे 'तच्चेहेति' इत्यारभ्य 'ज्ञापकत्वविघटनायाचारितार्थ्यं' इत्यन्तः ( ) पाठः लेखकप्रमादात् नष्टः। IOL पुस्तके खपाठे तूपलभ्यते।

**नन्वेवं पुरः हितमित्यवग्रहे हितशब्दस्य स्वरितत्वं बह्वचैः पठ्यमानमसङ्गतं स्यात्, ''तयोर्य्वावचि'' (पा० सू० ८-२-१०८) इति संहिताधिकार आशास्त्रसमाप्तेरिति सिद्धान्तात्, स्वरितविधेश्च तदन्तर्भूतत्वात्। अत एव तैत्तिरीया अवग्रहे हितशब्दमनुदात्तं पठन्ति। अत एव बह्वचा अपि ''अग्निमीळे'' इत्यस्य पदविभागपाठे निघातमेव कुर्वन्ति न तु स्वरितमपीति चेत् ? सत्यम्, प्रातिशाख्ये विशेषविधानात्स्वरितसिद्धिः। उक्तं हि–**

**यथा सन्धीयमानानामनेकीभवतां स्वरः।**
**उपदिष्टस्तथा विद्यादक्षराणामवग्रहे ॥ इति। (ऋ.प्र. ३-२४-६४)**

---

बाह्यत्वेन तत्र प्राप्तप्रवृत्त्यभावाय सूत्रं स्वस्मिन् चरितार्थमिति भावः। तेनेत्यस्य सिद्ध्यन्तीत्यत्रान्वयः। **आनङेति।** अन्यथा मात्राकालेनावग्रहेणोक्तपदस्य व्यवधानात् 'देवताद्वन्द्वे च' इत्यस्याप्रवृत्तिप्रसङ्ग इति भावः। **विभागेऽपीति** । अत्रापि मात्राकालेनैव व्यवधानमिति **तिङतिङः** (८-१-२८) इत्यनुदात्तत्वमन्यथा न स्यादिति भावः। एवमग्रेऽपि। इत्यादौ पदविभागेऽपीत्यनुषज्यते। **एवं** तदधिकारबाह्यानामेव तत्रापि प्रवृत्त्यङ्गीकारे। **पुर इति।** अत्र तैत्तिरीयैर्वेष्टनाङ्गीकारेऽपि बह्वृचैर्नेति भावः। [1]**हिशब्देति।** तदिकारस्येत्यर्थः। चो व्युत्क्रमे। तदन्तर्भूतत्वाच्चेत्यर्थः। अत एव = स्वरितस्याप्राप्तत्वादेव। एवमग्रेऽपि। **निघातमेवेति।** ईळ इत्यस्येति शेषः। **न हि त्विति।** ईकारस्येति शेषः। एकारस्यैकश्रुतिसमुच्चायकोऽपिः। **प्रातीति।** आश्वलायनानामिति भावः। तदेवाह **उक्तं हीति।** सन्धिविषयाणां नानेकेऽनेके भवन्ति तथाभूतानामित्यर्थः[2]। अत्रेदं बोध्यम्। नन्वेवमप्येत्यारभ्यावग्रह इतीत्यन्तं यदुक्तं तत् प्राचामनुरोधेन। अर्धमात्राधिककालेन वर्णान्तरेण वा व्यवाये उपश्लेष एव नेति निर्दिष्टपदं संहिताधिकारश्च विफल इति **संहितायाः**(६-१-७२)मित्यत्र भाष्ये स्पष्टत्वात्। वाक्ये तदनित्यत्वस्यान्यत्र नित्यत्वस्येव सिद्धत्वात्। अवग्रहे तु सम्प्रदाय एव शरणमित्यानङादिविषये आदेशोत्तरमेवावग्रहोऽन्यत्र ततः प्राक्। अकृतेति तु नास्त्येव। न लक्षणेति भाष्येण तदनुरोधेन

---

१. अत्र मुद्रिकपुस्तके कौस्तुभे हितशब्दस्येति पाठः। परन्तु व्याख्यायां प्रभायां सर्वमातृकासु हिशब्देत्येव प्रतीकं गृहीतम्। तेन 'हितमित्यवग्रहे हिशब्दस्ये'ति प्रभाकारसम्मतः पाठ इत्यूह्यते। २. मित्याद्यर्थः इति क पाठः।

३. 'संहितायाम्' इति सूत्रप्रत्याख्यानावसरे – 'शब्दस्य च शब्देन कोऽन्योऽभिसम्बन्धो भवितुमर्हत्यन्यदत उपश्लेषात्' इति भाष्यम्। अत्र कैयटः- 'इको यणचि' इत्यादौ विशेषः प्राधान्येनाश्रीयते न तु सामान्यमिति न कश्चिद्दोषः। उपश्लेषे चाश्रिते निर्दिष्टग्रहणमपि न कर्तव्यम्, व्यवहितयोरुपश्लेषाभावादुपश्लेषनिमित्तकार्या-प्रसङ्गात्। संहिताधिकारे च प्रत्याख्याते संहितासंज्ञाऽपि प्रयोजनाभावात् प्रत्याख्यातैवेति। म.भा.प्र.सं. ८४ पञ्चमो भागः।

**तदेवम् ''अइउण्'' (मा० सू० १) इत्यादौ संहिताविरहान्न सन्धिरिति स्थितम्।**

**केचित्तु चादिषु पाठान्निपातसंज्ञा, ''निपात एकाज्'' (पा० सू० १-१-१४) इति प्रगृह्यत्वं, ततः प्रकृतिभावः। यद्यपि अनिपातानामपीह ग्रहणमिष्टं 'दध्यश्वः' 'दाक्षिः' 'प्लाक्षिः' इत्यादिसिद्धये, तथापि न सर्वा व्यक्तयः साक्षान्निर्देष्टव्याः, आनन्त्यात्, किन्तु काचिद्व्यक्तिर्निर्दिश्यमाना स्वसदृशीरितरा अपि गृण्हातीति वक्ष्यते। तत्र किं निपातव्यक्तिरेव निर्दिश्यतामुत तदितरेति संशये आद्यकोटिरेव युक्ता। संहिताकार्यविरहेण निर्दिश्यमानरूपस्य स्फुटप्रतीतिसिद्धेरित्याहुः।**

**कारप्रत्ययस्तु न भवति बहुलग्रहणात्। स हि ''रोगाख्यायां ण्वुल् बहुलम्'' (पा० सू० ३-३-१०८) इत्यत्रोपसंख्यातः।**

**अन्ये तु ''इक्श्तिपौ धातुनिर्देशे'' (का० वा०) इत्यतो निर्देशशब्दः**

---

शास्त्रासङ्कोचस्य शास्त्रकरणाभावस्य स्पष्टमुक्तत्वाच्चेति। तदेतद्ध्वनयन् सिद्धान्तमुपसंहरति। **तदेवमिति।** तस्मादुक्तप्रकारेणेत्यर्थः। अत्राग्रहो न तत्रेति भावः। **पाठादिति।** उपसर्गविभक्तिस्वरप्रतिरूपकाश्चेत्यस्येति शेषः। **अनिपातानामपीहेति।** अपिशब्दान्निपातानामपि अक्षरसमाम्नाये इत्यर्थः। **सिद्धये इति।** यदि निपातानामेव ग्रहणं स्यात्तर्हि प्रयोगस्थाकारादीनां तद्भिन्नानामजादिप्रत्याहारेऽनन्तर्भूतत्वाद्यण् आदिवृद्धिश्च न स्यादिति भावः। **साक्षात्** तत्तद्रूपेण निर्देष्टव्याः = निर्देष्टुमर्हाः। **आनन्त्यादिति।** एवञ्च युगपदुच्चारयितुमशक्यत्वं तासामिति न तत्वमिति भावः। तत्र = तयोर्मध्ये। इतरेतीत्यत्राप्येवानुषङ्गः। केचिदित्यनेनारुचिः सूचिता, अर्थपराणां तेषां निपातत्वेऽपि अनुकरणानां शब्दपराणां तत्वे मानाभावः। **प्रकृतिवदि**(प.३६)ति त्वनित्यम्। तेषामेवानुकरणमित्यत्र मानाभावश्च। किञ्च तावतापि ऋकारानिर्वाहः। तत्र गत्यन्तराश्रयणे वरं तदाश्रयणमेव सर्वत्र। किञ्च सिद्धान्तेऽननुकरणत्वेऽर्थभेदेन ततो भिन्नत्वेन तत्वं दुर्वचमेवेत्येवंरूपा।

## २.४ माहेश्वरसूत्रे कारप्रत्ययाभावनिरूपणम्

**कारेति। वर्णात्कार** इत्यनेन। ननु वर्णादुच्चार्य्यमाणात्कारप्रत्ययो भवतीत्यर्थे स्वीक्रियमाणे ककार इत्यादावुच्चार्यमाणस्याज्हल्समूहस्यावर्णत्वात्कारो न स्यादत आह। **अन्ये त्विति। अनुवर्तत इति।** एकदेशे स्वरितत्वप्रतिज्ञानादिति भावः। नन्वेवमपि निर्देश उच्चारणमेवेत्य-

**कारप्रत्ययविधावनुवर्तते। निर्देशश्च प्रतिपादनम्। तेन प्रयोगविशेषनिर्दिष्टानां वर्णानां प्रतिपादने प्रत्ययः, इह तु आनुपूर्वीसम्पादनमात्रे तात्पर्यं, न तु 'कविपुत्र' इत्यादौ दृष्टानामकारादीनां प्रतिपादने। अतः कारप्रत्ययाभाव इत्याहुः।**

**अनुकार्यानुकरणयोरभेदविवक्षापक्षे तु अर्थवत्त्वस्याविवक्षिततया वर्णवाचित्वा-भावात्कारप्रत्ययाभावः।**

**अत्रेदमवधेयम्, अकारः संवृतः "विवृतकरणाः स्वराः, तेभ्य ए ओ विवृततरौ, ताभ्यामैऔ विवृततरतरौ, ताभ्यामप्याकारः, संवृतोऽकारः" इति शिक्षावाक्यात् विवृतसंवृतादयः शब्दाः शुक्लादिवद्धर्मे धर्मिणि च प्रयुज्यन्ते। तेन विवृतं करणं प्रयत्नो येषां ते तथाभूताः स्वरा इकारादय इत्यर्थः। यत्तु छन्दोगविशेषैरिवर्णोवर्णऋकाराणां संवृततामिच्छद्भिरुक्तं "य्वृतः संवृता अन्यत्रार्भवसाम्नः" इति, तत्तु तदीयशाखाविशेष-**

---

विशेषोऽत आह। **निर्देशश्चेति।** शब्दार्थमाह। **तेनेति।** प्रत्यासत्या अर्थाच्च लब्धमाह। **प्रयोगेति।** वार्तिके पञ्चमी षष्ठ्यर्थ इति भावः। एवञ्च यस्योच्चार्यमाणस्य प्रयोगस्थो वर्णो निर्देश्यः प्रतिपाद्यस्तस्माद्वर्णाद्वर्णप्रतिपादकात् कारप्रत्यय इत्यर्थः फलित इति बोध्यम्। **आनुपूर्वीति।** क्रमबोधनमात्र इत्यर्थः। अकारादीनां = तत्तद्रूपाणाम्। आदिना [1]इकारादिसंग्रहः। एकदेशा-नुवृत्त्यादिक्लेश एवात्रारुचिरन्ये त्वित्यनेन सूचिता। तदर्थस्तु वर्णाद्वर्णवाचकादित्येव। अचं विना तदुच्चारणाभावात् तदुक्तिरिति न तत्र दोषः। प्रकृते च तद्वाचित्वे प्रथममेव समाधानम्। तदवाचित्वे तु प्राप्तिरेव न। तदूध्वनयन् वक्ष्यति। **वर्णवाचित्वेति।** एवमभेदपक्षे समाधत्ते। **अनुकार्येति।** **अर्थवत्वेति।** वृत्त्याऽर्थबोधजनकत्वरूपेत्यर्थः। **अविवक्षिततयेति।** अभावेनेत्यर्थः।

## २.५ अइउण्सूत्रे अकारस्य विवृतत्व - संवृतत्वविचारः

अत्रत्यभाष्यसिद्धान्तमाह। **अत्रेदमिति।** प्रवृत्तेरिति दिगित्यन्तेनेति भावः। तत्रादौ वस्तुतत्वमाह। **अकार इति।** प्रयोगे सर्वत्रेति भावः। तत्र मानमाह। **विवृतेति।** ननु विवृतादयः शब्दा यदि धर्मिपरास्तर्हि विवृतकरणा इत्यनुपपन्नम्। अथ धर्मपरास्तर्हि संवृतोऽकार इत्यनुपपन्नमत आह। **विवृतेति।** प्रयुज्यन्ते ऋषिभिः। तेन = उभयत्र प्रयोगेण। अकारे विशेषस्य वक्ष्यमाणत्वादाह। **इकारेति। छन्दोगेति।** सामगविशेषैरित्यर्थः। ईवर्णोवर्णेति पाठः। **संवृत**

---

१. इकारोकारादिपरिग्रह इति ख पाठः।

**मात्रपरं न तु सार्वत्रिकम्। यथा सात्यमुग्रिराणायनीयानामेव ''सुजाते ए अश्वसूनृते'' ''अध्वर्यो ओ अद्रिभिः सुतम्'' इत्यादावेकमात्र एकार ओकारश्च न त्वनेकेषां, तद्वत्। इकारादौ वा यथा तथास्तु। अकारस्य संवृतत्वं तु निर्विवादमेव। तथाप्यसौ प्रक्रियादशायामाकारेण दीर्घेण प्लुतेन च सह सावर्ण्यसिद्ध्ये विवृततरोऽस्मिन्सूत्रे निर्दिश्यते। विवृततरत्वं च प्रयोगदशायां मा भूदित्येतदर्थं शास्त्रान्ते ''अ अ'' (पा० सू० ८-४-६८) इति सूत्रं कृतम्। तेन हि विवृततरमनूद्य संवृतो विधीयते। न चानुवाद्यसमर्पकेणाकारेण दीर्घप्लुतयोरपि ग्रहणकशास्त्रबलात्सङ्ग्रहः स्यादिति वाच्यम्, अद इति तपरनिर्देशस्य एकशेषेण ह्रस्वषट्कनिर्देशस्य वा सिद्धान्तयिष्यमाणत्वात्। वक्ष्यति हि तत्र वार्तिककारः - ''सिद्धं तु तपरनिर्देशाद्, एकशेषनिर्देशाद्वा स्वरानुनासिकभिन्नानां भगवतः पाणिनेः सिद्धम्'' इति। शास्त्रान्ते च विधीयमानं**

---

**इति। अर्भवा**ख्यसामतो भिन्नस्थले ईश्च ऊश्च ॠच ते संवृता बोध्या इत्यर्थः। तत्र दृष्टान्तमाह। **यथेति।** सात्यमुग्र्यादी द्वौ ऋषी। [१]पूज्यत्वे बहुवचनं। यद्वा राणायनीयादेरवान्तरबहुत्वात् तत्। द्वावेकारौकारौ ह्रस्वौ तयोरेव मते, नान्येषां मत इत्यर्थः। अर्धौकारस्तु न्यूंखेष्वाश्वलायनानामपीति बोध्यम्। एतेनार्धौकारस्याश्वलायनानामपि सत्वेनैवकारोऽसङ्गत इत्यपास्तम्। एश्व ओद्रिति पाठः। तत्र तत्वानिश्चयादाह। **इकारादाविति। निर्विवादमेवेति।** सर्वमतसिद्धत्वादिति भावः। एवं वस्तुतत्वमुक्त्वा वक्ष्यमाणसिद्धान्तप्रतिपादनाय [२]न्यासाद्युक्तिं किञ्चित्सिद्धान्तोक्तिसंवलितां स्वरूपव्यक्रियैव पराक्रियेति न्यायादिनादुष्टां बोधयन्ननुवदति। **तथाप्येत्यादिनाऽस्त्वित्यन्तेन।** तथापि = तस्य प्रयोगे संवृतत्वेऽपि। असौ = अकारः। अस्मिन् = 'अइउणि'त्यस्मिन्। तेन हि = 'अ अ' इति सूत्रेण यतः। आकारेण = विवृततरेण। **स्यादिति।** तथा च यथा ह्रस्वाकारस्य विवृततरस्य संवृतो विधीयते तथा विवृततरदीर्घाकारादेरपि प्रयोगे स स्यादिति भावः। तपरनिर्देशे गौरवादपाणिनीयत्वाच्चाह। **एकेति।** हि यतः। एकस्याकारस्यैकशेषासम्भवादाह। **स्वरेति।** तथा च पूर्वाव्यवहिता च ये भेदं, यद्वा दीर्घादिव्यावृत्तये आह। **स्वरेति।** ग्रहणमिति शेषः। उदात्तत्वादिस्वरैरानुनासिक्येन च ये भेदं प्राप्तास्तेषामेव ग्रहणं, तस्योभयथा सिद्धमित्यर्थः। ननु प्रक्रियादशायामपि तेन संवृतः कुतो न, विशेषानुक्तेः, तथा चात्र विवृततरोपदेशो निष्फल एव।

---

१. पूज्यत्वे च बहुवचने ख पाठः।

२. न्यासः पृ.सं. २२ (सुधीप्रकाशनम्)

**प्रत्यापत्तिवचनमेव ज्ञापकमिह विवृततर उपदिष्ट इत्यस्यार्थस्य।**

**यत्तु अत्रत्यं वार्त्तिकम् - ''अकारस्य विवृतोपदेश आकारग्रहणार्थः'' इति, तत्र विवृतशब्दो विवृततरत्वपरः उदाहृतशिक्षानुरोधात्। ननु शुक्लतरोऽपि शुक्लो भवत्येव यथा, तथेह विवृततरस्याकारस्य विवृतत्वानपायात्सावर्ण्यं यथाश्रुतेऽपि सेत्स्यतीति चेत्? न, सवर्णसंज्ञायां तुल्यप्रयत्नत्वस्य विवृततरत्वाद्यवान्तरधर्मपुरस्कारेणैव वक्तव्यत्वात्। अन्यथा ओदौतोरपि सावर्ण्यापत्तौ 'गां गाः, इत्यत्रेव 'नावं नावः' 'ग्लावं ग्लावः' इत्यादावपि ''औतोऽम्शसोः'' इत्यात्वं प्रवर्त्तेत। ''इदूदेद्'' (पा० सू० १-१-११) इत्येकारान्तस्य विधीयमाना प्रगृह्यसंज्ञा 'करवावहै' इत्यादावपि प्रवर्त्तेत। ''एङः पदान्तादति'' (पा० सू० ६-१-१०७) इति पूर्वरूपं 'कस्मै अदात्' 'विष्णौ अस्ति' इत्यादावपि स्यात्। किंचैवं हकारादीनाञ्च विवृतत्वात्सावर्ण्याप्रसक्तेः ''नाज्झलौ'' (पा० सू० १-१-१०) इति सूत्रं न कर्त्तव्यमिति भाष्यसिद्धान्तो व्याकुप्येत। ''एओङ्'' (मा० सू० ३) इत्यादिसूत्रद्वये ङकारचकाररूपानुबन्धद्वयकरणं चेह लिङ्गम्। अन्यथा हि अन्यतरेणैव सर्वत्र व्यवहरेत्। किम्बहुना एकारौकारावपि न निर्दिशेदाकारादीनामिव सावर्ण्येन सिद्धेरिति दिक्।**

---

सावर्ण्याद्यसिद्धेरत आह। **शास्त्रान्ते चेति।** नन्वेवमप्यत्र तदुपदेशे एव किं मानम्। अपूर्ववचनाङ्गीकारे तु गौरवमत आह। **शास्त्रान्त इति।** अन्यथा तदानर्थक्यं स्पष्टमेव। नन्वेवं वार्तिकविरोधोऽत आह। **यत्त्विति।** तत्रापि तस्य धर्मिपरत्वे समासो न स्यादतो धर्मपरत्वाभिप्रायेणाह। **विवृततरत्वेति।** यथाश्रुतमेव वार्तिकं युक्तमित्याशयेनाशङ्कते। **नन्विति।** तथेह = शास्त्रे। यथाश्रुतेऽपि = तस्य तदलक्षकत्वेऽपि। **विवृततरत्वाद्यवान्तरेति।** विवृतत्वव्याप्यधर्मेत्यर्थः। आदिना विवृततमत्वादिसंग्रहः। **अन्यथौदौतोरिति।** तदनङ्गीकारेण व्यापकविवृतत्वधर्मेण तुल्यप्रयत्नत्वाङ्गीकारे इत्यर्थः। दोषान्तरमाह। **ईदूदेदिति। करवेति।** तथा चावग्रहे दोष इति भावः। दोषान्तरमाह। **एङ इति।** दोषान्तरमाह। **किञ्चैवमिति।** एवं तथाऽङ्गीकारे। चस्त्वर्थे। न कर्तव्यं प्रयत्नभेदपक्षे। **भाष्येति।** तथा चेदमपि तत्र गमकम्। अत एवाग्रे चसङ्गतिरिति भावः। मूलसम्मतिमाह। **एओङिति।** लिङ्गान्तरमाह। **किं बहुनेति।** सिद्धेः = ऐकारौकारयोर्ग्रहणसिद्धेः। **दिगिति।** तदर्थस्तु प्रयत्नभेदात् तयोर्न सावर्ण्यमित्येव युक्तमिति युक्तिसिद्धेऽर्थे ज्ञापकस्यानुपयोगः। किञ्चानुबन्धद्वयकरणं पृथक् सूत्रकरणं च वृद्धिगुणसंज्ञाविध्यो-र्भेदेन निर्देशोपपत्त्यर्थं **पूर्वौ तु ताभ्यामैच् (७-३-३) प्लुतावैच (८-२-१०६) एचोऽप्रगृह्यस्य**

**तस्मादत्रत्यभाष्यवार्तिकयोर्विवृतशब्दो विवृततरं लक्षयतीत्येव तत्त्वम् ।**

**यद्वा, विवृतप्रतिज्ञानसामर्थ्याद्विवृततरेण सह सावर्ण्यं सेत्स्यतीत्यवधेयम् । एवञ्च भाष्यादिग्रन्थो यथाश्रुत एवास्तु । एतच्च न्यासकारहरदत्तयोर्ग्रन्थमनुसृत्य उदाहृतशिक्षा-वाक्योपष्टम्भेन व्याख्यातम् । परमार्थस्तु-आकारो विवृत इत्येव भाष्यवार्तिकस्वरससिद्धं न तु विवृततर इति । तथा च पाणिनीयशिक्षा –**

**स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् ।**

**तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च (पा० शि० श्लो० २१) इति ।**

**प्रागुक्तं तु मतान्तरं, न तु पाणिनीयम् । अत एव एओङ्सूत्रे भाष्यकैयटादौ**

---

**(८-२-१०७) इको यणचि (६-१-७७) इच एकाच (६-३-६८)** इत्याद्यर्थं च आवश्यकमिति न ज्ञापकम् । तत्र स्वरूपेण पाठे तु विपरीतं गौरवम् । किञ्च चतुर्दशसूत्रीत्वभङ्गपत्तिः । किञ्च तदभावे तयोरसत्वमेवाशङ्क्येत । ध्वनितं चेदमे**ओङ्**सूत्रशेषे भाष्य इति स्पष्टमन्यत्र । किञ्चास्याः श्रुतित्वमपि दुर्वचम् । ज्ञापकमावश्यकमिति दुराग्रहे तु वृद्धिगुणसंज्ञाविध्योः प्रत्याहाराय ग्रहणस्य **प्लुतावैच एचोऽप्रगृह्यस्ये**त्यादौ तद्ग्रहणस्य च ज्ञापकत्वं बोध्यमिति । उपसंहरति । **तस्मादिति ।** विवृततरं = विवृततरत्वम् । एवमग्रेऽपि । **लक्षयतीत्येवेति ।** लक्षयत्येवेतीत्यर्थः । उक्तयुक्तेरिति भावः । अत एव यथाश्रुतमपि सुयोजमित्याशयेनाह । **यद्वेति ।** विवृततरेण आकारेण सामर्थ्यात् कारणकल्पनापेक्षया प्रधानकार्यकल्पनमेव लघ्विति भावः । आदिना वार्तिकं बुद्धिस्थमेव प्रकटयन्नाह । **एतच्चेति ।** उक्तपक्षद्वयं चेत्यर्थः । अनुसारे उपष्टम्भो हेतुः । सिद्धान्तमाह । **परेत्याद्यनादेयमित्यन्तेन ।** आकार इति पाठः । आकार इत्येव । **स्वरसेति ।** तत्तच्छब्देन तयोर्व्यवहारादिति भावः । एवं सप्रमाणेऽर्थे स्कुटं मानान्तरमप्याह । **तथा चेति । स्वराणां** = अकारसन्ध्यक्षरभिन्नानां । तेषां विशिष्याग्रे उक्तेः । **विवृतावेङौ** = विवृततरौ सामर्थ्यात् । अपिस्ताभ्यामित्यग्रे योज्यः । [1]**(**अतिशयसूचको यथाश्रुत एव वा । **तथैव =** विवृततमामेव । चोऽप्यर्थे ताभ्यामित्यग्रे योज्यः ।) पूर्वशिक्षाविरोधं परिहरति । **प्रागुक्तमिति । न तु पाणिनीयमिति ।** तथा चेदमेवाद्यत्वे प्रमाणं, न तु तदिति तदनुसारि**न्यासादि**ग्रन्था अयुक्ता एवेति भावः । स्थलान्तरस्थभाष्यादितोऽप्ययमेव सिद्धान्तो लभ्यत इत्याह । **अत एवैओङिति ।** तस्य

---

१. इत आरभ्य 'योज्य' इत्यन्तः पाठः ( ) लण्डन् मातृकायामेवोपलभ्यते ।

**अकारस्य विवृतत्वाद्विवृततराभ्यां सन्ध्यक्षरभागाभ्यां न सावर्ण्यमित्युक्तम्। एवञ्च वृत्तिग्रन्थस्यापि यथाश्रुतस्य सौष्ठवे न्यासकारहरदत्ताभ्यां कृतं भङ्क्त्वा व्याख्यानमनादेयम्। अथ वा "नाज्झलौ" (पा०सू० १-१-१०) इति पठतः सूत्रकृतो मते विवृततरस्यापि विवृतत्वमात्रेण सावर्ण्यमस्तु, चत्वार आभ्यन्तराः प्रयत्नाः सवर्णसंज्ञायामाश्रीयन्ते इति वृत्तिग्रन्थस्वरसात्। न चैवमेङैचोरतिप्रसङ्गः, वर्णसमाम्नाये पृथक् निर्देशसामर्थ्यात् अनुबन्धद्वयसामर्थ्याद्वा तत्र सावर्ण्याप्रवृत्तेरिति दिक्।**

---

विवृतत्वेनात्र विवृतत्वप्रतिज्ञानादेवेत्यर्थः। अन्यथा तदसङ्गतिः स्पष्टैव। एवञ्च = एतस्य सिद्धान्तत्वे च। **वृत्तीति।** अकार इह शास्त्रे विवृतः प्रतिज्ञायत इति **काशिका**ग्रन्थस्यापीत्यर्थः। अपिरुक्तभाष्यादिसमुच्चायकः। **भंक्त्वा** = मूलं सन्दूष्य। एवं सिद्धान्तमुक्त्वा सूत्रमते प्रागुक्तशिक्षाङ्गीकारेऽपि यथाश्रुतमेव सुयोजं भाष्यादीत्याशयेन न्यासाद्युक्तपक्षद्वयविरुद्धंपक्षान्तरमभ्युपेत्यवादेनाह। **अथवेति। अस्त्विति।** अन्यथा प्रागुक्तरीत्या अकान्तरधर्मपुरस्कारेणैव तत्वेऽज्झलोः प्राप्तेरेवाभावात् तदानर्थक्यं स्पष्टमेवेति प्रागुक्तमेवेति भावः। विवृततरस्यापि आकारस्य विवृतेनाकारेण सहेति शेषः। ननु तत्सूत्रबलाद्धलचोस्तथाङ्गीकारेऽप्यत्र तन्निरस्तः प्रागुक्तन्यासादिपक्षाङ्गीकारे चतुष्ट्वासङ्गतिरिति **नाज्झला**विति सूत्रेण सामान्यतो वृत्तिग्रन्थेन च विवृतत्वव्याप्यानां तेषां सवर्णसंज्ञानुपयुक्तत्वबोधनमिति तात्पर्यम्। प्रागुक्तदोषमुद्धरति। **न चैवमिति।** मिथस्तस्येति शेषः। **पृथगिति। ऐऔजिति** पृथक्सूत्रेत्यर्थः। **एचोऽयवे**त्यादौ स्थानेन्तरेति निर्वाहः। **न य्वाभ्या**मित्यादौ स्वरूपेण पाठ्यौ। **एङि** इत्यादावनिष्टाभावः। वृद्धिगुणसंज्ञयोस्तु समावेशस्तन्मते इष्ट इति वृद्धिसंज्ञायामप्येङित्येव पाठ्यमिति भावः। नन्वेवं तयोरसत्वमेवाशङ्क्येतात आह। **अनुबन्धेति।** उक्त एवाशयः। **तत्रेति।** एङैचोरित्यर्थः। श्रुतार्थान्यथानुपपत्त्या यावत् श्रौतोपपादकं कल्प्यं तच्च सन्निहितविषयमेव, नासन्निहितविषयमित्येङैविषयकमेव ज्ञापकं, नाकारादिविषयकमपीति भावः। **नाज्झला**विति प्रत्याख्यानपरभाष्यमपि योगविभागरूपाद्यत्नाधिक्यात्प्रयत्नभेदेन सावर्ण्याप्रसक्तेः सम्यगेवेत्याहुः। **दिगिति।** तदर्थस्तु **अदेङ्गुणः वृद्धिरादैच् ताभ्यामैच् प्लुतावैच** इत्याद्यर्थं तयोरावश्यकत्वमित्यादि प्रागुक्तं सर्वमनुसन्धेयम्। किञ्च विवृतमूष्मणामित्यस्य पौरुषेयत्वेन भवदुक्तरीत्या दुर्योजत्वेन प्रागुक्तभाष्यव्याकोपानुद्धारः। किञ्च भाष्यमते सप्तप्रयत्नसत्वेन प्रयत्नभेदात्तयोर्नातिप्रसङ्गः। **नाज्झला**विति सूत्रमपि प्रयत्नभेदप्राप्तासावर्ण्यानुवादकं सत् तस्यैव बोधकम्। अत एव तन्न वक्तव्यमिति भाष्यकृतोक्तम्। एवञ्च वृत्त्यादिग्रन्थस्यैवायुक्तत्वेन तन्मूलकैतन्मतमयुक्तम्। किञ्च

**ननु 'दण्डाढकम्' इत्यादौ दीर्घेण सह दीर्घ एकादेशः सावर्ण्यस्य फलमित्यस्तु, प्लुतेन तु सावर्ण्ये किं फलमिति चेत् ? 'इह अ३ग्निदत्त' इति ''गुरोरनृतः'' (पा०सू० ८-२-८६) इति प्लुते कृते तेन सह पूर्वस्य दीर्घ एकादेशः फलमिति गृहाण। न च दीर्घे कर्तव्ये प्लुतस्यासिद्धत्वं शङ्क्यम्, ''प्लुतप्रगृह्या अचि'' (पा०सू० ६-१-१२५) इति ज्ञापकेन ''सिद्धः प्लुतः स्वरसन्धिषु'' इति वक्ष्यमाणत्वात्।**

**स्यादेतत्, आक्षरसमाम्नायिकस्य अकारस्य कृतेऽपि विवृतत्वे धातुप्रातिपदिक-प्रत्ययनिपातस्थस्य संवृतत्वादचृत्वं न स्यात्, आक्षरसमाम्नायिकेन भिन्नप्रयत्नानाम-मीषामग्रहणात्। ततश्च ''शमामष्टानाम्'' (पा०सू० ७-३-७४) इतिदीर्घोऽलोन्त्यपरि-भाषयाऽन्त्यस्यैव स्यान्न त्वकारस्य ''अचश्च'' (पा०सू० १-१-२८) इति परिभाषाया बाधादनुपस्थितेः। तथा 'दृषद्' इत्यत्र प्रातिपदिकस्यान्त उदात्तो भवतीत्येतन्न स्यात्।**

---

शिक्षोक्तव्याप्यधर्मवतां व्यापकधर्मेण सावर्ण्ये यणां च वर्गादिभिः सावर्ण्यापत्ता**वश्चित** इत्यादौ यादिपरसवर्णापत्तिरपि पक्षे। ज्ञापकदुराग्रहे तु प्रागुक्तं वाच्यम्। आकारस्य विवृततरत्वं तु मतान्तरत्वान्नैतच्छास्त्रप्रक्रियोपयोगीति मध्यममतमेव युक्तमिति। इतीति शेषो बोध्यः। स चावधेयसमाप्तौ। **सावर्ण्यस्येति।** ह्रस्वस्य दीर्घेण सहेत्यादिः। **ज्ञापकेन सिद्धः प्लुत इति।** तच्च ज्ञापकं सामान्यापेक्षमिति षाष्ठभाष्याशयेन। [1]एतेने**दूदेदि**त्यत्र स्वयं वक्ष्यमाणविशेषापेक्षत्वेन विरोधाच्चिन्त्यमेतदित्यपास्तम्। एवञ्च प्लुतांशेऽपि फलं सम्यगेव। किञ्च व्रजानीश्वरदत्तेत्यादा-विकोऽसवर्ण (पा०सू० ६-१-१२७) इत्यस्याप्रवृत्तिरपि तत्फलमिति दिक्।

## २.६ धात्वादिषु विवृतत्वप्रतिज्ञोपपादकभाष्यार्थनिरूपणम्

**तस्य विवृतोपदेशा**दित्यादिभाष्यार्थमाह। **स्यादेतदिति।** अमीषां = धात्वादिस्थानाम्। **न्त्यस्यैवेति।** स च इकारः स्यादिति भावः। **बाधादिति।** तदकारस्यानचृत्वादिति भावः। दोषान्तराण्याह। **तथेत्यादिना।** तथेत्यस्य न स्यादित्यनेनान्वयः। **प्रातीति।** [2]**हल्स्वरप्राप्ता**विति न्यायेन प्रवर्तमानमित्यादिः। **इत्येतन्न स्यात्** तदकारस्यानचृत्वात्। अन्यथा हलोऽप्यापद्येत। परिभाषा तु चिकीर्षकादौ स्यात्। अत एव हलन्तमुदाहृतमिति बोध्यम्। उपसर्गत्वाभिव्यक्तये

---

१. एतेनेति कृष्णमित्रस्य शब्दकौस्तुभव्याख्याकारस्य खण्डनम्।

२. 'हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत्' इति परिभाषा (प. ८१)

**'नायकः' इत्यत्र प्रत्ययाकारस्यानचूत्वादायादेशो न स्यात्। 'अवनमति' इत्यत्र ''निपाता आद्युदात्ताः'' ''उपसर्गाश्चाभिवर्जम्'' (फि०सू० ३-८१) इत्याद्युदात्तत्वं न स्यात्। किञ्च ''अस्य च्वौ'' (पा०सू० ७-४-३२) इत्यादौ अकारस्य संवृतत्वेनानणूत्वादसति ग्राहकत्वे 'शुक्लीभवति' इत्यादावेवेत्वं स्यान्न तु 'मालीभवति' इत्यादौ। न चाक्षरसमाम्नायिकस्य विवृतत्वप्रतिज्ञासामर्थ्यात्तत्सदृशेषु धात्वादिस्थेष्वपि तत्कार्यप्रवृत्तिरिति वाच्यं, 'खट्वाढकम्' इत्यादौ दीर्घसम्पादनेन विवृतत्वप्रतिज्ञायाः साफल्ये सति सामर्थ्यविरहात्। तथा हि, ''अकः सवर्णे'' (पा०सू० ६-१-१०१) इत्यत्र ''आदिरन्त्येन''(पा०सू० १-१-७१) इतिवचनादनयोरेवाकारककारयोरनुकरणमिति निर्णीतम्। तेन प्रत्याहारगतेन विवृतेनाकारेण सावर्ण्याद्दीर्घप्लुतयोर्ग्रहणे 'खट्वाढकम्' इत्यादि सिध्यति। असति तु विवृतत्वे ''अस्य च्वौ''**

---

नमतीत्यस्योल्लेखः। अनुवृत्त्यर्थं निपाता इत्युक्तम्। अत्रापि हेतुः स एव। दोषान्तरमाह। **किञ्चेति। नानणूत्वादिति।** अक्षरसमाम्नायेऽस्यापठितत्वात्, पठितेन[1] तेन भिन्नप्रयत्नत्वादग्रहणादनण्त्वेन ग्राहकसूत्राप्रवृत्तिरिति भावः। सूत्रसाफल्यमाह। **शुक्लीति।** स्यादेतदित्याद्युक्तसर्वदोषानुद्धरति। **न चेति। सामर्थ्यादिति।** तत्र कार्याभावादिति भावः। [2]**(तत्सदृशेष्विति।** सादृश्यं ह्रस्वत्वकृतम्। अपिर्व्युत्क्रमे। तत्सदृशेष्वपीत्यर्थः। स च दीर्घादिसमुच्चायकः। **तत्कार्येति।** अकः सवर्णे इत्यत्राक इत्यत्रत्येन विवृतेनाकारेण प्रयत्नभेदेनासवर्णस्याप्यत्वजात्याक्रान्तस्य ग्रहणे तया ज्ञाप्यत इत्यर्थः। नन्वस्य विवृतत्वेऽप्यक इत्यत्रत्यस्यैतद्भिन्नत्वेन संवृतत्वात्तेन विवृतस्याकारस्याग्रहणात्कथं साफल्यमत आह। **तथा हीति। आदिरन्त्येनेतीति।** अस्य चान्त्येत्सदृशेन सहोच्चार्यमाण आदिसदृश इत्याद्यर्थः। तत्र ककारादिचिह्नेनागादिशब्दस्थस्तत्सदृशत्वाद्विवृत एव। सादृश्यं च व्यक्तिभेदे सति सर्वधर्मसाम्यप्रयुक्तं ग्राह्यम्। एवञ्च तेन चिह्नेन वर्णसमाम्नायस्थवर्णानुकरणत्वानुमानं तत्रेति भावः। तदाह। **अनयोरेवेति। निर्णीतं** भाष्यादौ। तेन = तदनुकरणनिश्चयेन। **असति त्विति।** वर्णसमाम्नायस्थाकारे इति भावः। चिह्नाभावेनात्रत्येन दृष्टान्तत्वे नाह। **अस्य च्वावित्येति। न तु दीर्घेति।** तयोर्विवृतत्वादिति भावः।) वार्तिकस्येहस्थत्वादेवं वक्तुमशक्यत्वात्तत्पक्षं त्यक्त्वाऽह। **प्रत्यापत्त्येति।**

---

१. पठिते इति ख पाठः।

२. अत्र'IOL' पुस्तके तत्सदृशेष्विति' इत्यारभ्य 'तयोर्विवृतत्वादिति भाव' इति( )चिह्नस्थः पर्यन्तमधिकः पाठः अस्ति। संभाव्यते एताः पङ्क्यः मैसूरुपाठे लुप्त इति। यतः एतासु शब्दकौस्तुभस्य प्रतीकग्रहणपूर्वकं व्याख्यानं कृतम्॥

**(पा०सू० ७-४-७२) इत्यादिष्विव प्रत्याहारेष्वपि संवृतस्य ह्रस्वस्यैव कार्यं स्यान्न तु दीर्घप्लुतयोरिति फलभेदस्य स्पष्टतया क्व विवृतत्वप्रतिज्ञायाः सामर्थ्यम् ?**

**अथोच्येत प्रत्यापत्त्याऽऽक्षरसमाम्नायिकस्यैव विवृतत्वं ज्ञाप्यते इति न ब्रूमः, किन्तु सामान्यापेक्षं ज्ञापकम् - ''इह शास्त्रे यावानकारः स सर्वोऽपि प्रक्रियायां विवृतो बोद्धव्यः'' इति। एवमपि प्रत्युच्चारणं वर्णानां भेदेन ''अस्य च्वौ'' (पा०सू० ७-४-७२) इत्यादावुच्चारितस्यानणुत्वेन सवर्णग्राहकता न स्यात्, किन्तु ''अकः सवर्णे'' (पा०सू० ६-१-१०१) इत्यादौ प्रत्याहार एव सवर्णग्राहकत्वं स्यात्। एवमिकारादयोपि ''इको यणचि'' (पा०सू० ६-१-७७) इत्यादावेव ग्राहकाः स्युर्न तु ''एरनेकाचो'' (पा०सू० ६-४-८२) ''यस्येतिच'' (पा०सू० ६-४-१४) इत्यादौ।**

**ननु एक एवाकारः तत्कस्यानणुत्वमाशङ्क्यते ? न चैवमुदात्तानुदात्तत्वादिविरुद्ध-धर्मानुपपत्तिः, तेषां व्यञ्जकध्वनिधर्मत्वात्। अनुबन्धव्यवस्थाऽपि लोकवद् भविष्यति। लोके हि 'इह मुण्डो भव, इह जटिलो भव' इत्यादिक्रमेण एकस्यानेकधर्मोपदेशेऽपि तत्तद्देशभेदेन धर्मा व्यवतिष्ठन्ते, तथेहापि ''कर्मण्यण्'' (पा०सू० ३-२-१) इत्यत्रैव णित्त्वं, ''चरेष्टः'' (पा०सू० ३-२-१६) इत्यत्र टित्त्वं, गापोष्टक्'' (पा०सू० ३-२-८)**

---

तत्प्रतिपादकवचनेन अइत्यनेनेत्यर्थः। लक्ष्यस्यापि शास्त्रविषयत्वाद्विशिष्टे व्याकरणत्वस्य प्रागुक्तत्वाच्च शास्त्रत्वं बोध्यम्। **प्रत्युच्चारणमिति।** प्रत्युच्चारणं वर्णान्यत्वादाक्षरसमाम्नायिकस्य प्रयोगादावुच्चारणाभावादिति भावः। ग्राहकसूत्रवैयर्थ्यं तु नेत्याह। **किन्त्विति।** अस्योपपत्तिरुक्ता। स्यादेतदिति पूर्वपक्षं प्रकारान्तरेण निरसितुमथोच्येतेत्याद्युक्तवुक्तदोषमुद्धरन् एकत्वादकारस्य सिद्धमित्यादिभाष्यस्यैकदेश्युक्तित्वं ध्वनयंश्च शङ्कते । **नन्विति। एक एवेति।** स एवेति स एवायमिति प्रत्यभिज्ञानादष्टकृत्वोऽकारमुच्चारयतीत्यादिप्रयोगाच्चेति भावः। न चैवं = तस्यैक्ये। **अनुपपत्तिरिति।** एकाधिकरणकत्वस्य तेषु बाधितत्वादिति भावः। नन्वेवमप्यनुबन्धकार्य-साङ्कर्यापत्तिरत आह। **अनुबन्धेति।** अनुबन्धे कार्यव्यवस्थापीत्यर्थः। तामेव दृष्टान्तपूर्व-मुपपादयति। **लोक इति।** हि यथा । तथेहापि = शास्त्रेऽपि। **कर्मण्यणित्यत्रैवेति।** इति विहिताण्येवेत्यर्थः। एवः प्रकृतटादिव्यवच्छेदे। क्वचित्तच्छून्यः पाठः, स सुगम एव। एतेन णादावपि णित्वसत्वादिदं चिन्त्यमित्यपास्तम्। गापोष्ठकि = **गापोष्ठगि**त्यत्र। आदिना अप्रत्ययादिपरिग्रहः। तुरुक्तव्यवच्छेदे। अत एव = तत्तदनुबन्धकार्याणां व्यवस्थितत्वादेव।

**इत्यत्र टित्त्वकित्त्वे ''अ साम्प्रतिके'' (पा०सू० ३-२-९) इत्यादौ तु नैकमप्यनुबन्ध-कार्यमिति व्यवस्था। अत एव ''प्राग्दीव्यतोऽण्'' ''शिवादिभ्योऽण्'' इत्यादौ पुनः पुनर्णित्करणं सार्थकम्। कथं तर्हि घटेन तरतीति घटिकः, ''तरति'' (पा०सू० ४-४-५) इत्यधिकारे ''नौद्व्यचष्ठन्'' (पा०सू० ४-४-७) इति ठन्? कथं च धनस्य निमित्तं संयोग उत्पातो वा धन्यः ''तस्य संयोगोत्पातौ'' (पा०सू० ५-१-३८) इत्यधिकारे ''गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्'' (पा०सू० ५-१-३९) इति चेत्? आवृत्तिकृताद् द्व्यज्व्यपदेशाद्भविष्यति। न च ''बाहुकः'' इत्यादौ मुख्यद्व्यचि चरितार्थत्वाद्गौणे कार्यासम्भव इति वाच्यम्, अश्वादिप्रतिषेधेनेह गौणस्यापि मुख्यसमकक्षताया ज्ञापनात्। अत एव 'किरिणि' इत्यादौ ''सावेकाचः'' (पा०सू० ६-१-१६८) इति विभक्तेरुदात्तत्वं न भवति, आवृत्तिकृतेन द्व्यज्व्यपदेशेन स्वाश्रयस्य एकाज्व्यपदेशस्य निवर्त्तितत्वात्। न हि त्रिपुत्रो द्विपुत्रव्यपदेशं लभते। तस्मादुक्तरीत्या बाधकाभावाल्लाघवरूपसाधकबलाच्चाकारव्यक्तिरेकैवेति सर्वं सुस्थमिति चेत्? न, उदात्तत्वादि**

---

अन्यथा ऐक्यपक्षे तदसङ्गतिः स्पष्टैव। **कथं तर्हीति।** तस्यैक्ये तत्रादोषेप्यन्यत्र [1](कथमित्यर्थः। तत्र द्व्यचूकत्वाभावेन सूत्राप्रवृत्तेरिति भावः। इतिर्व्युत्क्रमे। **घाटिक इति।** इत्यत्र) उभयोरभेदद्योतको यथाश्रुतो वा। तदा तत्रेत्यत्रेति शेषः। अग्रे इवः। श्वादेर्यत् = अश्वादेर्यदिति यत्। इतिरथोच्येतेति पूर्वपक्षसमाप्तौ। क्वचिदिति चेदिति पाठः। समाधत्ते। **आवृत्तिकृतादिति।** आवृत्तिः पुनरुच्चारणम्। तज्जन्यसंख्यया द्व्यचूकत्वव्यवहारादित्यर्थः। एवमग्रेऽपि। आदिना युआदिपरिग्रहः। **चरितार्थत्वादिति।** ठनादेरिति भावः। **अश्वादीति। गोद्व्यच** (५-१-३९) इति सूत्र इति शेषः। अनेन लिङ्गेन श्रुतिस्मृतिसिद्धत्वादस्य व्यवहारस्य गौणत्वमेव नेति ज्ञाप्यत इत्यर्थः। तथा च संख्यविषये गौणमुख्यन्यायो नाश्रीयत इति भावः। **नेह** शास्त्रे संख्यविषये न तु सर्वत्र। अत एव = कृतद्व्यचूकत्वव्यपदेशस्य मुख्यसमकक्षत्वज्ञापनेन तस्य सूचकत्वादेव। आदिना गिरिणेत्यादिपरिग्रहः। नन्वेवमपि मुख्यं स्वाश्रयैकाचूत्वमादाय तदुर्वारमत आह। **आवृत्तीति।** पूर्वा संख्या उत्तरया मुख्यया गौण्या वा बाध्यत इति भावः। लोकसिद्ध एवायमर्थ इत्याह। **न हीति।** इदमुपलक्षणं **ऋषिसहस्र**मित्यादिभाष्योक्तस्यापि। नन्वित्यादिनोक्तपूर्वपक्षमुपसंहरति। **तस्मादिति। लाघवेति।** अनन्ततद्व्यक्तितत्प्रागभावतद्ध्वंसाकल्पनप्रयुक्तलाघवेत्यर्थः। **अध्यासेनेति।** तत्तद्धर्मवत्तया

---

१. अत्रापि 'प्यन्यत्रे'त्यनन्तरं 'कथमित्यर्थ' इत्यारभ्य 'घाटिक इति। इत्यत्र' इत्यन्तः ( ) चिह्नस्थः मैसूरुपाठे नष्टः 'IOL' पाठे उपलभ्यते।

**विरुद्धधर्माध्यासेन व्यक्त्यैक्यस्य बाधात्। ध्वनिधर्मा एवैत इत्युक्तमिति चेत्तर्हि कत्वगत्वादिकमपि तस्यैवास्त्विति अकारेकारादीनामप्यैक्यप्रसङ्गः। तदेतदुच्यते-अखण्डं पदं वाक्यं वा वाचकमिति। किं बहुना मास्त्वेव व्यङ्ग्यो वर्णः, व्यञ्जकत्वाभिमतैर्ध्वनिभिरेव सर्वनिर्वाहात्। उक्तं च हरिणा —**

**अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता।**
**कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः॥ इति। (वा.प. १-९३)**

**तस्माद्यदि ध्वनिभिरेव निर्वाहस्तर्हि जातिस्फोट एव, नो चेत् कखयोरिवोदात्तानुदात्तादीनामपि भेद एवेति न्यायतः परिनिष्ठिते सति**

**[१]एवं ध्वनिगतान् भेदानुदात्तस्वरितादिकान्।**
**वर्णा अनुपतन्तः स्युरर्थावगतिहेतवः॥**

**इति मीमांसकमतमर्द्धजरतीयत्वादुपेक्ष्यमिति स्थितम्।**

---

प्रत्ययेनेत्यर्थः। धर्मावभासेनेति पाठस्तु सुगम एव। अन्यथा अध्यासस्यैव प्रागुक्तत्वेनासङ्गतिः स्पष्टैव। आदिना घत्वादिपरिग्रहः। अग्रे आदिना कादिपरिग्रहः। **प्रसङ्ग इति।** तथा चाकारादीनां प्रत्येकमेकत्वं मिथो भेदश्चेत्यर्धजरतीयमनौचित्यमिति भावः। तत्पक्षे सिद्धान्तिसम्मतिमाह। **तदिति।** तेषां सर्वेषां ध्वनिधर्मत्वमभ्युपेत्य वक्ष्यमाणमुच्यत इत्यर्थः। भिन्नत्वे सखण्डत्वसम्भवो नैकत्व इति भावः। तेषां ध्वनिधर्मत्वे दोषान्तरमाह। **किं बहुनेति।** तत्र सम्मतिमाह। **उक्तं चेति।** व्याख्यातेयं पस्पशाह्निके। उपसंहरति। **तस्मादिति।** स्थितमित्यत्रान्वयः। **जातिस्फोट एवेति।** जातिरेवैका सैव च वाचिका, व्यक्तयस्तु वर्णरूपा ध्वनिरूपा वा अनन्ता इत्यर्थः। परं तु न तदाश्रया शास्त्रीयप्रक्रियेति दोषोऽत्र पक्षे बोध्यः। अत एवाह। **नो चेदिति।** ध्वनिभिरनिर्वाहश्चेदित्यर्थः। कखयोरित्युपलक्षणमन्येषामपि। **न्यायत इति।** उक्तयुक्त्यादिना निश्चिते सतीत्यर्थः। एवं प्रागुक्तप्रकारेण तद्गतान् तान् भेदाननुपश्चात् पतन्तो गच्छन्तस्तत्तद्वैशिष्ट्येन भासमाना वर्णा अर्थबोधजनका स्युरित्यर्थः। पठन्त इति पाठे तान् भेदान् अनु पश्चाद् अनुलक्ष्य वोच्चार्यमाणा इत्यर्थ इति केचित्। अपपाठ एवायमिति **परे। अर्द्धेति।** उदात्तदयो ध्वनिगता अथ च वर्णाङ्गीकार इत्यर्धजरतीयत्वादित्यर्थः।

---

१. एवं ध्वनिगुणान् सर्वान् नित्यत्वेन व्यवस्थितान्।
वर्णा अनुपतन्तः स्युरर्थभेदावबोधिनः॥ इति श्लोकवार्तिके पाठः। श्लो.वा.पृ.सं. ५६६

**एवञ्च अनन्ता वर्णा इति नैयायिकाद्यभ्युपगतरीत्या यद्ययं जातिपरो निर्देशस्तर्हि ''अस्य च्वौ'' (पा०सू० ७-४-३२) इत्यत्रापि तथैवास्त्विति किं ग्रहणकशास्त्रेण ? तदुक्तम् - ''सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात्'' इति। तपरसूत्रं तु जातिनिर्देश-प्रयुक्तस्यैवातिप्रसङ्गस्य भङ्गाय। ''त्यदादीनामः'' (पा०सू० ७-२-१०२) इत्यादौ तु एकमात्रव्यक्तिरपि जातिविशेषणतया विवक्ष्यते विधेयविशेषणत्वात्। पश्वेकत्ववत्। ''अस्य च्वौ'' (पा०सू० ७-४-३२) इत्यादौ तु अनुवाद्यविशेषणत्वान्न व्यक्तिर्विवक्षिता ग्रहैकत्ववत्। किं तु अण्ग्रहणं कुर्वतः सूत्रकृतो नायं पक्षोऽभिप्रेतः। एका**

---

## २.७ 'एका अवर्णव्यक्तिः' 'जातिपरनिर्देशः' 'व्यक्तिनिर्देशः' इति पक्षत्रयेऽपि ग्रहणकसूत्रवैयर्थ्यशङ्का ।

एवं नानात्वे सिद्धे तदवस्थं प्रागुक्तदोषं दृढयितुमन्यथा तदुद्धारं निरसितुं चाह। **एवञ्चेति।** उक्तरीत्या नानात्वे स्थितौ[१] चेत्यर्थः। **नन्ता इति।** व्यक्तिस्फोटपक्ष इति भावः। **अयं** अइउणित्यत्रत्यः। **प्रयुक्तस्यैवेति।** तत्पक्षे वेति भावः। अणूग्रहणाभावेऽप्रत्यय इत्यपि नास्ति, अन्यथानिर्वाहात्। अत एव जातिपक्षे तपरसूत्रवत्तस्य साफल्यं भाष्ये नोक्तमित्येकदेशी आह। **त्यदादीति।** वस्तुतस्तु **सवर्णेऽण्ग्रहण**मिति वार्तिकादिस्वारस्यादप्रत्यय इत्यस्त्येवेति न दोष इति तत्वं बोध्यम्। स्पष्टं चेदमन्यत्र। **एकमात्रेति।** एकत्रिमात्रिकव्यक्तिरपीत्यर्थः। नान्तरीकतयोच्चार्य-माणेति शेषः। एवमग्रेऽपि। अत्र पक्षे जातेः प्राधान्येन विधेयत्वात्तद्विशेषणत्वं व्यक्तेरिति भावः। **पश्वेकत्वेति। पशुना यजेते**त्यत्र यागस्य वाक्यन्तरेण प्राप्तत्वात् तदुद्देशेन पशुरूपो गुणो विधी-यते। तत्र तद्विशेषणस्यैकत्वस्याविवक्षायामनेकपशुविधानापत्तिरिति विधेयानेकत्वलक्षणवाक्य-भेदप्रसङ्ग इति तद्विवक्षेति भावः। **विवक्षितेति।** जातिविशेषणत्वेनेति भावः। **ग्रहैकत्वेति। प्राजापत्या नव ग्रहा गृह्यन्त** इति वाक्येन ग्रहाणां प्राप्तत्वात् **ग्रहं संमार्ष्टीत्यत्र** तदुद्देशेन संमार्गो विधीयते। तत्रोद्देश्यग्रहगतैकत्वसंख्याविवक्षायां तद्विशिष्टस्योद्देश्यत्वे संस्कार्यत्वेन तस्य प्राधान्यात् **प्रति प्रधानं गुणावृत्ति**रिति न्यायेनावृत्तिलक्षणवाक्यभेदप्रसङ्ग इति तद्विवक्षेति भावः। **एकेति।** [२](एतेन द्वयोरतुल्यतेत्यपास्तम्। एवं यद्यपि निर्वाहस्तथाप्यसौ नेष्ट इत्याह। **किन्त्विति। दूषित**

१. नानात्वस्थितौ इति क पाठः।

२. 'एकेति' प्रतीकानन्तरं 'एतेने'त्यारभ्य 'दूषित एवेति' इति प्रतीकपर्यन्तं ( ) मैसूरुपुस्तके नष्टः पाठः 'IOL' पुस्तके उपलभ्यते।

**अवर्णव्यक्तिरिति पक्षस्तु दूषित एव। अष्टादश अवर्णव्यक्तयः इति पक्षे तु ''अइउण्'' (मा०सू० १) इति यदि जातिपरो निर्देशस्तर्हि पुनरण्ग्रहणवैयर्थ्यम्। व्यक्तिनिर्देशे तूक्तरीत्या ''अस्य च्वौ'' (पा०सू० ७-४-३२) इत्यादौ सवर्णग्रहणानुपपत्तिरिति महत्सङ्कटम्। तस्मादिह सूत्रकारस्याशयो दुर्वच इति चेत् ?**

**उच्यते, त्रिष्वपि पक्षेषु अस्त्येव सूत्रस्योपपत्तिः। तथा हि, स एवायमकार इति प्रत्यभिज्ञाबलादकार एक एवेति पक्षे धर्मव्यवस्थायास्त्वयैवोपपादनाद्यथा के अण्कार्यं न भवति, यथा चाप्रत्ययादिविधिस्थले न दीर्घादिप्रवृत्तिः, तथा ''अस्य च्वौ'' (पा०सू० ७-४-३२) इति विधिरपि 'मालीभवति' इत्यादौ न प्रवर्तेतेति ग्रहणकशास्त्रं क्रियते। तच्च सावर्ण्याधीनमिति ह्रस्वस्य विवृतत्वं प्रतिज्ञायते। तत्तु आक्षरसमाम्नायिकस्यैव चेत्पुनरपि न व्यवतिष्ठेतेति सार्वत्रिकी प्रतिज्ञा। एवमपि ''अस्य च्वौ'' (पा०सू० ७-४-३२)**

---

**एवेति।)** अनुपदमिति भावः। नानात्वपक्षे एव पक्षान्तरमाह। **अष्टादशेति।** तत्वं चाष्टादशधर्मवत्त्वाद् ह्रस्वत्वोदात्तत्वानुनासिकत्वादीनां भेदमाश्रित्येदम्। **जातीति।** सर्वसाधारणजातीत्यर्थः। एवं प्रागपि। **वैयर्थ्यमिति। अस्य च्वौ** (पा०सू० ७-४-३२) इत्यादावपि तथैव निर्वाहात् विधेयेऽप्युक्तरीत्यादिना न दोषः। तथा चायमपि न सूत्रकृतोऽभिमत इति भावः। **व्यक्तीति।** तस्मिन्नेव पक्षे अइउणित्यत्रेति भावः। **उक्तरीत्येति।** प्रयत्नभेदेनानणुत्वादित्यर्थः। **इह** एतद्विषये। **आशय इति।** येन तत्सूत्रं सफलं भवेदिति भावः।

## २.८ पक्षत्रयेऽपि सूत्रसार्थक्योपपादनम्

**त्रिष्वपीति।** एका अवर्णव्यक्तिरष्टादशावर्णव्यक्तयोऽनन्तास्ता इति त्रिष्वपि पक्षेष्वित्यर्थः। अपिना तुरीयसिद्धान्तपक्षसमुच्चयः। **सूत्रेति।** अणुदित्सूत्रेत्यर्थः। **बलादिति।** हेत्वन्तरमप्यत्र प्रागुक्तं बोध्यम्। **एक एवेतीति।** व्यक्तेर्नित्यत्वैकत्वविभुत्ववादिपक्षे इत्यर्थः। **धर्मेति।** उदात्तत्वादिणित्वकित्वधर्मेत्यर्थः। अयमग्रे सर्वत्र हेतुः। **चाप्रत्ययादीति।** अकाररूपप्रत्ययादिविधायकसूत्रलक्ष्येष्वित्यर्थः। आदिना इप्रत्ययाद्यादेशादीनां ग्रहणम्। ह्रस्वादेरुपादानात्ते एव विधेया न दीर्घादयः। सूत्राभावेऽप्रत्यय इति सुतरां नेति तद्भावः। **तच्चेति।** ग्रहणकशास्त्रं चेत्यर्थः। **सार्वण्याधीनमिति।** अत्र पक्षे सावर्ण्यादिव्यवहारस्तु ध्वनिगतह्रस्वत्वदीर्घत्वादिभिः कल्पितभेदमादायेति बोध्यम्। **आक्षरसमाम्नायिकस्यैवेति।** आक्षरसमाम्नायिकत्वरूपोपाधिविशिष्टस्यैवेत्यर्थः। **न व्यवतिष्ठेतेतीति।** कार्यमिति शेषः।

**इत्यादौ अनणुत्वादेव ग्राहकत्वं न स्यादिति चेत् ? विवृतह्रस्वत्वादेरविशेषेण तस्याप्यणुत्वात्। न हि मुण्डत्वजटिलत्वादिवद्देशभेदेनानुपात्ताः स्वरूपमात्रानुवादेन विहिता अपि श्यामो दीर्घश्चतुर्बाहुरित्यादयो व्यवतिष्ठन्ते। उदात्तानुदात्तस्वरितानुनासिकत्वगुणास्तु स्वशब्देनानुपात्ता न भेदका इति वृद्धिसूत्रे वक्ष्यते। अनन्ता एव व्यक्तय इति पक्षे अष्टादश अवर्णव्यक्तय इति पक्षे च यद्यपि ह्रस्वदीर्घप्लुतसाधारणी एका जातिः कण्ठादिजन्यतावच्छेदिका तज्जन्यध्वनिव्यङ्ग्यतावच्छेदिका वाऽस्त्येव, तथापि तद्व्याप्यह्रस्वमात्रवृत्तिरपि जातिरस्ति। तथा च अइउण्सूत्रे व्याप्यजातिपरो निर्देशः।**

---

कार्यव्यवस्था न स्यादित्यर्थः। प्रकारान्तरेण प्रागुक्तमेव शङ्कते। **एवमिति।** तस्य सर्वत्र विवृतत्वप्रतिज्ञानेऽपीत्यर्थः। **अनण्वादेवेति।** [1]तत्र तस्य प्रयोगस्य संवृतत्वेन विवृतत्वाभावादित्यभिमान इति कश्चित्। वस्तुतो धर्मव्यवस्थायाः प्रागुक्तत्वेनाक्षरसमाम्नायिकत्वविशिष्टविवृतत्वह्रस्वत्वावच्छिन्नस्यैव चाणुत्वेतस्य तद्भिन्नत्वेनातत्वादेवेत्यर्थ इति बोध्यम्। चेन्नेति पाठः। **अविशेषेणेति।** संवृतस्याणुदित्सूत्रदृष्ट्याऽसिद्धत्वादिति कश्चित्। वस्तुतस्तु ह्रस्वत्वस्य सर्वत्र निर्विवादत्वेन विवृतत्वप्रतिज्ञायाः सार्वत्रिकत्वेना**स्य च्वा**वित्यादौ तदनुकरणसत्वेन तत्वस्याप्यविशेषेणेत्यर्थ इति बोध्यम्। एवञ्च विवृतत्वह्रस्वत्वादेर्न भेदकत्वमिति फलितमिति भावः। नन्वेवमप्याक्षरसमाम्नायिकस्यैव तत्वमिति शङ्का तदवस्थैवात आह। **न हीति।** वैधर्मे दृष्टान्तः। एवञ्चाणुत्वस्य स्वरूपमात्रानुवादेन विहितत्वं, न त्वाक्षरसमाम्नायिकत्वानुवादेनेति तस्य न भेदकत्वमित्यणुत्वं सर्वत्र तत्र न तु व्यवस्थितमिति भावः। ननु विवृतत्वादेर्देशभेदेनानुपादानादभेदकत्वेऽपि उदात्तत्वादेर्मुण्डत्वादितुल्यत्वेनात्रोदात्तत्वादीनां सर्वथा भेदकत्वं स्यादित्यनण्त्वं तदवस्थमेवात आह। **उदात्तेति।** स्वशब्देन = उदात्तादिशब्देन। एवमस्यैक्यमिति पक्षे सूत्रोपपत्तिं कृत्वा पक्षद्वये तामाह। **अनन्ता इति।** एवेनैक्यपक्षनिरासः। **कण्ठादीति।** केवलकण्ठत्वे सति स्वरत्वमत्वजातिव्यञ्जकमिति दीर्घप्लुतयोरपि सेति भावः। एवं वर्णानित्यत्वपक्षे कार्यतावच्छेदकतया जातिसिद्धिमुक्त्वा वर्णनित्यतापक्षे व्यङ्ग्यतावच्छेदकतया तत्सिद्धिमाह। **तज्जन्येति।** कण्ठादिजन्येत्यर्थः। का वास्त्येवेति पाठः। **जातिरस्तीति।** अवान्तरकारणभिदा तज्जन्यताद्यवच्छेदकतया सिद्धेति भावः। **तथा च** व्याप्यजातिसत्वे च। **निर्देश इति।** अणुदित्सूत्रोपपत्तय इति भावः। **तेन** तादृशजातिपरनिर्देशेन। जातावसम्भवाज्जातेरनुच्चारणाच्चाह।

---

१. तत्रत्यस्य इति क पाठः।

**तेन तज्जातीये एकत्र कृतं विवृतत्वं सर्वेष्वपि सिध्यति। अत एव सर्वेऽपि ह्रस्वा अणो भवन्त्येवेति ''अस्य च्वौ'' (पा०सू० ७-४-३२) इत्यादौ न कश्चिद्दोषः। 'अवात्ताम्' इत्यादिष्वपि ह्येषैव गतिः। अन्यथा अवात् स् तामिति स्थिते सिचः पूर्वपरयोस्तकार-योर्मध्ये अन्यतरस्यैव झल्त्वं स्यान्नतूभयोः अक्षरसमाम्नाये उभयोरपाठात्। ततश्च ''झलो झलि'' (पा०सू० ८-२-२६) इति न प्रवर्तेत। सूत्रस्यावकाशस्तु 'अभित्थाः' इत्यादिः स्यात्। एवञ्च दीर्घाणामनण्त्वेन सवर्णग्राहकत्वं नास्तीत्यपि सिद्धान्तः संगच्छते।**

**अथ व्यापकजातिपरमेव निर्देशं स्वीकृत्य अण्ग्रहणं त्यज्यतामिति चेत्? एवमपि ''उपसर्गादृति'' (पा०सू० ६-१-७१) इत्यादौ लृवर्णग्रहणाय ग्रहणकशास्त्रस्यावश्य-कत्वात्। न च ''ऋलृवर्णयोः'' (का०वा०) इति सावर्ण्यविधानसामर्थ्यात्तद्ग्रहः**

---

**तज्जातीय इति।** न चैकस्मिन् तज्जात्याश्रये तन्निबन्धनकार्यसिद्धौ शास्त्रं चरितार्थमाश्रयान्तरकार्यं[1] न प्रयुञ्जीतेति वाच्यम्। सामान्यशास्त्रस्यापवादमन्तरेण विशेषोपसंहाराभावादनियतविशेषोपसंहारे च सर्वत्र कार्यप्रसक्तेरनिवारणादित्याहुः। **सर्वेष्वपि** ह्रस्वेषु। **अत एवेति।** तथा निर्देशेन तत्र सर्वत्र विवृतत्वसिद्धेरेवेत्यर्थः। तेषामभेदकत्वस्योक्तत्वेन **अस्य च्वा**वित्यादावणुदित्सूत्रप्रवृत्तिरविघ्नेति भावः। उक्तप्रकारस्यावश्याश्रयणीयतां ध्वनयति। **अवात्तामिति।** वसेर्लुङ्स्तसस्ताम्। सिच्। सःस्ये(पा०सू० ७-४-४९)ति तत्वम्। वदव्रजे(पा०सू० ७-२-३)ति वृद्धिः। झलो झली (पा०सू० ८-२-२६)ति सलोपः। **ह्येषैव** = यतो जातिपरनिर्देशरूपैव। अन्यथा = तत्र व्यक्तिनिर्देशे। **अपाठादिति।** तत्रैकस्यैवानुकरणसत्वादिति भावः। इष्टापत्तावाह। **ततश्चेति।** तथा च तदसिद्धिरिति भावः। ननु वचनसामर्थ्यात् हल्सदृशेऽपि भविष्यतीत्यत आह। **सूत्रस्येति। अभित्था इति।** भिदेर्लुङि सिचि रूपम्। आदिनाऽबुद्धेत्यादिपरिग्रहः। ननु व्यापकजातिपरनि-र्देशेऽपि प्रागुक्तसर्वसिद्धिरत आह। **एवञ्चेति।** व्याप्यजातिपरनिर्देशे चेत्यर्थः। **इत्यपि सिद्धान्त इति।** इति सिद्धान्तोऽपीत्यर्थः। अपिना सूत्रसमुच्चयः। एवं पक्षत्रयेऽपि तदुपपत्तिः सिद्धेति भावः।

अस्मिन्नेव पक्षद्वये आवश्यकत्वात्ततो लघुभूतपक्षाश्रयणेऽपि सूत्रं सार्थकमिति बोधयितुं लाघवादेवाशङ्कते। **अथेति।** अत एवैवः प्रयुक्तः। **एवमपि** = तत्स्वीकारेऽकारादौ सर्वत्र निर्वाहेऽपि। **लृवर्णेति।** जातिभेदेन तद्भिना ग्रहणासम्भवादिति भावः। **सामर्थ्यादिति।** तच्च तदर्थं, तदभावे तु तदानर्थक्यं स्पष्टमेवेति भावः। **तद्ग्रहः** = लृवर्णग्रहणम्। आदिने**को सवर्ण**

---

१. आश्रयान्तरे कार्यं इति ख पाठः।

**''अकः सवर्णे'' (पा०सू० ६-१-१०१) इत्यादौ चारितार्थ्यात्। किञ्च, ''अस्य च्वौ'' (पा०सू० ७-४-३२) इत्यादौ व्यापकजातिनिर्देशः ''त्यदादीनामः'' (पा०सू० ७-२-१०२) इत्यादौ तु व्याप्यजातिनिर्देश इत्यस्य नियामकाभावे सङ्करोऽपि स्यात्। न चानुवाद्यविशेषणं विधेयविशेषणं च ग्रहैकत्वपश्वेकत्ववद्विवक्षितमविवक्षितं चेति मीमांसकमर्यादा वैयाकरणैः स्वीकर्त्तुं शक्या ''उपेयिवाननाश्वाननूचानश्च'' (पा०सू० ३-२-१०९) इत्यत्र उपेत्यविवक्षितं नञ्प्रभृति तु विवक्षितमिति स्वीकारात् ''आर्द्धधातुकस्येड् वलादेः (पा०सू० ७-२-३५) इत्यादावनुवाद्यविशेषणस्यापि बहुशो विवक्षणाच्च। तस्माद् ''व्याख्यानतो विशेषप्रतिपत्तिः'' (प०भा० १) इति परिभाषैव सिद्धान्ते शरणम्। व्याख्यानं तु लक्ष्यानुरोधीति यद्यप्यगत्या तत्र तत्राश्रीयते, तथापि नैतद्बलेन ग्रहणकशास्त्रस्य प्रत्याख्यानं चमत्कारमावहते। ग्रहणकशास्त्रबलेन हि अप्रत्ययोऽविधीयमानः सवर्णग्राहक इति स्फुटतरं प्रतीयते। उल्लङ्घिता चेयं**

---

(पा०सू० ६-१-१२७) इत्यस्य परिग्रहः। दीर्घसिद्धिप्रकृतिभावप्रतिबन्धाभ्यामिति भावः। नन्व**कः सवर्ण** इत्यत्र फलं चेत्तत्रैव लृग्रहणं कार्यं, प्रकृतिभावे त्विष्टापत्तिः। सिद्धान्तेऽपि **ऋत्यक** (पा०सू० ६-१-१२८) इत्यस्येष्टत्वादत आह। **किञ्चेति।** यत इति शेषः। इत्यस्य इत्यत्र। ननु विशेषणविवक्षाविवक्षयोर्नियामकत्वस्य प्रागुक्तत्वान्न सङ्करोऽत आह। **न चेति।** द्वन्द्वोत्तरं वतिः यथासंख्यमन्वयः। **स्वीकारादिति।** यद्येतेषां विधानं तर्हि सर्वत्र विवक्षोचिता। यदि साधुत्वं विधेयं तर्हि सर्वत्राविवक्षोचितेत्यर्द्धजरतीयासङ्गतिरन्यथा स्यादिति भावः। दोषान्तरमाह। **आर्धधातुकेति।** आदिना सिचि वृद्धि(पा०सू० ७-२-१)रित्यादिपरिग्रहः। उपसंहरति। **तस्मादिति।** अनियमादित्यर्थः। **सिद्धान्ते** = व्याकरणसिद्धान्ते। ननु तर्हि व्याख्यानेनैव सङ्करनिरासोऽस्त्विति तत्पक्षस्यादुष्टत्वे प्रागुक्तरीत्या अणुदित्सूत्रं व्यर्थमेवात आह। **व्याख्यानं त्विति।** अगत्या = लक्ष्यान्यथानुपपत्त्या। एवाश्चात्रापि तेनैव निर्वाह इति भावः। **नैतद्बलेन** व्याख्यानबलेन। तेनैतत्पक्षादुष्टत्वाप्रतिपादनद्वारा प्रागुक्तेनेति यावत्। **चमत्कारमिति।** क्लेशेन ततस्तादृशार्थ-प्रतीतेरिति भावः। तदेव व्यतिरेकमुखेनाह। **ग्रहणकेति।** हि यतः। अप्रत्यय इत्यस्य व्याख्या। **अविधीति।** नन्वेवमपि तन्मर्यादात्यागरूपो दोषो दुरुद्धर एवेति चेन्न तत्तच्छास्त्रमर्यादाया भिन्नत्वेन तस्यादोषत्वात्। तदेतद्ध्वनयन्मर्यादा न केवलमस्माभिरेव त्यज्यते किन्त्वन्यैरपीति सिंहावलोकनन्यायेनाह। **उल्लङ्घितेति।** प्रशस्यरूपोद्देश्यविशेषणस्या-तिशयस्य विवक्षितत्वादिति भावः। तदनङ्गीकारः पाणिन्यादिभिरतोऽपीत्याह।

**मीमांसकमर्यादा धर्मशास्त्रेऽपि बहुज्ञः श्रेयांसं न प्रबोधयेदित्यादिषु। ''एकः पूर्वपरयोः'' (पा०सू० ६-१-८४) इति सूत्रे एकग्रहणमपीह ज्ञापकम्। अन्यथा ''आद्गुणः'' (पा०सू० ६-१-८७) इत्येकत्वस्य पश्वेकत्ववद्विवक्षासंभवात्किं तेनेति दिक्।**

**अथवार्थवत्त्वस्याविवक्षायामपि इहोच्चारितोऽकारादिः स्वसदृशीः षड् व्यक्तीः सादृश्याख्यसम्बन्धेनोपस्थापयति। नचैवमपि वृत्त्याऽनुपस्थितानां शाब्दबोधेऽन्वय-प्रतियोगितानुपपत्तिः, अर्थाध्याहारवादे बाधकाभावात्। अतिप्रसङ्गभङ्गस्तु तात्पर्यग्राहक-बलेनैव। अन्यथा तवापि लक्षणाध्याहारादेरतिप्रसङ्गस्य तदवस्थतत्वात्। ''स्पृहेरीप्सितः'' (पा०सू० १-४-४६) इत्यनुशासनबलात् 'पुष्पेभ्यः' इत्यादौ**

---

**एक इति।** पीह = अत्र तन्मर्यादानङ्गीकारे। अन्यथा = तदङ्गीकारे। एकत्वस्य विधेयविशेषणस्य। **दिगिति।** तदर्थस्तु तस्मादस्मिन्नपि तुरीये पक्षे सूत्रोपपत्तिरिति सूत्रकृत्सम्मतः पन्थाः। भाष्यसम्मतस्तु प्राचां मतेन **ऋलृक्सूत्रे इदं त्ववधेय**मित्यादिना स्फुटीभविष्यति मूले एवेति। ननु जातिनिर्देशेऽर्थवत्वस्याविवक्षितत्वादिति प्रागुक्तग्रन्थविरोधः। स ह्यनुकार्यानु-करणयोरभेदविवक्षातात्पर्यकः। न हि तत्पक्षे तस्याः सम्भवः। एवञ्च तत्पक्षे कथं सूत्रसाफल्यमत आह। **अथ वेति। अर्थवत्वेति।** व्यक्तिपक्षे तत्पक्षाङ्गीकारेऽपीत्यर्थः। **पीह** अक्षरसमाम्नाये। **सादृश्येति।** अनुकार्यानुकरणयोरभेदविवक्षेति भावः। एवञ्च तासामेवाणुत्वाद्दीर्घादीनामनणुत्वा**दस्य च्वा**वित्यादौ तस्य तत्वात्तद्ग्रहाय तत्सूत्रमत्र पञ्चमपक्षेऽपि सफलमिति भावः। [1]चैवमपि = तेन सम्बन्धेनोपस्थितावपि। **वृत्त्याऽनुपस्थितानामिति।** हेतुगर्भं विशेषणम्। **अर्थाध्याहारेति।** तन्मत इत्यर्थः। तद्वदत्रेति भावः। यद्वा वाद इत्यग्रे इवात्रापीति शेषः। यथाकथञ्चित्पदार्थोपस्थितिः शाब्दबोधे हेतुर्न तु पदजन्यत्वस्यापि तत्र निवेश इति तात्पर्यम्। नन्वेवं घटपटादितः समवायेनोपस्थिताकाशादेरपि घटमानयेति वाक्यजन्यशाब्दबोधेऽन्वयप्रतियोगित्वापत्तिरत आह। **अतिप्रसङ्गेति।** तथा चान्यार्थमवश्यं बोधे प्रकरणादिगृहीततात्पर्यज्ञानस्य हेतुत्वाङ्गीकारात्तत्सत्वे तत्र यथाकथञ्चिदुपस्थितस्यापि तस्य तत्वं तदसत्वे नेति तन्निवेशे न फलमिति भावः। अन्यथा = तात्पर्यज्ञानस्याहेतुत्वे । तवापि = वृत्त्युपस्थितस्यैव तत्रान्वयप्रतियोगित्वाङ्गीकर्तुरपि। **लक्षणेति।** लक्षणाया अध्याहारस्य चेत्यर्थः। स च शाब्दः। आदिनाऽऽर्थपरिग्रहः। गङ्गायां घोष इत्यादौ घोषादेरपि लक्षणया द्वारमित्यादौ पश्येत्यादेरप्यध्याहारेणान्वयोपपत्तेरिति भावः। नन्वक्लृप्तकल्पनात इति न्यायेन शब्दाध्याहार एवोचित इति प्रागुक्तमसङ्गतमेवेत्याशयेनाशङ्कते। **स्पृहेरिति।**

---

१. न चैवमपि इति ख पाठः।

**पदाध्याहारः क्लृप्त इति चेत् ? न, "ल्यब्लोपे कर्मणि" "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" (पा०सू० २-४-१४) इत्याद्यनुशासनादर्थाध्याहारस्यापि स्थलविशेषे क्लृप्तत्वात्। अन्यथा 'गवित्ययमाह' इत्यादावगतेश्चेति वक्ष्यते।**

**ऋलृक् (मा० सू० २)। ननु विधिवाक्येषु ऋकारो ग्रहणकशास्त्रबलेन ऋकारादीनष्टादश यथा गृण्हाति तथा लृवर्णानपि द्वादश ग्रहीष्यति तत्किं पृथग्लृकारोपदेशेन ? न च भिन्नस्थानतया सावर्ण्यविरहादग्रहणमिति वाच्यम्, "ऋकारलृकारयोः सवर्णविधिः" (का०वा) इति वार्तिकबलेन वाचनिकस्य सावर्ण्यस्यावश्यं वाच्यत्वात्। अन्यथा इहोपदिष्टेऽपि लृकारे 'प्राल्कारीयति' इत्यादौ**

---

**क्लृप्तत्वादिति।** तथा च तन्न्यायाविषय इति भावः। यद्यपि पदस्याध्याहारो नामानुमानमुपनीतभानं वा। तथा च तस्मिन् सत्यपि लोपोऽप्रयोगश्चास्त्येवेति तदुभयमुपपन्नमेवेति न तत्र ज्ञापकम्, तथापि दृशेरुच्चारणमात्रे प्रयोगाभावाज्ज्ञानमात्रे प्रयोगाच्च स्थानिपदस्य च स्थानं स्थितिः वर्तते न तु ज्ञायते यस्य स इत्यर्थात्तथा ज्ञानेप्यनुपपत्तितादवस्थ्येनार्थाध्याहारज्ञापकत्वमप्रतिहतम्। अप्रयुज्यमानस्येति व्याख्या तु मन्दबोधार्थेति न कश्चित् क्षुद्रोपद्रवः। वस्तुतस्तु वाक्यार्थे वाक्यैकदेशप्रयोगस्थले प्रविश पिण्डीमित्यादौ तस्यैव पदस्य सम्पूर्णवाक्यार्थशक्तता। तथा तल्लक्ष्ये उपात्तसमुदायस्याहरणघटि-ताद्यर्थे शक्तिः तच्छास्त्रबलात् स्थानिन इत्याद्युक्तेस्तत्प्रयोगेणायमेवार्थाध्याहार इति बोध्यम्। अत एव दूषणान्तरमाह। **अन्यथेति।** सादृश्याख्यसम्बन्धेनोपस्थितस्य शाब्दबोधाविषयत्व इत्यर्थः। अत्र सुपः श्रवणापत्तेरिति भावः। प्रत्ययलोप (पा०सू० १-१-६२) इत्यादिभिर्न प्रत्ययस्यानु-मानिकादिज्ञानं, किन्तु तदभावेप्यतिदेशात्कार्यसिद्धिरिति दिक्। **वक्ष्यते = प्रगृह्यसं**ज्ञाप्रकरणे।

## २.९ लृकारोपदेशप्रयोजनविचारे सूत्रवार्तिकसम्मतरीत्या 'प्रकृतिवदनुकरण' इत्यतिदेशस्यानित्यत्वनिरूपणम्

**ऋलृक्।** ननु ऋकारस्याच्त्ववदण्त्वेन ऋलृवर्णयोः सावर्ण्यादृकारेण लृकारस्यापि ग्रहणादच्कार्यस्य तत्र सिद्धौ किं लृकारोपदेशेनेत्याशङ्कते। **नन्वित्यादिना।** यद्यपि **नन्दिकेश्वरकाशिका**यामस्य फलान्तरमयुक्तमिति इयं शङ्का न युक्ता, तथापि पाणिन्युद्देश्यकं फलमस्ति न वेत्येतद्विचारतात्पर्यम्। ग्रहीष्यति तत्किमिति पाठः। **पृथगिति स्पष्टार्थतया इति।** तुल्यास्यसूत्राप्रवृत्त्येति शेषः। **वार्तिकबलेनेति।** तद्रूपप्रमाणेनेत्यर्थः। आवश्यकतामेव स्पष्टयति। **अन्यथेहोपेति।** तदनङ्गीकारे वर्णसमाम्नाय इत्यर्थः। **उपसर्गादृती**त्यस्यानुवृत्त्यर्थमुल्लेखः।

**''उपसर्गादृति धातौ'' (पा०सू० ६-१-९१) ''वासुप्यापिशलेः'' (पा०सू० ६-१-९२) इत्यस्याप्रवृत्तिप्रसङ्गात्। ननु क्लृपिस्थस्य लृकारस्येदमनुकरणम्। तस्य च स्वरकार्येष्वसिद्धत्वादृकार एवायमिति 'उपसर्गादृति' (पा०सू० ६-१-९१) इत्यादि सेत्स्यतीति चेत् ? न, ''कृपो रो लः'' (पा०सू० ८-२-१८) इति विहितस्यासिद्धत्वेऽपि तदनुकरणस्यास्यासिद्धत्वविरहात्।**

**स्यादेतत्, ''प्रकृतिवदनुकरणम्'' (प०भा० ३६) इत्यादिदेशादयमप्यसिद्ध एव। स चातिदेशोऽवश्याश्रयणीयः। ''द्विः पचन्त्वित्याह'' इति तैत्तिरीयवाक्ये यद्यपि पचन्त्वित्याद्युदात्तं पठ्यते, तथापि भाष्योदाहृते शाखान्तरीये पचन्तुशब्दस्य ''तिङ्ङतिङः'' (पा०सू० ८-१-२८) इति निघातो यथा स्यात्। नह्येतत्तिङन्तं, तिङन्तपदार्थकत्वात्। स्वाद्युत्पत्तिस्त्विह विवक्षाभेदेन वैकल्पिकीत्यर्थवत्सूत्रे वक्ष्यते। 'अग्नी इत्याह' इत्यादौ प्रगृह्यत्वमप्यतिदेशादेव। अतिदेशे ज्ञापकं तु ''यत्तदेतेभ्यः परिमाणे'' (पा०सू० ५-२-३९) इति सौत्रनिर्देशः। न ह्यत्रातिदेशं विना त्यदाद्यत्वं लभ्यते। ''अभिव्यक्तपदार्था ये'' इति न्यायेन लोकप्रसिद्धार्थपरतायामेव तत्प्रवृत्तेः। तथा**

---

**क्लृपिस्थस्येति।** चक्लृप इत्यादिप्रयोगस्थकृतलत्वकृपधातुनिष्ठस्येत्यर्थः। अन्यत्र लृकारस्याभावादिति भावः। **स्येदं** लृकारीयतीत्यत्रत्यं। **तस्य च** अनुकरणलृकारस्य। चस्त्वर्थे। **मितीति।** बुद्ध्येति शेषः। तस्याविषयत्वादाह। **इत्यादीति।** तेन **वा सुपी**(पा०सू० ६-१-९२)त्यस्य परिग्रहः। **विहितस्य विरहादिति।** भेदादिति भावः। तदनङ्गीकारं खण्डयति। **स चेति।** तत्र हेतुमाह। **द्विरिति।** यत इत्यादिः। **पठ्यत इति।** एवञ्च न तत्रातिदेशफलम्, अनुकार्यस्याद्युदात्तत्वेन तत्स्वरविशिष्टस्यैवानुकरणादिति भावः। भाष्योदेत्यनेन निर्मूलत्वं निरस्तम्। ननु तिङन्तत्वात्सिद्ध एव निघातोऽत आह। **न ह्येतदिति।** क्रियाप्रधानस्यैव तत्वात् अस्य त्वनुकार्यशब्दपरत्वात्। तदाह। **तिङन्तेति।** नन्वतिङन्तत्वे प्रातिपदिकत्वात्सुबुत्पत्तिः स्यादत आह। **स्वाद्युत्पत्तिरिति।** इह = अनुकरणस्थले। **विवक्षेति।** भेदाभेदविवक्षाभेदेनेत्यर्थः। तस्य फलान्तरमाह। **अग्नी इत्येति।** द्व्यर्थानभिधानान्न द्विवचनान्तत्वमत्र। अत एवान्वर्थसंज्ञाकरणमिति भावः। ननु सफलत्वेऽपि गमकाभावान्निर्मूलः स इत्यत आह। **अतिदेश इति।** तत्वमुपपादयति। **न ह्येति। लभ्यत इति।** अन्त्य इति भावः। **नारायणा**द्यनुरोधेनाह। **अभीति।** सर्वनामसंज्ञाया अन्वर्थत्वाभावेप्यत्र न दोष इति साधारणयुक्त्या वारणे विशेषयुक्त्यादरोऽनुचित इति वा तदाकूतम्।

**च प्रयुज्यते – ''यत्तदोर्नित्यसम्बन्धः'' इति। नन्वनेनैवातिदेशेन अत्वस्यावश्यकत्वादुदाहृतप्रयोगोऽनुपपन्न एवेति चेत् ? न, उदाहृतज्ञापकसूत्र एव ''त्यदादीनि सर्वैः'' (पा०सू० १-२-७२) इत्येकशेषस्याकरणेन ''एतत्तदोः सुलोपः'' (पा०सू० ६-१-१३२) इत्यादिनिर्देशैश्चातिदेशस्यानित्यताज्ञापनात्।**

**अथ वा ''प्रावृट्शरत्कालदिवां ज'' (पा०सू० ६-३-१५) इति सूत्रे ''अपो योनियन्मतुषु च'' (का० वा०) इति वार्तिकेनेयं परिभाषा अस्या अनित्यता चेत्युभयमपि ज्ञाप्यते। तथा हि कारीर्याम् ''अप्सुमन्तावाज्यभागौ'' इति श्रुतम्। ''अप्सु मे सोमः'' ''अप्स्वग्ने सधिष्टव'' इति हि तत्र मन्त्रौ। तत्राप्सुशब्दादनुकरणभूतान्मतुपि 'अस्यवामीयम्' इत्यादाविवानुकरणस्य विभक्तित्वाभावादेव**

---

वस्तुतस्त्वस्य[१] गौणमुख्यन्यायमूलकत्वेन पदकार्यविषयकत्वेनात्राप्रवृत्तेश्चिन्त्यमिदम्। अन्वर्थसंज्ञयैवाप्रवृत्तिरत्रेति तत्त्वमिति बोध्यम्। **लोकेति।** लोकप्रसिद्धा ये अर्थपरा बुद्धिस्थपरामर्शकास्तत्वे सत्येवेत्यर्थः। **तथा च** तत्रैव तत्प्रवृत्तौ च। अभियुक्तैरिति शेषः। अनेनैव = प्रकृतिवदनुकरणमित्यनेनैव। **उदाहृतेति।** यत्तदोरितीत्यर्थः। **उदाहृतेति। यत्तदेतेभ्य** (पा०सू० ५-२-३९) इति ज्ञापकपरसूत्र इत्यर्थः। नन्वेकशेषे व्याख्यानाश्रयणप्रयुक्तं गौरवमतः स न कृतोऽत आह। **एतत्तदोरिति।** अन्यथा तत्राप्यत्वमुचितमिति भावः। **ज्ञापनादिति।** तथा चेष्टानुरोधेन तत्प्रवृत्तिरिति नोदाहृतप्रयोगासङ्गतिरिति भावः।

एवं सूत्रकृत्सम्मतत्वमुक्त्वा वार्तिककृत्सम्मतत्वमाह। **अथ वेति।** यद्वा ननु सौत्रत्वान्निर्देशोपपत्तिरिति तस्य न ज्ञापकत्वमत आह। **अथ वेति। उभयमपीति** स्पष्टार्थः। कारीर्या शुष्यत्सस्यसञ्जीवनाय **वृष्टिकामः कारीर्या यजेते**ति विहितयागप्रकरणे। **अप्सुमन्ताविति।** अप्सुपदघटितमन्त्रग्राह्यावाज्यभागावित्यर्थः। तावेवाह। **अप्सु म इति।** हिः प्रसिद्धौ चार्थे वा। 'अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा अग्निं च विश्वशम्भुवं' 'अप्स्वग्ने सधिष्टव सौषधीरनुध्यसे गर्भे सञ्जायसे पुनरि'ति तौ बोध्यौ। **तत्र** यागप्रकरणे। **तत्र** अप्सुमन्तावित्यत्र। अस्यवामशब्दो यस्मिन्नस्ति तदस्यवामीयं सूक्तम्। तच्च 'अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः। तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्र'मित्यादि

---

१. वस्तुतस्तस्य इति ख पाठः।

**लुकोऽप्रसङ्गादलुग्विधानमुक्तपरिभाषां ज्ञापयति। मतुबुत्पत्तेश्च प्रथमान्ततां विना दुर्लभत्वात्प्रातिपदिकताप्यावश्यिका। सा च प्रत्ययान्तत्वे सति दुर्लभेति प्रातिपदिकसंज्ञायामतिदेशप्रवृत्तिविरहाभ्यनुज्ञानादानित्यताऽपि सिद्धा। एतेन 'युष्मदस्मत्प्रत्ययगोचरयोः' इत्यादिप्रयोगा व्याख्याताः।**

**प्रकृतमनुसरामः, ऌकारानुकरणस्याप्यतिदेशेनासिद्धत्वात् 'प्राल्कारीयति'' इत्यादौ ''उपसर्गादृति'' (पा०सू० ६-७-९१) इत्यस्य प्रवृत्तिसिद्धौ किं सावर्ण्येनेति चेत् ? न, तथा सति रेफपरत्वप्राप्तावपि लकारपरत्वासिद्ध्या प्रकृतेऽनित्यत्वेनातिदेशाप्रवृत्तेरेव त्वयाऽपि वाच्यत्वात्। ननु रेफपरत्वे सिद्धेऽतिदेशाद्रेफस्य लकारो भविष्यतीति चेत् ? न, एवमपि गम्ऌसृप्ऌइत्यादिस्थस्य ऌकारस्यानुकरणे त्वदुक्तातिदेशादेरुक्तिसम्भवा-**

---

द्विपंचाशदर्चमिति बोध्यम्। अनुकरणस्य तदेकदेशस्य सुइत्यस्य। अत एव **मतौ छ** (पा०सू० ५-२-५९) इति सूत्रे [1]भाष्ये 'योऽसावाम्नायेऽस्यवामशब्दः पठ्यते स छप्रत्ययः प्रकृतेरस्यवामशब्दस्यास्यवामीयमित्यादौ पदार्थः। अत एव प्रातिपदिकत्वाच्छसिद्धि'रित्युक्तम्। एवं तल्लाभोपायमुक्त्वा तव नित्यत्वलाभोपायमाह। **मतुबिति।** चस्त्वर्थे । सूत्रे प्रथमान्तस्य निमित्तत्वे नो छो स्यादिति भावः। आवश्यिकेति पाठः। एतेन = अतिदेशानित्यताज्ञापनेन। **व्याख्याता इति।** उक्तरीत्या प्रत्ययोत्तरपदयोश्चे(पा०सू० ७-२-९८)ति त्वमादेशयोरभावेन व्याख्याता इत्यर्थः। तन्नित्यत्वे तु तदापत्त्या तदसङ्गतिः स्पष्टैव। एकशेषे द्विपर्यन्तानामिति नियमाभावेऽपि प्रागुक्तरीत्या स नेति भावः। तथा च नोदाहृतप्रयोगानुपपत्तिरिति समूलसफलातिदेशाश्रयणमावश्यकमिति सकलतात्पर्यम्। तथा सत्युपसंहरति। **प्रकृतमिति।** स्यादेतदित्याद्युक्तमित्यर्थः।

## २.१० सूत्रमते ऌकारोपदेशप्रयोजननिरूपणम्

उपसर्गादित्युपलक्षणं **वा सुपीत्यस्य। किं सावर्ण्येनेतीति।** तथा च ऌकारोपदेश आवश्यक इति भावः। तथा सति = ऋकारबुध्या प्रवृत्तत्वे सति। त्वयापि = सावर्ण्यखण्डकऌकारोपदेशवादिनापि। अतिदेशात् = प्रकृतिवदित्यनेन **कृपो रो ल** (पा०सू० ८-२-१६) इत्यस्यातिदेशात्। कैयटाद्यनुरोधेनाह। **एवमपीति।** तदनुकरणे निर्वाहेऽपीत्यर्थः। **अनुकरण इति।** तत्रैवेति भावः। आदिना तत्साध्यकार्यपरिग्रहः। **उक्तीति।** तस्य

---

१. म.भा. चतुर्थभागः पृ.सं. ३३३।

**भावात्। तस्मात्सवर्णत्वस्यावश्यके लृकारोपदेशो व्यर्थ एवेति चेत् ?**

**अत्रोच्यते, न तावद्वार्त्तिकं दृष्ट्वा सूत्रकृतः प्रवृत्तिः। आरब्धेऽपि वार्त्तिके ऋकार-लृकारयोः सावर्ण्यस्यानित्यतां ज्ञापयितुं कर्त्तव्य एव लृकारोपदेशः। तेन 'क्लृ३प्तशिखा' इत्यत्र ''गुरोरनृतः'' (पा०सू० ८-२-८६) इति प्लुतः सिध्यति। अन्यथा 'अनृतः' इति निषेधः स्यात् ऋकारेण लृकारग्रहणात्। 'क्लृप्यमानः, चलीक्लृप्यमानः' इत्यादौ ''ऋव-र्णान्नस्य'' (का० वा०) इत्यौपसंख्यानिकणत्वस्याप्रवृत्तिस्तु क्षुभ्नादित्वेनापि सुवचा। अन्यथा प्रक्लृप्यमानादौ ''कृत्यचः'' (पा०सू० ८-४-२९) इति णत्वस्य दुर्वारत्वात्।**

**इदं त्ववधेयम्, वार्त्तिकमते सवर्णेऽण्ग्रहणमपरिभाष्यमिति सिद्धान्तादृकारे**

---

स्वतःसिद्धत्वादिति भावः। परमप्रकृतमुपसंहरति। **तस्मादिति।** तत्र वृद्ध्यादिसिद्धेः प्रकारान्तरेणानिर्वाहादित्यर्थः। **तावत्** आदौ। सूत्राभिव्यक्तिसमय इति यावत्। **वार्तिकं** ऋकारलृकारयोरित्यादिकम्। **सूत्रकृतः** = तत्प्रकाशकस्य शिवस्य। तदुत्तरमपि वैयर्थ्यं परिहरति। **आरब्धेऽपीति।** तेन = सावर्ण्यस्यानित्यताज्ञापनेन। अन्यथा = सावर्ण्यनित्यत्वे। यत्तु ऋकारेण सावर्ण्याल्लृकारग्रहणे क्लृप्यमानादावौपसंख्यानिकणत्वापत्तिरतस्तदभावोऽपि तत्प्रयोजनमिति कश्चित्। तत्खण्डयति। **क्लृप्यमान इति। नस्येत्यौपेति।** इति विहितवाचनिकणत्वस्येत्यर्थः। अपिरेवाऽर्थे। यद्वा अपिस्तदनित्यत्वसमुच्चायकः। स च सर्वस्य निषेध इत्यग्रे मूल एव स्फुटीभविष्यति। तथा च तस्या असाधारणफलत्वाभाव इति भावः। **अन्यथा** = तस्य तत्र पाठानङ्गीकारे। तथा चावश्यके तदर्थं सोपसर्गपाठे गौरवमिति लाघवादुपसर्गं विहाय पाठे नास्त्येव तस्यापि सिद्धिः। एवञ्च तयोर्नित्यसावर्ण्ये तत्रोक्तरीत्या णत्वरूपदोषवारणेऽपि प्लुताप्रवृत्तिरूप-दोषवारणार्थमवश्यं तस्यानित्यत्वमश्रयणीयमित्येतदुपदेश इति भावः। किञ्च गम्लृादिस्थस्यानु-बन्धत्वेन प्रयोगेऽस्थितत्वेन धर्माजनकत्वादसाधुत्वेन च नानुकरणम्। तत्रोपदिष्टत्वेन प्रकृतित्वादतिदेशेनासाधुत्वं च। अत एव वार्तिकेऽशक्तिजेति सार्थकम्। अत एवात्र भाष्यकृता तत्रापि फलं नोक्तमित्याद्यन्यत्र स्पष्टम्। एवञ्चैवमपि गम्लृित्याद्युक्तिरयुक्तैवेत्यपि बोध्यम्।

**अइउणि**त्यत्रोक्तसिद्धान्तनिर्वाहोपायं तत्र दिक्शब्देन ध्वनितं प्राचीनसिद्धान्तं तस्मादित्यादिना वक्तुं तत्रोक्तदोषमादौ सविशदमनुवदति। **इदन्त्विति।** वार्तिकेत्युपलक्षणं भाष्यस्यापि। **सिद्धान्तादिति।** तथा चाण्ग्रहणाभावात्कथं तेनैतद्ग्रहणमिति भावः। ननु

**लृकारसाधारणजातिविरहेणाकृतिग्रहणासम्भवाच्च 'प्राल्कारीयति' इत्यत्र कार्यानिर्वाहस्तदवस्थः। सावर्ण्यविधिस्तु सवर्णदीर्घे 'होतृ लृकारः, इत्यत्र ''इकोऽसवर्णे'' (पा०सू० ६-१-१२७) इत्यस्य प्रवृत्तिप्रतिबन्धेन चरितार्थः। न च ''ऋत्यकः'' (पा०सू० ६-१-१९८) इत्यस्य प्राप्तिः, ग्रहणकशास्त्राभावादेव। एवं च दीर्घं सम्पाद्य कृतार्थ लृकारपाठः सावर्ण्यानित्यत्वमपि कथं ज्ञापयेदिति। तस्मादण्ग्रहणं प्रत्यावक्षाणस्य तत्स्थाने ऋग्रहणं कर्त्तव्यम्, अप्रत्ययग्रहणं च न कार्यमित्याशयः कल्प्यः। यद्यप्येवं पत्लृप्रभृतीनां लृदितां ''नागूलोपि'' (पा०सू० ७-४-१) इत्यृदित्कार्यं प्राप्नोति, पृथगनुबन्धकरणं तु लृदित्त्वप्रयुक्तस्य अङादेशस्य ऋदित्स्वप्रवृत्या चरितार्थत्वादसङ्करं ज्ञापयितुमसमर्थं, तथापि सावर्ण्यानित्यतयैवेदमपि समाधेयम्। यद्वा, स्वरसन्धिप्रकरणे लृवर्णस्य ऋवद्भाव एव वाच्यः, सावर्ण्यं च नोपसंख्येयं, प्लुतस्तु**

---

जातिनिर्देशेनैव तदत आह। **ऋकार इति। कार्येति।** वृद्धिरूपेत्यर्थः। ननु सावर्ण्यविधिसामर्थ्यात्तदभावेऽपि तेनैतद्ग्रहणेन तत्सिद्धिरत आह। **सावर्ण्येति।** होतृ लृकार इत्यस्य मध्यमणिन्यायेनोभयत्रान्वयः। अन्त्यपक्षं दृढयति। **न चेति।** नहीत्यर्थः। **ग्रहणेति।** इदमुपलक्षणं साधारणजात्यभावस्यापि। दोषान्तरमाह। **एवञ्चेति।** फलद्वयेन तस्य चारितार्थ्ये चेत्यर्थः। ल्यबन्तस्य कृतेत्यत्रैवान्वयः[1]। होतृ लृकार इत्यत्र सावर्ण्येऽपि दीर्घाप्रवृत्तिः वर्णोपदेशे लृकारस्यापाठेनानच्त्वात् ग्रहणं तूक्तरीत्या न। अतोऽच्त्वसम्पादनद्वारा दीर्घप्रवृत्त्यर्थमावश्यकोऽस्य पाठ इति भावः। अपिना प्रागुक्तदोषसमुच्चयः। इतिर्दोषानुवादसमाप्तौ। प्राचामनुरोधेन समाधत्ते। **तस्मादिति।** भाष्यादिमते निर्वाहादित्यर्थः। प्रत्याचक्षाणस्य वार्तिककारादेः। तत्र दृष्टान्तार्थमाह। **अप्रत्ययेति।** पूर्वसूत्रोक्तप्रकारेण व्याख्यानेन निर्वाहात्। एवञ्च यथेदं भगवता नोक्तं तथा तदपि, अभिमतं तु तद्वदिदमपीति भावः। यद्वा नन्वेवं **उर्ऋदि**(पा०सू० ७-४-७)त्यादौ तपरकरणं व्यर्थं स्यात् तेन हि तत्र परणकारेण ग्रहणं ज्ञाप्यतेऽत आह। **अप्रत्ययेति।** एवं च तत्र तत्सार्थकम्, उणादौ त्वव्युत्पत्तिपक्षस्यैव सिद्धान्तितत्वान्न दोषः। एतेन सावसेर्ऋतस्वसेत्यादौ दोषाच्चिन्त्यमिदमिति **रत्नाकरो**क्तमपास्तम्। एवं तत्र ऋकारकरणे। ऋकाराद्यकरणजलाघवेनाह। **यद्वेति।** एवव्यावर्त्यमाह। **सावर्ण्यमिति**। चेन ऋकारादिपरिग्रहः।

---

१. कृतेत्यत्र वान्वय इति ख पाठः।

**प्रकरणान्तरस्थ इति न तत्रातिदेशप्रवृत्तिः। "उरण् रपरः" (पा०सू० १-१-५१) इति परिभाषा तु कार्यकालतया स्वरसन्धिप्रकरणस्थेति उरित्यनेन लृवर्णग्रहणोपपत्तिः। अस्मिन्नपि पक्षे लृकारोपदेश इह कर्त्तव्य एव 'क्लृ३ प्तशिखः' इत्यत्र प्लुतो यथा स्यात्, क्लृप्त इति च द्वित्वम्, प्रक्लृप्त इति च स्वरितः। अत्र ह्यन्तर्भावितण्यर्थात् कर्मणि क्तः। तेन "गतिरनन्तरः" (पा०सू० ६-२-४९) इति पूर्वपदप्रकृतिस्वरः, कर्मणि यःक्तस्तदन्ते उत्तरपदे तद्विधानात्। ततः शेषनिघाते कृते "उदात्तादनुदात्तस्य स्वरितः" (पा०सू० ८-४-६६)। न चात्र "कृपो रो लः" (पा०सू० ८-२-१८) इत्यस्यासिद्धत्वाशङ्कापि, पूर्वत्वात्। परं हि पूर्वं प्रत्यसिद्धं न तु परं प्रति पूर्वम्। एवञ्च गम्लृप्रभृतीनां लृकारस्येत्संज्ञाप्यनायासेन सिध्यति। अन्यथा तु "पुषादिद्युताद्य्लृदित" (पा०सू० ३-१-५५) इति लृकारे परतः कृतेन यणादेशेन इत्संज्ञानुवादेन च ज्ञापकेन कथंचित्साधनीया स्यात्। एवम् "इदितो नुम्" (पा०सू० ७-१-५८) इत्याद्यनुवादानाम् "ऋत्यकः"**

---

तत्र = प्लुतनिषेधे कर्तव्ये। एवञ्च प्लुतसिद्धिः। नन्वेव**मुरणि**त्यत्राप्यतिदेशापत्तिः स्यादत आह। **उरणिति।** तत्स्थत्वसाधककार्यकालत्वे हेतुः। **परिभाषेति।** अपिः प्रथमपक्षसमुच्चायकः। तत्पक्षे तदनित्यत्वज्ञापनाय तस्यावश्यकत्वस्योक्तत्वादिति भावः। **इह** = वर्णसमाम्नाये। अत्र पक्षेऽच्त्व-सिद्धय इति भावः। **क्लृप्तशिखेत्यत्र प्लुतो यथेति।** तद्विधा**वच** इति परिभाषोपस्थितेस्तस्या-स्वरसन्धिस्थत्वाच्च **गुरो**रिति प्लुत उचितः। क्लृप्तशिख इति तदन्यप्रथमान्तपाठः। सोऽपि युक्तः। तद्विधौ बोधनमात्रस्य निमित्तत्वात्। यथा स्यादित्यस्याग्रे उभयत्रानुषङ्गः। **इति च** = इत्यत्र च। एवमग्रेऽपि। द्वित्वम**नचि चे**(पा०सू० ८-४-४७)ति स्पष्टत्वात् द्वयमुपेक्ष्य तृतीयमुपपादयति। **अत्र हीति।** प्रक्लृप्त इत्यत्र हीत्यर्थः। **ण्यर्थादिति।** प्रपूर्वात् क्लृपेरिति शेषः। तेन = कर्मणि क्तेन। **तद्विधानात्** = अनन्तरेति प्रकृतिस्वरविधानात्। **स्वरित इति।** इति स्वरित इति शेषः। नन्वसिद्धत्वात्स्थलत्रये ऋकारबुद्ध्या कार्यसिद्धिरत आह। **न चात्रेति।** न हि स्थलत्रय इत्यर्थः। हि यतः। **एवञ्चेति।** उक्तफलत्रयसिद्ध्यर्थमच्त्वसिद्ध्यर्थमावश्यकलृकारोपदेशे चेत्यर्थः। **त्संज्ञेति।** तथा चेदमप्येतदुपदेशफलमिति भावः। परं तु पूर्ववन्नासाधारणमित्याह । **अन्यथा त्विति।** एतदुपदेशानङ्गीकारे त्वित्यर्थः। इति इत्यत्र। ज्ञापकेनेत्युभयान्वितम्। [1]**(कथञ्चिदिति।** अच्त्वाज्ञापनद्वारेति भावः। एवञ्चोक्तफलानामपि सिद्ध्याऽच्त्वं नैव कार्यं स्यात्। तत्र कथञ्चित्वं) प्रकटयन् तत्रेष्टापत्तिं प्रतिबन्धादिना खण्डयति। **एवमिति।** तद्वदित्यर्थः। यद्वा एवंत्वित्यर्थः। एवं

---

१. कथञ्चिदिति प्रतीकमारभ्य 'तत्र कथञ्चित्व' मिति पर्यन्तं( )मैसूरुपाठे वाक्यानि लुप्तानि 'IOL' पाठे उपलभ्यते।

**(पा०सू० ६-१-१२८) इत्यादिनिर्देशानां च साम्यादिकारादयोऽपि न निर्दिश्येरन्।**

**यथाश्रुतसूत्ररीत्या तु ब्रूमः। ऋकारमुच्चारयितुं प्रवृत्ता कुमारी करणापाटवाद्यदा लृकारमुच्चारयति तदनुकरणस्याप्यच्कार्यसिद्धिः फलम्, अनुकरणानामनुकार्येणार्थवतां सर्वत्र साधुताभ्युपगमात्। नन्वेवं लृवर्णस्य दीर्घा न सन्तीति व्याहन्येत। अनुकरणस्य**

---

सतीत्यर्थो वा। निर्देशानां च ज्ञापकानामिति शेषः। आदिनाऽकारादिपरिग्रहः। तथा च निर्देशादिज्ञापकेनैतत्खण्डनमयुक्तमिति लृकारः कर्तव्य एव, अन्यथा शास्त्रोच्छेदापत्तिः। इदमेव तत्र कथञ्चित्वमिति बोध्यम्। एवं प्राचीनसिद्धान्त उक्तः। वस्तुतस्तु एतदकरणे एतस्यासत्वशङ्क्या सवर्णविधिस्तयोर्दुर्वच इति एतदुपदेशः। ऋकारलृकारयोरित्यनेन समानजातित्वस्यैवातिदेश इति न प्राल्कारीयतीत्यादौ दोष इति नाणुदित्सूत्रे तत्स्थाने ऋग्रहणं कार्यम्। पृथगनुबन्धकरणात्तद-नित्यत्वान्न कार्यसङ्करः। अनृत इति निषेधश्च अप्रत्ययग्रहणायावश्यकम्। विधेये दोषाभावाय व्याख्यानं त्वगतिकगतिः। यद्वा सावर्ण्यवचनस्थाने लृवर्णस्य ऋ वा इत्यतिदेशो वाच्यः। स्वरसन्धिप्रकरण इति तु न युक्तम्। यथोद्देशे उरणित्यादौ दोषापत्तेः। कार्यकाले तत्रोपस्थितावपि तद्देशस्थत्वाभावस्य भाष्यारूढत्वाच्च। अन्यत् प्राग्वत्। स्पष्टीकृतं चैत**द्रप्रत्याहारखण्डने**[1] इति भाष्यारूढः पन्था इति बोध्यम्।

## २.११ यदृच्छाशब्दार्थ लृकारोपदेश इति प्रयोजननिराकरणम्

नन्वेवं लृकारोपदेशसाफल्येऽत्रत्यवार्तिकादिविरोधः, अतः प्राचामनुरोधेनाह । **यथाश्रुतेति।** वार्तिकोक्तसावर्ण्यरहिताणुदित्सूत्रेत्यर्थः। अत एव तुः प्रयुक्तः। यद्यपि वार्तिककृता स्थलत्रये फलमुक्तं खण्डितं च, तथापि मध्यमं भगवता कण्ठतः स्थापितमित्याशयेन तदेव प्रथमं विहायाऽह। **ऋकारमिति। करणापाटवात्** इन्द्रियाद्यशक्तेः। जिह्वाद्यशक्तेरिति यावत्। **तदन्विति** तदेत्यादि। तदनुकरणैकदेशस्यापीत्यर्थः। अपिः संज्ञाशब्दादिसमुच्चायकः। **फलमिति।** लृकारोपदेशस्येति भावः। ननु तवासाधुत्वमनुकार्यवदत आह। **अनुकरणानामिति। अनुकार्येण** तत्स्वरूपेण। तथा चार्थभेदान्नास्य स निवर्तक इति नास्यासाधुत्वम्। अतिदेशेनाऽपि न तदिति वक्ष्यतेऽनुपदमिति भावः। सर्वत्र ध्वनेर्वर्णस्य साधोरसाधोरर्थवतोऽनर्थकस्य वाऽनुकरणस्थले। **एवं** अनुकरणमात्रस्य साधुत्वाङ्गीकारे। **अनुकरणस्येति।** तथोच्चारितानुकरणस्येत्यर्थः। वचनेन दीर्घाभावबोधकवचनेन।

---

१. प्रभाकर्त्रा वैद्यनाथेन विरचितः लक्ष्मणपाठककृतस्य रप्रत्याहारमण्डनस्य खण्डनात्मकः ग्रन्थविशेषः। 'प्रतिभा प्रकाशन' द्वारा प्रकाशितः। तत्र पृ.सं. १७ स्पष्टीकृतं वस्तुतस्त्वित्यादिना।

**तत्रापि सुलभत्वादिति चेत्, न्यायप्राप्तस्यापि वचनेन बाधात्। इदञ्च ‘‘न्याय्यभावात्कल्पनं संज्ञादिषु’’ इति वार्तिकाल्लभ्यते। तथा हि, ‘‘लृकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थः’’ इति पूर्ववार्तिकेन लृकारोपदेशस्य प्रयोजनत्रयमुक्तम्। ‘दध्य्लृतकाय देहि’ इति यदृच्छाशब्दः, ‘कुमारी लृजु इत्याह’ इत्यशक्तिजानुकरणम्, प्लुतद्विर्वचनस्वरिताश्च प्लुत्यादयः, एतदर्थं लृकारोपदेश इति हि तस्यार्थः। तत्र प्रथमप्रयोजननिराकरणायेदं वार्त्तिकम् – ‘‘न्याय्यभावात्’’ इति। अस्यार्थः – ऋतिस्तावद् ‘‘ऋतेरीयङ्’’ (पा०सू० ३-१-२९) इति निर्द्दिष्टः सौत्रो धातुः, तस्मादौणादिकः क्वुन्। तत्र ह्येवं सूत्रितम् – ‘‘क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि’’ (उ०सू० २-२००) इति। शिल्पिन्यभिधेये संज्ञायां च सोपपदान्निरुपपदाच्च धातोः क्वुन् स्यादित्यर्थः। रजकः, तक्षकः, इत्यादि शिल्पिनि; चरकः, भषकः, कटकं, कनकम्, इत्यादि संज्ञायामुदाहरणम्। तथा च ऋतकशब्दः शास्त्रानुगतत्वान्न्याय्यः। तत्सद्भावात्स एव संज्ञा। तथा च ‘‘कृतं कुर्यान्न तद्धितम्’’ इत्यादि गृह्यस्मृतिरप्यनुकूलिता भवतीति।**

---

तथा चासाधुत्वाच्छास्त्राविषयत्वम्। अत्र मानमाह। **इदञ्चेति।** तथा प्राप्तस्यापि वचनेन बाधेनासाधुत्वाच्छास्त्राविषयत्वं चेत्यर्थः। ननु अनेन वार्तिकेन पूर्ववार्तिकोक्तफलानामाद्यफल-खण्डनात् प्रकृतेऽनुकरणत्वविषयत्वात् वार्तिकेतराभावेन[१] कथं तत्र एतल्लाभोऽत आह। **तथा हीति।** तत्रादौ सफलं तदर्थं वक्तुमाद्यवार्तिकं फलत्रयबोधकं सार्थसफलं चाह। **लृकारोपेति।** यदृच्छाशब्देति पाठः। हीति इत्यत्र। एवमग्रेऽपि। यद्यपि भाष्येऽनुकरणस्थलेऽपि कुमारीलृतक इत्याह इत्येवोक्तम्। तथापि यदृच्छाशब्दतः स्फुटभेदायाह। **कुमारी लृजुक इत्याहेतीति।** ऋजुक इति प्रयोक्तव्ये करणापाटवाल्लृजुक इति प्रयुक्तस्यानुकरणमिदम्। लृज्वित्येव पाठान्तरम्। यद्यपि भाष्ये प्लुत्यादयो धर्मपरा उक्ताः, तथापि बाधाल्लाक्षणिकमर्थमाह। **प्लुतेति।** एतदर्थः यतस्त्रितयसिद्ध्यर्थः। एतदर्थमिति पाठान्तरम्। हिर्निश्चये। **तस्य** पूर्ववार्तिकस्य। **तत्र** = तेषां त्रयाणां मध्ये। अस्यार्थ इत्यस्य भवतीति इतिशब्देनान्वयः। **इति** = इत्यत्र। **तत्र** = उणादौ हि। तत्सूत्रार्थमाह । **शिल्पीति।** शिल्पिनिरस्योदाहरणमित्यत्रान्वयः। तथा च तस्मात् क्वुनि च स एव संज्ञेति ऋतकशब्द एव संज्ञेत्यर्थः। तथा च साधुर्ऋतक एव नामत्वेन कृतो न लृतकः, अशक्त्या तु तथोच्चारणमित्यपभ्रंशत्वान्न शास्त्रविषयत्वमिति न तदर्थो लृकारोपदेश इत्याशयः। तथा च =

---

१. वार्तिकसञ्चाराभावेन इति ख पाठः।

**एवं वदता शास्त्राननुगतं देशभाषया यत् 'कूची' इत्यादि नाम क्रियते तदसाध्विति स्फुटीकृतम्। आदिशब्दादनुकरणेऽपि शिष्टानुरोधं दर्शयता 'लृवर्णस्य दीर्घा न सन्ति' इति शास्त्रमर्यादामुल्लङ्घ्य क्रियमाणस्य दीर्घानुकरणस्याप्यसाधुता दर्शिता। तस्माड्डित्थ-घुभादिभ्यः कूचीमञ्ज्यादीनामिव गावीगोण्याद्यनुकरणेभ्यो दीर्घलृवर्णानुकरणस्यापि न्यायतो न किञ्चिद्वैलक्षण्यं, किन्तु वाचनिकमिति स्थितम्। मन्त्रशास्त्रे तु मातृकान्या-सादौ दीर्घ लृवर्णो यद्यपि स्वीकृतस्तथापि प्रातिशाख्यन्यायेन अन्यत्रासौ नोपयुज्यत एवेत्यवधेयम्। एवं वचन्त्यादीनामपि शिष्टैरनङ्गीकृतानां न्यायसाम्यादसाधुतोक्ता। तथा चाहुः - ''न हि वचिरन्तिपरः प्रयुज्यते'' इति। एवञ्च ''न्याय्यभावात्'' इति वार्तिकेन पूर्ववार्तिकोक्तप्रयोजनत्रयमध्ये प्रथमप्रयोजनं निराकृतम्। लृतकश्चासाधुरेव।**

---

तस्यैव संज्ञात्वे च। फलितार्थमाह। **एवञ्चेति।** प्रकृतिप्रत्ययादिविभागेनान्वाख्यातत्वरूपव्याप्या-त्वाङ्गीकारे चेत्यर्थः। वदतेत्यस्य तथार्थमिति वार्तिककृतेति चाद्यन्तयोः शेषः। एवं वदतेति पाठे तथा पाठेऽपि एवं वदता चेत्यन्वये साध्विति चेत्यन्वये वा नानुपपत्तिलेशोऽपि। न च तर्हि तस्यैव प्रयोगे लृतकशब्दो बोधकोऽपि न स्यादिति वाच्यम्। बोधकत्वेऽप्यसाधुत्वान्न शास्त्रकार्यनिमित्तत्व-मित्याशयात्। एवं प्रासङ्गिकमुक्त्वा प्रकृतमाह। **आदीति। नारायणा**द्यनुरोधेनाह। **अनुकरेति।** तेषामप्यव्युत्पन्नत्वात्, शिष्टप्रयुक्तत्वमपि अत्र न्याय्यत्वमिति भावः। अपिर्जात्यादिशब्दप्रागुक्त-संज्ञाशब्दसमुच्चायकः। दर्शयतेत्यस्य वार्तिककृतेति शेषः। अन्यथा आदिशब्दानर्थक्यं स्फुटमेवेति भावः। **अप्यसाधुतेति।** असाधुतापीत्यर्थः। उपसंहरति। **तस्मादिति।** उक्तहेतोरित्यर्थः। **दीनामिवेति।** शास्त्रानुगतत्वरूपन्याय्यत्वाभावस्य सर्वत्र तुल्यत्वेऽपि संज्ञाशब्दस्थले शिष्टाप्रयुक्तत्वहेतुकं न सन्ति यदृच्छाशब्दा इति वचनकृतपन्थावैलक्षण्यम्। तथाऽनुकरणे तद्धेतुकलृवर्णेति वचनकृतं तदित्यर्थः। स्थितं भाष्यादौ। **प्रातिशाख्यन्यायेनेति।** तद्रीत्येत्यर्थः। तत्समाख्याबलेन तस्य यथा तत्रैवाङ्गीकारस्तद्वदिति भावः। प्रासङ्गिकमाह। **एवञ्चेति।** दीर्घलृकारानुकरणस्य साधुत्वे इत्यर्थः। एवमिति पाठस्तु युक्ततरः। **वचन्त्यादीनामपि** शास्त्रानुगतानामपि। **न्यायसाम्यात्** = शिष्टानङ्गीकृतत्वरूपयुक्तितौल्यात्। अत्र तद्धेतुकं वचनमाह। **तथा चेति।** तेषां ततोऽसाधुत्वे चेत्यर्थः। अभियुक्ता इति शेषः। एवञ्च शिष्टप्रयुक्तत्वमेव न्याय्यत्वमिति भावः। परमप्रकृतमुपसंहरति। **एवञ्चेति।** संज्ञाशब्दसत्वेऽपि शास्त्रानुगतशिष्टप्रयुक्तानामेव क्वचित् संज्ञात्वेन विनियोगो नान्येषामित्येतद्भिन्नलृतकस्यासाधुत्वेन शास्त्राविषयत्वे चेत्यर्थः। तदाह। **लृतकश्चेति।** चेन लृफिडादि संग्रहः। यद्यपि भगवता

**इदं च 'त्रयीशब्दानां प्रवृत्तिर्न सन्ति यदृच्छा शब्दाः' इति पक्षेणोक्तम् । पक्षान्तरैरपि हि परिहारा भवन्तीति भाष्यकारः । एतद्ग्रन्थपर्यालोचनया तु चतुष्टयीति पक्षे लृतकादयोऽपि टिघुभादिवत्साध्वसाधुबहिर्भूताः साधव एव न तु टिघुभादिविलक्षणा इति लभ्यते । अन्यथा हि पक्षान्तरैरिति न ब्रूयादिति । न च गृह्यस्मृतिविरोधः, तावताऽपि कृतं कुर्यान्न तद्धितमिति गृह्यमुल्लङ्घ्य कृतस्याप्यौपगवादेरिव शब्दसाधुताभ्युपगमे बाधकाभावात् । पुरुषस्तु साधूनपि प्रयुञ्जानो देवब्राह्मणादिनिन्दकवद्धर्मशास्त्रोल्लङ्घनात्प्रत्यवैतीत्यन्यदेतत् ।**

---

यदृच्छाशब्दानङ्गीकृत्य शास्त्रान्वितानां क्वचिच्छिष्टप्रयुक्तानामेव यत्र कुत्रचित्संज्ञात्वेन[१] विनियोगः, नान्येषामित्येवं लृतकलृफिडादेः शास्त्रविषयत्वाभावान्न तदर्थो लृकारोपदेश इत्युक्त्वा 'न सन्त्येव यदृच्छाशब्दा' इति पक्षावष्टम्भेनैतस्य तदर्थत्वं प्रत्याख्यातं त्रयी चेत्यादिना । अत एव चसङ्गतीति । तथापि उक्तार्थेन फलितमाह **त्रयी चेति ।** चोऽवधारणे । त्रय्येवेत्यर्थः । तद्व्यावर्त्यमाह । **न सन्तीति ।** व्याख्यातृ**नारायणा**द्यनुरोधेनाह । **इदं चेति ।** प्रागुक्तं प्रथमप्रयोजननिराकरणादिकं सर्वमित्यर्थः । **त्रयीति ।** शब्दानामर्थेषु या प्रवृत्तिर्व्यापारस्सा प्रवृत्तिनिमित्तभेदात्प्रकारत्रयवतीत्यर्थः । एवमग्रेऽपि बोध्यम् । सर्वं वाक्यं सावधारणमिति न्यायलभ्यमर्थमाह । **न सन्तीति ।** तथा च तेषामसाधुत्वेऽपि टिघुभादीनामसाधुत्वं यथा न तथा प्रागुक्तमिति न किञ्चिदनिष्टमिति भावः । डित्थादिशब्दानां क्रियादिशब्देष्वत्र पक्षेऽन्तर्भावो बोध्यः । ननु संज्ञाशब्दा अव्युत्पन्ना अतिरिक्ता इति पक्षाश्रयेण फलमुक्तमिति कथं तेषां व्युत्पाद्यत्वमाश्रित्यायं परिहारोऽत आह । **पक्षान्तरैरिति ।** इदमत्र शास्त्रेऽन्यत्र तन्त्रान्तरे चावश्यकमिति भावः । अत एव हिः प्रयुक्तः । यतो बुद्धिस्थोक्तहेतोरिति तदर्थः । **भादिवदिति ।** यथा च तद्बहिर्भूतत्वं यथा चासाधुत्वं तत्तथा पस्पशायां प्रतिपादितम् । तथा च तेषां तद्बच्छास्त्रविषयत्वमेवेति तत्पक्षेऽनिर्वाह एवेति तदर्थमपि एतदुपदेश इत्यतो भाष्याल्लभ्यत इति भावः । **अन्यथा हि** = अतस्तदलाभे तु । इतीत्यस्य बोध्यमिति शेषः । एतद्ग्रन्थेत्यादेरत्रान्वयः । न चेत्यस्यैवमिति शेषः । लृतकादेस्तद्वत्संज्ञात्वाङ्गीकार इति तदर्थः । तावताऽपि = तद्विरोधेऽपि । **रिवेति ।** लृतकादेरिति शेषः । **अन्यदेतदिति ।** वस्तुतस्तु पक्षभेदेनैकस्य शास्त्रविषयत्वतदविषयत्वाङ्गीकारे **नवे**ति सूत्रस्थभाष्यविरोधः । टिघुभादीनां पाणिन्यादिशिष्टप्रयुक्तत्वेन साधुत्वाच्छास्त्रविषयत्वेऽप्यन्येषां तद्विषयत्वे मानाभावश्च । किञ्च साध्वसाधुबहिर्भूतानामपि शास्त्रविषयत्वे 'साध्वनुशासनेऽस्मिन् शास्त्र' इति तत्र तत्र

---

१. कुत्रचित्संज्ञात्वं इति ख पाठः ।

**यत्तु द्वितीयप्रयोजननिराकरणार्थं वार्त्तिकम् - ''अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु'' इति, तस्यायमर्थः - शिष्टस्य साधोरनुकरणं साध्वेव। अशिष्टं च तदप्रतिषिद्धं च साध्वसाधुबहिर्भूतं टिघुभादि तस्यानुकरणमपि तादृगेव, अर्थादसाधोरनुकरणमप्यसाध्वेवेति। इदं तु भाष्ये दूषितमेव, हेलयो हेलय इत्यादीनां शिष्टपरिगृहीतानामसाधुतायां बीजाभावात्। न ह्यपशब्दवाचकत्वमात्रेण तथात्वम्, अपशब्द इत्यस्याप्यसाधुतापत्तेः।**

---

भाष्योक्त्यसङ्गत्यापत्तिः। किञ्च शास्त्रविषयत्वमथ तद्व्यङ्ग्यसाधुत्वाभाव इत्यशक्यम्। अतः तत्पक्षेऽपि लृतकादिनां सर्वथा भिन्नप्रवृत्तिनिमित्तकत्वेन ऋतकाद्यनिवर्त्यत्वेऽपि शिष्टाप्रयुक्तत्वेन तन्निवर्त्यत्वादसाधुत्वान्न शास्त्रविषयत्वमित्येव[1] भाष्याशयः। न्याय्यत्वमपि। पक्षान्तरैरपीति तु वार्तिककृदुक्तिर्न भगवदुक्तिः। साप्यन्यत्रास्यावश्यकत्वमिति सूचयितुं, न त्वत्रायमेव परिहारस्तात्विक इति बोधयितुम्। उक्तं चैतत्स्फुटं कैयटेन – 'एवञ्च न शास्त्रीयकार्यनिमित्तत्व'मिति। एवञ्च एतद्ग्रन्थेत्यादि प्राचामनुरोधेनेति बोध्यम्।

## २.१२ अशक्तिजानुकरणार्थ लृकारोपदेश इति प्रयोजननिराकरणम्

**द्वितीयप्रयोजनेति।** अशक्तिजानुकरणरूपेत्यर्थः। नन्वसम्बद्धमिदं वार्तिकम्। एतेन तदनिराकरणादत आह। **तस्येति।** वार्तिके सप्तमी षष्ठ्यर्थे। बहुवचनं प्रयोगभेदाभिप्रायम्। शेषपूरणेनान्वयस्तदाह। **शिष्टेति।** अनुशिष्टस्येत्यर्थः। तत्फलितमाह। **साधोरिति।** एवमग्रेऽपि। साध्वेव अभ्युदयजनकत्वात्। **अशिष्टं चेति।** [2]अननुशिष्टमनिषिद्धभूतमेवेत्यर्थः। **टिघुभादीति।** [3]रूढ्यादिप्रयोगैकदेशभूतमनुकार्यमित्यर्थः। **तादृगेव** = साध्वसाधुबहिर्भूतमेव। अभ्युदयाजनकत्वे सति दोषाजनकत्वात्। एवञ्च न तदप्यसाधु। नन्वेवमपि प्रकृते किमायातमिति चेन्न अर्थलब्धार्थमादाय प्रकृतोपयोगात्। तदेतत्सूचयन् पर्यवसितमर्थमाह। **अर्थादिति।** अपिरनुकार्यसमुच्चायकः। एवञ्च शास्त्राविषयत्वात्तदर्थता लृकारोपदेशस्य न युज्यत इति भावः। इतिरर्थसमाप्तौ। इदं तु = द्वितीयफलनिराकरणं तु । **इत्यादीनां** अनुकरणानां। **शिष्टेति।** अनेनैवं रीत्या टिघुभादेरपि साधुत्वमिति सूचितम्। तच्च पूर्वं सविशदमुक्तमिति बोध्यम्। तत्र सम्भावितबीजं निरस्यति। **न**

---

१. शास्त्रविषयत्वमित्येवेति। एतदनन्तरं वार्तिके शिष्टप्रयुक्तत्वमेवेति शेषः। उद्योते तथादर्शनात्। तथा च मित्येवेति वार्तिके शिष्टप्रयुक्तत्वमेवेति भाष्याशय इति वाक्यार्थः।

२. अत अननुशिष्टमनिषिद्धं चेत्यर्थ इति ख पाठः।

३. कथादीति ख पाठः.

**न च ''प्रकृतिवदनुकरणम्'' (पा०सू० ३६) इत्यनेन साधुताऽतिदेशः, अशास्त्रीयस्यातिदेशायोगादिति दिक्। तस्माद्वार्तिककृता दूषितमपि द्वितीयप्रयोजनं भाष्यरीत्या स्थितम्।**

**यदपि तृतीयप्रयेजननिराकरणपरं वार्त्तिकम् - ''एकदेशविकृतस्यानन्यत्वात् प्लुत्यादयः'' इति। तस्यायमर्थः - ''नुड्विधिलादेशविनामेषु प्रतिबिधानम्'' इति**

---

**ह्यपेति। तथात्वं** = असाधुत्वम्। **पत्तेरिति।** गाव्याद्यपभ्रंशवाचकत्वादिति भावः। बीजान्तरं निरस्यति। **न चेति।** असाधुत्वस्येति शेषः। अयं भावः। ज्ञापकसिद्धत्वप्रकरणादतिदेशस्य शास्त्रीयत्वेन तत्र प्रत्यासत्त्या शास्त्रीयायाः प्रकृतेः शास्त्रनिबन्धनकार्यस्य च ग्रहणौचित्येनापशब्दस्य सर्वथानुपदिष्टत्वादप्रकृतित्वेनापशब्दत्वस्याशास्त्रीयकार्यत्वेन चात्र प्रकृतेऽशक्तिजस्य [१]शास्त्रीयप्रकृतित्वाभावान्न तदनुकरणेऽतिदेशप्रवृत्तिरित्यपशब्दत्वाभावादच्त्वकार्यसिद्ध्यर्थमेतदुपदेशस्त्वावश्यक इति। भाष्ये तु तुष्यतु दुर्जनन्यायेन साध्वनुकरणार्थत्वमपि यदुक्तं तत्तत्रैवाग्रे खण्डितमनेनैव न्यायेनेति तदनुक्तिरत्र। गम्लादिस्थस्यानुकरणे दधि ऌकार इत्यादौ पाठाभावमूलस्यैवानच्त्वेन तत्वादतिदेशादेरुक्तिसम्भवस्यैवाभावादसिद्धत्वाभावादच्कार्यसिद्ध्यर्थमेतदुपदेश आवश्यक इत्यपि न युक्तम्। तस्य धर्माजनकत्वेनासाधुत्वेनानुबन्धत्वेन प्रयोगेऽस्थिततत्वेनानुकरणासम्भवात्। तत्रोपदिष्टत्वेन प्रकृतित्वेन प्रकृतिवदित्यतिदेशेनासाधुत्वाच्च। अत एव शक्तिजेति वार्तिकेत्याद्यर्थकम्। भाष्यकृता चात एव तत्र फलं नोक्तम्। एवञ्च कैयटाद्युक्तं चिन्त्यमेवेति बोध्यम्। तदाह। **दिगिति।** अत्रत्यं तत्वं मत्कृत**रप्रत्याहारखण्डन**तोऽवगन्तव्यम्। अत एवोपसंहरति। **तस्मादिति।** उक्तहेतोरित्यर्थः।

## २.१३ प्लुत्याद्यर्थ इति तृतीयप्रयोजनविघटनम्

**तृतीयेति।** प्लुत्यादिरूपेत्यर्थः। प्लुत्यादीनां धर्मपरत्वादसम्बद्धत्ववारणायाह । **तस्येति।** यद्यपि एकदेशेत्यादि भाष्यं ग्रहणपक्षाभिप्रायेण प्रवृत्तम्। व्याख्यातं च तथा कैयटादिभिरेकदेशपदोक्तिस्वारस्यात्। तथापि [२](ग्रहणपक्षस्य बहुप्रतिविधेयत्वेन गुरुभूतत्वादत्रत्यभाष्यस्यैक-

---

१. अत्रापि मैसूरुपुस्तके पाठः नष्टः। तत्र हि शास्त्रीयप्रकृतित्वेन प्रत्यासत्त्या शास्त्रीयन्यायेन साध्वनुकरणार्थत्वमपि यदुक्तं तत्तत्रेव खण्डितमनेनैव न्यायेनेति तदनुक्तिरत्रेति वर्तते। अयं पाठः अशुद्ध इति स्पष्टः। अतः मध्ये 'IOL' विद्यमानः पाठ एव न्याय्यः।

२. 'ग्रहण' इत्यारभ्य 'एओडितिसूत्रस्थ' इति ( ) पर्यन्तं कपाठे नास्ति।

**वक्ष्यमाणत्वादृकारैकदेशस्य रेफस्य लत्वे कृते एकदेशविकृतन्यायेनाचूकार्यसिद्धिरिति। न चैवमनृत इति प्रतिषेधापत्तिः, अरवत इति न्यासात्। न ह्येकदेशविकृतन्यायेन रेफवत्ताप्यायाति। लोकेऽपि हि छिन्नपुच्छस्य पुच्छवत्त्वप्रयुक्तकार्यं नायात्येव। न चैवं**

---

देश्युक्तित्वाच्च 'एओङ्' इति सूत्रस्थ)वक्ष्यमाणसिद्धान्ताग्रहणपक्षप्रवृत्तभाष्यानुरोधेनैतद्वार्तिकं योजयति। **नुड्विधीति।** विनामो णत्वम्। **प्रतिविधानमिति।** समाधानमित्यर्थः। कर्तव्यमिति शेषः। अग्रहणपक्षे सर्वत्र वार्तिककृताऽपूर्वकर्तव्यत्वेन चोदितऋकारप्रत्याख्यानायेति भावः। इति इत्यस्य। **वक्ष्येति।** 'एओङ्' सूत्र इति भावः। प्रतिविधानं लादेशांशे कृप उरः ल इति छेदेन ऋकारनिर्देशस्य सूत्रे एव सत्वे तत्सामर्थ्याद्विभागं परिकल्प्य शब्देन तत्सदृशस्यारोपितरेफत्वकस्यापि ग्रहणेनादेशविधानरूपम्। अंशमित्येतत्तु तत्रैव स्फुटीभविष्यति। तदाह। **ऋकारैकदेशेति।** तत्वेन कल्पितस्येत्यर्थः। **रेफस्य** = रेफसदृशस्य आरोपितरेफत्वकस्य। एतेन ननु समुदायस्य ऋकारस्य लृकारादेशेऽचूत्वस्य स्थान्यलाश्रयत्वात् प्रकृते लौकिकस्याप्राप्तावपि शास्त्रीयोऽपि न्यायो न प्रवर्त्तेत। अरवत इति न्यासेऽपि स्थान्यलाश्रितत्वाभावात्स्थानिवद्भावेन निषेधश्च स्यादत आह। रेफस्येति। वर्णैकदेशा वर्णग्रहणेन गृह्यन्त इति पक्षे इति भाव इति व्याख्यानमपास्तम्। मूलविरोधात्। एतत्पक्षस्य तदसम्मतत्वाच्च। शास्त्रीयैकेति न्यायस्यात्र कथमप्यप्रवृत्त्या तथोक्तेरयुक्तत्वाच्च। एवमुक्तावपि तद्दोषानिस्ताराच्च। एकदेशविकाराभावेन लौकिकन्यायस्याप्रवृत्त्यापत्तेश्च। एतेन लकारघटितादेश इति रीत्येदमित्यप्यपास्तमिति दिक्। इतिरर्थसमाप्तौ। चैवं = [१](तन्न्यायेनाचूत्ववदत्वे। ननु अरवत इति न्यासेऽपि स्वस्यैवानेन न्यायेनानयनमिति दोष एवेति चेत् किं शास्त्रीयोऽभिमतोऽथवा लौकिकस्तत्र। नाद्यः। यथाश्रुतसूत्रे इवात्रापि पक्षेऽनल्विधाविति प्रतिषेधाच्छास्त्रीयाप्रवृत्तेस्तदाह। **नह्येकेति।** नन्वेवं तत्र न्यासान्तराश्रयणं व्यर्थम्, उक्तरीत्या) इष्टसिद्धिश्च। अतस्तदभावेऽपि लौकिकन्यायप्रवृत्तिरेवाभिमतेति। तेन तदायात्त्येवात आह। **लोकेऽपीति।** अत एवापिसङ्गतिः। एतेनान्त्योऽपि निरस्तः। हि यतः। तत्र हि भूयोऽवयवत्वसाम्यात्तद्वत्ताबुद्धिरेव भवति, न त्ववयववत्ताबुद्धिरपि। तथा चैकदेशपदस्य लपदस्य ससम्बन्धिकतयोपस्थितावपि धर्मः। एवमिकारविशिष्टे आरोप्यते तेन न्यायेन, न त्ववयव एवानीयते लोकव्यवहारादिति। तेनाचूत्वरत्वादिकार्येऽपि रवत्वकार्यं नेति तात्पर्यम्। न चैवं रवत्वमपि तद्धर्म

---

१. 'तन्न्यायेन' इत्यारभ्य 'उक्तरीत्या' इति पर्यन्तपाठः ( ) खपुस्तके ('IOL') एवोपलभ्यते। कपुस्तके तु नास्ति।

**होतॄकारादेर्दीर्घस्याप्यरवत इति प्लुतप्रतिषेधापत्तिः, ह्रस्वस्य रवतो नेति न्यासात्। किन्त्वेवं सति एकस्य लृकारस्य प्रत्याख्यानाय सूत्रभङ्गाश्रयणे विपरीतमेव गौरवमिति। तदेतदाह भाष्यकारः - ''सेयं महतो वंशस्तम्बाल्लट्वाऽनुकृष्यते'' इति। लट्वा पक्षि-विशेषः फलविशेषो वा ''लट लौल्ये'' (भ्वा०प०) इति धातोः ''अशूप्रुषिलटिक-णिखटिविशिभ्यः क्वन्'' (उ०सू० १-१५७) इत्यौणादिकः क्वन्। ''नेड् वशि कृति'' (पा०सू० ७-१-८) इतीडभावः।**

**लट्वा करञ्जभेदे स्यात्फलेऽवद्ये खगान्तरे। इति विश्वः।**

---

एवेति स्यादेव तेन तदिति वाच्यम्। धर्मपदेन जात्यादिरूपस्य सम्बन्धान्यस्य तत्र ग्रहणात्। न हि रवत्वं जात्यादिरूपम्। **कृत्तद्धितसमासेभ्यः सम्बन्धाभिधान**मिति सिद्धान्तात्। तथा च जात्याद्याश्रयव्यपदेशमात्रस्यैव तेन लाभ इति सिद्धम्। अत एव तस्य लोकसिद्धत्वम्। अत एव च शुनः पुच्छे कर्णे वा छिन्ने नाश्वो न गर्दभ इत्युक्तं भगवता। एवञ्च यथा पुच्छवानिति तत्र व्यवहारो न, तथाऽत्रारवानिति व्यवहारोऽपि नेति बोध्यम्। क्वचिदपिरहितः पाठः। तदा लौकिकन्याय एव पूर्वत्राभिमतः, तस्यैवोपपादनं लोके हीत्यादिनेत्येक एवायं ग्रन्थ इति बोध्यम्। न चैवं अरवत इति न्यासेऽकारादेर्दीर्घस्येति व्यधिकरणषष्ठ्यौ भाष्ये। पूर्वत्र वाकारो निषेधार्थः पृथक् पदमिति ध्वनयन्नाह। **नेतीति।**

## २.१४ लृकारोपदेशे भाष्यकाराशयः

एवं वार्तिकोक्ततृतीयप्रयोजननिराकरणमपि प्लुतांशे भाष्यानभिमतमित्याशयेनाह। **किं त्वेवं सतीति।** ह्रस्वस्य रवतो नेति न्यासेन प्लुतांशे दोषवारणे सतीत्यर्थः। **सूत्रभङ्गेति।** उक्तन्यासरूपेत्यर्थः। तत्स्थाने तत्प्रक्षेपेण यथाश्रुतसूत्रतस्तद्विशिष्टस्य भेदात्स इति भावः। **सेयमिति।** प्लुतांशे प्रत्याख्यानमित्येकोक्तिरित्यर्थः। सैषेति तत्र पाठान्तरम्। [१]**(वंशस्तम्बादिति।** ल्यब्लोपे पञ्चमी। तमवलम्ब्येति तदर्थः। इयमुक्तिस्तदनुकर्षाभिन्नेत्युक्ते यथा महान्तं वंशस्तम्बमवलम्ब्य तदनुकर्षणमयुक्तम्, एवं लृकारप्रत्याख्यानमुक्तरीत्येति गम्यते। तथा च बह्वायाससाध्यमल्पफलं तद्यथा न युक्तमेवं लृकारोपदेशप्रत्याख्यानमपीति तात्पर्यम्। **करञ्जेति।** करञ्जो वृक्षविशेषस्तद्विशेषे इत्यर्थः। **अवद्येति।** द्ये फले इत्यन्वयः। तथा च फलविशेषलाभः।

---

१. 'वंशस्तम्बादिति' आरभ्य उत्तरपृष्ठे 'य इत्यस्य दीर्घः स्यादित्यत्रान्वय' इत्यन्तः ( ) कपाठे नास्ति।

**ननु ''कृपो रो लः'' (पा०सू० ८-२-१८) इति सूत्रम् ''अ अ'' (पा०सू० ८-४-६८) इत्यस्मात्पूर्वमस्तु। एवञ्च लत्वस्यासिद्धत्वादेव प्लुत्यादयः सेत्स्यन्तीति चेत् ? न, एवं हि सति ''ग्रो यङि'' (पा०सू० ८-२-२०) इत्यस्याप्युत्कर्षः स्यात्ततश्च लत्वस्यासिद्धतया 'निजेगिल्यते' इत्यत्र ''हलि च'' (पा०सू० ८-२-७७) इति दीर्घः स्यात्। ननु बह्वृचप्रातिशाख्ये ''ऋकारलृकारावथ षष्ठोष्मा जिह्वामूलीयाः'' (ऋ०प्रा० १-८) इति ऋलृवर्णयोः स्थानसाम्योक्तेस्तद्रीत्या ग्रहणकशास्त्रेणैव निर्वाहाद् लृकारोपदशो मास्त्विति चेत् ? न, उक्तरीत्या ऋलृवर्णयोः सावर्ण्योपसंख्यानं परं प्रत्याख्यायताम्, लृकारोपदेशस्तूक्तरीत्या क्लृप्तशिखे प्लुतसिद्धये सावर्ण्यानित्यतां ज्ञापयितुं कर्त्तव्य एवेति दिक्।**

---

खगान्तरे पक्षिविशेषे। आद्यार्थस्यात्र तत्वासम्भवादनुक्तिः। भाष्यानुक्तं प्राचामनुरोधेनाह। **नन्विति।** एवमग्रेऽपि। **एवञ्च** = तस्य ततः पूर्वं पाठे च। एवञ्चैतदुपदेशो मास्त्विति तात्पर्यम्, तदर्थमेवैवकारः। न चेत्यस्यैवमिति शेषः। प्लुतदृष्ट्या लत्वस्यासिद्धत्वे इति तदर्थः। निषेधसम्बन्धायावश्यकमाह। **योगविभागेनेति।** अन्यथा तत्रापि विधिनैव सम्बन्धः स्यान्न निषेधविशेषणम्। यद्वा तत्तु रूप एव, गामश्वमिति वत् समुच्चयो बोध्यः। सप्तम्यन्तः पाठः क्वचित्, तदा तेन तदाश्रयणे सतीत्यर्थे चानुपपत्तिलेशोऽपि नेति बोध्यम्। ननु तत्रागतिकगतिकयोगविभागाद्याश्रयणमेव दोषोऽत आह। **अगतिकेति।** पूर्वमतेऽपि सर्वप्लुतसम्बन्धादित्युक्त्याऽन्यार्थं तयोराश्रयणादिति भावः। क्वचिन्न चेत्यादि समानमित्यन्तग्रन्थो न दृश्यते। **एवं हि सति** सतस्तस्य ततः प्राक् पाठे सति। य इत्यस्य दीर्घः स्यादित्यत्रान्वयः।) **उपसर्गस्यायता**(पा०सू० ८-२-१९)वित्यस्योत्कर्षेऽप्यदोषादाह। **ग्रो यङीति।** अपिना अधीत्यादिसूत्रसमुच्चयः। षष्ठो एकारः। ऊष्मा शषसहाः। जातावेकवचनम्। अथशब्दः समुच्चये। अत्रानुक्तत्वादाह। **तद्रीत्येति।** तदाश्रयणेनेत्यर्थः। **उक्तेति।** यत इत्यादिः। परं केवलम्। उक्तरीत्येत्यस्य ज्ञापयितुमित्यत्रान्वयः। क्लृप्तशिखे तच्छब्दे। **सावर्ण्येति।** तुल्यास्ये प्राप्तेत्यर्थः। **कर्तव्य एवेतीति।** यत्तु प्रागुक्तं तादृशं प्राचामिति योगविभागेन सिद्धे इदं न फलमिति लृकारोपदेशफलं दुर्वचमेवेति चिन्त्यमेवेदमिति। तन्न। तावता विधिमात्रसम्बन्धेऽपि निषेधसम्बन्धे मानाभावात्। निषेधस्याशाब्दत्वाच्च। एतदनुपदेशे एतदसत्वशङ्कया सावर्ण्यविधिरपि तयोर्वक्तुमशक्य इति वार्तिकाद्यसाङ्गत्यापत्तेश्च। एवञ्च व्यवहितशङ्काद्ययुक्तमेव। सावर्ण्यप्रत्याख्यानमप्ययुक्तम्। जातिपक्षे वार्तिकावश्यकत्वस्योक्तत्वात्। तन्यायेन पाणिनीयशिक्षाविरोधेन च तस्य

**एओङ्। ऐऔच् (मा०सू० ३, ४)। यद्यपि छन्दोगानां मध्ये सात्यमुग्रि-राणायनीया अर्द्धमेकारम् अर्द्धमोकारं चाधीयते 'सुजाते ए श्वसूनृते' 'अध्वर्यो ओ**

---

तत्रैवाश्रयणेन सर्वशाखासाधारणेऽत्रानाश्रयणाच्च। अन्यथा मन्त्रशास्त्रस्वीकृतदीर्घलृवर्णस्यापि स्वीकारापत्त्या सिद्धान्तव्याकोपापत्तेश्च। अर्धैकारादेरपि तुल्ययुक्त्या स्वीकारापत्तेश्च। स्फुटीभविष्यति चैतदग्रिमसूत्रे। तस्मादेतदुपदेश आवश्यकः। अत एव सावर्ण्यविध्युपपत्तिः। सवर्णसंज्ञाविधिद्वारकफलमपि प्राल्कारीयति होतृकारः क्लृप्तशिखेत्यादिस्थलत्रये एवेति तत्रैव यदृच्छा शब्दाः। तद्द्वारकः प्रयोजनोपन्यासो वार्तिककृतः। भाष्यकृताऽपि तथैव व्याकृतम्। एवञ्च भाष्यवार्तिकादि यथाश्रुतसूत्ररीत्येति सूचयितुं यथाश्रुतसूत्ररीत्येत्यादि प्रागुक्तं सर्वं चिन्त्यमेवेति बोध्यम्। यद्यपि तेन त्रितयमपि खण्डितम्, तथापि भगवता द्वितीयं कण्ठतः स्थापितम्। तं सन्दूष्य तृतीयमपि प्लुतांशे तमुपहस्य स्थापितप्रायम्। वस्तुतस्तु तृतीयसर्वफलार्थमप्यस्यावश्यकत्वं न प्लुतमात्रार्थत्वम्, शास्त्रीयैकेति न्यायाविषयत्वस्योक्तत्वात्। अर्धविकारेण लौकिकन्यायस्याप्य-प्रवृत्तेः। तत्र प्रतिज्ञाया अभावात्, लकारघटितादेशकल्पने एकदेशविकाराभावाच्च। तथा समुदायादेशकल्पने दोषस्योक्तत्वाच्च। [1](न्यासभेदप्रयुक्तगौरवं तूक्तमेव। भगवता सिद्धान्ते यथा प्लुतस्तथोक्तम्। एवञ्चैकदेशेत्यादि तृतीयप्रयोजननिराकरणमेक)देश्युक्तिरेव। यद्यप्येतत् प्राग्वत् कण्ठतो भगवता नोक्तम्। तथापि प्लुत्यर्थः सन्निति वदता ध्वनितमेव। अन्यथा प्लुत्त्यर्थ इत्येव वाच्ये सन्नित्यस्यादिपदस्य च वैयर्थ्यं स्पष्टमेव। ताभ्यां हि सर्वत्रैतदावश्यकता सूचिता। वस्तुतस्तु स एष इत्यादिभाष्यग्रन्थ एतदर्थमेव प्रवृत्तः। अन्यथा तदाधिक्यं स्पष्टमेव। भाष्यस्थसूत्रभेदेत्यस्य गुरोरित्यत्र न्यासान्तरकरणे तद्द्वयोः न्याययोरुक्तरीत्याऽप्राप्त्या तृतीयैकेति न्यायाङ्गीकारेण चेत्यर्थात्। एवञ्च तथा प्रत्याख्यानेऽतिगौरवम्। तदेवं सैषा महत [2](इत्यन्तेन प्रतिपादितं तत्र। अत एव महत्स्तम्बपदयोः सार्थक्यम्। स्तम्बशब्दस्य समुदायवाचित्वादिति) बोध्यमिति दिक्। तदाह। **दिगिति।**

## २.१५ अर्धैकारार्धौकारखण्डनम्

**एओङ्। ऐऔच्।** ननु ह्रस्वस्यैङः सत्वेन कथं दीर्घपाठ इत्याशयेनाशङ्कते। **यद्यपीति।** छन्दोगानां सामगानाम्। **सात्यमुग्रीति।** प्राग् व्याख्यातम्। **अर्धमिति।** मात्रिकत्वेनार्धम्।

---

१. 'न्यासभेद' इत्यारभ्य 'निराकरणमेक' इति पर्यन्तं ( ) कपाठे नास्ति।

२. 'इत्यन्तेन' इत्यतः 'समुदायवाचित्वादि'त्यन्तः ( ) कपाठे न।

**अद्रिभिः सुतम्' इति अन्तःपादस्थस्याव्यपरस्य तदीयप्रातिशाख्येऽर्द्धमेकारमोकारं च विदधति, तथापि प्रातिशाख्यसमाख्याबलादेव सर्वशाखासाधारणेऽस्मिन् शास्त्रे तस्य न ग्रहणम् ; ज्ञापकाच्च। यदि हि अकारादिभिरष्टादशानामिव एङ्भिरपि एकमात्राणां ग्रहणं संमतं स्यात्तर्हि लाघवार्थमेकमात्रावेव एङावुपदिशेत्, अकारादिवत्। न चैवम् ''अदेङ् गुणः'' (पा०सू० १-१-२) इत्यत्र तपरत्वान्मात्रिकयोरेव गुणसंज्ञा स्यादिति वाच्यम्, तत्र एओइति स्वरूपेणैव दीर्घयोर्निर्देशेऽनण्त्वेन सवर्णाग्रहणोपपत्तेः, एवमप्यर्द्धमात्रालाघवात्। तव हि वर्णोपदेशे एओ इति दीर्घयोर्मात्राचतुष्टयम्, गुणसंज्ञायां तु वर्णोपदेशे मात्राद्वयम्, गुणसंज्ञायां तु एङिति सार्धद्वयम्। मम तु चतस्र इति मिलिताः षडेव मात्राः। तस्माद् द्विमात्रनिर्देश-सामर्थ्यादप्येकमात्रयोरनभिमतत्वं निर्णीयते। नन्वेवम् ''एच इग्घ्रस्वादेशे'' (पा०सू० १-१-४८) इति व्यर्थं स्यात् तद्धि स्थानेन्तरतमपरिभाषया प्राप्नुवतोरर्द्धैकारार्द्धौकारयो-र्निवृत्त्यर्थं क्रियते इति चेत् ? न, वैकल्पिकप्राप्तिमतोऽकारस्य व्यावृत्तये तदारम्भात्।**

---

**सुजाते एश्वेति।** अकारलेखस्त्वत्र प्रामादिकः। ननु लक्षणाभावात् कथं तदध्ययनमत आह। **अन्तः पादेति।** पादमध्यस्थस्यावकारपरकस्येत्यर्थः। **तदीयेति।** ग्रन्थकृदपेक्षया स्वीयेत्यर्थः। **विदधतीति।** विदधति चेत्यर्थः। समाख्या यौगिकः शब्दः। बलादेवेत्यग्रहणे हेतुः। एवः प्रसिद्धौ। सर्वशाखेति हेतुगर्भं विशेषणम्। तस्य मात्रिकस्यैङः। तत्र हेत्वन्तरमाह। **ज्ञापेति।** तदेवाह। **यदीति।** हिर्निश्चये। प्लुतानां ग्रहणस्येष्टत्वादाह। **एकमात्राणामिति।** तर्हीह = वर्णसमाम्नाये। न चैवं = अत्रैकमात्रयोरुपदेशे। तपरत्वात् = तात्परत्वात्। तत्र = 'अदेङ् गुण' इत्यत्र। प्लुताग्रहस्येष्टत्वं सूचयन्नाह। **सवर्णाग्रहेति।** ह्रस्वाद्यग्रहणेत्यर्थः। नन्वेवं गौरवापत्तिरत आह। **एवमप्येति।** ईदृशनिर्देशवैपरीत्येऽप्यर्धमात्रालाघवस्य सत्वादित्यर्थः। पूर्वदूषणोपपादकोऽयं ग्रन्थः। तदेव लाघवमुपपादयति। **तव हीत्यादिना। एङिति सार्धद्वयमिति।** एङित्यस्य सार्धमात्राद्वयमित्यर्थः। सङ्कलनया = मेलनेन। मात्राद्वयं ह्रस्वयोः पाठात्। चतस्रः दीर्घयोः पाठात्। एवेनार्धमात्रव्यावृत्तिः। ज्ञापकमुपसंहरति। **तस्मादिति।** उक्तहेतोरित्यर्थः। अपिना पूर्वहेतुसमुच्चयः। एवञ्चास्या पाठोऽप्युक्त इति भावः। एवं ह्रस्वयोरविशिष्टत्वे। हि यतः। **क्रियत इतीति।** एवञ्च यदि ह्रस्वयोरग्रहणं तर्हि तन्निवृत्त्यर्थं क्रियमाणं तत्सूत्रं व्यर्थं स्यादिति भावः। **वैकेति।** असुब्बत इति भाष्यप्रयोगेणास्योपपत्तिः। [१](ननु कथं पाक्षिक्यकारप्राप्तिरत आह।

---

१. 'ननु' इत्यारभ्य 'तस्मादिति' प्रतीकपर्यन्तं ( ) कपाठे न।

**एचां हि पूर्वो भागोऽकारसदृशः, उत्तरस्तु इवर्णोवर्णसदृशः, तत्र उभयान्तरतमस्य ह्रस्वस्याभावात्पर्यायेणाकारः स्यात्, इकारोकारौ च स्याताम्। तस्मान्मा कदाप्यवर्णं भूदिति सूत्रारम्भः। वस्तुतस्तु प्रत्याख्यास्यते सूत्रम्। तथा च तत्र वार्तिककारो वक्ष्यति - ''सिद्धमेङः सस्थानत्वात्'' ''ऐचोश्चोत्तरभूयस्त्वात्'' इति। अस्यार्थः - शब्दपरविप्रतिषेधेन एङ उत्तरभागान्तरतमौ इउवर्णाविवेति सिद्धम्। यद्वा, एकारः शुद्धतालव्यः, औकारस्तु शुद्धौष्ठ्य इति मते सिद्धमित्यर्थः। तथा च बह्वृचानां प्रातिशाख्यम् - ''तालव्यावेकारचवर्गाविकारैकारौ यकारः शकारः'' (ऋ०प्रा० १-९) इति। ''शेष**

---

**एचां हीति।** तत्र एक्षु। सूत्रसार्थक्यमुपसंहरति। **तस्मादिति।)** कदापि पक्षेऽपि। अक्षरे वर्णशब्दस्योभयलिङ्गत्वादाह। **अवर्णमिति।** एवं सूत्रसत्वेऽपि ततस्तदलाभमुक्त्वा, इदानीं तदेव नास्ति येन शङ्का स्यादित्याशयेनाह। **वस्तुतस्त्विति**। तत्र मानमाह। **तथा चेति।** तत्र = **एच इगिति** सूत्रे। एतत्सूत्रापेक्षया भविष्यत्वनिर्देशः। नन्वेङ इकारोकाराभ्यां समानस्थानत्वाभावादैचोः समानप्रविभागेनोत्तरभूयस्त्वाभावाद्वार्तिकासङ्गतिरेवात आह। **अस्येति।** वार्तिकद्वयस्येत्यर्थः। अस्य शरणमित्यन्तेनान्वयः। तत्रादावाद्यार्थमाह। **शब्देति।** इदं वार्तिके [1]**(**शेषपूरणसूचकम्। तथा च पूर्वभागेन तदसम्भवात् सस्थानत्वादित्यस्योत्तरभागेन समानस्थानत्वादित्यर्थः। तदाह। **उत्तरेति।** ननु नेदं व्याख्यानं युक्तम्, गौरवादक्षरस्वारस्यानाहत्वाच्च। शब्दपरविप्रतिषेधाश्रयणे मानाभावेनान्तरङ्गत्वात्पूर्वसदृशस्यैवापत्तेश्च। स्पष्टं चेदं) 'नित्यः पर यणादेश' इत्यादिना 'अचः परस्मिन्' इत्यत्र भाष्य इत्यग्रे मूलेऽनुपदमेव स्फुटीभविष्यत्यत आह। **इति मत इति।** [2]**(**एतेनेकारोकाराभ्यां सहैङस्तुल्यस्थानत्वादिति तदर्थः सूचितः। एवञ्च न एङः स्थानेऽवर्णप्राप्तिः कदापीति तत्वम्। तत्र मानमाह। **तथा चेति।) प्रातिशाख्यमिति।** जातावेकवचनम्। अत एवाग्रे चसङ्गतिः। अग्रे तालव्यावित्यस्य वचनविपरिणामेनान्वयः। स्पष्टार्थत्वादाद्यमुपेक्ष्य 'शेष ओष्ट्योपपाद्य' इति द्वितीयार्थे सन्दिग्धत्वादाह। **पूर्वोक्तेभ्य इति।** शेष इत्येकवचनेनैकवर्णसम्भावनावारणायाह। **वर्णराशिरिति। उपेति।** उत्पादयितव्यः प्रकाशयितव्यो वा इत्यर्थः। अत एव तथोक्तिं वर्णराशिं प्रतिपादयन् तत्फलितमर्थमाह। **उवर्ण इति। तद्भाष्ये तु** = प्रातिशाख्यभाष्ये तु। स्येति पाठ इत्यत्रैवान्वयः। तस्य च धृत इति शेषः। तत्पाठे शेषपदस्यार्थः। **उत्तरेति।** ओष्ठ्य इत्यस्य तु तत्स्थानिक इत्यर्थः। ननु पूर्वमते

---

१. 'शेषपूरणसूचकं' इत्यारभ्य 'स्पष्टं चेदं' इति पर्यन्तं ( ) कपाठे नास्ति।

२. 'एतेन' इत्यारभ्य 'तथा चेति' इति प्रतीकपर्यन्तं ( ) कपाठे नास्ति।

**ओष्ठ्योपपाद्यः'' (ऋ०प्रा० १-९) इति च। पूर्वोक्तेभ्यः शेषो वर्णराशिरोष्ठाभ्यामुपपादयितव्यः। उवर्णः पवर्गः ओ औ उपध्मानीयश्च ओष्ठ्य इति सूत्रार्थः। इदं च प्रातिशाख्यवृत्तिकृता व्याख्यातम्। तद्भाष्ये तु ''शेषओष्ठ्योपवाद्य'' इति पाठः। तत्र अपवाद्येत्यस्य उत्तरसूत्रे वक्ष्यमाणान् विहायेत्यर्थः। न्यायसिद्धस्यैव बाध्यबाधकभावस्य स्फुटीकरणार्थं चेदं सूत्रम्। तदेवं ''शब्दपरविप्रतिषेधान्मतभेदेन स्थानसाम्याद्वा सिद्धम्'' इति समाधानद्वयं एङ्क्षु फलितम्। एतच्च यद्यप्यैक्ष्वपि तुल्यं तथापि तत्र समाधानान्तरमप्यस्तीत्याह। ''ऐचोश्च'' इति। चकारो भिन्नक्रमो हेतोरनन्तरं बोध्यः। अर्द्धमात्राऽवर्णस्य, अध्यर्द्धमात्रा इवर्णोवर्णयोरिति पक्षे मल्लग्रामादिवद् भूयसा व्यपदेशादपि इकारोकारौ भविष्यत इत्यर्थः। समप्रविभागपक्षोऽप्यस्तीत्यष्टमे वक्ष्यते। तत्र तु पूर्वोक्तसमाधानद्वयमेव शरणम्। तत्रापि शब्दपरविप्रतिषेधपरं प्रथमव्याख्यानं यद्यपि विवरणे स्थितम्, तथापि तदभ्युपगमे ''अप्रतिपत्तिर्वोभयोः'' इत्यादि ''विप्रषेधे परम्''**

---

वक्ष्यमाणानामोष्ठ्यत्वापत्तिः। न चोत्तरसूत्रेण बाधः। तर्हि शेषपदस्यापि वैयर्थ्यापत्तेः। पूर्वसूत्रेण बाधात्तत्रेष्टसिद्धेरत आह। **न्यायेति।** तथा चोत्तरेति सूत्रविहितस्थानेनास्य बाधान्नातिव्याप्तिस्तन्मत इति नातीव प्रयोजनं तस्येति तदुभयोर्नातीव प्रयोजनमत्र मत इति साम्यमेव पक्षयोरिति भावः। **चेदं** विशेषणद्वयम्। चस्त्वर्थे। उपसंहरति। **तदेवमिति।** एवमित्यस्यार्थमाह। **शब्देत्यादि।** मतभेदेन = अन्यमतेन। एङ्क्षु प्रयोगभेदेन बहुवचनम्। एवमग्रेऽपि। एकस्मादुभयोर्वाच्यवृत्त्याऽलाभादाह। **फलितमिति।** एतच्च = समाधानद्वयं च। तत्र = एक्षु। अपिनोक्तद्वयसमुच्चयः। नन्वेवं यथाश्रुतासङ्गतिरत आह। **चकार इति। हेतोरिति।** उत्तरभूयस्त्वादिति हेत्वन्तरं बोध्य इत्यर्थः। तथा चैचोरुत्तरभूयस्त्वाच्च सिद्धमित्यर्थः फलितः। चेन पूर्वसमाधानद्वयसमुच्चयः। यथाश्रुते तु एङोऽपीदं समाधानमित्यर्थः स्यात्, स च बाधित इति भावः। विषयविभागेऽपि वैपरीत्यन्यूनत्वाधिक्यनिरासपूर्वकभूयस्त्वोपपादनपूर्वकं तत्फलितार्थमाह। **अर्धमात्रेति। अध्यर्धमात्रेति।** अर्धमात्रयाऽधिकैकमात्रेत्यर्थः। तत्सदृशौ वर्णभागौ भासेते, न तु ताभ्यामेतौ निष्पन्नाविति भावः। **मल्लेति।** ग्रामे मल्लानाममल्लानां सत्वेऽपि तेषां बहुत्वाद्यथा तद्व्यवहारस्तथा तद्द्वारकभूयःस्थानसाम्येनान्तरतमव्यवहारादपीत्यर्थः। चार्थ अपिना उक्तः। इति पक्ष इत्यनेन सूचितं पक्षान्तरमाह। **समेति।** सर्वेषामेकधा एकमात्रेति पक्ष इत्यर्थः। अपिनैतत्पक्षसमुच्चयः। अष्टमे **प्लुतावैच इदुता** (८-२-१०६)विति सूत्रे भाष्ये। तत्र तु = समप्रविभागपक्षे तु। **शरणमिति।** इति बोध्यमितीति शेषः। इतिः अर्थसमाप्तौ। अथ प्रागुक्तं दूषयति। **तत्रापीत्यादिना।** तत्रापि तयोर्मध्येऽपि। भाष्यं

**(पा०सु० १-४-२) इति सूत्रे वार्त्तिकं भाष्यं च विरुध्येत। न हि "गोस्त्रियोः" (पा०सू० १-२-४८) इति सूत्रेण गोशब्दे विधीयमानो ह्रस्वोऽन्यत्र चरितार्थः, येनाप्रतिपत्तिः स्यात्।**

**ननु प्रतिलक्ष्यं लक्षणभेदेन विकल्पे प्राप्ते परमेवेति नियमोऽस्त्विति चेत् ? न, एवं हि सति "अचः परस्मिन्" (पा०सू० १-१-५७) इतिसूत्रे —**

**नित्यः परयणादेशः परश्चासौ व्यवस्थया।**
**युगपत्सम्भवो नास्ति बहिरङ्गेण सिध्यति ॥ (म.भा.पृ.सं. ४७३ प्रथमो भागः)**

**इत्यादिभाष्यसन्दर्भो विरुध्यते। तद्बलेन हि लक्षणवाक्ययोः पूर्वापरीभाव एव विप्रतिषेधसूत्रस्य विषयोऽन्यस्तु "अन्तरङ्गम्बलवत्" (प०भा०) इत्यस्येति लभ्यते। इदं च तत्रैव स्फुटीकरिष्यामः।**

**द्वितीयव्याख्यानमपि अर्द्धैकारादिवात्प्रातिशाख्योक्तस्य प्रायेणानादराद्दुर्बलम्।**

---

चेत्यस्य तदित्यादिः। **गोशब्द इति**। एवञ्च तदंशे विधानं, न सर्वांश इति भावः। एतदर्थमेवाप्रतिपत्त्युपपादनं **नहीत्यादिना**। अन्यत्र = गोशब्दातिरिक्ते।

इदं च 'विप्रतिषेध' इत्यस्य विध्यर्थत्वे उक्तम्, उक्तवार्तिकस्य तदुपपादकत्वात्। अत एवोक्तवार्तिकादिना सहास्य तस्य नियामकत्वे विरोधो न श्रवणादितार्ध्येन। द्वयोः पर्यायेण प्राप्त्याऽप्रतिपत्तेरेवाभावेनोक्तवार्तिकाद्यप्रवृत्तेरित्याशयः। तदेतद् ध्वनयन् शङ्कते। **नन्विति। एवं हि सति** यतो नियमपक्षे विरोधाभावेनात्र तत्सञ्चारेण विवरणमतस्य सुयोजत्वाङ्गीकारे सति। व्यवस्थया = शब्दपरविप्रतिषेधेन। नास्तीत्यन्तः पूर्वपक्षः। बहिरित्यादिः सिद्धान्तः। आदिना तद्व्याख्यानभूतभाष्यपरिग्रहः। तदाह। **भाष्येति**। हि यतः। पूर्वापरीभाव एव वास्तव एव। **अन्यस्तु** = लक्ष्यगतपूर्वपरभिन्नवर्णकल्पितभेदकलक्षणवाक्यपूर्वापरीभावस्तु। द्वयोः समकालत्वेनासिद्धमित्यस्या अप्राप्तेराह। **अन्तरङ्गं बलेति**। परिभाषान्तरमिदमिति भावः। वस्तुतोऽसिद्धमित्यस्या एवायमर्थ इति नातिरिक्तेयमित्यन्यत्र स्पष्टम्। ननु कथं तत एतल्लाभोऽत आह। **इदं चेति**। तत्रैव = अचः परस्मिन्नित्यत्रैव। अत एव पद्वीमृत्याविति सङ्गदते। ननु तर्हि प्रथमव्याख्यानस्यायुक्तत्वादस्तु द्वितीयव्याख्यानमेव, इदं च तदवतरणावसरे प्रागुक्तमेवात आह। **द्वितीयेति**। एकारः शुद्धतालव्य इत्यादीत्यर्थः। अर्धैकारादिवत् = ह्रस्वैकारादिवत्। क्वचिदस्य

**अथ छन्दोगाभिमतस्यापि चतुर्मात्रस्य तपरकरणव्यावर्त्यतोक्तेस्तद्वदिहाप्यभ्युपगमस्तर्हि ऋलृक्सूत्रोक्तरीत्या ''ऋकारलृकारयोः सवर्णविधिः'' इति वार्त्तिकमपि प्रत्याख्यातुं शक्यम्। अथ शिक्षान्तरानुसारेण वार्त्तिकारम्भस्तर्हि ''एच इग्'' (पा०सू० १-१-४८) इतिसूत्रारम्भोपि तथैवास्त्विति दिक्।**

**तस्माद् एच इति सूत्रबलेनार्द्धैकारार्द्धौकारौ न लभ्येत इति स्थितम्। ननु प्रातिशाख्योक्तावपि ताविह गृह्येते चेत्तदा किमनिष्टमापद्येत ? येन तयोरग्रहणं यत्नतः प्रतिपादयसीति चेत् ? न, एचो ह्रस्वविधौ अन्तरतमत्वेन तयोरेव प्रसङ्गात्। ''एच इक्'' (पा०सू० १-१-४८) इति सूत्रं तु प्रत्याख्यातमेव। एतदर्थमेव सूत्राभ्युपगमे तु गौरवमेव दोषः।**

---

सत्वादाह। **प्रायेणेति।** तदेवाह। **अथेति।** तोक्तेः भाष्यकारादीनाम्। तद्वत् = तत्र तदङ्गीकृत्त्यैव इगिति सूत्रप्रत्याख्यानाभ्युपगम इत्यर्थः। **ऋलृगिति** ऋकारलृकारौ। **अथेति।** बह्वृचप्राति-शाख्यमङ्गीकृत्त्येत्त्यर्थः। **शिक्षान्तरेति।** 'स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसा स्मृता'[1] इति पाणिनीयमुख्यशिक्षानुसारेणेत्यर्थः। **तथैवेति।** 'ए ऐ तु कण्ठतालव्यावो औ कण्ठोष्टजौ स्मृता'[2]विति तथाशिक्षानुसारेणेत्यर्थः। **दिगिति।** तदर्थस्तु तदाश्रित्यात्र प्रत्याख्यानपक्ष एव युक्तः। प्रकृतसूत्रेऽष्टमे च भगवता तथा सिद्धान्तितत्वात्। प्रतिबन्दी तु न। नासूयेति भाष्योक्तेः। अत एव वस्तुतस्त्वयमेव पक्षः प्रागुक्तो मूले इति पर्यवसितं ब्रुवन् प्रकृतमुपसंहरति। **तस्मादिति।** प्रत्याख्यानपक्षत्व[3] इव सत्वेऽप्युक्तरीत्या साफल्यादित्यर्थः। **स्थितं** भाष्यादौ। उक्तं दिगर्थमेव सूचयन् तावभ्युपेत्य शङ्कते। **नन्विति।** ताविह = अर्धैकारार्धौकारौ व्याकरणे। ह्रस्वविधौ = 'ह्रस्वो नपुंसके' (पा०सू० १-२-४७) इत्यादिविधिप्रवृत्तौ। एवेनावर्णादिव्यावृत्तिः। **प्रत्याख्यातमेवेति।** भाष्यकारैरित्यर्थः। एवस्तत्सत्वव्यवच्छेदे। तथा च भाष्यविरोधस्तदङ्गीकारे दूषणमिति भावः। **एतदिति।** तयोः प्रसङ्गनिवृत्त्यर्थमित्यर्थः। मक्षिकार्थो धूम इति वत् फलान्तरव्यवच्छेदः। गौरवमेवेत्येवोऽप्यर्थे। तेनोक्तदोषसमुच्चयः, अत एवारुचिसूचकस्तुः प्रयुक्तः।

---

१. पा. शिक्षा (श्लो.सं. १७)

२. पा. शिक्षा (श्लो.सं. १८)

३. सूत्रस्यासत्वे इव इति ख पाठः।

**स्यादेतत्, एत् ओत् ङ् इत्यादिक्रमेण तपरानेव निर्देक्ष्यामः। तथा च ऊकालसूत्रे अच्शब्देन तपराणामेवोपस्थितौ सत्यां तत्कालग्रहणादर्ध एकार ओकारो वा ह्रस्वसंज्ञां न लभेत। तेन ह्रस्वविधिविधेयोऽप्यसौ नेति। मैवम्, त्रिमात्राणामप्यनच्त्वापत्तेः। ततश्च 'गो ३ त्रातः' इत्यत्र ''अनचि च'' (पा०सू० ८-४-४१) इत्यचः परस्य विधीयमानं द्वित्वं तकारस्य न स्यात्। 'प्रत्यङ्ङैतिकायनः' 'उदङ्ङौपगवः' इति ङमुट् न स्यात्। प्लुतसंज्ञाविरहात् प्लुतविधिर्न प्रवर्त्तेत। न च ''ओमभ्यादाने'' (पा०सू० ८-२-८७) इत्यादिविधिसामर्थ्यात्तत्सिद्धिः। उवर्णविधानेन चरितार्थत्वापत्तेरिति दिक्।**

---

## २.१६ तपरोपदेशखण्डनपरवार्तिकत्रयावतरणम्

उक्तदोषवारणाय तत्रैव पक्षे 'इदं विचार्यत' इत्यादि भाष्यार्थं प्रतिपादयितुं शङ्कते। **स्यादेतदित्यादिना।** आदिनानैच्परिग्रहः। अत एव तपरानिति बहुवचनम्। एवेन यथान्यासव्यावृत्तिः। तथा च = तथानिर्देशे च। **ऊकालेति।** पदपाठे प्रत्ययं विहाय प्रकृत्यनुकरणमिदम्। सूत्र इति पाठस्तु युक्त एव। वा चार्थे। तेन = संज्ञालाभाभावेन। **असौ** अर्धैकारादिः। अपिना तत्संग्रहः। [१]**(**तद्वत्तेषामपि तत्वापत्तेरित्यर्थः। **ततश्चेति।** तेषामपि तदापत्तेश्चेत्यर्थः। अस्य स्थलत्रयेऽन्वयः। गोदः त्रातेत्यादिक्तान्तादेः सम्बोधनम्। प्लुतात्परत्र दोषमुक्त्वा प्लुते दोषमाह। **प्रत्यङिति चेति।** इत्यत्र प्लुतमभ्युपेत्य दोषद्वयमुक्तम्। वस्तुतस्तु स एव नेत्याह। **प्लुतेति।** त्रिमात्रस्याचः) प्लुतसंज्ञा विधीयते। तपरत्वे च त्रिमात्रस्याग्रहणादच्त्वाभावेन प्लुतसंज्ञाया अभावात्प्लुत एव न स्यादित्यर्थः। एतेन कारानुक्तत्वान्न्यूनतेत्यपास्तम्। एकत्र दोषत्रयाभावेन समुच्चयाभावात्। आर्थिकसमुच्चयलाभेन चानुक्तेश्च अहरहर्नीयमानो गामश्वमितिवत्। **नन्वोमभ्यादाने** (पा०सू० ८-२-८७) इत्यादिसूत्रैरारम्भे ओम्शब्दस्य प्लुतो भवतीत्याद्यर्थकैरन्तरतमपरिभाषासंस्कृतैरज्रूपप्लुतविधानसामर्थ्यात् त्रिमात्राणामनच्त्वेऽपि प्लुतसंज्ञा भविष्यतीत्याशयेनाशङ्कते। **न चौमेति।** तत्सिद्धिः = प्लुतसंज्ञासिद्धिः। अन्यथाऽनुपपत्तवपि अपूर्ववचनाकल्पनजलाघवादाह। **उवर्णेति।** तदादीत्यर्थः। आदिनेकारपरिग्रहः। ताभ्यामपि सा हि तेषां प्रातिशाख्यानुरोधादुत्तरभागमात्रजसादृश्याश्रयणात्तद्धूयस्त्वेन तत्वाच्च। यथाकथञ्चिदान्तरतम्यस्य सत्वात्। तथा च सामर्थ्यकल्पना न युक्तेति भावः। एवं चारितार्थ्यस्यानिष्टजनकत्वादाह। **आपत्तेरितीति।** वस्तुतस्तु तृतीयदोषस्योक्तरीत्याऽभावेऽऽद्यदोषद्वयं दृढमेवेति बोध्यम्। इदं तु

---

१. 'तद्वत्तेषामपि' इत्यारभ्य 'प्लुतेति। त्रिमात्रस्याच' इति पर्यन्तं ( ) कपाठे नास्ति।

**तदेतदाह वार्त्तिककारः- ''सन्ध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणम्, प्लुत्यादिष्व-ज्विधिः। प्लुतसंज्ञा च। अतपर एच इग्घ्रस्वादेशे एकादेशे दीर्घग्रहणम्'' इति। अस्यार्थः- श्लिष्यमाणवर्णद्वयसदृशावयवत्वात्संधीयमानमक्षरं सन्ध्यक्षरमित्यन्वर्था पूर्वाचार्यसिद्धा एचां संज्ञा। तपर उपदिश्यतेऽनेनेति करणव्युत्पत्त्या प्रयोजनमुच्यते। तथा च एचां तपरत्वोच्चारणे फलमस्ति चेत्तर्हि तपरोच्चारणं तावत्कर्त्तव्यम्।**

---

वक्ष्यमाणवार्तिकाशयवर्णनमात्रम्। एवञ्च तथा दुर्वचत्वेनोक्तदोषापत्त्या अर्धैकाराद्यङ्गीकारो न युक्तस्तदाह। **दिगिति**।

## २.१७ 'सन्ध्यक्षरेषु तपरोपदेश' इत्यादिवार्तिकत्रयार्थः।

तदेतत् स्यादेतदित्यादिना समनन्तरोक्तं प्रसङ्गात् यथान्यासं समर्थयितुं अग्रिमभाष्यार्थं विशदयितुं चाह। **तपर इति।** धर्मपरो निर्देशः, जातावेकवचनं वा। अप्रसिद्धयभेदकृतोदे-श्यविधेयभावानुपपत्तिकृतानन्वया[१](दिनाऽर्थाप्रतीतेराह। **अस्यार्थ इति। णवर्णद्वयसदृशेति** बहुव्रीहिरयम्। शिष्यमाणवार्तिकपञ्चकस्येत्यर्थः।) उक्तयुक्तेरित्यन्तेनान्वयोऽस्य। तत्रादौ प्रथमवार्तिकार्थं वक्तुं पदार्थद्वयमुक्तहेतुभ्यामेवाह। **अइउणिति।** शिष्यमाणवर्णसदृशावयवद्वयसन्धा-नेनैषां निष्पन्नत्वादित्यर्थः। वर्णानां जन्यत्वपक्ष इदम्। ऐजंशे निष्पादकवचनं च प्रातिशाख्यादितः पूर्वव्याकरणतो वा बोध्यम्। यद्वाऽजन्यत्वपक्षे एवाइउणित्यादिनाऽनशिष्यमाणा ये वर्णास्तत्सदृशा येऽवयवा रमेशो गङ्गोदकं देवैश्वर्यं कृष्णौत्कंट्यमित्यादिप्रयोगस्थाः तत्तद्रूपसन्धानेनैचस्तत्र निष्पन्नत्वादित्यर्थः। एवञ्च तत्सदृशावयवभासादेतेषां सर्वेषां सर्वत्र तत्वमिति भावः। श्लिष्यमाण-वर्णद्वयसदृशेति पाठे पक्षद्वयेऽपि रमेश इत्यादौ श्लेषविषयाकारेकारादिवर्णद्वयसदृशभासमानावयव-कत्वस्य सर्वत्र सत्वात् सन्धीयमानमिवाक्षरसन्ध्यक्षरमित्यर्थः। क्लृप्तकल्पनात इति न्यायात्। कैयटाद्यसाङ्गत्यं ध्वनयन्नाह। **तपर इति। प्रयोजनमिति।** फलस्य करणत्वेन विवक्षणादिति भावः। एवं हेतुभूतावश्यकपदार्थज्ञानविषयपदार्थद्वयं प्रतिपाद्य वाक्यार्थमाह। **तथेति।** पदार्थद्वयबोधे चेत्यर्थः। **चैचामिति।** वार्तिके सप्तमी सम्बन्धिनोऽधिकरणत्वविवक्षया, तपरशब्दो धर्मपरः। [२](तदुच्चारणं चाश्रयद्वारकम्, अन्यथा)ऽसामर्थ्यात्समासो न स्यात्। अग्रे तु धर्मिपर एवेति भावः।

---

१. ( ) 'दिनाऽर्थाप्रतीतेः' इत्यारभ्य 'पञ्चकस्येत्यर्थ' इति ग्रन्थः कपाठे नास्ति।

२. ( ) 'तदुच्चारणं चाश्रयद्वारकं। अन्यथा' इति कपाठे नास्ति।

**प्लुतत्वे सत्यप्यज्विधिर्द्वित्वङमुडादिर्न सिद्ध्यति। तत्र प्लुतस्यैव ङमुडादिः तस्मात्परस्य द्वित्वमिति सूचयितुमादिशब्दः। प्लुते तदुत्तरवर्णेषु चेष्टं कार्यं सिध्यतीत्यर्थः। अभ्युपेत्यवादोऽयम्।**

**वस्तुतस्तु अनच्त्वात्प्लुतसंज्ञैव न सिध्यति। तस्माद्दुष्टस्तपरनिर्देश इति वार्त्तिकत्रयेणोक्तम्। यथान्यासपाठे त्वाह-अतपर इति। सूत्रं कर्त्तव्यं स्यादर्द्धैकारादिनिवृत्तये इत्यर्थः। वस्तुतस्तु उभाभ्यामपि वा न कर्त्तव्यमिति समनन्तरमेवोपपादितम्।**

---

तावत् आदौ। तथा चायमेवाद्यो दोषः। अस्याभ्युपेत्यवादत्वं वक्तुं द्वितीयवार्तिकस्यार्थमाह। **प्लुतत्व इति।** [१]प्लुतसंज्ञायामित्यर्थः। अज्विधिरित्यस्यार्थमाह। **द्वित्वेति।** नन्वेवं प्लुतावज्विधिरिति वाच्यमत आह। **आदिशब्द इति।** प्लुत्यादिष्वित्यत्रेति भावः। एतेन स व्यर्थ एवेत्यपास्तम्। स्वयं तु तस्यानतिप्रयोजनकत्वध्वननाय तथोक्तं सूचयितुमित्यनेनोक्तार्थस्य फलितत्वं सूचितम्। अतः शाब्दार्थमाह। **प्लुते इति।** प्लुतिशब्दो लक्षणया प्राग्वद्धर्मिपर इति भावः। वस्तुतस्तु प्लुतिशब्दस्त्रिमात्रपरः आदिना चतुर्मात्रग्रहणम्। कृष्णाद्युक्तं तु क्लिष्टत्वादुपेक्ष्यमिति स्पष्टं **छायाया**मिति बोध्यम्। तृतीयवार्तिकार्थमाह। **अभ्युपेत्येति।** प्लुतसंज्ञामङ्गीकृत्येदमुक्तमित्यर्थः। वार्तिकरीत्याऽस्य दोषस्य तत्वध्वननायाह। **वस्तुतस्त्विति। सेज्ञैवेति।** एतेन वार्तिके चस्त्वर्थे इति सूचितमिति कश्चित्। [२]**(**वस्तुतस्तु समुच्चायक एव सः। इदं तु सर्वं वाक्यमिति न्यायलब्धमिति बोध्यम्। वस्तुतो दोषद्वयमेव) दृढं, न तृतीयदोष इति प्रागुक्तमिति बोध्यम्। तदेतद् ध्वनयन् उपसंहरति। **तस्मादिति।** उक्तदोषाभ्यामित्यर्थः। दुष्टत्वकथने तात्पर्यं, न तु तत्रेति भावः। अत एव त्रयेणेति समूहनिर्देश इति बोध्यम्। तदर्थं प्रासङ्गिकमुक्तं शेषपूरणेन व्याचष्टे। **यथान्यासमिति।** सूत्रं **एच इगिति।** अस्य दोषस्यारुचिग्रस्तत्वमाह। **वस्तुतस्त्विति।** नन्वाद्यपक्षो न सिद्धान्त इति प्रागुक्तमेवात आह। **उभाभ्यामपि वेति।** एतेनानास्थायां वाशब्द इत्यपास्तम्। तपरत्व इवातपरत्वेऽप्यर्धैकारादेः सत्वेऽपि [३]**(**वर्णसमाम्नाये दीर्घोच्चारणसामर्थ्यात्तेषामेवाचृत्वेन, ऊकाल इत्यत्र तेन द्विमात्रादिग्रहणेन संज्ञाद्वयविधानेनास्याग्रहणेन तत्संज्ञाविरहाद्ध्रस्वविधिविधेयताया एवाभावात्। वस्तुतस्तु तत्सत्वमेव न), अवर्णोऽपि नेत्यादिप्रागुक्तमेवेति भावः।

---

१. तत्संज्ञायामित्यर्थ इति ख पाठः।

२. ( ) 'वस्तुतस्तु' इत्यारभ्य 'दोषद्वयमेव' इति पर्यन्तं कपाठे नास्ति।

३. 'वर्णसमाम्नाये' इत्यारभ्य उत्तरपृष्टे 'तत्सत्वमेव न', इति पर्यन्तं ( ) कपाठे नास्ति।

**तस्मान्नायं दोष उद्भावनार्हः पक्षद्वयसाधारण्यात् ।**

**स्यादेतत्, तपरत्वाभावपक्षे 'गङ्गोदकं' 'रमेशः' इत्यादौ त्रिमात्रचतुर्मात्राणां स्थाने त्रिमात्रचतुर्मात्रा एवादेशाः स्युः, आन्तरतम्यात् । न च ''अकः सवर्णे'' (पा०सू० ६-१-१०१) इति सूत्रे दीर्घ इति योगं विभज्य ''एकः पूर्वपरयोः'' (पा०सू० ६-१-८४) इत्यधिकारे यो विहितः स दीर्घो भवतीति व्याख्यानान्न त्रिमात्राद्यादेश इति वाच्यम्, 'पशुं' 'विद्धं' 'पचन्ति' इत्यत्र दोषप्रसङ्गात् ।**

**ननु ''अमि'' इत्येव सूत्रमस्तु । ''प्रथमयोः'' (पा०सू० ६-१-१०२) इति सूत्रात्पूर्वसवर्णोऽनुवर्त्तते ''एकः पूर्वपरयोः'' (पा०सू० ६-१-८४)**

---

तत्वमध्ये आद्यपक्षोक्तिस्त्वत्र पक्षे तथापि प्रकृते न वैलक्षण्यमिति ध्वनयितुं, न तु तस्य तत्वं प्रतिपादयितुम् । तदेतद् ध्वनयन्नाह । **तस्मादिति ।** एतत्प्रतिपादने तात्पर्यं, न तु तत्रेति भावः । तस्मादित्यस्यार्थमाह । **पक्षेति ।** पक्षद्वये तस्य कर्तव्यत्वाकर्तव्यत्वयोः साधारण्यादित्यर्थः । तथा चाद्यपक्षेऽस्य तत्वेन तदर्थं [1]...... सिद्धान्तेऽकर्तव्यत्वेन दोष एव नेतीदं वार्तिकमयुक्तमेव । अत एव तेनाप्यग्रे दोषान्तरं दत्तम् ।

## २.१८ अतपरपक्षदूषणम्

तदेतद् ध्वनयन् तदप्युद्धर्तुं तदादौ प्रतिपादयति । **स्यादेतदित्यादिना ।** एवेन द्विमात्रव्यावृत्तिः । **आन्तरेति ।** स्थानप्रमाणोभयान्तरतम्यादित्यर्थः[2] । यद्यप्येकयोगेऽप्यग्रिमेषु तदनुवृत्त्येष्टसिद्धिस्तथापि पूर्वत्र दोषादाह । **योगं विभेति ।** अकः सवर्णे इति विभक्तस्याकः सवर्णेऽचि परे पूर्वपरयोरेक आदेशो भवतीत्यर्थं प्रकृतानुपयुक्तं तद् निधाय द्वितीयस्यार्थमुपयुक्तमाह । **एक इति । विद्धमिति ।** [3](व्यधधातोः क्ते सम्प्रसारणे रूपम् । एषु पूर्वरूपादिना दीर्घाः स्युः । **अतो गुण** (पा०सू० ६-१-९७) इत्यस्य वैयर्थ्यं तु न, एङंशे साफल्यादिति भावः । **अमीत्येवेति ।** न च 'प्रथमयो'रिति सिद्धे इदमपि किमर्थमिति वाच्यम् । **वा छन्दसी**(पा०सू० ६-१-१०६) त्यस्यात्रानुवृत्त्यर्थमावश्यकत्वात् । अधिकं **छायातो**ऽवगन्तव्यम् । **पूर्वसवर्णोऽनुवर्तत** इति

---

१. अत्र ग्रन्थः त्रुटितः ।

२ उभयान्तर्यादित्यर्थ इति ख पाठः ।

३. ( ) 'व्यधधातोः' इत्यारभ्य उत्तरपृष्ठे 'तदर्थत्यागे' इति पर्यन्तं कपाठे नास्ति ।

**इति च। एवं सिद्धे पूर्वग्रहणं यथाजातीयकः पूर्वः स एव यथा स्यात् दीर्घो मा भूदिति। तेन पशुमिति तावत्सिद्धम्। ''सम्प्रसारणाच्च'' (पा०सू० ६-७-१०८) इत्यत्रापि स एव पूर्वशब्दोऽनुवर्त्तते। ''हलः'' (पा०सू० ६-४-२) इति सूत्रारम्भसामर्थ्याद्वा ''संप्रसारणाच्च'' (पा०सू० ६-१-१०८) इत्यनेन दीर्घो न विधीयते। तेन 'विद्धम्' इत्यपि सिद्धम्। ''अतो गुणे'' (पा०सू० ६-१-९७) इत्यत्रापि पर इत्येव सिद्धे रूपग्रहणसामर्थ्याद्यादृशः, परस्तादृश एवादेशो न तु तद्विलक्षणः। तेन 'पचन्ति' इत्यपि सिद्धम्। ''अतो गुणे'' (पा०सू० ६-१-९७) इत्यत्रापि पर इत्येव सिद्धे रूपग्रहणसामर्थ्याद्यादृशः परस्तादृश एवादेशो न तु तद्विलक्षणः। तेन 'पचन्ति' इत्यपि सिद्धम्। तस्माद्योग-**

---

शब्दोऽनुवर्तत इत्यर्थः। **इति चेति।** अनुवर्त्तत इत्यस्यानुषङ्गः। **यथाजातीयकः** तत्तद्धर्मव्यञ्जकः। स एव = तत्तज्जातीय एव। इति = एतदर्थम्। तेन = पूर्वग्रहणेन। तावत् = प्रथमोपात्तम्। द्वितीयमुद्धरति। **सम्प्रेति। स एवेति।** स च तदर्थक एव, अर्थाधिकारादिति भावः। शब्दाधिकारे आह हल इतीति केचित्। वस्तुतस्तु अगतिकगतिः, शब्दाधिकारस्य दुर्लभत्वेन तदर्थत्यागे) मानाभाव इति। यद्यपि तथेष्टसिद्धिरेव, तथापि ज्ञापकमप्यत्र सम्भवतीत्याशयेनाह। **हल इतीति।** [1](वा चार्थे इति बोध्यम्। विधिनियमसम्भवे विधिरेव ज्यायानिति (प. १०९) परिभाषया हलः परस्यैव दीर्घत्वं यथा स्यात्, उतमित्यादौ मा भूदिति नियमो नेति भाव इति केचित्। वस्तुतस्त्वत्र पक्षे विध्यसम्भवो नियमे फलाभावश्चेत्यादि सर्वं **छायायां** विशदीकृतं तत एव बोध्यमिति बोध्यम्। तेन प्रकारद्वयेन। प्राचामनुरोधेनाह। **अतो गुण इति। इत्यत्रापीति।** अर्थाधिकारादिति बोध्यं) तेन शेषः, मुख्यत्वादिति भावः। ननु पूर्वत्र कोऽर्थोऽत आह। **पर इत्येवेति।** यत इत्यादिः। **एङि परेति** सूत्रे इति भावः। [2](यादृशः परः दीर्घत्वादिविशिष्टः। चिन्त्यमिदम्। सिद्धान्ते रूपग्रहणस्य) स्पष्टार्थत्वात्। भाष्यमप्यत्रत्यमेकदेश्युक्तिरेव। एवञ्च पचन्तीत्यत्र दोष एव। अत एवात्र भाष्ये चरमे तदुल्लेखः। एतेनैङि परेति सूत्रस्थ**मनोरमा**[3]विरुद्धमित्यपास्तम्। तदनुरोधेनैवावान्तरपूर्वपक्षमुपसंहरति। **तस्मादिति।** उक्तदोषाणामभावा(दित्यर्थः[4]। आदिना खट्वर्श्यो मालर्श्य

१. ( ) इति चिह्नस्थः 'वा चार्थे' इत्यारभ्य 'अर्थाधिकारादिति बोध्यम्' इति पर्यन्तं क पाठे नास्ति।

२. ( ) 'यादृशः परः' इत्यारभ्य 'रूपग्रहणस्य' इत्यत्र रूपेति पर्यन्तं कपाठे नास्ति।

३. तत्र हि 'रूपग्रहणं चिन्त्यप्रयोजनम्। 'एङि पर' इत्येव सिद्धेः। यथा 'अमि पूर्व' इतीत्युक्तम्। प्रौ.म.पृ.सं. २३१।

४. ( ) 'दित्यर्थ' इत्यारभ्य 'उक्तलक्ष्येषु' इति पर्यन्तं कपाठे न।

**विभागेन एकादेशो दीर्घो भवतीति पक्षो निर्दोष एवेति चेत् ? न, एवं सति 'कृष्णर्द्धिः' 'तवल्कारः' इत्याद्यसिद्धिप्रसङ्गात्। इह हि दीर्घवचनादकारो न। अनान्तर्यादेदोतौ न। तस्माद्दीर्घ इति योगविभागो दुष्ट एव। तेन 'गङ्गोदकं' 'रमेशः' इत्यत्र त्रिमात्रचतुर्मात्रप्रसक्तिर्दुर्वारैवेति। न च प्लुतश्च विषये स्मृत इति वाच्यम्, प्लुताप्लुतप्रसङ्गे सत्येव तदिति वक्ष्यमाणत्वात्। ननु तथापि चतुर्मात्रः कथमापद्यते ? तस्य लोकवेदयोरप्रसिद्धेरिति चेत् ? न, छान्दोग्ये प्रसिद्धेरित्याहुः। वस्तुतस्तु लोकेऽप्यस्ति**

---

पचन्तीत्यादिपरिग्रहः। असिद्धिमेवाह। **इह हीति।** उक्तलक्ष्येषु) यत इत्यर्थः। **दीर्घेति।** योगविभागेन सर्वस्य दीर्घत्वप्रतिपादनादित्यर्थः। **अकारो नेति।** यद्यपि परत्वेनाकारस्य स्थान्यन्तरतमत्वात्प्राप्तः, तथापि द्विमात्रत्वरूपदीर्घत्वासम्भवस्तस्येति भावः। [१](क्वचिन्न स्यादिति पाठः। **एदोतौ नेति।** एवञ्च दीर्घश्रुतिस्थानेन्तरेतिपरिभाषयोर्विरोधे जातिव्यक्त्युभयपक्षेऽपि तद्विषयकलक्षणानुपप्लवाद्विविक्तस्वरकश्रवणापत्तिरिति भावः। एतेनैकः पूर्वपरयोः दीर्घ इत्येव न्यासपरं वार्तिकमित्यपास्तम्। स्फुटीभविष्यति चैतदनुपदमेव। भवन्तावपि तौ कृष्णर्द्ध्याद्यसाधकावेवेत्यपि बोध्यमिति कश्चित्। वस्तुतो भाष्यविरोधादयुक्तमेतदिति स्पष्टीकृतं **छायाया**मिति तत एव बोध्यम्। पचन्तीत्याद्यसिद्धिस्तूक्तैव। सिद्धान्ती अवान्तरसमाधिमुपसंहरति। **तस्मादिति।** अव्याप्त्यतिव्याप्तिरूपदोषद्वयादित्यर्थः। परमपूर्वपक्षमुपसंहरति। **तेनेति।** योगविभागाद्यभावेनेत्यर्थः। इत्यत्र इत्यादौ इति भाष्योक्तानूदितपूर्वपक्षे सति प्रत्यभिवादादिरूपस्वनिमित्ते इत्यर्थः। एवञ्च तदभावान्नात्र स इति भावः। **प्लुताप्लुतेति।** उभयप्रसङ्गे सत्येव तद्वार्तिकं प्रवर्त्तत इत्यर्थः। इति इत्यस्य। **वक्ष्येति। स्थाध्वो**रिति सूत्रे इति भावः।) तथा हि। यथा **स्थाध्वोरिच्च** (पा०सू० १-२-२७) इत्यत्रातपरत्वे स्थाध्वोर्दीर्घयोः स्थाने **घुमास्थे** (पा०सू० ६-४-६६) त्यनेनैचां दीर्घेकारयोः सिद्धौ पुनर्वचनमदीर्घार्थमिति स्थितेऽनन्तर्याविशेषाद्ध्रस्वप्लुतयोः प्रसङ्गेन तत्सञ्चारो, नैवं प्रकृते आन्तरतम्यात् त्रिमात्रादेरेव प्रवृत्तेः। एवञ्च तद्विषयेऽपि नैव। प्लुते पक्षेऽनुवादकत्वदोषापत्तिस्तत्रेति तत्प्रवृत्तिः। अत्र तु प्लुत एव प्राप्नोति। स च **गुरोरनृत** (पा०सू० ८-२-८६) इत्यनेनानन्त्यटेरिकारविशिष्टाकारस्यैकाररूपः सिद्ध इति खट्वा इन्द्र इत्यादिविषयकशास्त्रवैयर्थ्यापत्तिरेवेत्यनुवाददोषः सोढव्य एवेति वैषम्यमिति भावः। तथापि = त्रिमात्रप्राप्तावपि। यद्वा प्रकारान्तरेण तयोरवारणेऽपि। **आपद्यत इति।** आपद्यत एवेत्यर्थः। छान्दोग्ये छन्दोगवेदे तथात्वगाने प्रसिद्धिः। **आहुरिति।** प्रकाशकृदादय इत्यर्थः। आहुरित्यनेन

---

१. ( ) मध्यस्थः 'क्वचिन्न स्यादिति पाठ' इत्यारभ्य 'स्थाध्वोरिति सूत्रे इति भाव' इति पर्यन्तं ग्रन्थः कपाठे नास्ति।

**प्रसिद्धिः । तथा च ''प्लुतावैच इदुतौ'' (पा०सू० ८-२-१०६) इति सूत्रे भाष्यकारो वक्ष्यति- ''इष्यत एव चतुर्मात्रः प्लुतः'' इति । अत्रोच्यते-गुणसंज्ञायां वृद्धिसंज्ञायां च तपरनिर्देशान्नोक्तदोषः । तदेतदुक्तं वार्त्तिककृता- ''एकादेशे दीर्घग्रहणम्'' इति । तस्यैव संज्ञित्वादिति भावः । न त्वेतद्वार्त्तिकं दीर्घग्रहणान्तरकर्त्तव्यतापरं नापि योगविभागपरम्, उक्तयुक्तेः ।**

---

तावत्पर्यन्तं गमनं निर्बीजमित्येवंरूपाऽरुचिः सूचिता । तद् ध्वनयन्नाह । **वस्तुतस्त्विति ।** अपिना वेदपरिग्रहः । ऊकाल इत्यत्र त्रिमात्रग्रहणमेकमात्रद्विमात्रत्रिमात्रोप-लक्षणमिति तस्य तद्वदचृत्ववत् प्लुतसंज्ञा निर्बाधेति भावः । तदेतद् ध्वनयन्नाह । **तथा चेति ।**

## २.१९ अतपरपक्षोक्तदूषणपरिहारः

वर्णक्रमानुरोधेन विधिसूत्रक्रमानुरोधेन चाह । **गुणेति ।** अत एव भाष्ये तथैवोदाहृतं समाहितं च । **तपरनिर्देशादिति ।** तत्र पञ्चमीसमासोऽपीत्याकूतम् । तथा च तात्परशब्दनिर्दिष्टसंज्ञिनां गुणवृद्धिसंज्ञाप्रवृत्त्या त्रिमात्रादेस्तत्र संज्ञित्वेनैवानिर्देशान्नोक्तदोष इति भावः । **तदेतदिति ।** अभिप्रेत्येति शेषः । अभेदेनान्वयेन यथाश्रुतं वा तमभिप्रायमाह । **तस्यैवेति ।** वृद्धिसंज्ञादौ तपरनिर्देशेनेत्यादिः । तथा च तत्र तेन दीर्घाणामेव संज्ञित्वात् **आद्गुण** (पा०सू० ६-१-८७) इत्याद्येकादेशविधायके गुणादिपदेन दीर्घाणामेव ग्रहणमिति वार्तिकार्थो बोध्यः । अर्थान्तरमपि [१]**छायायामु**क्तम् । सर्वं वाक्यमिति न्यायलब्धावधारणगर्भस्य तदेतदित्यस्य व्यावर्त्त्यमाह । **न त्वेतदिति । ग्रहणान्तरेति । अकः सवर्ण** इत्यत्र [२]दीर्घग्रहणभिन्नदीर्घग्रहणेत्यर्थः । **एकः पूर्वेति** सूत्र इति शेषः । एकः पूर्वपरयो दीर्घ इत्येवं न्यासपरं नेति यावत् । **योगविभागेति । अकः सवर्ण** इत्यत्रेति शेषः । योगविभागपक्षोक्तदोषगणेनैवोक्तन्यासस्यापि दुष्टत्वादुभयत्रैकमेव हेतुमाह । [३]**(उक्तेति ।** कृष्णर्द्ध्यर्थाद्यसिद्धिप्रसङ्गादित्यर्थः । इतीति शेषः । स चार्थसमाप्तौ । तस्मादतपरत्वे न कोऽपि दोष इति तयोरङ्गीकारे प्रागुक्ते दोष एवेति तयोरत्राग्रहणमिति सिद्धमिति भावः ।

---

१. तत्र हि **'एकादेशे** इत्यस्य तन्मूलभूतसंज्ञाविधावित्यर्थः । कार्यत्वाच्छेषत्वाच्च संज्ञाधिकारे 'एकादेशे' इत्यभिधा-नोपपत्तिः' इत्युक्तम् । तथा च संज्ञाविधौ दीर्घग्रहणे दीर्घा आदैचो वृद्धिसंज्ञका इति वृद्धिरादैजित्यस्यार्थः । अदेङ्गुण इत्यत्र च एङा सहैव दीर्घग्रहणं सम्बध्यते नाता इति पूर्वोक्तेषु खट्वोढादिलक्ष्येषु न दोष इत्याशयः ।

२. दीर्घग्रहणेत्यर्थः इति क पाठः ।

३. ( ) मध्यस्थः 'उक्तेति' इत्यारभ्य 'अत एव भगवता अवर्णस्ये'ति पर्यन्तं कपाठे नास्ति ।

**स्यादेतत्, संज्ञासूत्रे अदातोस्तपरकरणेऽपि एङैचोः कथं तत्कालग्राहकता। 'सहिवहोरोत्' (पा०सू० ६-३-११२) इति सूत्रे वर्णग्रहणेन तात्पर इति पञ्चमीसमासस्यापि ज्ञापितत्वादिति चेत् ? एवमपि तात्पराभ्यामेङैच्छब्दाभ्यामस्तु दीर्घाणामेवोपस्थितिरुपस्थितैस्तु दीर्घैः स्वसवर्णानामशेषाणां ग्रहणं दुर्वारमेव। न हि तेऽपि तात्पराः, अनुच्चारितत्वात्। ग्राहकत्वं परमनुच्चारितानामपि प्रत्याहारैरुपस्थितानामस्त्येव "दीर्घाज्जसि च" (पा०सू० ६-१-१०५) इति ज्ञापकात्। "ल्वादिभ्यः" (पा०सू० ८-२-४४) "प्वादीनाम्" (पा०सू० ७-३-८०) इत्यादिनिर्देशाच्च। तेन चमूष्वित्यादिषु**

---

## २.२० एङैचोः तत्कालग्राहकत्वाभावशङ्का

अत्र सिद्धान्ते शङ्कते। **स्यादेतदित्यादिना। संज्ञासूत्रे इति।** जातावेकवचनम्। **तपरेति।** तपरकत्वेत्यर्थः। यद्वा तपरेति कर्मधारयः राजदन्तादि। तस्य परस्य करणेऽपीत्यर्थः। **कथमिति। अतोभिस ऐसि** (पा०सू० ७-१-९) त्यादौ तपरकरणात् ज्ञापकाद्बहुफलकत्वाच्च तपर इति बहुव्रीहिः सकृदुच्चरितन्यायाद्गमकाभावाच्चार्थान्तराप्रतीतेश्चातपरत्वादिति भावः। तत्र गमकं ब्रुवन् शङ्कते। **स हीति।** तत्र वर्णग्रहणं हि अत्वावच्छिन्नसर्ववर्णग्रहणाय। तदभावे त्वोदस्येत्युक्तावपीष्टसिद्धिरेवेति तद् व्यर्थं सत्तद्बोधकमिति भावः। अपिरुक्तरीत्या बहुव्रीहिसमुच्चायकः। **ज्ञापितत्वदिति।** तत्कालग्राहकतेत्यस्यानुषङ्गः। चेदित्यस्य ब्रूष इति शेषः। वस्तुतस्तु तत्रोदस्येत्युक्तावपि तस्य भिन्नकाले सवर्णग्राहकताया अनपेक्षितत्वेनैवेष्टसिद्धौ तथा सार्थक्यदुरुपपादत्वेन पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियत इत्येवमेव तत्र वर्णग्रहणसार्थक्यमुपपादनीयं सूत्रमते। किञ्च 'व्याख्यानतो विशेषप्रतिपत्ति' रिति न्यायेनैव भगवता तात्परस्यापि तपरशब्देन ग्रहणं व्याख्यातमिति तथैव वाच्यम्। अत एव भगवता अवर्णस्येति) प्रत्याख्यातमितीदं प्राचामनुरोधेन। एवं दण्डिकृष्णरत्नाकृदाद्युक्तमप्यपास्तमिति बोध्यम्। एवमपि = तात्पर इत्यर्थे स्वीक्रियमाणेऽपि। **अनुच्चारीति।** पौर्वापर्यस्योच्चारितेष्वेव सम्भव इति भावः। नन्वेवं ग्राहकत्वमपि तेषां न स्यात्, 'उच्चरितः शब्द एवे'त्यणुदित्सूत्रभाष्योक्तेरत आह। **ग्राहेति।** परं केवलम्। **दीर्घादिति।** विश्वपावित्यादौ **नादिची**(पा०सू० ६-१-१०४)त्येव सिद्धमिति भावः। नन्वक्प्रत्याहाराद्यवर्णस्योच्चारितत्वेन तद्विषये विश्वपावित्यादौ दीर्घादिति सावकाशम्। न च तेन सिद्धिः, व्यक्तिपक्षे ततो भेदेनानण्त्वेन तत्राणुदिदित्यस्याप्राप्तेरत आह। **ल्वादिभ्य इति।** तत्फलमाह। **तेनेति।** अनुच्चारितानां तेषामपि ग्राहकत्वेनेत्यर्थः। आदिना वामोरु इत्यादिपरिग्रहः।

**षत्वादिकं सिध्यतीति वक्ष्यते। तात्परस्तत्कालस्येति तु उच्चारितेष्वेव स्यादिति चेत् ? सत्यम्, ''ङमो ह्रस्वाद्'' (पा०सू० ८-३-३२) इति सूत्रे ङमुडिति प्रत्याहारे कृतं टित्त्वं संज्ञायां व्यर्थं तत्सामर्थ्यात्संज्ञिषु ङादिषु उपकरोतीति यथा स्वीकृतं, तथेहापि तात्परत्वं संज्ञायामनुपयुज्यमानं तदुपस्थाप्येषु संज्ञिषु तत्कालावधारणं सामर्थ्यात्करोतीति न कश्चिद्दोषः। यद्वा, अणुदित्सूत्रेऽशब्दसंज्ञेत्यनुवर्त्तते ''ऊकालोज्'' (पा०सू० १-२-२७) इत्यत्र भाष्ये स्फुटम्। उपपादयिष्यामश्चेदं तत्रैव। अतो गुणवृद्धिसंज्ञाविधावपि न सवर्णग्रहणम्। तपरकरणं तु स्पष्टार्थम्, ''ईदूदेद्'' (पा०सू० १-१-११) इतिवत्। अन्यथा हि किमेचावेवेह निर्दिष्टौ किं वा आकारोपीत्यादिसन्देहः स्यात्। तत्र च**

---

**षत्वादिकमिति।** इणः परत्वा**दादेशप्रत्यययो** (पा०सू० ८-३-५९) रित्यादिनेति भावः। आदिना श्रीश इत्यादौ दीर्घादिपरिग्रहः। वक्ष्यते तत्सूत्रे एव। उपसंहरति। **तस्मादिति।** तद्वद्गमकाभावादित्यर्थः। तुरुक्तव्यवच्छेदे। क्वचित्तस्मादित्यस्यापाठः। स च युक्त एवेति बोध्यम्। **उच्चारितेष्वेवेति।** तथा चैङेजिति संज्ञायास्तात्परत्वेऽपि संज्ञिनामेकारादीनामतत्वादुक्तदोषतादवस्थ्यमेवेति भावः।

## २.२१ पक्षद्वयेन एङैचोः तत्कालग्राहकतासमर्थनम् - कौस्तुभमतनिराकरणञ्च ।

संज्ञिषु = एकारादिषु। **तत्कालेति।** तत्कालत्वेत्यर्थः। **सामर्थ्यादिति।** एवञ्च तात्परशब्दबोध्यवर्णस्यातत्वात्सोऽपि तत्कालस्यैव संज्ञेति सिद्धमिति नोक्तदोष इति भावः। अत्र [१](पक्षेऽनुपदं स्वयमेव वक्ष्यमाणारुच्या मतान्तरमाह। **यद्वेति। अनुवर्त्तत इति।** सप्तम्यन्तेन विपरिणमते चेत्याद्यपि बोध्यम्। सूत्रार्थस्य स्पष्टत्वात्तद्भिन्नं तदर्थमाह। **शब्दस्येति।** विधेयायां कर्तव्यायां तत्संज्ञाविधायके सूत्रे इति यावत्। क्वचिदनुवृत्तेरिति पाठः। तच्च हेतुपञ्चम्यन्तम्, ततस्तस्येत्यर्थः। इति तत्र स्फुटमिति तत्र पक्षेऽर्थः। ननु कथं यथाश्रुते ततः तथाऽर्थलाभोऽत आह। **उपेति।** उक्त एवाशयः। अतः = द्वितीयवाक्यार्थाङ्गीकारात्। नन्वेवं तपरकरणं पूर्वांशेऽपि व्यर्थमत आह। **तपरेति।** दृष्टान्ते उभयत्र तदर्थता बोध्या। स्पष्टार्थत्वमेवोपपादयति। **अन्यथेति।** हि यतः। ऐचावेव इहेत्येवकारेणाकारव्यावृत्तिः। स्फुटत्वाय पूर्वत्र सन्ध्यभावः। ऐचावेवेति क्वचित्पाठः। स च युक्ततरः। आदिना अदेङित्यत्र सन्देहपरिग्रहः। तत्र च = सन्देहे सति च।

---

१. ( ) 'पक्षेऽनुपदं' इत्यारभ्य 'यद्वा तत्र च सन्देहनिवृत्तौ च' इति पर्यन्तं स्पष्टतया पङ्क्तयः कपाठे नोपलभ्यन्ते। मध्ये त्रटयः। खपाठे तु स्पष्टं प्रतीयते।

**"मालादीनां (पा०सू० ६-२-९८) इत्यादिज्ञापकानुसरणक्लेशः स्यादिति दिक् ।**

**युक्ततरश्चायमेव पक्षः । आद्यपक्षे हि वृद्धिसंज्ञायाम् आ इति दीर्घस्यानण्त्वेन सवर्णाग्राहकतया तपरकरणमैजर्थमिति स्थिते ङमुटीव सामर्थ्यमस्तु, गुणसंज्ञायां तु तपरकरणस्योभयार्थताभ्युपगमात्पूर्वत्र चरितार्थस्य क्व सामर्थ्यं येनेदं संज्ञिनोरेदोतोरुप-कुर्यादिति तत्र सवर्णग्रहणं स्यादेव । अस्मिन्नपि पक्षे "एकादेशे दीर्घग्रहणम्" इति**

---

तन्निवृत्तये इति शेषः । यद्वा तत्र च सन्देहनिवृत्तौ च ।) **मालादीनामिति ।** तेन ह्याद्युदात्तत्वं मालाप्रस्थर इत्यादौ विधीयते । तद् व्यर्थं, **प्रस्थेऽवृद्धमकर्क्यादीना** (पा०सू० ६-२-८७) मित्यनेनैव सिद्धेरिति भावः । **दिगिति ।** तदर्थस्तु अयुक्तोऽयं पक्षः, तस्य प्रथमान्तत्वेन विभक्तिविपरिणामादौ मानाभावेन च तथार्थासम्भवात् । **स्वं रूप**मिति सूत्रस्य प्रत्याख्यानाच्च । तथा सति ऊकालोऽजित्यत्राच्पदोपस्थापितानामकारादीनां सवर्णग्राहकत्वाभावभियाऽनुपपन्नमेतत्सूत्रं स्यादिति वृश्चिकभिया पलायमानस्याशीर्विषनिपात इति न्यायापातेनोकालोऽजिति सूत्रगतभाष्यस्य प्रौढिवादमात्रताया एव युक्तत्वाच्च । नन्वजुपस्थाप्याकारादीनां सवर्णग्राहकत्वे त्रिमात्रस्यानु-वादाभावेन संज्ञात्रयकरणमयुक्तं स्यादिति तत्राकारादीनां सवर्णग्राहकताऽभ्युपगन्तव्येति चेत्तर्हि संज्ञात्रयकरणसामर्थ्यादेव दीर्घप्लुतयोर्ह्रस्वसंज्ञा न भवतीत्यादियुक्त्यन्तरस्य तत्र भगवतैव उक्तत्वेन पूर्वोक्तसमाधानं प्रौढिवादमात्रमिति भगवतैवोक्तप्रायम् । किञ्च तथा सति **अचोऽन्त्यादि टि** (पा०सू० १-१-६४) **वृद्धिर्यस्याचामादि** (पा०सू० १-१-७३) रित्यनयोरज्ग्रहणोपस्थापितानां सवर्णाग्राहकत्वे आसामादिशब्दस्य शालामालादिशब्दादेश्च टिसंज्ञा वृद्धसंज्ञा च न स्यात् । अपि च 'यचि भम्' (पा०सू० १-४-१८) इति भसंज्ञायामच्पदोपस्थापितानामकृशब्दानां सवर्णाग्राहकत्वापत्त्या अमि ङीबादौ च परतो भसंज्ञाया अभावापत्त्या विश्वपामित्यादावातो लोपो राज्ञामित्यादौ अल्लोपः कुम्भकारी इत्यादावल्लोपश्च न स्यादिति ।

तदेतद् ध्वनयन् आद्यपक्षं दूषयति । **युक्ततरश्चायमेव पक्ष इति ।** उक्तयोरयमेव युक्तो न त्वाद्य इत्यर्थः । स्वार्थे तरप् । एवञ्चायमपि तत्वतो न युक्त एव, उक्तयुक्तेरिति बोध्यम् । प्राचामनुरोधेनोक्तयोस्तेनैव द्वितीयं समर्थयते युक्तेतीति कश्चित् । तत्र हेतुमाह । **आद्येति ।** हि यतः । **ग्राहकतयेति ।** तद्व्यावृत्तिफलकतपरत्वस्य तत्रानुपयोगेनेति शेषः । **ङमुटीवेति ।** तत्र टित्वस्येवात्र तपरकरणस्येत्यर्थः । **तत्र** = गुणसंज्ञायामेङंशे । **स्यादेवेति ।** प्रत्याहारेषु तद्वाच्यवाच्ये निरूढलक्षणेति पक्षेऽपि तुल्यमेतत् । लक्ष्यतावच्छेदकज्ञानायाद्यवर्णे तत्प्रवृत्तेरावश्यकत्वात् । एवञ्च **ल्वादिभ्य** इत्यादिनिर्देशैः सैव ज्ञाप्यते, न त्वनुच्चारितानामपि ग्राहकत्वमिति पक्षेऽपि आद्यवर्णे

**वार्त्तिकं दीर्घस्यैव संज्ञित्वादिति पूर्ववदेव व्याख्येयम् ।**

**स्यादेतत्, प्रथमपक्षे तादपि परस्य तत्कालग्राहकत्वाद् ''ऋदोरप्'' (पा०सू० ३-३-५७) 'यवः' 'स्तवः' इत्यादावेव स्यान्न तु 'लवः' 'पवः' इत्यादावपीति चेत् ? अत्र भाष्यम्, नायं तकारः किं तर्हि असन्देहार्थो मुखसुखार्थो वा दकारोऽयमिति । नन्वेतद्भाष्यं ''तितिप्रत्ययग्रहणम्'' (का०वा०) इत्येतद्वार्त्तिकप्रत्याख्यानपरेण ''तित्स्वरितम्'' (पा०सू० ६-१-१८५) इत्यत्रत्यभाष्येण सह विरुध्येत । तथाहि, तत्र**

---

तत्प्रवृत्त्या तज्ज्ञानेन तदंशे सापि स्यादेव । तपरकरणेन तस्या वारणं तूक्तरीत्या दुर्वचमेवेति तत्र दोष एवेत्याहुः । वस्तुतस्त्विदं सर्वं सूत्रमते व्यक्तिपक्षे, न भाष्यमतेन । तन्मते उच्चारितस्यैव ग्राहकत्वात् लक्षणाया अभावात् । जातिपक्षमेवाश्रित्य अण्ग्रहणप्रत्याख्यानात् । अत एव न व्यक्तिपक्ष इतीदं सर्वमयुक्तमेव । अत एवाणुदित्सूत्रादिभाष्यविरोधो नेति बोध्यम् । अत्र पक्षे उक्तवार्तिकविरोधापत्तिरूपदोषस्तु नेत्याह । **अस्मिन्नपीति । दीर्घस्यैवेति ।** अशब्देति निषेधेनेत्यादिः । तस्मादुक्तरीत्या प्रथमपक्षस्यायुक्तत्वात् द्वितीयस्य खण्डितत्वात् व्याख्यानात्तपरत्वमूरीकृत्त्य वृद्धिसूत्रस्थभाष्यप्रामाण्यात्तात्परशब्दोऽपि वर्णः स्वसमानकालग्राहक इत्येवं वाच्यमित्यभिमतमुख्यपक्ष एव युक्त इति सिद्धमिति तत्वं बोध्यम् । एतेनोक्तदोषाभावार्थमादि-रन्त्येनेत्यस्यान्त्येत्सदृशेन सहोच्चार्यमाण आदिसदृशोऽनुबन्धान्यमध्यगसदृशानामुपलक्षणं स्यादित्यर्थकपरिभाषात्वाश्रयणम् । अत एव तद्भाष्यस्थेदं तर्हीत्यादेः सङ्गतिरिति [1]**रत्नोक्त**मपास्तम् ।

## २.२२ दकारस्य तत्कालग्राहकत्वविचारः

तदेतद् ध्वनयितुं मुख्यपक्षेऽपि प्राप्तं दोषं प्रसङ्गत उद्धर्तुं प्राचामसङ्गतिं ध्वनयितुं अग्रिमभाष्यार्थं प्रतिपादयति । **स्यादेतदित्यादिना ।** प्रथमपक्षे = उक्तरीत्या तात्परत्वान्निर्वाह इति मुख्यपक्षे । **तादपि परस्येति ।** तात्परस्यापीत्यर्थः । अपिनातपरकसमुच्चयः । **रबिति ।** इत्यबिति शेषः । एवापी मिथो व्यावर्त्तकसमुच्चायकौ । **अत्रेति ।** अत्रैव सूत्रयोरिति भावः । मुखसुखार्थ इति पाठः । स च सुगम एव, षष्ठीसमासात् । सुखमुखार्थ इति पाठे मयूरव्यंसकादित्वात्समासः, तस्याऽऽकृतिगणत्वात् । अत एव पूर्वनिपातव्यत्ययोऽपि । तत्र = **तित्स्वरितम्** (पा०सू० ६-१-१८५) इत्यत्र, अस्य स्थितमित्यत्रान्वयः । तिति = तित्स्वरितमिति सूत्रे । **तत इति ।**

---

१. रत्नप्रकाशे (र.प्र.पृं. १५८-F.I.P.) प्रथमो भागः ।

**तिति प्रत्ययग्रहणं कर्त्तव्यम्। इह मा भूत् – ''दिव उत्'' (पा०सू० ६-१-१३१) 'द्युभिरक्तुभिः' इति पूर्वपक्षयित्वा दित्त्वमाश्रित्य समाहितम्। ततो भाव्यमानस्याप्युकारस्य ''अदसोसेर्दाद्'' (पा०सू० ८-२-८०) इत्यत्रेव सवर्णग्राहकता स्यादित्याशङ्क्य तपरसूत्रे दकारस्यापि चर्त्वभूतस्य निर्देशाद्दपरोऽपि तत्कालग्राहक इति परिहृतम्। एवञ्च ''उर्ऋत्'' (पा०सू० ७-४-७) इत्यादावपि दपरत्वमेव। अन्यथा स्वरितप्रसङ्गात्। अयमेव च दपरनिर्देशो भाव्यमानस्याप्युकारस्य सवर्णग्राहकतां ज्ञापयतीति स्थितम्। इह तु 'ऋदोः' (पा०सू० ३-३-५७) इति दकारनिर्देशात् 'लवः 'पवः' इत्यादौ दीर्घेऽपीष्टं साध्यते।**

**अत्र प्राञ्चः - थकारस्थानिको धकारस्थानिको वा दाकारोऽत्र भाष्यकृतो विवक्षितः, अतो न पूर्वोत्तरविरोध इति। ऋजवस्तु वार्त्तिकमते स्थित्वेदं भाष्यमतो न विरोध इत्याहुः। वस्तुतस्तु ''तपरस्तत्कालस्य'' (पा०सू० १-१-७०) इत्यत्र दकारो न**

---

तदनन्तरमित्यर्थः। दित्वेन तपरसूत्राप्रवृत्तेरिति भावः। **कारस्येति। दिव उदि**त्यादाविति भावः। चर्त्वभूतस्य = चर्त्वं प्राप्तस्य। 'खरि चे'(पा०सू० ८-४-५५)ति कृतचर्त्त्वस्येति यावत्। **दपरोऽपीति।** दपरको दात्परश्चेत्यर्थः। **एवञ्चेति।** दपरस्यापि तत्कालग्राहकत्वे चेत्यर्थः। आदिना 'ऋत उत्' इत्यादिपरिग्रहः। ननु तत्परिभाषाया मानमेव नेतीदमयुक्तमेवात आह। **अयमेव च दपरेति।** 'ऋत उत्' (पा०सू० ६-१-१११) इत्यादि सूत्रस्थेत्यर्थः। इह तु = प्रकृतसूत्रे तु। **दीर्घेऽपीति।** तपरसूत्राप्रवृत्तेरिति भावः। साध्यत इत्यस्येतीति शेषः। स च विरोधरूपपूर्वपक्षसमाप्तौ ॥

## २.२३ दपरनिर्देशे प्राचीनमतविमर्शः

**प्राञ्च इति।** हर्यादय इत्यर्थः। विनिगमनाविरहादाह। **धकारेति।** रोऽत्र ऋदोरित्यत्र। **विवक्षित इति।** एवञ्च तपरसूत्रदृष्ट्या जश्त्वस्यासिद्धत्वात्थकारधकारान्यतरदेवेति न तत्र तपरसूत्रप्रवृत्तिरिति भावः। तदाह। **अत इति।** तादृशविवक्षणादित्यर्थः। **ऋजवस्तु** = सरलास्तु। **वार्तिकेति।** तितीति वार्तिकेत्यर्थः। इदं भाष्यं एओङित्यादिसूत्रस्थम्। एवञ्चैकदेशयुक्तित्वादस्य तस्य च तत्प्रत्याख्यानपरत्वेन सिद्धान्तत्वान्न मिथो विरोधस्तदाह। **अत इति।** अस्य पूर्वपदयुत्त्यनुसारित्वादित्यर्थः। मतद्वयेऽप्याहुः प्राञ्च इत्याभ्यां सूचितारुचिं ध्वनयन् प्राचां सिद्धान्तमाह। **वस्तुतस्त्विति।** अस्य चाकलनीयमित्यत्रान्वयः। नन्वेवं 'दिव उदि'त्यादौ दोष

**निर्दिश्यते प्रयोजनाभावात्। ''दिव उत्'' (पा०सू० ६-१-१३१) ''ऋत उत्'' (पा०सू० ६-१-१११) इत्यादौ तु तपरत्वादेवेष्टसिद्धिः। नन्वेवं ''तित्स्वरितम्'' (पा०सू० ६-१-१८५) इत्यस्य प्रसङ्ग इति चेत् ? न, ''प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणम्'' (प०भा० १००) इति परिभाषया तत्समाधानात्। यत्तु ''तित्स्वरितम्'' (पा०सू० ६-१-१८५) इति सूत्रे हरदत्तेनोक्तम् – ''तस्यास्तु परिभाषाया भाष्यवार्त्तिकयोरिहादर्शनादयं यत्नो महानस्माभिरादृतः'' इति, तत्रेदं वक्तव्यम् – थकारस्थानिको धकारस्थानिको वा दकार इत्येवंरूपो यत्नस्तावदेओङ्सूत्रे स्थित्वा पूर्वाचार्यैरेवोक्त इत्यत्रत्यकैयटग्रन्थ एव स्फुटम्। नन्वत एवास्माभिरादृत इति ब्रूमो नतून्नीत इतीति चेत् ? सत्यमादृतः तथापि परिभाषाया अदर्शनादित्यसिद्धो हेतुः, ''अङ्गस्य'' (पा०सू० ६-४-१) इति सूत्रप्रत्याख्यानाय भाष्ये कण्ठरवेणैव एतत्परिभाषोपन्यासात्। 'निरुतं' 'दुरुतम्' इत्यादिसिद्धये सूत्रं कर्त्तव्यमिति स्थिते**

---

एव। तत्र स्वराभावाय दित्वस्य प्रागुक्तेः। एवञ्च तत्र तद्व्यावृत्तिरेव फलमत आह। **दिवेति।** आदिना 'उर्ऋदि' त्यादिपरिग्रहः। तुः 'ॠदो'रिति व्यवच्छेदे। **एवं** = तत्र तपरत्वाङ्गीकारे। द्युभिरित्यादाविति शेषः। तत्रादौ मिश्रोक्तिखण्डनाय प्राचामनुरोधेन समाधत्ते। **प्रत्ययेति। तत्समाधानात्** = स्वरितप्रसङ्गस्य वारणरूपसमाधानात्।

## २.२४ हरदत्तमतविमर्शः

अस्य समाधेरसिद्धान्तत्वात्तात्विकसमाधिं सूचयितुं तथोक्तिं सफलयितुं प्रसङ्गा**द्धरदत्तो**क्तिं[1] खण्डयति। **यत्त्वित्यादिनानर्ह एवेत्यन्तेन। तस्याः =** प्रत्ययाप्रत्यययोरित्यस्याः। इह व्याकरणे। **अयं** थस्थानीत्यादिः पूर्वोक्तः। यत्नान्तराभावादाह। **थकारेति।** तावत् आदौ। **पूर्वाचार्यैः** हर्यादिभिः। **त्रत्येति**। एओङादिसूत्रभाष्यस्थतद्ग्रन्थ एवेत्यर्थः। एवञ्च कैयटस्य तदनुवादकत्वेन न कोऽपि दोषः। अत एवाग्रे दूष्यकोटौ कैयटानुल्लेख इति गूढाकूतम्। **अत एव** = पूर्वाचार्योक्तत्वादेव। **न्नीतः** कल्पितः। **सत्यमिति।** तथा च नायं दोष इति भावः। अत एव दोषान्तरमाह। **तथापीति।** उक्तदोषाभावेऽपीत्यर्थः। भाष्ये तत्रत्ये। स च प्राग्वत्। हरदत्तः स्वाशयं प्रकाशयन् शङ्कते। [2]**निरुतमिति।** आदिना दुरुतादिसंग्रहः। क्वचिदेतत्पाठ एव। तत्रादिना समुदितादिपरिग्रहः। सूत्रं **अङ्गस्येति**। अन्यथा तत्र **हल** (पा०सू० ६-४-२) इति दीर्घः

---

१. का.वृ.प.पृ.सं. २७०। (उस्मानिया पब्लिकेशन्)   २. निरुतीमिति ख पाठः।

**व्यर्थेयं परिभाषेत्याशय इति चेत् ? तथापि थकारधकारस्थानिको दकार इत्यर्थ इति व्याख्यानक्लेशो निष्फलतया मूलस्वरसविरुद्धतया चादरणानर्ह एव। "दिव उत" (पा०सू० ६-१-१३१) इत्यादौ "तित्स्वरितम्" (पा०सू० ६-१-१८५) इत्यस्य प्राप्तेरेव विरहेण दकारप्रश्लेषादेर्निर्बीजत्वात्। तथा हि उदित्येषा उकारस्य संज्ञा तया प्रत्यायित उकारस्तु विधीयते। तथा च संज्ञायास्तित्त्वेऽपि संज्ञिनः किमायातम्? वस्तुतस्तु संज्ञापि तान्ता न तु तित्। "तपरः" (पा०सू० १-१-७०) इति हि सूत्रितं न**

स्यात्। परिभाषाया अविषयत्वादित्याशयः। तथा हेतुं वदतो मम। तथा च तया सर्वेष्टासाधनेन प्रकारान्तराङ्गीकारावश्यकत्वेन तस्यानिष्फलत्वेन तस्या असाधारणफलजनकत्वेनादर्शनादिति हेत्वर्थो बोध्यः। अत एव तित्स्वरितमित्य'त्रैषा परिभाषा लक्ष्यसंस्काराय भाष्ये क्वापि नाश्रिते'ति कैयटः[१] सङ्गच्छते। **अङ्गस्ये**ति सूत्रभाष्यं त्वेकदेश्युक्तिः। अत एव तितीति इति वार्तिककृतोक्तमिति दिक्। **तथापि** = हेत्वसिद्धिवारणेऽपि। **थकारेति।** एतदन्यतरेत्यर्थः। **व्याख्यानेति। काशिका**स्थदकारोऽयमित्यस्येति भावः। **निष्फलेति।** अनुपदं वक्ष्यमाणप्रकारेण सिद्धेरिति भावः। **यत्तू**क्तप्रकारेण सिद्धेरित्यर्थः इति। तन्न। तस्यासिद्धान्तत्वात्। **मूलेति।** वृत्तिग्रन्थस्वरसविरुद्धतया चेत्यर्थः। तस्य भाष्यसदृशत्वादिति भावः। उक्तार्थे तात्विकसमाधिं सूचयन् तत्र निष्फलत्वमुपपादयति। **दिवेति।** आदिना 'ऋत उत्' इत्यादिसंग्रहः। द्वितीयं तु स्पष्टमेवेत्युपेक्षितम्। **प्राप्तेरेवेति।** अनेन पूर्वसमाधेरभ्युपेत्यवादरूपता ध्वनिता। **दकारेति।** तित्त्वाङ्गीकारेऽपि बाधकाभावात्तपरसूत्र इत्यादिः। आदिना 'दिव उदि'त्यादौ दकारस्य **ॠदो**रित्यत्र थकारस्थानिकत्वादिव्याख्यातस्य च परिग्रहः। ननूक्तरीत्या परिभाषाया अभावे कथं तत्र तत्प्राप्तिविरहोऽत आह। **तथा हीत्यादिना। संज्ञेति।** तपरसूत्रेणेति भावः। **तया** = उदिति संज्ञया। तुस्तन्त्रान्तरसंज्ञाव्यवच्छेदे। **तथा च** = तन्मात्रविधाने च। **किमायातमिति।** अपि तु न किमपीति न तस्य तित्वमिति भावः। अभ्युपेत्यवादोऽयम्। परमार्थतस्तु तदेव नेत्याह। **वस्तुतस्त्विति।** अपिना संज्ञिसमुच्चयः। संज्ञापि न तित्, तु किन्तु, सा तान्तेत्यर्थः। यथाश्रुते त्वसङ्गतिः स्पष्टैव। न च संज्ञाया निवृत्तौ कश्चिद्यत्नः क्रियते। संज्ञा हि संज्ञिनं प्रत्याय्य स्वयं निवर्तत इति भावः। न च स्वरितार्थमेव संज्ञायां तत् स्यादिति वाच्यम्। तत्र प्रत्ययग्रहणस्य चोदितत्वात्। संज्ञायां तित्वप्रयुक्तफलादर्शनात्, 'तित्स्वरित'मित्यस्य साक्षात् तिति चारितार्थ्यात्। साक्षात्फलवति इत्संज्ञाशास्त्रस्य साफल्यात्,। भाष्यप्रामाण्यादादेशतकारे इत्संज्ञाप्रवृत्त्यभावा-च्चेत्याहुः। उभयत्र हेतुमाह। **तपर इतीति।** यतः पाणिनिनेति शेषः। नन्वेवं संज्ञ्यपि साजात्यतान्त

१. म.भा.प्र.पृ.सं. १६५ (पञ्चमो भागः)

**तु तिदिति। यदि हि संज्ञावत् संज्ञ्यपि तान्त एव तर्हि ''अतो भिस ऐस्'' (पा०सू० ७-१-९) 'भवद्भिः' इत्यादावेव स्यान्न तु 'वृक्षैः' इत्यादौ। ''तपरस्तत्कालस्य'' (पा०सू० १-१-७०) इति सूत्रं च व्यर्थमेव स्यात् ''स्वं रूपं शब्दस्य'' (पा०सू० १-१-६८) इत्यनेनैव गतार्थत्वात्। न च ङमुडादाविव संज्ञायां कृतं लिङ्गं संज्ञिनि लब्धुं शक्यम्, तद्वदिह सामर्थ्यविरहात्। एवञ्च ''तित्स्वरितम्'' (पा०सू० ६-१-१८५) इति सूत्रे भाष्यवार्त्तिकग्रन्थः सर्वोऽप्यभ्युपेत्यवाद एव। ''स्थाघ्वोरिच्च'' (पा०सू० १-२-१७) इति सूत्रे इच्च कस्य तकारेत्त्वमित्यादिग्रन्थोऽप्येवमेव। तस्मान्नायं तकारः किन्तर्हि दकार इति इहत्यभाष्यग्रन्थो यथाश्रुत एव साधुरिति सहृदयैराकलनीयम्। अयमेव च**

---

एवास्तु। अणुग्रहणस्य तत्राननुवृत्तेः। एवञ्च वर्णसमूहे विध्यर्थं तदत आह। **यदि हीति।** हिः त्वर्थे। यदि हेत्यपाठः। ऐसित्यस्येत्यैसिति शेषः। आदिना महद्भिरित्यादिसङ्ग्रहः। **न त्विति।** तान्तसंज्ञाभावादिति भावः। लक्षणचुक्षुष्कस्येष्टापत्तौ दोषान्तरमाह। **तपर इति।** चः स्यादित्यग्रे योज्यः। ननु तथापि संज्ञायां तस्य वैयर्थ्यात् तत्रोपकारेण तान्त एव संज्ञी फलतीति तस्यैव विधेयत्वेनेत्संज्ञां विना तत्तकारनिवृत्तेरसम्भवात् तदावश्यकत्वेन स्वरितत्वं दुर्वारमेवेत्याशयेनाशङ्कते। **न चेति।** लिङ्गं तान्तत्वाख्यम्। इयं शङ्का पूर्वमतेऽपीति सूचयितुं लिङ्गमित्युक्तम्, न तु विशिष्य तथेति बोध्यम्। **इह** उदादौ। **सामर्थ्येति।** 'भाव्यमानोऽप्युकारः सवर्णान् गृह्णातीति' सिद्धान्तज्ञापनात् संज्ञागततान्तत्वस्य तपरसूत्रप्रवृत्तिद्वारा तद्ग्राहकत्वसम्पादकत्वेन सार्थक्यादित्यर्थः। मतान्तरेऽप्युच्चारणाद्यर्थत्वेन सार्थक्यमिति तद्विरहो बोध्यः। तस्मात् तत्र तत्प्राप्तिविरहो निर्बाध इति सिद्धं प्रागुक्तम्। नन्वेवं **तित्स्वरित**(पा०सू० ६-१-१८५) मित्यत्रत्यभाष्यादिविरोधोऽत आह। **एवञ्चेति।** तत्र तत्प्राप्तिविरहे चेत्यर्थः। न केवलं तत्प्रत्याख्यनपरभाष्यस्य तत्वं, किन्तु वार्तिकस्यापीत्याह। **वार्तिकेति। ग्रन्थ इति।** तितीत्यादिना प्रागुक्तरूपो **दिव उदि**त्यादौ दकारस्य तपरसूत्रे दकारप्रश्लेषस्य च प्रतिपादको यावानित्यर्थः। एतेन तत्सूत्रस्थसर्वग्रन्थस्यातत्वात्सर्व इत्ययुक्तमित्यपास्तम्। **अभ्युपेत्य** = संज्ञिनो दुर्लभतमतित्वमभ्युपेत्य। प्रसङ्गादाह। **स्थाघ्वोरिति। इच्चेति।** कस्य हेतोरितस्तकारेत्कत्वं क्रियत इत्यर्थः। आदिना **दीर्घो माभूदृतेऽपि सः। अनन्तरे प्लुतो माभूत्प्लुतश्च विषये स्मृत**[1] इत्यादिसंग्रहः। **एवमेवेति।** अभ्युपेत्य वाद एवेत्यर्थः। तत्राप्युक्तरीत्या तपरत्वेऽपि तित्वाद्यभावादिति भावः। उपसंहरति। **तस्मादिति।** उक्तहेतोरित्यर्थः। नायं ऋदोरबित्यत्रत्यः। पूर्वोक्तं सर्वं समूलत्वेन दृढयन्नत्र गमकान्तरमाह। **अयमेव चेति।** वायमित्याद्यपि चेत्यर्थः। **उत्तरेति।** पूर्वोक्तेत्यर्थः। **एतेन** = पूर्वोक्तप्रकारेण

---

१. म.भा.पृ.सं. १४ (द्वितीयो भागः)

**ग्रन्थोऽभ्युपेत्यवादरूपतामुत्तरग्रन्थानां गमयति। एतेन ''औत्'' (पा०सू० ७-३-११८) ''इटोऽत्'' (पा०सू० ३-४-१४६) इत्यादिष्वपि विधेयस्य तपरत्वाभावो व्याख्यातः। तित्त्वं तु दूरापास्तमिति दिक्।**

**इह अकारादयो वर्णाः सांशा इष्यन्ते। यदाह ''तस्यादित उदात्तमर्द्धह्रस्वम्।'' (पा०सू० १-२-३२) पूर्वस्यार्द्धस्यादुत्तरस्येदुताविति। वार्त्तिककारोप्याह - ''ऐचोश्चोत्तरभूयस्त्वात्'' इति। तत्र सन्ति केचिदंशाः स्वतन्त्रवर्णान्तरसदृशाः, यथा**

सामर्थ्यभावरूपेण। **ओत् सहिवहे**रिति सूत्रस्थः। **औदिति** प्रचुरः पाठः। तत्र च **दिव औदच्च घेरि**त्यनयोः परिग्रहः। **तपरेति।** तपरकत्वेत्यर्थः। तान्तत्वेति यावत्। एतेन सत्यं **ङमो ह्रस्वादित्यादि**प्रागुक्तविरुद्धमिदमित्यपास्तम्। तस्य तात्परविषयकत्वात्। अस्य तपरकविषय-कत्वात्। तद्वत् सामर्थ्याभावात्तस्यैकदेशयुक्तित्वात्, तस्यानुवाद्यविषयकत्वादस्य विधेयविषय-कत्वाच्चेति दिक्। **दूरेति।** संज्ञाया एव तदभावादिति भावः। तथा च भाष्यवद्वृत्तिग्रन्थस्य सौष्टवे हरदत्तोऽयुक्त एव। एवं यथाश्रुतभाष्यनिर्वाहे अत्रत्यहर्यादिग्रन्थोऽप्यसङ्गत एवेति बोध्यम्। वस्तुतस्तु तपरसूत्रस्य विध्यर्थत्वे नियमार्थत्वे च विधेयस्थलेऽप्रवृत्तिरप्रत्यय इति निषेधात्। अत एव **दिव उदृत उदिति** तपरत्वस्य तत्परिभाषाज्ञापकत्वं भाष्योक्तं सङ्गच्छते। **उरॄदि**ति तपरत्वं तु अणुदित्सूत्रे णः परणकारत्वमित्यर्थज्ञापकमिति तदपि सफलम्। इतोऽन्यत्र विधेये आदेशे तदुच्चारणार्थ इति सोऽपि सफलः। न चैवमपि तेषामित्वात्स्वरितत्वापत्तिवार्तिकेनादेशे जश्त्वं, तदसत्वेन वा निर्वाहात्। तपरसूत्रस्य तु प्रवृत्तिर्नैवेष्टेति च तत्र दप्रश्लेषः। अत एव मूलकृताऽपि वस्तुतस्त्वित्यादिना तावदेव प्रतिज्ञातम्। एवञ्च **तित्स्वरित**मित्यत्र दप्रश्लेषपरग्रन्थस्या-युक्तत्वेऽप्यन्यस्य सर्वस्य युक्तत्वमेवेति न मिथो विरोध इति हर्याद्युक्तं तदंशे मिश्रोक्तं यथासम्भवं मूलोक्तं त्वयुक्तमेवेति बोध्यम्। तदाह। **इति दिगिति।**

## २.२५ वर्णैकदेशग्रहणाग्रहणविचारः

अथ **इदं विचार्यते य एतेषु वर्णेष्वित्या**दिभाष्यं सन्ध्यक्षरविचारप्रसङ्गात्प्रवृत्तं वर्णयति। **इहेत्यादिना। इह** शास्त्रे वर्णसमाम्नाये वा। अकारादिह्रस्वेषु तदनुपलम्भादाह। **इष्यन्ते इति।** मुनिभिरिति शेषः। न तु वस्तुतस्तेषां तत्र सत्ताऽस्तीति भावः। असम्भवादिनिरासाय तत्र मानमाह। **यदाहेत्यादिना। यदाह =** यतः पाणिनिराह। एवं तेषां सांशत्वमवच्छेदकावच्छेदेनानु-मानविधया शब्दविधया वा प्रतिपाद्य क्वचिदुपलम्भादपि तत्सत्वमस्तीत्याह। **तत्रेति।**

१. म.भा.पृ.सं. ११५ (प्रथमो भागः)

**आकारादिष्वकारस्य सदृशौ भागौ, एक्षु पूर्व्वभागोऽकारस्य उत्तर इवर्णोवर्णयोः, ऋकारे उभयतोऽजूभक्तेरर्द्धमात्रा मध्ये रेफस्य सदृशोऽर्द्धमात्राभागः, लृकारेऽप्युभयतोऽजूभक्तिः मध्ये स्वतन्त्रलकारसदृशो भागः। तत्र स्वतन्त्रत्तद्वर्णग्रहणेन निधायमानं कार्यं तत्तत्सदृशेष्वंशेषु न प्रवर्त्तते। तत्सदृशा हीमे न तु त एव नरसिंहवज्जात्यन्तराक्रान्त-त्वात्। गौनौग्रहणं चात्र ज्ञापकम्। यदि हि भागा अपि स्वतन्त्रवर्णप्रयुक्तं कार्यं प्रवर्तयेयुस्तर्हि ''गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्'' (पा०सू० ५-१-३९) इति ''नौव्यचष्ठन्'' (पा०सू० ४-४-७) इति च सूत्रद्वये ह्यज्ग्रहणेनैव गतार्थत्वाद्गो शब्दं नौशब्दं च नोपाददीत। तेन 'अग्ने इन्द्र, 'वायो उदकम्' इत्यत्र सवर्णदीर्घो न।**

---

इष्यमाणसांशत्वकवर्णानां मध्य इत्यर्थः। क्वचिदिति शेषः। केचित् न तु सर्वे। अनेन ऋकारादावच्भागव्यावृत्तिः। **अकारस्येति।** अकारादेरित्यर्थः। अकारस्येति सदृश इत्यस्याध्याहारः। अग्रे तस्य भाग इत्यस्य चानुषङ्गः। उभयतः सर्वतः। अत एवाह। **अज्भक्तेरिति।** अन्यथैकवचनोक्त्यसङ्गतिरिति भावः। एवमग्रेऽपि। नन्वेवं तत्र तत्प्रयुक्तं कार्यमपि स्यादत आह। **तत्रेति।** क्वचिद्वर्णानामुपलभ्यमानांशकत्वे सत्यपीत्यर्थः। अप्रवृत्तौ हेतुमाह। **तदिति।** हि यतः। **जात्यन्तरेति।** समूहस्येति शेषः। तथा च तदवयवेन हल्त्वाद्यभाववदेतदवयवेऽप्यच्त्वाद्यभावः। एवञ्च भेदान्न कार्यमिति भावः। अत एवा**ष्टमे** यथा नरसिंहावयवानां नरत्वसिंहत्वजातियोगाभावात्पुरुषमृगराजाभ्यामेकाकृतियोगाभावस्तथा वर्णौ वर्णैकदेशयोरप्येकाकृतियोगाभाव इति **कैयटः** सङ्गच्छते। समूहस्य तत्वमात्रे दृष्टान्तोऽयम्। अवयवानां तु साम्यं वैषम्यं वेत्यत्र नाग्रहः। एतेनाकारादावयवसाम्यात्कथं समूहस्य तत्वमित्यपास्तम्। ननु शास्त्राभावादसम्भवादुक्तरीत्या समुदायस्य तत्वाच्च तैरेतेषां दुष्करत्वेन समुदायस्य ततो भिन्नत्वेऽपि अवयवानां सत्वात्तेषु तत्वस्याभावेऽपि तत्सादृश्यसत्वाच्च कार्यं कुतो न। न च गौणमुख्येत्यादिना निर्वाहः। तस्य विशिष्टरूपोपादानविषयत्वादत आह। **गोनाविति। चात्र** = तत्कार्याप्रवृत्तौ। तत्वमेवोपपादयति। **यदि हीति।** हि यतः। ज्ञापकं न विशेषापेक्षं किन्तु सामान्यापेक्षमिति कैयटरीत्या आह। **भागा अपीति।** अत एव तदुक्तमेवादौ ग्रहणपक्षे दोषत्वेनादौ भगवता दत्तम्। अनन्यथासिद्धं ज्ञापकफलमाह। **तेनेति।** तथार्थस्य समूलस्याङ्गीकारेणेत्यर्थः। इदमिति पाठः। अत एवाग्रे तथैव दृश्यते उदाहरणान्तरतुल्यता च। अत्रेन्द्रेति पाठः। क्वचित् भाष्येऽप्येवं पाठभेदो दृश्यते। अन्यथाऽत्रान्तरङ्गत्वादयादिकं बाधित्वा स एव स्यात्। 'अग्न

---

१. रषाभ्यां (८-४-१) इति सूत्रस्थः (म.भा.प्र.पृ.सं. २१० षष्ठो भागः)

**न च ''एचोऽयवायावः'' (पा०सू० ६-१-७८) इत्यनेन तस्य वाधोऽस्त्विति वाच्यम्, अयादयो हि येन नाप्राप्तिन्यायेन मध्येपवादन्यायेन वा यण एव बाधकतया 'अग्न आयाहि' इत्यादौ चरितार्था 'अग्ने इन्द्रम्' इत्यादौ परेण दीर्घेण बाध्येरन्। अन्तरङ्गोऽपि दीर्घोऽवयवमात्रापेक्षत्वात्। तथा 'अग्न एति' इति ''एङः पदान्तात्'' (पा०सू० ६-१-१०९) इत्येतन्न, 'आलूय' 'प्रमाय' इत्यत्र तुङ् न, 'मालाभिः' इत्यत्र ऐस्न, 'याता'**

---

आयाहि' अग्न ऋच्छ अग्न लृकारं पश्येत्यादि तु तस्यावकाश इति भावः। ननु तत्रापि यण् प्राप्नोति एव। तथा चायादेर्विध्यन्तरवाचकत्वात् सर्वबाधकत्वेन दीर्घोऽपि नेत्याशयेनाशङ्कते। **न चेति।** तस्य दीर्घस्य। हि यतः। एकफक्किकान्ते बाध्येरन्नित्यत्रान्वयोऽस्य। ननु येनेत्यस्य स्वेतरेणेत्यर्थे बाध्यसामान्यचिन्तापक्षलाभेन [1](तत्प्रवृत्तौ तेन सर्वबाधः स्यादिति पूर्वपक्षस्यैवासिद्धिरत आह। **मध्येऽपेति। परेणेति।** दीर्घस्यावकाशस्तु श्रीश इत्यादिः) सुप्रसिद्ध इति भावः। अन्तरङ्गोऽपी-त्यपिः प्रत्यक्षत्वसमुच्चायकः। स च हेतुः कैयटादौ स्फुटः। अन्तरङ्गत्वे हेतुमाह। **अवयवेति।** अवयवोच्चारणं विना समुदायोच्चारणायोगात्समुदायधियोऽवयवधीपूर्वकत्वाच्च समूहाश्रयायादिकार्यस्य बहिरङ्गत्वमिति भावः। उक्तवदनन्यथासिद्धं कैयटोक्तं फलान्तरमाह। **तथेति।** अथोक्तार्थस्य ज्ञापकरूपस्यासिद्धान्तत्वसूचनाय भगवताऽन्यथासाधितानि फलान्याह। **आलूयेत्यादिना।** अत एव तथेत्यस्यादावनुल्लेखः। **तुङ्नेति। ह्रस्वस्य पिती**त्यनेनेति शेषः। ननु दीर्घात्पदान्ताद्वेति योगविभागसामर्थ्यान्नायं दोषोऽत आह। **मालेति। नन्वतो भिस** इत्यत्रात इति तपरकरणसामर्थ्यादयमपि न दोषः। एतेन मालाभ्य इत्यादौ बहुवचने ऐस्येत्वप्रसङ्गः, एव**माङि चाप** इत्यस्य चानर्थक्यप्रसङ्ग इत्यपास्तम्। उक्तरीत्या तत्रापि निर्वाहादत आह। **यातेत्यादाविति।** ननु **गापोष्टगि**त्यत्र अनन्यार्थककारानुबन्धकरणादयमपि न दोषोऽत आह। **वाचेति।** अन्यथाऽवयवसंख्याश्रयेण वाक्शब्दस्य द्व्यच्कत्वान्नौद्व्यचः **गोद्व्यच** इति यथासंख्यं तौ स्यातामिति भावः। नन्वयमपि दोषो गोनोग्रहणस्य विशेषापेक्षज्ञापकत्वमुक्त्वा परिहृतो भगवतेति न प्रागुक्तसामान्यापेक्षज्ञापकस्येदमसाधारणं फलम्। एतेनैवं **द्व्यचोऽतस्तिङः** (पा०सू० ६-३-१३५) **अर्मे चावर्णं द्व्यच् त्र्यच्** (पा०सू० ६-२-९०) [2].... मित्यादौ दोष ऊह्य इत्यप्यपास्तम्। उक्तरीत्या तत्रापि निर्वाहात्। किञ्च भाष्ये कण्ठतस्तथोक्तत्वेन तद्विरोधादेव न ज्ञापकस्य सामान्यापेक्षत्वमिति प्राक् तथोक्तमयुक्तमेव। एवञ्चोक्तार्थासिद्धिः। शङ्कायाः स्थितत्वादग्न

---

१. ( ) 'तत्प्रवृत्तौ' इत्यारभ्य 'श्रीश इत्यादिः' इति पर्यन्तग्रन्थः कपाठे नास्ति।

२. अत्र ग्रन्थः त्रुटितः।

**इत्यादावतो लोपो न, 'वाचा तरति' 'वाचो निमित्तम्' इत्यत्र द्व्यज्लक्षणौ ठन्यतौ नेति दिक्।**

**नुड्विधिलादेशविनामेषु तु प्रतिविधेयम्। तथा हि, द्विहल्ग्रहणमपनीय ''तस्मान्नुड्' इत्येव सूत्रं कर्त्तव्यम्। न चैवम् 'आनृधतुः' इत्यत्रेव 'आटतुः' इत्यादावपि नुट्प्रसङ्गः, 'अश्नोतेश्च'' (पा०सू० ७-४-७२) इत्यस्य नियमार्थत्वात्। नियमश्च**

---

इन्द्रमग्न एतीत्यादौ दोष एवेति चेन्न नाव्ययपृक्तस्येत्यादिना सर्वदोषोद्धारकवार्तिककृदुक्तप्रकारेण ग्रहणपक्षे आवश्यकेन ज्ञापकानां विशेषापेक्षत्वेऽपि उक्तार्थसिद्ध्या दोषसामान्याभावस्य भाष्ये एव स्फुटत्वात्। एवञ्च स एव प्रकारो युक्त इति प्रागुक्तसाध्यांशस्य युक्तत्वेऽपि साधनांश आलूयेत्यादिफलांशश्चायुक्तः [1](एवेति सर्वमवदातम्। तदर्थस्तु भाष्यादौ स्फुटस्तदाह। **दिगिति।**)

## २.२६ वर्णैकदेशाग्रहणपक्षदूषणम्

ननु स्वतन्त्रवर्णप्रयुक्तकार्यं सर्ववर्णैकदेशेषु नेति सिद्धमेतावता। तथा च सखण्डपक्षेऽपि वर्णैकदेशा वर्णग्रहणेन न गृह्यन्त इति फलितम्। तथा च आनृजुः चक्लृपे मातृणामित्यादौ नुट्लत्वणत्वानि न स्युः। यद्यपि दिगर्थरीत्या ग्रहणपक्ष इवात्र पक्षेऽपि प्रागुक्तदोषाभावः, एषु नुडादिसिद्धिश्च। तथापि सखण्डपक्षे ज्ञापकादिनाऽग्रहणपक्षे पूर्वोक्तनुडाद्यसिद्धिरेवात आह। **नुड्विधीत्यादि।** विनामो णत्वमित्यग्रे मूल एव स्फुटम्। अपूर्वऋग्रहणे गौरवादाह। **प्रतीति।** सूत्रत एव लघुभूतप्रकारेण समाधेयमित्यर्थः। इदमखण्डपक्षेऽपि तुल्यम्। तत्र मते एकदेशस्यैवाभावात्। परं तु यथासम्भवमुत्तरोक्तानां मध्ये प्रतिविधानं तत्र पक्षे बोध्यम्। एतेन नन्वखण्डपक्षे तेषु नुडाद्यसिद्धिरत आह नुड्विधीतीत्यपास्तम्। पूर्वं सखण्डपक्षस्यैव प्रतिपादितत्वात्। अत एव तुः प्रयुक्तः। अपूर्वकरणाद्व्याख्यानं लघ्विति भावः।

## २.२७ नुड्विधौ लादेशे च दोषाभावनिरूपणम्

विधिशब्दस्य मध्यमणिन्यायेन सर्वत्र सम्बन्धं तद्विहाय तदुक्तिस्वारस्यमुक्तगौरवं च सूचयन् समाधेयत्वमुपपादयति। **तथा हीत्यादिना।** तत्रादावुद्देशक्रमेण नुटि तदाह। **द्विहलिति। चैवं** = द्विहल इत्यस्याभावे। ननु श्नुविकरणानां स्वादीनां चेत् अश्नोतेरेवेति, अकारोपधानामुक्तानां चेद् अश्नोतेरेवेति वा नियमस्याङ्गीकारे कथमिष्टसिद्धिरत आह। **नियमश्चेति।** न तु प्रागुक्तः

---

१. ( ) 'एवेति' इत्यारभ्य 'दिगिति' इति पर्यन्तं कपाठे नास्ति।

**सामान्यापेक्षः — अकारोपधस्य यदि भवत्यश्नोतेरेव न तु अटत्यादेरिति। यदि त्वश्नातिमात्रं निवर्त्यं स्यात्तर्हि 'नाश्नः' इत्येव ब्रूयात्।**

**'रोलः' इत्यत्र स्वतन्त्रास्वतन्त्रसाधारणी जातिरनुवाद्ये विधेये च विवक्षिता। एकादेशस्य च पृथङ्निष्कर्षायोगात्तद्द्वारा ऋकारस्यैव लृकारादेशः फलति। स्वतन्त्रवर्णवृत्तिजातेर्नायं निर्देशः किन्तु अंशांशिसाधारण्या एवेति। अत्र ज्ञापकं तु**

---

स्वादिप्रकृतिकश्नुविकरण(घटिताद्यपेक्ष[1] इत्यर्थः। तदाकारमाह। **अकेति। भवतीति।** तर्हीति शेषः। क्वचित्पाठ एव तथा। एवमग्रेऽपि। ननु विकरण)विशेषनिर्देशेन श्नाविकरणनिवृत्त्यर्थं सूत्रं स्यात्। तथा चेत्थं नियमः स्यादशूधातोः चेत्तर्हि श्नुप्रत्ययान्तस्यैवेतीत्याशयेनाशङ्कते। **यदि त्विति। नाश्न इति।** न चैवं यङ्लुकि फलभेदः। एतद्भाष्यप्रामाण्येनैतस्माद्यङ्लुगेव नास्तीति सुवचत्वात्। तस्य छान्दसत्वात् श्तिपेति निषेधस्यासत्वाच्चेति भावः।

एवं नुटि समाधाय लत्वे समाधत्ते। **रोल इति।** यद्यपि [2]भाष्येऽ**थवोभयतः स्फोटमात्रं निर्दिश्यते। रश्रुतेर्लश्रुतिर्भवतीति** यद्वेत्यादिनाऽत्र वक्ष्यमाणसमाधेरग्रे समाहितम्। तस्य चायं भावः। स्फोट एव श्रोत्रग्राह्यः, वायुनिष्ठरत्वादिना च तस्याभिव्यक्तिः। एवं च क्वापि साक्षाद्रत्ववतोऽभावेन कल्पत इत्यादावप्यप्रवृत्तापत्तौ तस्य वैयर्थ्यापत्तिः। एवञ्च रेफावभासिनः स्फोटस्य प्रसङ्गे लकारावभासो स्फोट इति तदर्थः। एवञ्च सर्वत्र विशिष्टयोरेव स्थान्यादेशभाव इत्येक एव वाक्यार्थ इत्येकरूपता। एवञ्च क्लृप्त इत्यादावपि तत्प्रवृत्तिः सम्भवत्येव। तत्रापि रेफावभाससत्वात्। अकारादौ तु नैवं ह्रस्वावभास इति न तत्राकारावभासप्रयुक्तकार्यापत्तिः। तदुक्तं **रश्रुतेरित्यादीति।** तथापि कैयटादिना तद्भाष्यमन्यथा व्याख्यातम्। तत्रारुचिं ध्वनयितुमादौ तद्रीत्याऽह। **स्वतन्त्रेति।** भाष्ये मात्रशब्दः सामान्याभिप्राय इत्याह। **जातिरिति।** तस्याश्च व्यक्तिद्वारकः स्थान्यादेशभावो बोध्यः। एवं विधेये रत्वलत्वजाती एवेत्यतिप्रसङ्गो नेति भावः। उभयत इत्यस्यार्थमाह। **अनुवाद्य इति।** नन्वेवमपि पार्थक्येन स्थान्यादेशभावासम्भवान्नेष्टसिद्धिरत आह। **एकादेशेति। निष्कर्षायोगादिति।** निष्कर्षणायोगादित्यर्थः। निर्देशकरणायोगादिति पाठेऽप्ययमेवार्थः। **तद्द्वारा** एकादेशद्वारा। उभयत्र तत्साधारणजातिविवक्षायां प्रमाणमाह। **स्वतन्त्रेति। अंशांशिसाधारण्या इति।** स्वतन्त्रास्वतन्त्रसाधारण्या इत्यर्थः, नत्ववय-

---

१. ( ) 'घटिताद्यपेक्ष' इत्यारभ्य 'ननु विकरण्' इति पर्यन्तं कपाठे नास्ति।

२. म.भा.पृ.सं. १२० (प्रथमो भागः)

**"लुटि च क्लृपः" (पा०सू० १-३-९३) "तासि च क्लृपः" (पा०सू० ७-२-६०) "ऋदुपधाच्चाक्लृपिचृतेः" (पा०सू० ३-१-११०) इति निर्देशाः। यद्वा, कृप उः रः ल इति छेदः, कृप इति लुप्तषष्ठीकं पदम्। तच्च तन्त्रेणाऽऽवृत्या वा योज्यम्। कृपेर्यो रेफस्तस्य लः कृपे ऋकारस्यावयवो यो रेफः रेफसदृश इति यावत्, तस्य च लकार इति। तेन 'चलीक्लृप्यते' इत्यादि सिद्धम्। ईदृशपदविभागप्रदर्शनपरभाष्यादेव कृपेरिति सूत्रपाठस्य प्रामादिकत्वं निर्णीयते। तदेवं नुड्विधिलादेशयोः समाहितम्।**

---

वावयवीत्याद्यर्थः। ऋकाराद्यन्तर्गतस्यावयवत्वेऽपि स्वतन्त्रस्यावयवित्वाभावात्। तथा चांशोऽस्ति यस्य स अंशीत्यस्य यत्प्रतियोगिकसादृश्यवानन्यांशत्वेनाभिमतः स इत्यर्थः। वेदाः प्रमाणमिति वदभेदान्वयः। वस्तुतोऽयमेवं समाधिरयुक्तस्तादृशजातौ मानाभावात्। नरसिंहदृष्टान्तानुपपत्तेश्च। **सादृश्यात्तु प्रत्यभिज्ञे**त्यादिकैयटोक्तिविरोधाच्च। किञ्चैवं भगवतो रजातिरित्यादेरेव वक्तुमौचित्यात्। किञ्च प्रकृते तादृशजातिसत्वेऽन्यवर्णैकदेशानामपि तज्जातिमत्वसम्भवेन वर्णग्रहणेन सर्ववर्णैकदेशानां ग्रहणपक्षस्यैव सिद्ध्या ग्रहणपक्षमुक्त्वाऽथवा न गृह्यन्त इति पक्षे प्रागुक्तरीत्या तथा समाधानपरोक्तभाष्योक्त्यसङ्गतेरिति बोध्यम्। इत एवारुचेराह। **यद्वेति। लुप्तेति।** सौत्रत्वादिति भावः। अत एवाह। **पदमिति।** पृथक्पदमित्यर्थः। **तच्चेति।** चेन रलौ समुच्चीयेते। वक्तुः श्रोतुश्चाह। **तन्त्रेणेति।** नन्वन्वयिभेदेन विरोधेनोभयोरेकानुसन्धानेन बोधासम्भवात्क्रमबोधे तात्पर्याच्च तन्त्रासम्भवोऽत आह। **आवृत्त्येति।** तत्र सूचीकटाहन्यायेन तस्य स्थितत्वेन चोद्देशविपर्ययेण वाक्यार्थे निर्विवादमाह। **कृपेरिति।** तस्यावयव इत्यर्थः। द्वितीयवाक्यार्थे उरित्यवयवपष्ठ्यन्तम्। तच्च रेफस्य विशेषणम्। तथा च तत्रापि भागयोरेव स्थान्यादेशभावः। उरेव स्थानित्वे तु सम्पूर्णस्य लादेशः स्यात्, तदाह। **कृपेरिति।** तदवयवस्येत्यर्थः। ननु स्वतन्त्ररेफेणाग्रहणादखण्डपक्षेऽतत्वाच्च ऋकारप्रश्लेषेऽपि कथमिदमत आह। **रेफसदृश इति।** ऋकारनिर्देशसामर्थ्यात् रेफपदेन लक्षणया तत्सदृश आरोपितरेफत्ववानपि गृह्यत इति भावः। **तस्य च लेति।** तस्य लकारश्चेत्यर्थः। चेन पूर्ववाक्यार्थसमुच्चयः। उभयोर्लाघवादेकत्रैव फलमाह। **तेनेति।** द्विविधवाक्यार्थेनेत्यर्थः। आदिना कल्पत इत्यादिसंग्रहः। ननु 'कृपे रो ल' इति प्राचां सूत्रपाठात्तथा छेदस्यैवासम्भवेन कथमिदमत आह। **ईदृशेति।** अत्रत्यादीत्यादिः। **निर्णीयत इति।** तथा न तथापाठमङ्गीकुर्वन्तः प्राचो भ्रान्ता एवेति भावः। प्रागुक्तरीत्या भाष्योक्तं तदपि समाधानमत्र बोध्यम्। उपसंहरति। **तदेवमिति॥**

**विनामो नतिः, तल्लक्षणं चोक्तं प्रातिशाख्ये — ''नतिर्दन्त्यमूर्द्धन्यभावः'' (ऋ०प्रा० ५-५७) इति। प्रकृते तु नस्य णत्वं नतिः, तत्रेदं प्रतिविधानम् — ''छन्दस्यृदवग्रहात्'' (पा०सू० ८-४-२६) इत्यत्र योगविभागः कार्यः, ऋतः, ऋतः परस्य नस्य णः स्यात् 'गृणाति' 'वृणोति' इत्यादि। ततः — छन्दस्यवग्रहात्। ऋत इत्येव, 'पितृयाणं' 'द्युमत्' इत्यादि। नन्वेवमपि तपरकरणात् 'पितॄणाम्' इत्यादौ णत्वं न स्यादिति चेत्। एवं तर्हि लत्वविधाविवेहापि 'रषाभ्याम्' इति रेफतत्सदृशभागसाधारणी जातिर्निर्दिश्यते क्षुभ्नादिषु तृप्नोतिशब्दपाठाज् ज्ञापकात्। न च**

## २.२८ विनामे भाष्योक्तसमाधानम्

विनामे समाधत्ते। **विनाम इत्यादिना।** ननु नतिर्न प्रसिद्धोऽर्थः, अयोग्यत्वात्। अन्यस्तु कुम्भोदरं नाम निकुम्भतुल्यमिति न्यायायित अत आह। **तल्लक्षेति।** चस्त्वर्थे। क्वचिच्चोक्तमित्यस्यापाठः। तत्र तदध्याहारः। **प्रातीति।** ऋक्प्रातिशाख्य इत्यर्थः। **दन्त्येति।** भावशब्द आदेशपरो, न तु धर्मादिपरः। तथा च दन्त्यस्य मूर्द्धन्यादेशः सेत्यर्थः। पर्यवसितमाह। **प्रकृते त्विति।** यद्यपि योगविभागरूपं समाधानं भाष्येऽत्र यद्वेत्यादिना वक्ष्यमाणसमाधितोऽग्रे उक्तम्। तथापि गौरवात्तदयुक्तमित्यभिप्रायेणादावत्राह। **छन्दस्यृदिति।** छन्दसि ऋकारान्तादवग्रहत्परस्य नस्य णत्वं स्यादिति तदर्थः। तत्र ऋदिति लुप्तपञ्चम्यन्तमित्याशयेन पाठक्रमादिति न्यायेनाह। **ऋत इति।** द्युमदित्यादिना नृमणा इत्यादिपरिग्रहः। भक्षितेऽपीति न्यायेन योगविभागस्यायुक्तत्वमाह। **नन्वेवमपीति।** योगविभागाङ्गीकारेऽपीत्यर्थः। यद्यपि प्रशास्तृणामित्यादिनिर्देशात्तत्र तपरत्वं मुखसुखार्थमेव। अग्रेऽप्येवमेव फलाभावात्। ध्वनितं चेदं **वृत्ता**विति सुपरिहारोऽयं दोषः। तथापि यद्वेत्यादिना वक्ष्यमाणलघुभूतप्रकारापेक्षयाऽत्र गौरवं [1](दुरुद्धरमेवेति बोध्यम्। अत आह। **एवं तर्हीति।** भक्षितेऽपीति न्यायेन सर्वेष्टासिद्ध्यादिना योगविभागस्य) दुष्टत्वे सतीत्यर्थः। तत्रादौ स्वपूर्वोक्तरीत्या सम्भावितं समाधिमाह। **लत्वेति। इहापि** रषाभ्यामित्यत्रापि। **इति** इत्यत्र। ननु तद्भन्नात्र गमकमत आह। **क्षुभ्नेति।** यद्यपि भाष्ये ऋवर्णान्नस्य णत्वमित्यर्थे तत्र संज्ञाभूतनृनमनशब्दपाठस्यादौ ज्ञापकत्वमुक्त्वा नार्नमनिरित्यत्र वृद्ध्यर्थत्वेन खण्डयित्वा वृद्धेर्बहिरङ्गत्वेनासिद्धतया समर्थितम्। तथापि तत् त्रिपाद्यमपि प्रवर्तत इति वार्तिकमताभिप्रायं, न तु सिद्धान्तः। अत एवाग्रे भगवता [2]ज्ञापकेतरमत्रोच्यमानं दत्तम्। तद् ध्वनयन् तद्भाष्यानुरोधेनेवाह। **तृप्नोतीति।** ननु

१. ( ) 'दुरुद्धरमेवे' त्यारभ्य 'योगविभागस्य' इति पर्यन्तं कपाठे नास्ति।

२. ज्ञापनेतरं इति खपाठः।

**परयाऽजूभक्त्या व्यवधानं, 'व्यवायेऽपि' इति विभज्य सामान्येन व्यवायेऽपि षत्वविधानात्। न चैवं 'कृतेन' इत्यादावतिप्रसङ्गः, ''अट्कुप्वाङ्नुम्भिः'' इति नियमात्। आक्षरसमाम्नायिकैस्तत्प्रत्यायितैर्वा व्यवाये यदि भवति तर्ह्येतैरेवेति नियमसूत्रस्यार्थः।**

---

पराजूभागव्यवायेऽपि **अट्कुप्वाङित्ये**कयोगेनैव सिद्धे व्यवायेऽपीति योगविभागो व्यर्थः, तथार्थकरषाभ्यामित्यस्य तत्रानुवृत्तैर्नवा तदूत्वं ? तस्य, ऋकारेण [१]स्वभेददीर्घादेरिव स्वभागस्यापि ग्रहणात् तदवयवरेफस्येव तदजूभागस्यापि केनचिदकोऽणादिनाऽसादृश्यस्याविशिष्टत्वाद्ग्रहणसम्भव इत्यभिमानाच्चेति चेन्न पराजूभागस्य [२](वर्णसमाम्नायेऽपाठेनानट्त्वेनानेनासिद्धे विशिष्टस्यैव तत्र पाठात्। अग्रहणपक्षस्यैव) प्रक्रान्तत्वात् वैलक्षण्येन केनाप्यक्षरसमाम्नायिकेनाचा तद्ग्रहणासम्भवात्। अव्यपृक्तत्वेन तदसम्भवाच्च। अतः पाठक्रमादिति न्यायेनाह। **व्यवायेऽपीतीति। चैवं** योगविभागेन तत्र तद्विधाने। यक्षानुरूपो बलिरिति न्यायेनाह। **कृतेनेत्यादाविति।** अस्य प्रकारस्यावश्यकताध्वननायादावित्युक्तम्। तेना**दर्शनेनेत्या**दिपरिग्रहः। नुमग्रहणस्य खण्डितत्वादाह। **अट्कुप्वाङ्भिरिति।** समासे लुप्ततृतीयाकं पदमित्यसमासे तत्स्थितिरेवेति भावः। क्वचिदट्कुप्वाङ्नुम्भिरिति पाठः। युक्तश्चायम्। [३]अदृष्टार्थं तस्यावश्यकत्वात्। येन केनचिद् व्यवाये चेदटादिभिरेवेति नियमेनेष्टसिद्धेराह। **आक्षरेति।** अत एवोत्तरभागेन व्यवायेऽपि न तस्य व्यावृत्तिर्नियमेनातत्वादिति भावः। नन्वेवमपि वर्णानां प्रत्युच्चारणं भेदेनाक्षरसमाम्नायिकस्य प्रयोगे क्वाप्यसत्वान्नियमानुपपत्तिरेव। इष्टसिद्धिस्तु दूरापास्ताऽत आह। **तत्प्रत्येति।** आक्षरसमाम्नायिकोपस्थापितैः प्रयोगस्थैरकारादिभिरित्यर्थः। एतेन ननु आकारादिभिः भक्तिस्तु न स्यात्तेषामनाक्षरसमाम्नायित्वादत आह तत्प्रत्येतीत्यपास्तम्। हेतुसाध्ययोरसम्बद्धत्वात्। भक्तिस्तु न ([४]प्रत्याय्या, न च प्रत्यायिका। असवर्णत्वादनुपदेशाच्चेति न नियमेन तन्निवृत्तिरिति भावः। भाष्ये तु) प्रथमनियम एवोक्तः। अकारादीनामपि तत्प्रत्यायितत्वात्तत्वमिति तद्भावः। एवञ्च वर्णैर्व्यवाये यदि भवति तर्ह्याक्षरसमाम्नायिकैरेवैतैरिति नियमेऽपि न दोषः। एवमाक्षरसमाम्नायिकैर्व्यवाये यदि भवति तर्ह्याक्षरसमाम्नायिकैरेवैतैरिति नियमेऽपि दोषाभाव इति बोध्यम्।

---

१. सभेददीर्घादेरिव खपाठः।

२. ( ) 'वर्णसमाम्नाये' इत्यारभ्य 'अग्रहणपक्षस्यैव' इति पर्यन्तं कपाठे नास्ति।

३. अदृष्टार्थमिति मातृकाद्वयेऽपि पाठः। परन्तु अर्थानुरोधादेवं विपर्यस्तः।

४. ( ) 'प्रत्याय्या' इत्यारभ्य 'भाष्ये तु' इति पर्यन्तं कपाठे नास्ति।

**यद्वा तृप्रोतिशब्दपाठेन ''होतृपोतृप्रशास्तृणाम्'' (पा०सू० ६-४-११) इत्यादिनिर्देशेन च ऋवर्णान्तस्य णत्वमेव ज्ञाप्यते लाघवात्। एवं हि व्यवायेऽपीति योगविभागोऽपि न कर्त्तव्यो भवतीति दिक्। भाष्ये तु ''वर्णैकदेशा वर्णग्रहणेन न गृह्यन्ते'' इति द्वितीयोऽपि पक्षः समर्थितः। स तु बहुप्रतिविधेयत्वेन गौरवभयान्नेह प्रपञ्च्यते।**

---

नन्वेवं प्रथमपक्षवत् द्वितीयपक्षोऽपि गौरवग्रस्तः। अस्या रीतेः पूर्वखण्डितत्वं चातो भाष्योक्तं समाधितत्वमाह। **यद्वेति।** ह्रस्वविषयकमेवेदं ज्ञापकमिति भ्रमनिरासाय तदनुक्तं तत्पोषकमाह। **होतृपोत्रिति।** एतेन ननु सर्वेष्टासिद्धिरित उक्तयुक्तेरत आह होतृपोत्रितीत्यपास्तम्। दोषतौल्यात्, निर्देशस्य सौत्रत्वेनोपपत्तेश्च। तस्मात्समुचित्य ज्ञापकता। अत एव तदर्थकश्चः। इदानीमाद्यानुरोधेन तस्यावश्यकत्वेन च तथा दुर्वचमिति भावः। अनेन पूर्वमतेऽपि गौरवमस्त्येवेति सूचितम्। अत एवाह। **ऋवर्णादिति।** एवेनोक्तपक्षयोर्व्यावृत्तिः। लाघवमेवाह। **एवं हीति।** यतस्ततः परस्य णत्वमात्रज्ञापने चेत्यर्थः। इदं च सैषा महतइत्यादिभाष्येणापि प्रतिपादितमेव। एवं लाघवं तितिप्रत्ययमित्यादावपि बोध्यम्। विभागोऽपीत्यपिना नियमप्रागुक्तयोगविभागादिसमुच्चयः। **न** चैवमदर्शनेत्यादौ दोषः। रषाभ्यामिति पञ्चम्योपस्थितनिर्दिष्टपदस्य व्यवाय इत्यनेनाविरोधाय आट्भिन्नाव्यवहितपरतया तदप्राप्तेः। इदं च वार्तिकमतेनोक्तम्। वस्तुतस्तूक्तज्ञापकेव तज्ज्ञापनेऽदर्शनेत्यादावनतिप्रसङ्गाय तत्र योगविभागादिस्वीकार एवोचितो, न तूक्तप्रकारः। यथोत्तरं मुनीनां प्रामाण्यात्। स्पष्टं चेदमन्यत्रेति बोध्यम्। तदाह। **इति दिगिति।**

## २.२९ ग्रहणपक्षानिरूपणे बीजकथनम्

ननु भाष्ये पक्षान्तरमपि स्थापितं, तदत्र कुतो नोक्तमत आह। **भाष्ये त्विति। बह्विति।** अग्रहणपक्षे स्थलत्रय एव प्रतिविधानम्। ग्रहणपक्षे तु सवर्णदीर्घादिषु बहुषु प्रागुक्तेषु प्रागुक्तरूपानेकप्रतिविधानकरणमिति गौरवमिति भावः। **गौरवेति।** ग्रन्थेत्यादिः। **न्नेह** कौस्तुभे। एतेन न्यूनता परिहृता। तस्य निर्बीजत्वेन दुष्टत्वं सूचितं। तथा हि। सत्यपि गोसादृश्ये गवये गोत्वस्येव सन्ध्यक्षरावयवेष्वकारादिसादृश्यसत्वेऽप्यत्वादिजातेरभावात्सादृश्येन प्रत्यभिज्ञोपपत्तेरकारादिग्रहणेन तद्ग्रहणासम्भवः। किञ्चैतेषामेकेच्छापूर्वकैकप्रयत्नत्वेनैकवर्णत्वमेव अकारादिवत्। अत एवैषां पदवन्न वर्णसमूहत्वेन प्रतिभासः। समुदायत्वाच्चेत्याद्युक्तिरपि न तात्त्विकी। किन्तु भ्रान्तिगृहीतावयवसद्भावाश्रयिका। एवञ्च भ्रान्तिरेव ग्रहणपक्षबीजम्। अत एव गोनौग्रहणं चरितार्थम्। एतदर्थमेव तद्द्वयं प्रयुक्तमिति। एतेन नाव्यपवृक्तस्येत्यादिसिद्धान्तभाष्योक्तिरूपेण

**ननु यदि वर्णैकदेशा वर्णग्रहणेन न गृह्यन्ते तर्हि 'कुक्कुटः' पिप्पली' 'पित्तम्' इत्यादौ संयोगसंज्ञा न स्यात् अखण्डस्य मात्राकालस्य क्लृप्त् इत्यस्य एकहल्त्वात्। तदवयवयोश्च हल्ग्रहणेनाग्रहणात्। नन्वखण्डस्यानुपदेशात् कथं हल्त्वमिति चेत् ? मा भूत्तर्हि तदपि। अवयवानां हल्त्वं तु कुतः ? 'सँय्यन्ता' 'सँवत्सरः' 'यँल्लोकम्' इत्यादौ तु एकवर्णानामपि हल्त्वं भविष्यति, अण्सूपदिष्टैर्ग्रहणात्। तदवयवयोस्तु हल्त्वं न स्यादेव। ततश्च संयोगसंज्ञाविरहे ततः पूर्वस्य गुरुत्वाभावे प्लुतो न स्यादिति। अत्राहुः,**

---

एकेनैव सर्वसमाधानेन बहुप्रतिविधेयत्वाभावेनागौरवाच्चिन्त्यमिदमित्यपास्तम्। निर्बीजत्वेन तस्यैवायुक्तत्वात्। एतेन प्रागुक्तस्येष्यन्ते सन्ति चेत्यंशस्यापि असिद्धान्तत्वमपि सूचितश्च। ध्वनयिष्यति चैतदग्रे **इदं चेत्यादिना।** अत एव भाष्यविरोधो न। भगवता ग्रहणाग्रहणपक्षाभ्यां सखण्डाखण्डपक्षयोरेवोक्तत्वेनान्यथा तद्विरोधः स्पष्ट एव। 'तस्यादित' इत्यादि तु काल्पनिकमादाय निर्वाह्यमिति तस्याशयः। अत्र प्राक् तथोक्तिस्तु **तस्यादित** इत्याद्यनुरोधेन, प्रक्रियादशायामनुबन्धबोधनाय सखण्डपक्ष एव ग्रहणाग्रहणपक्षावित्याशयिका। तथापि सम्भवान्न तु तात्त्विकी। एवञ्चाखण्डपक्षो निर्दुष्टो निरुक्तोऽस्त्येव। नुडादिषु प्रतिविधानं तु तत्रापि इदमेव ध्वनयितुं, प्रतिविधानयुक्त**मिदं चेत्या**दिना वक्ष्यमाणं च ग्रन्थकृतेति बोध्यम्। तदेतद् ध्वनयन्नाह। **नन्वित्यादिना।** नन्वित्यस्यैवमपीति शेषः। नुडादिषु निर्वाहेऽपीति तदर्थः। **अखण्डेति।** तत्वेनाभिमतस्य समूहस्येत्यर्थः। एवमग्रेऽपि। मात्रेति बहुव्रीहिः। अन्यथाऽनन्वयापत्तेः। **एकेति।** उक्तरीत्या तत्त्वेन प्रतीयमानत्वादित्यर्थः। नन्वेवमपि तदवयवयोः तत्वेन सा स्यादेवात आह। **तदिति।** चोऽग्रहणादित्यग्रे योज्यः। **अनुपदेशादिति।** अनुपदिष्टत्वं च वर्णसमाम्नायेऽपठितत्वं ग्रहणशास्त्रेणाग्रहीतत्वं च। कुक्कुट इत्याद्युच्चारणं तु नोपदेशः। एवञ्च पूर्वतो वैलक्षण्यमिति भावः। अपिना संयोगसंज्ञादिसमुच्चयः। एवञ्च प्रथमहेत्वसिद्धिः। तावताऽपि पूर्वपक्षो युक्त एव, द्वितीयहेतुसत्वादित्याह। **अवेति। कुत इति।** तेन तदग्रहणादिति भावः। यत्र तु ग्रहणकशास्त्रस्य प्रवृत्तिस्तत्र भवतु समुदायस्य तत्वमिति तत्र प्रथमहेतुसिद्धिरपि। अत एव तत्रापि नेष्टसिद्धिरित्याह। **सँय्यन्तेति।** तुः पूर्ववैलक्षण्ये। तच्च हेतुद्वयसत्वासत्वकृतं, नान्यकृतम्। **एकवर्णानां** समुदितरूपाणां तत्वेनाभिमतानाम्। अपिरेवार्थे विरोधे वा। तत्र तेषामपाठात्। अत एवाह। **अण्स्विति। तदवेति।** चप्यादिसमुदायावयवयोस्त्वित्यर्थः। हल्ग्रहणेनाग्रहणादिति भावः। तत्रेष्टापत्तावुभयसाधारणं दोषमाह। **ततश्चेति।** उभयत्र तयोरहल्त्वादेकत्रत्वात्तस्यैकहल्त्वादन्यत्र

**व्यञ्जनमर्धमात्रमेव। आशूच्चारणात्तु तुल्यरूपयोर्द्वयोरेकत्वभ्रमः। इदं च शिष्टसमाचारात् प्रक्रियादशायामवश्यं स्वीकार्यम्। परमार्थदशायां तु –**

**पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।**

**वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन॥**

**इति वाक्यपदीयोक्तरीत्या स्फोटं सिद्धान्तयतां क्वास्य पूर्वपक्षस्यावसरः॥**

**हयवरट् (मा०सू० ५) हकारोऽवं द्विरुपदिश्यते। यदि तु परत्रैवोपदिश्यते अडश्हश्इण्ग्रहणेषु न गृह्येत। ततश्च 'अर्हेण' इत्यत्राड्व्यवायेऽपीति णत्वं न स्यात्। 'महान् हि' इति स्थिते 'महाँहि' इति न स्यात्। अत्र हि 'दीर्घादटि समानपादे' (पा०सू० ८-३-९) इति रुः, ''आतोऽटि नित्यम्'' (पा०सू० ८-३-३) इत्यनुनासिकः, ''भो भगो अघो अपूर्वस्य (पा०सू० ८-३-१७) इति यत्वम्, ''हलि**

---

तदभावाच्चेत्यर्थः। **भ्रम इति।** तथा च भ्रममूलकोऽयं पूर्वपक्ष इति भावः। अनेन तत्पक्षस्यापि भ्रममूलकत्वं सूचितम्। **शिष्टेति।** शिष्टव्यवहारादित्यर्थः। **अवश्यमिति।** अन्यथा प्रक्रियोच्छेदापत्तिरिति भावः। अनेनैतदभिप्राया प्रागुक्तिरपीति सूचितम्। पदे नेति व्याख्यातं प्राक्। **स्फोटं** वाक्यजातिस्फोटम्। **क्वास्य** [१]कुक्कुटादौ संयोगसंज्ञादि न स्यादित्यस्य। **अवसर इति।** अस्येतीति शेषः। अनेन ग्रहणाग्रहणपूर्वपक्षादेरपि नावसर इति प्रागुक्तसिद्धान्ततत्त्वं सूचितमिति शिवम्॥

## २.३० हकारस्य द्विरुपदेशफलम्

**हयवरट्। द्विरुपदिश्यत इति।** शिवेनेति शेषः। **वर्तमानेति** भूते लट्। उपदिष्ट इत्यर्थः। अनेन वर्णानामेकत्वं सिद्धान्त इति सूचितम्। एवेन पूर्वत्र तस्य व्यावृत्तिः। उपदिश्येतेत्यस्योपदिष्टः स्यादित्यर्थः। तर्हीत्यग्रे शेषः। एवमग्रेऽपि। अयं विचारो ऌकारविचारवद्बोध्यः। **अडशिति।** अडादयो गृह्यन्ते येषु तेषु सूत्रेष्वित्यर्थः। एवमग्रेऽपि। तत्रोद्देशक्रमेण दोषानाह। **ततश्चेत्यादिना।** संग्राहिकवाक्यादुपस्थितवाक्यमाह। **अड्व्यवायेऽपीतीति।** अड्ग्रहणे तद्ग्रहणमात्रप्रयोजनमुक्त्वाऽडंशेः तद्ग्रहणस्यैकमेव फलं भाष्येऽडंशे कण्ठत उक्तमाह। **महानिति।** इति च न स्यादिति पाठः। **दीर्घादिति।** दीर्घात्परस्य नस्य रुः स्याद्वाऽटि तौ चेन्नाटावैकपादस्थौ स्यातामिति सूत्रार्थः। तथा च महानित्यत्र नकारस्येति शेषः। **अतोऽटीति।** अटि परे रोः पूर्वस्यातः स्थाने नित्यमनुनासिकः स्यादिति सूत्रार्थः। एवमटि तदुक्त्वा तत्रैवाशि तदाह। **भोभगो इति।**

---

१. कुक्कुट इत्यादौ इति खपाठः।

**सर्वेषाम्'' (पा०सू० ८-३-२२) इति यलोपः। तत्राप्यशीत्यनुवर्त्तत इति वक्ष्यते। 'ब्राह्मणो हसति' इत्यत्र ''हशि च'' (पा०सू० ६-१-११४) इत्युत्वं न स्यात्। तथा 'लिलिहिदवे, लिलिहिध्वे, इत्यत्र ''विभाषेटः'' (पा०सू० ८-३-७९) इति मूर्द्धन्यविकल्पो न स्यात्। तत्र हि ''इणः षीध्वम्'' (पा०सू० ८-३-७८) इति सूत्रादिण इत्यनुवर्त्तते। तदेवमटि अशि हशि इणि चेति चतुर्षु ग्रहणं प्रथमोपदेशस्य फलमिति स्थितम्।**

**यदि तु परत्र नोपदिश्येत, वल्रल्झल्शल्ग्रहणेषु न गृह्येत। ततश्च 'रुदिहि' 'स्वपिहि' इत्यत्र ''रुदादिभ्यः सार्वधातुके'' (पा०सू० ७-२-७६) इति वलादित्वप्रयुक्त इण्न स्यात्। ''ष्णिह प्रीतौ'' (दि०प०) 'स्निहित्वा, स्नेहित्वा' 'सिस्निहिषति, सिस्नेहिषति' इत्यत्र ''रलो व्युपधात्'' (पा०सू० १-२-२६) इति कित्त्वं न स्यात्। 'अदाग्धाम्' 'अदाग्धम्' इत्यत्र घत्वस्या-सिद्धत्वाद्धकारादझलः परः सिजिति ''झलो झलि'' (पा०सू० ८-२-२६) इति न प्रवर्त्तेत। 'अधुक्षत्' 'अलिक्षत्' इत्यत्र ''शल इगुपधादनिटः'' (पा०सू० ३-१-४५) इति क्सो न स्यात्। तस्मात्प्रत्याहाराणां चतुष्टये प्रथमोपदेशस्य चतुष्टये च द्वितीयोपदेशस्य फलमस्तीति स्थितम्।**

---

**तत्राप्येति।** 'हलि सर्वेषां' इत्यत्रापीत्यर्थः। वक्ष्यतेऽत्रैवाग्रे **स्थानिव**त्सूत्रादौ। हशि तदाह। **ब्राह्मण इति।** हशि चेति सिद्धान्तरीत्या निर्देशः। इदानीं तु यशि चेति पाठ्यं स्यात्। इणि तदाह। **तथेति।** भाष्यकैयटाद्यनुक्तमपि तत्र फलं सम्भवतीति सूचयितुमत्र तथेत्यस्योल्लेखः। उपसंहरति। **तदेवमिति। स्थितमिति।** कैयटादाविति शेषः। अनेनारुचिः सूचिता। तद्बीजं तु कण्ठतो भाष्योक्तमड्हशोरेव फलं नाशिणोरपीति। यथा चेतत्तथा स्पष्टीकृतं **भावप्रकाशे**[1]**।**

**परत्रेति।** पूर्वत्रैवोपदिश्येतेत्यर्थः। न चैवं लस्याप्यभावेन तन्त्राद्याश्रयणेन हलन्त्यमित्यत्रान्योन्याश्रयपरिहारो वक्ष्यमाणो विरुद्ध्येत न्यासासङ्गतिश्चेति वाच्यम्। रंत्यं हरिति न्यासेन हरन्त्यमित्यस्यैवावृत्त्या हर्प्रत्याहारबोधकसूत्रसमुदायान्त्यमिदित्यप्यर्थेन वा तत्परिहारसम्भवात्। [2]**उद्योते** परे त्वित्यादिना द्वितीयदोषस्यापि परिहृतत्वाच्चेति भावः। ननु हस्यातत्वेऽपि घात्परत्वमादाय स्यादत आह। **घत्वेति।** उपसंहरति। **तस्मादिति।** कैयटादिमत इति शेषः। आद्यस्य द्वयोर्द्वितीयस्योक्ते पिति तत्वं बोध्यम्।

---

१. तत्र हि 'इण्ग्रहणेष्वितीति' शब्दरत्नप्रतीकमादाय 'अत्रेदं बोध्यम्, अशित्यधिक'मित्यादिना 'एवञ्च लिलिहिढ्वे इत्यादीनामनभिधानमेवेति बोध्यम्' इत्यन्तं प्रतिपादितम्। (प्रौ.म.श.भा.पृं.सं. ५)

२. (म.भा.प्र.उ.पृं.सं. १२३) प्रथमभागः।

**स्यादेतत्, रेफस्य यर्कार्याणि प्राप्नुवन्ति। तद्यथा 'मद्रह्रदो' 'भद्रह्रदः' इत्यत्र अचः पराद्धकारात् परस्य यर इति विधीयमानं द्वित्वं 'नह्यस्ति' इत्यादौ यकारस्येव प्राप्नोति। न च "रोरि" (पा०सू० ८-३-१४) इति लोपः सुकरः, लोपं प्रति द्वित्वस्यासिद्धेः। "हलो यमाम्" (पा०सू० ८-४-६४) इति लोपस्तु वैकल्पिक इति वक्ष्यमाणत्वात् पक्षे रेफद्वयं श्रूयेत। न च व्यञ्जनपरस्यैकस्यानेकस्य वा उच्चारणं विशेषो नास्तीत्यसिद्धवत्सूत्रे भाष्यकृता वक्ष्यमाणत्वान्नायं दोष इति वाच्यम्, सूक्ष्मत्वाद् दुर्लक्ष्यो विशेष इति तदर्थात्। न तु सर्वथा विशेषविरहोऽभिप्रेतः। "शरोचि" (पा०सू० ८-४-४९) "हलो यमाम्" (पा०सू० ८-४-६४) इत्यादिशास्त्रवैयर्थ्यापत्तेः। तथा 'चतुर्मुखः' इत्यादौ "यरोऽनुनासिकेऽनुनासिको वा" (पा०सू० ८-४-४५) इति पक्षे पकारः प्रवर्त्तेत, स्थानसाम्यात्। 'कुण्डं रथेन' इत्यादौ "वा पदान्तस्य" (पा०सू० ८-४-४९) इति पक्षे**

---

## २.३१ रेफस्य यर्कार्यभावापत्तिपूर्वपक्षनिरूपणम्

अथ 'इदं विचार्यत' इत्यादिभाष्यं[१] वर्णयति। **स्यादेतदिति।** कृत्वा चिन्तान्यायेनायं विचारो बोध्यः। तत्रादौ यथान्यासे आह। **रेफेति।** यद्यपि भाष्येऽनुनासिकद्विर्वचनपरसवर्णेति क्रमः पूर्वपक्षेऽस्ति, तथापि अनुनासिकपरसवर्णयोरादौ तुल्यसमाधिमुक्त्वा द्वित्वसमाधिरुक्त इति तदनुरोधेन व्युत्क्रमेणाह। **मद्रेति। अचो रेत्य**स्य प्रकृतोपयोगिनमर्थमाह। **अच इति।** नन्वेवमपि **हलो यमा**मित्यनेन निर्वाहोऽत आह। **हल इति।** इति इत्यस्य। **वक्ष्येति। घढधषि**त्यादिसूत्रव्याख्यावसर इति भावः। **व्यञ्जनपरस्यैकेति।** व्यञ्जनात्परस्येति सुप्सुपेति समासः। **असिद्धवदिति। असिद्धवदत्राभादि**त्यत्रेत्यर्थः। **दुर्लक्ष इति।** खलन्तम्। **अभिप्रेत इति।** भाष्यकृत इति भावः। आदिना **नादिन्या**(पा०सू० ८-४-४८)**रो री**(पा०सू० ८-३-१४)त्यादिपरिग्रहः। तत्क्रमेणैव दोषान्तरमाह। **तथेति।** आदिना स्वर्नयतीत्यादिपरिग्रहः। **पकार इति।** न हि तत्र सवर्णग्रहणमस्ति येन रेफस्य तदभावाद्वारणं स्यादिति भावः। **स्थानेति।** इतरान्तरतमाभावादन्तरतमानन्तरतमप्राप्तौ प्रवृत्तया परिभाषया स्थानसाम्यादित्यर्थः। न च तमबर्थो नास्तीति वाच्यम्। व्यक्तिपक्षे प्रतिलक्ष्यं लक्षणभेदात्सति सम्भवे तमबर्थाश्रयणात्। न त्वन्यथा। न च तेन शास्त्रप्रवृत्तिर्बाध्या। गुणलोपे प्रधाननिवृत्त्ययोगात्। आकृतिपक्षे त्वेकमेव लक्षणं सर्वाङ्गोपसंहारेण प्रवर्तत इति क्वचिदन्तरमतमे चरितार्थं न्यूने न प्रवर्तेतेति स्यादिति प्राञ्चः। वस्तुतः सप्तम्यन्तपाठाभावात्स्थानेऽन्तरतमत्वात् णकारप्राप्तिस्त्वत्पक्षेऽपि युक्तैवेति बोध्यम्। तृतीयदोषमाह। **कुण्डमिति।**

---

१. म.भा.पृ.सं. १२४ (प्रथमो भागः)

**रेफः प्रवर्त्तेत। ''रेफोष्मणां सवर्णा न सन्ति'' (भा०इ०) इत्येतद्विजातीयः सवर्णो नास्तीत्येवं परम्। स्वस्य स्वयं सवर्णो भवत्येव, तुल्यास्यप्रयत्नत्वात्। ''रो रि'' (पा०सू० ८-३-१४) इति लोपस्तु नास्ति तं प्रति परसवर्णस्यासिद्धत्वात्। अथ द्वित्वानुनासिकपरसवर्णनिवृत्तये यवाभ्यां पूर्वत्र रेफोऽनुकृष्येत— ''हरयवट्'' इति ? तर्हि ''रलो व्युपधाद्'' (पा०सू० १-२-२६) इत्येतद्वकारान्तेष्वपि प्रवर्त्तेत। ततश्च 'देवित्वा' 'दिदेविषति' इत्यत्र पक्षे गुणो निषिध्येत। नन्वव्युपधादिति च्छित्वा अवकारान्ताद् व्युपधादिति व्याख्यास्यते इति चेत् ? एवमपि 'गौधेरः' 'पचेरन्' इत्यादौ ''लोपो व्योः'' (पा०सू० ६-१-७६) इति न प्रवर्त्तेत, रेफस्य वल्यनन्तर्भावात्। 'रलि' इति वक्ष्यामीति चेत् ? ''हय गतौ'' (भ्वा०प०) 'हय्यात्' इत्यादौ यकारेऽतिप्रसङ्गः। ननु यथाश्रुते एव सूत्रे 'वलि' इति सरेफं पदं छित्वा रेफे वलि चेति व्याख्यानान्नोक्तदोष**

---

भाष्यविरोधं परिहरति। **रेफोष्मेति।** इत्येतदित्यस्य भाष्यमिति शेषः। सवर्ण इति जातावेकवचनम्। **स्वस्येति।** व्यक्तिभेदादिति भावः। ते चानुनासिकेनैव परसवर्णेन भाव्यमिति नियमाभावाद्रेफे शुद्धे जातेऽपि तस्य **रो री**ति लोपेन पक्षे तच्छ्रवणापत्तिरूपो नायं दोषः। पाक्षिकानिष्टापत्तिरूपदोषस्त्वस्त्येव। रूपासिद्धिरूपदोषस्तु न, तस्य पक्षे सिद्धत्वादत आह। **रो रीतीति।**

उक्तदोषत्रयं भाष्योक्तन्यासान्तरेण परिहरति। **अथेति। अनुकृष्येतेति।** सिद्धान्तरीत्येदं तत्रैवोपदिष्टः स्यादिति वाच्यम्। रलोपे त्वेतच्छास्त्रप्रवृत्युपयोगियान्तधातोरसम्भवादाह। **वकारान्तेष्वपीति।** यद्यपि भाष्येऽव्व्युपधादिति दृश्यते, तथापि तत्तत्सत्ताप्रदर्शकम्। न तु तथाच्छेदप्रदर्शकम्। तत्रापि वलोपेनैव निर्देशस्य भगवत इष्टत्वात्। एवञ्च न्यासभेदशङ्कालेशोऽपि न। तदेतद् ध्वनयन्नाह **अव्युपधादिति।** अविति सौत्रत्वात् लुप्तपञ्चमीकं पृथक्पदं। वस्य च लोपो व्योरिति लोपः इति भावः। क्वचिदत्रापि भाष्यवत्पाठो दृश्यते, सोऽपि तथैव योज्यः। चेदित्यस्योच्यत इति शेषः। एवमग्रेऽपि। **एवमपि** पूर्वोक्तदेवित्वेत्यादिदोषाभावेऽपि। न्यासभेदेनेममप्युद्धरन् शङ्कते। **रलीति। हयेति।** तथापीत्यादिः।

अथ भाष्योक्तपरिहारेणात्र निर्वाहेऽप्यन्यत्र तदनुक्तोऽपि दोष एवेति प्रतिपादयितुं शङ्कते। **नन्विति।** [१](एवेन न्यासान्तरव्यवच्छेदः। वलीति समाहारद्वन्द्वः। तदाह। **रेफे इति। नोक्तदोषः**

---

१. ( ) 'ननु यथाश्रुते' इत्यारभ्य 'ऋच्छत्यॄताम् इति गुणविधानात् ज्ञापकात्' इति पर्यन्तं कौस्तुभग्रन्थस्य **२०५-२२९** इति पृष्टस्थितस्य व्याख्या कपाठे (मैसूरुपाठे) नोपलभ्यते। पत्राणां कीटकदष्टत्वात्। खपाठे (लण्डन्पाठे) तूपलब्धम्।

**इति चेत् ? एवमपि ''इको रणचि'' (पा०सू० ६-१-७७) ''संयोगादेरातोधातो-रण्वतः'' (पा०सू० ८-२-४३) ''उदात्तरणो हल्पूर्वात्'' (पा०सू० ६-१-१७४) ''इग्रणः सम्प्रसारणम्'' (पा०सू० १-१-४५) इत्यादिक्रमेण यण्ग्रहणानि सर्वाणि रेफेण ग्राह्याणि स्युः। न चैतावतापीष्टनिर्वाहः ''इको रण्'' इत्यत्र संख्यातानुदेशे-नेकारस्य रेफः उकारस्य यकारः ऋकारस्य वकार इति बहूपप्लवप्रसङ्गात्। ननु यथाश्रुतेऽपि यथासंख्येन निर्वाहो दुरुपपादः। तथा हि, विधीयमानतया यवलाः सवर्णान्न गृह्णन्तीति चत्वारस्तावद् यणः, गुणानामभेदकतयाऽनुनासिकसङ्ग्रहेऽपि पृथग्गणनाविरहात्। इकस्तु सवर्णग्रहणात् षट्षष्टिः। न च षट्षष्टेरुपस्थापकानामिक्शब्दवाच्यानामिकारादीनां चतुष्ट्वमस्त्येवेति वाच्यम् तृतीयचतुर्थाभ्यामृकाराभ्यां प्रत्येकं तस्या एव त्रिंशत उपस्थितौ सत्याम् लृकारे रेफादेशस्य ऋकारे च लकारादेशस्य दुर्वारत्वात्। तस्मात् ''स्थानेऽन्त-**

---

गौधेर इत्याद्यसिद्धिरूपो न। **एवमपि** गौधेर इत्यादौ निर्वाहेऽपि। आदिना उदात्तस्वरितयोरण इत्यादिपरिग्रहः। रणो मयो द्वे इत्यादिसंग्रहायाह। **सर्वाणीति।** अत्र शास्त्रे यावन्ति यणं उच्चारणानि तानि सर्वाणि इत्यादिक्रमेण रेफेणेत्याद्यर्थः। इष्टापत्तिं परिहरति। **न चैतावतेति।** न हि रणिति न्यासेनापीत्यर्थः। अत्रापि लस्य यथास्थानसिद्धत्वेनानुपादानम्। इमं दोषमुद्धरन् शङ्कते। **नन्विति। यथाश्रुतेऽपि** यणिति न्यासेऽपि। रेफस्य विजातीयवर्णासत्वादाह। **यवला इति। सवर्णं नेति** जातावेकवचनम्। क्वचिद्बहुवचनान्तपाठ एव। अणुदित्सूत्रेण लक्षणया जातिपक्षेण वेति शेषः। लक्षणादेरपि तत्रासत्वादिति भावः। **चत्वार इति।** इदमिको यणिति सूत्रस्थ**मनोरमा**[1]विरुद्धम्, शास्त्रे गुणानां भेदकत्वाभावेऽपि स्वरूपगतभेदमादाय सप्तत्वसंख्याया-स्तत्रोक्तत्वात्। तथा चेदं प्राचामनुरोधेनेति केचित्। अन्ये त्वणुदित्सूत्रेऽण्ग्रहणात्तद्विषये गुणानां भेदकत्वस्यैवाङ्गीकाराद्यण्विषये गुणानां भेदकतैवोचितेति चतुष्ट्वसंख्याया एवौचित्येनैतस्यैव सम्यक्त्वेन **मनोरमा**ग्रन्थस्यैव चिन्त्यत्वमित्याहुः। वस्तुतस्तु सिद्धान्ते जात्यभेदपक्षयोरण्ग्रहण-स्यैवाभावात्तयोरपि विधाय मीनातिरिक्ते एवाङ्गीकारात् सूत्रे शुद्धचतुर्णामुपादानाच्चतुष्ट्वस्य युक्तत्वेनास्य युक्तत्वेऽपि यथा न कौस्तुभमनोरमयोर्विरोधस्तथा प्रतिपादितं **भावप्रकाशे**[2]**।** एवञ्च संग्रहेऽपीत्यपिरनास्थायाम्। तेन गुणानामिति ग्रन्थमात्रस्यारुचिग्रस्तत्वं सूचितमिति बोध्यम्। **वाच्याना**माक्षरसमाम्नायिकानाम्। तृतीयेत्यस्यैवमपीत्यादि। तेनेकारोकारयोर्निर्वाहेऽपीति तदर्थः। **तस्या एवेति** जातावेकवचनम्। पूर्वोक्तषट्षष्ट्यन्तर्गतत्वेन बुद्धिस्थायास्तुल्यरूपाया एव वा ऋत्वावच्छिन्नाया इत्यर्थः। यथाश्रुते उपसंहरति। **तस्मादिति।** अस्य निष्कर्ष इत्यत्रान्वयः। **प्रकृते**

---

१. प्रौ.म.पृ.सं. १३१। २. प्रौ.म.श.भा.पृ.सं. १३२।

**रतमः'' (पा०सू० १-१-५०) इत्यनेनैव प्रकृते निर्वाहः। यथासङ्ख्यसूत्रं तु ''नन्दिग्रहि-पचादिभ्यः'' (पा०सू० ३-१-१३४) इत्यादिषूषयोक्ष्यते इत्येव निष्कर्षः। तथा च 'इको रण्' इति न्यासेऽपि तेनैव निर्वाहोऽस्त्विति चेत् ? न, वैषम्यात्। यथाश्रुते ह्यविरोधात्परिभाषाद्वयमपि ''इको यण्'' (पा०सू० ६-१-७७) इत्यत्र प्रवर्त्तते। इको यथासंख्य-मन्तरतमो यण् स्यादिति। रणिति न्यासे तु परिभाषयोर्विरोधात् परत्वेन यथासंख्यमेव प्रवर्त्तेत। तस्मदनुचितो रेफस्य स्वस्थानादपकर्षः। यथाश्रुते तु द्वित्वादिदोषत्रयं दुर्वारमिति।**

---

इको यण् इत्यादौ। नन्वेवं यथासंख्यसूत्रं व्यर्थं स्यादत आह। **यथेति। तथा च** उक्तनिष्कर्षे च। **तेनैव** स्थानेऽन्तरतम इत्यनेनैव। **द्वयमपीति।** नन्वनुपदमेव यथाश्रुतेऽपि यथासंख्यसूत्र-प्रवृत्तिखण्डनेनेदानीं तत्पक्षे तत्प्रवृत्तिकथनं पूर्वापरविरुद्धमिति चेन्न आशयानवबोधात्। तथाहि। तस्य परिभाषया केवलया निर्वाहे वाच्येऽन्तरमपरिभाषयैव निर्वाहेन यथासंख्येनेत्येवं तेनैव केवलमनिर्वाहेऽपूर्वमुक्तः। इदानीं तु लक्ष्यार्थबोधात्प्राग्भाविशक्यार्थबोधसमये तत्प्रवृत्तिध्रौव्यमुच्यते। तथा च सति ऋकारादौ दोषेण स्थानेऽन्तरतमपरिभाषाया अप्युपस्थितिः। अत एव तत्काले यथासंख्यमित्यस्य परत्वात् प्रथमं प्रवृत्तिरिति। अतस्तथैव वाक्यार्थबोधमाह। **इको यथेत्यादीति।** गामश्वमिति वत् समुच्चयो बोध्यः। क्वचिच्चपाठ एव। **विरोधादिति।** क्रमप्राप्तानां त्रिष्वनन्तरतमत्वादिति भावः। प्रवर्तेतेत्यस्येतीति शेषः। स च वैषम्यसमाप्तौ। उक्तन्यासान्तरे उपसंहरति। **तस्मादिति।** यथासंख्येनानिष्टापत्तिरूपदोषादित्यर्थः। यदि तु विप्रतिषेधे सूत्रे परशब्दस्येष्टवाचित्वेन इष्टानुरोधेनात्रान्तरतमपरिभाषैव प्रवर्त्तते। अत एव यथासंख्यसूत्रस्थभाष्य-सङ्गतिः। स्थानेऽन्तरेति सूत्रस्थभाष्यग्रन्थस्तु यथान्यासे सिद्धान्तपक्षे द्वयोः समफलत्वबोधक इति न तद्विरोधः। अत एव देवित्वा गौधेर इत्यादावुक्तरीत्या परिहृत्य अमुं पक्षं संस्थाप्य अथवेत्यादिना यथान्याससमर्थनमत्र भाष्ये सङ्गच्छते। अत एव चात्र पक्षे इग्रण इत्यादौ यथासंख्यनिर्वाहः कथमित्याशङ्क्य संज्ञाविधानसामर्थ्येन तत्र तद्भावितपक्षाश्रयणान्न दोष इत्युक्त**मुद्योते**[१] इत्युच्यते, तर्ह्यस्त्वयं पक्षोऽदुष्टः, भाष्ये अथवेत्यादिना पक्षान्तराश्रयणे बीजं तु एवमानुपूर्वीकश्रुतित्वस्यास्याः सत्वेन मूले एव कुठारोऽन्यथा तत्त्वभङ्गापत्तिश्चेतीति यद्यपि सुवचम्, तथापि यथान्यासो दुष्ट एव, तत् ध्वनयन्नाह। **यथेति।** तद्दूषणे एवाग्रहो न तूक्तरीत्या तत्खण्डने। अत एवैतदुक्तिः, अन्यथैतद्ग्रन्थानर्थक्यं स्पष्टमेव। अत एव तुः प्रयुक्त इति भावः। इति स्यादेतदिति पूर्वपक्षसमाप्तौ।

---

१. म.भा.प्र.उ.पृ.सं. १२५ (प्रथमो भागः)

**अत्रोच्यते, रेफस्याविशेषतः श्रुतेन द्वित्वं प्रति निमित्तत्वेन सामान्यतः श्रुतं कार्यित्वं बाध्यते। यथा 'ब्राह्मणा भोज्यन्तां, माठरकौण्डिन्यौ परिवेविष्टाम्, इति विशेषतः श्रुतेन परिवेषणेन माठरकौण्डिन्ययोः सामान्यतः प्राप्तं भोजनं बाध्यते, तद्वत्। यद्यपीह लक्ष्यव्यक्तिभेदेनोभयं सम्भवति, सत्यपि सम्भवे सामान्यतः प्राप्तं विशेषप्राप्तेन बाध्यते इत्यभ्युपगमान्न दोषः। एवञ्च "अचो रहाभ्याम्" (पा०सू० ८-४-४६) इति सूत्रे यर इति रेफभिन्नपरमेवेति स्थिते "अनचि च" (पा०सू० ८-४-४७) इत्यत्रापि तथैव अर्थाधिकाराश्रयणात्। तेन 'हर्यनुभवः' इत्यादावपि रेफस्य न द्वित्वम्। नन्वेवं दध्युदकादौ यण् न स्यात्, विशेषतः श्रुतेन स्थानित्वेनेकां निमित्तत्वस्य बाधादिति चेत् ?**

## २.३२ कैयटादिरीत्या तक्रकौण्डिन्यन्यायेन यर्कार्याभावनिरूपणम्

पूर्वपक्षक्रमेण समाधत्ते। **रेफस्येति।** विशेषतः रत्वेन। सामान्यतः यर्त्वेन। इति इत्यत्र। विशेषतः माठरत्वकौण्डिन्यत्वाभ्यां, सामान्यतः ब्राह्मणत्वेन। नन्वेककर्तृकयोर्भोजनपरिवेषणयोर्युग-पदसम्भवादस्तु तत्र तत्काले बाधः, प्रकृते तु लक्ष्यभेदेन युगपद्भिन्नवाक्यावगतकार्यिनिमित्तभावः किं न स्यात्। यथा दध्यत्रेत्यादाववगतकार्यित्वकस्य इको निमित्तत्वं मध्विदमित्यादौ, यथा वा उभयसमावेशस्तवल्कार इत्यादावित्याशयेनाशङ्कते। **यद्यपीहेति।** दार्ष्टान्तिके इत्यर्थः। **लक्ष्येति।** [१].... हर्यनुभव इत्यादीत्यर्थः। **अभ्युपगमादिति।** 'सत्यपि सम्भवे बाधनं भवती'ति **मिदचोऽन्त्या**दिति [२]सूत्रभाष्योक्तेः। एवञ्च विधिप्रवृत्तिकाले तद्विहितभोजनं कदापि तयोर्नेति वदत्रापीति भावः। नन्वेवमपि यत्र वाक्ये निमित्तत्वं श्रुतं मद्र ह्रद इत्यादिविषयकेऽचो रेति सूत्रे तद्ग्रहे तेन तद्विहितकार्ये वा कार्यत्वस्य बाधोऽस्तु, न तु वाक्यान्तरप्राप्तकार्ये णकारे चेत्यर्थः। भिन्नपदविशेषसन्निधाने सामान्यशब्दस्य तद्व्यतिरिक्तपरत्वं तद्बीजमिति भावः। तथैव यर्पदं तद्भिन्नपरमेव। **न द्वित्वमिति। अनची**त्यनेन प्राप्तमिति भावः। अपिना मद्रेत्यादौ **यणो मय** इति प्राप्तव्यवच्छेदः। इदं च **प्रकाशनारायणाद्य**नुरोधेनोक्तम्। वस्तुतस्तु द्वित्वप्रकरणे एव तेन तद् बाध्यते इति बोध्यम्। अत एव न मनोरमादिविरोध इति स्फुटं **भावप्रकाशे।** स्फुटीभविष्यति चैतदनुपदमपि। तुल्ययुक्त्या शङ्कते। **नन्वेवमिति।** तेन तस्य तत्र बाधाङ्गीकारे इत्यर्थः। विशेषतः इकुत्वेन। **निमित्तेति।** अच्त्वरूपसामान्येन प्राप्तस्येत्यादिः। **बाधात्** तत्प्रसङ्गात्।

---

२. अत्र ग्रन्थः त्रुटितः। २. म.भा.पृ.सं. ४०१ (प्रथमो भागः)

**न, तत्र लक्ष्यानुरोधेन व्यक्तिपक्षाश्रयणात्। व्यक्तिपक्षे हि प्रतिलक्ष्यमसकृल्लक्षणं प्रवर्त्तते। यद्वा, प्रतिलक्ष्यं भिन्नानां सर्वेषां लक्षणानां तन्त्रेणोच्चारणम् ''इको यणचि'' (पा०सू० ६-१-७७) इति। ततश्चैकामपि तात्पर्यतो निमित्तत्वप्रतिपादनाददोषः। नचैवं 'श्रीशः' इत्यादावपि यणप्रसङ्गः, व्यक्तिपक्षे विप्रतिषेधे परमेवेति नियमबलेन तद्व्यक्तिविषयक-शास्त्रस्यैव विरहकल्पनात्। एवमपवादविषयेऽपि 'सुश्रियौ' इत्यादौ बोध्यम्। ''परिहृत्यापवादविषयं तत उत्सर्गोऽभिनिविशते'' इति न्यायात्। जातिव्यक्तिपक्षौ च**

---

**नारायणाद्य**नुरोधेन समाधत्ते। **तत्रेति**। इको यणित्यादावित्यर्थः। ननु तदाश्रयणेऽपि कथमिष्टसिद्धिरत आह। **व्यक्तीति।** हि यतः। असति तत्पक्षे लक्षणस्य एकैकं लक्ष्यं प्रति पुनः पुनः प्रवृत्तौ बाधकाविषये तथाप्रवृत्तौ फलाभावादेकवारमेव प्रवृत्तावपि तद्विषये पूर्ववृत्तेर्बाधकेन बाधे प्राप्ते पुनः प्रवृत्त्या बाधकस्यापि बाध इत्यर्थः। ननु लक्ष्ये लक्षणमिति न्यायेनैकवारमेव प्रवृत्तिः स्यात्। किञ्चैवमुत्सर्गापवादस्थलेऽपि व्यक्तिपक्षे वक्तुं शक्यत्वेनापवादशास्त्रवैयर्थ्यं पर्यायो वा स्यादत आह। **यद्वेति।** ततश्च तथाप्रवृत्तेस्तन्त्रस्य वाङ्गीकाराच्च। अपिस्तदन्याचूपरिग्राहकः। **तात्पर्यतः** तथाप्रवृत्तिद्वारा तत्तद्विषयकलक्षणोपप्लवद्वारा। **अदोष इति।** अन्यथा तथा प्रवृत्तेस्तद्विषयकलक्षणस्य वा वैयर्थ्यापत्तिरेवेति भावः। **चैवं** अचूत्वावच्छिन्ने परतो यणङ्गीकारे। **शास्त्रेति।** तदित्यादिः। यणिति तदर्थः। **विरहकल्पनादिति।** अन्यथा तस्य वैयर्थ्यापत्त्या विपरीतो नियमबाधः स्यादिति तस्य वैयर्थ्यमेवेति भावः। द्वयोरन्यत्र सावकाशत्वमिति प्रवादस्तु सामान्यशास्त्रयोर्बोध्यः स्यादिति बाधकभावाशयकः। विप्रतिषेधशब्दार्थस्तु असम्भवादिः, स चात्राप्यस्तीति बोध्यम्। नन्वेवं सुश्रियावित्यादाविको यणिति यणापत्तिः। उक्तरीत्या उक्तरीतेरभावादत आह। **एवमिति।** तत् विरहकल्पनारूपप्रकाराश्रयणमित्यर्थः। **अपवादेति।** इको यणिति यणपवादेयङ्विषयकेऽपीत्यर्थः। ननु तत्र नियामकतत्सूत्रबलात्तथास्तु। अत्र तु गमकाभावात्कथं तथाऽत आह। **परीति**। परित्यज्येत्यर्थः। तत इत्यस्यापवादशास्त्रपर्यालोच-नात्प्रागपीत्यर्थः। नन्वेवमपि जातिपक्षे दध्युदकादौ दोष एवात आह। **जातीति।** ननु त्वदुक्तरीत्या जातिपक्षेऽप्यदोषः, व्यक्तिपक्षे सर्वं लक्ष्यं शास्त्रं व्याप्नोति न जातिपक्षे इत्यत्र मानाभावात्, प्रत्युत **न ब्राह्मण**मित्यादौ तदर्थमेव जातिपक्षाश्रयणस्य भाष्ये दर्शनात्। किञ्च व्यक्तिपक्षेऽप्यविरुद्धलक्ष्ये चरितार्थेनेदं लक्ष्यं विरोधात्स्वविषयकत्वं न कल्पयतीति सुवचत्वात्। तस्मादुक्तरीत्या तन्निर्वाहे जातिपक्षेऽपि निर्वाह इति विशिष्य तदुक्तिर्जातिव्यक्तिपक्षौ चेत्याद्युक्तिश्चायुक्ता, रेफविषये दोषापत्तेश्च। अथ तदनुरोधेन पक्षद्वयेऽप्युक्तरीत्यनङ्गीकारस्तर्हि दध्युदकादौ दोष एवेति

**लक्ष्यानुरोधाद्व्यवस्थयाऽऽश्रीयेते इति पस्पशायामेवोक्तम्। "तस्मादित्युत्तरस्य"(पा०सू० १-१-६७) "पत्युत्तरपदाण्ण्यः" (पा०सू०ए० ४-१-८५) इत्यादिनिर्देशाश्चेह लिङ्गम्।**

**भाष्ये तु "नेमौ रहौ कार्यिणौ द्विर्वचनस्य, किं तर्हि निमित्तमिमौ" इत्युक्तम्। तत्र हकारग्रहणं दृष्टान्तार्थं, तस्य यर्बहिर्भूततया यथा न द्वित्वे कार्यिता तथा यरन्तर्भूतस्यापि रेफस्येति। एवमनुनासिकपरसवर्णविधी अपि स्थानेन्तरतमपरिभाषा-**

---

तदनुरोधेनोक्तमिदं सर्वं चिन्त्यमेव, अत आह। **तस्मादिति। श्चेह लिङ्गमिति।** चस्त्वर्थे। इको यणित्यादौ जातिव्यक्तिपक्षयोरपि तेन तद्बाधने तु लिङ्गमित्यर्थः। लिङ्गं चेत्यन्वयेन यथाश्रुतो वा चः। स चोक्तवक्ष्यमाणसमुच्चायकः। प्रकारद्वयाभावे तु तदसङ्गतिः स्पष्टैव। अन्यथाऽ**कः सवर्णे** इत्येतत्पर्यालोचनया श्रीश इत्यादिविषयकयणृशास्त्राभावकल्पनवत्संग्राहकवाक्ये इकः स्थानित्व-श्रवणात्तन्निमित्तत्वविषयकलक्षणाभावस्यैव कल्पनं स्यादिति निर्देशासङ्गतिः स्पष्टैवेति स्पष्टमिको यणचीत्यत्र **कैयटे।** एवञ्चेदमपि कैयटादिरीत्या। वस्तुतस्तु तद्वदत्र स्थानित्वस्य नानवकाशत्वम्, मध्वत्रेत्यत्र निमित्तत्वाप्राप्त्या स्थानित्वस्य चारितार्थ्यात्। तक्रकौण्डिन्यन्यायादिरस्यानवकाशविषय एवेति स्पष्टं तद्धितेष्वचामादे(पा०सू० ७-२-११७)रिति सूत्रे भाष्ये[1]। तदप्राप्तियोग्यविषयाभाव-रूपं चानवकाशत्वं तत्प्रवृत्तौ बीजम्। एवञ्च दध्युदकादौ न शङ्कालेशोऽपि इति बोध्यम्। तथा च रेफस्य निमित्तत्वेन कार्यित्वबाधे बाधकाभावेन तत्वेनार्थाधिकारादिष्टसिद्धिरिति स्थितम्।

## २.३३ भाष्यरीत्या यर्कार्याभावनिरूपणम्

वस्तुतस्तदपि **प्रकाशा**द्यनुरोधेनोक्तम्। प्रकृतसूत्रभाष्यात् द्वित्वप्रकरणे एव तेन तद्बाधलाभात्। अन्यथा रेफस्यानुनासिकपरसवर्णद्विर्वचनप्रतिषेधो वक्तव्य इति वचनारम्भे इन्द्रीयरेफेऽचो रेति द्वित्वस्य मद्रादीये यण इति द्वित्वस्य च निषेधः उदासीनः, प्रकृते सूत्रे पाठात्। अत एव मद्राच्छुक्तिः सफलाह। सा अचः परत्वं तु न, उल्लेखेनैव सिद्धमिति यावत्। द्वित्वनिषेधलाभेन रेफोष्मणां सवर्णा न सन्ति। नेमौ रहौ कार्यिणौ, किं तर्हि निमित्तमिमौ रहौ द्विर्वचनस्येति प्रत्याख्याने तदलाभेन फलभेदप्रत्याख्यानासङ्गत्यापत्तेः। वार्तिके परपदाननुवृत्तेस्त्व-दुक्तप्रकारेणानिर्वाहाच्च। तस्मात् तथैवोचितमिति बोध्यम्। तदेतद् ध्वनयन्नाह। **भाष्ये त्विति।** प्रकृते सूत्रे इत्यर्थः। नन्वयर्त्वादप्रसक्तद्वित्वकस्य हस्य ह्ग्रहणमयुक्तमत आह। **तत्रेति।** भाष्योक्तवित्यर्थः। **तथेति।** प्रकरणे तेन बाधादिति शेषः। **रेफेति।** न द्वित्वे इत्यादिरनुषङ्गः। एवं द्विर्वचनदोषं परिहृत्य दोषद्वयं परिहरति। **एवमिति।** यथा द्वित्वं न तथेत्यर्थः। **तरतमे इति।**

---

१. सत्यपि सम्भवे बाधनं भवति' इत्यादिना निरूपितम्। म.भा.पृ.सं. १८१ (षष्ठो भागः) स्पष्टीकृतमिदं शब्दरत्ने भावप्रकाशे च (प्रौ.म.श.भा.पृ.सं. २०६)

**संस्कृतौ स्थानप्रयत्नोभयान्तरतमे 'एतन्मुरारिः' 'त्वङ्करोषि' इत्यादौ क्वचिल्लब्धावकाशौ अनन्तरतमे प्रागुक्ते न प्रवर्त्तेते, जातिपक्षाश्रयणादेवेति संक्षेपः ।**

**अत्र वार्त्तिकम् — ''अयोगवाहानामट्सु णत्वं, शर्षु जश्भावषत्वे, अविशेषेण**

---

स्थानतः सम्भवदनुस्वारान्तरतमके चेति शेषः । इत्यादावित्यस्य प्रत्येकं सम्बन्धात्तदादौ तदादौ चेत्यर्थः । क्वचित्स्पर्शादौ पूर्वयोः प्रत्येकमन्वयः । **अनन्तरतमे इति** । रेफविषये इत्यर्थः । स्थानप्रयत्नोभयेत्यादिः । स्थानेन तत्वेऽपि प्रयत्नासदृशत्वात् । एतेन स्थानेनान्तरतमो रेफस्य णो भवत्येवेत्यपास्तम् । प्रागुक्ते तत्वावच्छिन्ने । चतुर्मुखः कुण्डं रथेनेत्यादौ विभक्तिव्यत्ययेनान्वयः । स्थानेऽन्तरतमे इति सप्तम्यन्तपाठे णस्य रेफो रेफस्य धातुस्वारोऽनन्तरतम इति भावः । एतेनोभयप्रसङ्गे स्थानेऽन्तरतम इत्यस्य प्रवृत्तिः, नहि प्रकृते सः अनन्तरतमस्यैव प्राप्तेरितीदं चिन्त्यमित्यपास्तम् । उक्तयुक्तेः । ननु व्यक्तिपक्षे प्रागुक्तरीत्याऽसकृत्प्रवृत्तेस्तत्तल्लक्षणानां भेदेन तत्तद्विषयकशास्त्रस्याचारितार्थ्याद्वा प्रवृत्तिः स्यादेवात आह । **जातीति ।** अयं भावः । पाणिन्यादेः पक्षद्वयस्य सत्वेऽपीष्टानुरोधेन क्वचिज्जातिपक्षः क्वचिद्व्यक्तिपक्ष इति यरोऽनुनेत्यादौ जातिपक्षे एव तत्र तस्या एकत्वाच्छास्त्रमपि समुदाये सकृत्प्रवर्तते न प्रतिव्यक्त्त्यावृत्त्या । समुदाये प्रवृत्तिस्तु जातेः स्थानित्वादिधर्माणां व्यक्तिद्वारकत्वेन तत्र ते वर्तमानास्तद्वतीषु व्यक्तिषु वर्तन्त इति । न हि व्यक्तीनां तत्र पक्षे तत्तद्रूपेण प्रतीतिः किन्त्वेकजातिरूषितत्वेन, अयमेव समुदाये प्रवृत्तिरित्यस्यार्थः । न चैवमुक्तदोषतादवस्थ्यमिति वाच्यम् । सकृत्प्रवृत्तेरप्यन्तरतमपरिभाषा-संस्कृताया एवाङ्गीकारेण प्रोक्तरीत्या दोषाभावादिति । इदमपि कैयटाद्यनुरोधेन । स्थानेन्तरतम इति सप्तम्यन्तपाठप्रत्याख्यानपरभाष्यविरोधेनैतद्युक्तेरयुक्तत्वात् । एवं सति भाष्ये ह्ग्रहणवैयर्थ्यापत्तेश्च । तस्मादनुनासिकविधौ सवर्णपदापकर्षपरं भाष्यम् । रेफोष्मणामिति । परेति तत्र लुप्तषष्ठ्यन्तं पृथक् पदम् । अत एव 'उदः स्था' इत्यादौ तदनुवृत्तिः । तस्य च प्रत्यसत्त्या अनुनासिका अनुस्वारान्तरतमाश्चार्थाद्विजातीयाः, तेषां सवर्णा न सन्तीत्यर्थः । अत एव महिष्मानित्यादौ सूत्ररीत्या स्थानप्रयत्नोभयान्तरतमऋकारसम्भवेऽपि नानुनासिकः सः, **नाज्झला**विति निषेधेन तस्य तत्सवर्णत्वाभावादिति तत्वम् । तद् ध्वनयन्नाह । **संक्षेप इति ।**

## २.३४ अयोगवाहशब्दार्थः - अयोगवाहानामट्सूपदेशे फलम्

**अत्रेति ।** हयवरदसूत्रेऽपूर्ववार्तिकमित्यर्थः । एतदर्थमेवैतदुक्तिः, तस्य तद्धर्मत्वात् । वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणत्वात्प्रतिज्ञातं वाक्यार्थं वक्तुमादावयोगवाहपदप्रवृत्तिनिमित्तमाह ।

**संयोगोपधसंज्ञाऽलोन्त्यविधिद्विर्वचनस्थानिवत्त्वनिषेधाः'' इति। अस्यार्थः – अविद्यमानो योगः प्रत्याहारेषु सम्बन्धो येषां तेऽयोगाः अनुपदिष्टत्वादुपदिष्टैरगृहीतत्वाच्च प्रत्याहारसम्बन्धशून्या इत्यर्थः। वाहयन्ति निर्वाहयन्ति प्रयोगमिति वाहाः, अयोगाश्च ते वाहाश्चेति कर्मधारयः। अनुपदिष्टत्वे उपदिष्टैरगृहीतत्वे च सति श्रूयमाणा इत्यर्थः। ''ते च विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारयमाः'' इति भाष्यम्। एतच्च ''ऋति ऋ वा'' (का०वा०) ''लृति लृ वा'' (का०वा०) इति विहितयोरीषत्स्पृष्टयोरप्युपलक्षणम्। तथा च तुल्यास्यसूत्रे भाष्यम् – 'तयोरच्त्वं वक्ष्यामि'' इति। तत्फलं तु तत्रैव स्पष्टम्। तत्र यमानां लक्षणमनुनासिकसंज्ञासूत्रे प्रपञ्चयिष्यामः। एषामट्सूपदेशः कर्त्तव्यः, णत्वं फलम्। 'उरःकेण' 'उरःपेण' 'उर...केण' 'उर॒पेण' अड्व्यवाये इति णत्वं विसर्जनीयजिह्वामूलीयोपध्मानीयैर्व्यवायेऽपि सिध्यति। नायमज्ञाताद्यर्थे कः, ''सोऽपदादौ'' (पा०सू० ८-३-३८) इति सत्वप्रसङ्गात्; किन्तु उरः कायति उरःपातीति विग्रहः। ''कै शब्दे'' ''पा रक्षणे'' (अ०प०) आभ्याम् ''आतोऽनुपसर्गे कः'' (पा०सू० ३-२-३) ''कुप्वोᳲकᳲपौ च'' (पा०सू० ८-३-३७) इति चकारात् पाक्षिको विसर्गः। न चैवमपि गतिकारकोपपदानां प्राक्सुबुत्पत्तेः समासाभ्युपगमात् ''सोपदादौ'' (पा०सू० ८-३-३८) इति प्रवर्त्तेतेति वाच्यम्, तस्य ''दधिसेचौ''**

---

**अविद्येति। प्रत्याहारेषु** तद्बोधकवर्णसमाम्नायेषु। एवमग्रेऽपि। तस्यैवार्थमाह। **अनुपेति।** नन्विदमाकारादावतिप्रसक्तमत आह। **उपेति। वाहयन्तीति।** एरजिति भावः। भाष्यात्तु बाहुलकात् केवलादुक्तार्थकात्कर्तरि घञिति लभ्यते। **नारायणा**द्यनुरोधेन त्विदमुक्तम्। विशिष्टार्थमाह। **अनुपेति।** वर्णसमाम्नाये इत्यादिः। ननु एतेषामशास्त्रत्वात् कथं प्रयोगनिर्वाहकत्वमत आह। **श्रूयेति।** प्रयोगादावित्यादिः। तथा च अक्षरसमाम्नाये पठितास्तैरगृहीताश्च सम्यक् प्रयोगादौ घटकत्वेन श्रूयमाणा इति तेषां तत्वात्प्रयोगनिर्वाहकत्वमिति भावः। एवमयोगवाहपदव्युत्पत्तिं प्रदर्श्य अनतिप्रसङ्गाय रूढिं ध्वनयन् तत्स्वरूपमाह। **ते चेति। विसर्जेति।** अभ्यर्हितत्वादस्य पूर्वनिपातः, तत्प्रकरणस्यानित्यत्वाद्वा। द्वयोर्द्वन्द्वं कृत्त्वाग्रे मध्यमपदलोपिसमासत्रयवान्। न्यूनाधिकनिरासपूर्वकं प्राचामनुरोधेनात्यक्रयभाष्यापन्यूनतां नेदं परिगणनमित्याशयेन परिहरति। **एतच्चेति।** पञ्चानामयोगवाहत्वबोधकभाष्यं चेत्यर्थः। ईषत्स्पृष्टयोरित्यनेन तत्र पठितविवृतभिन्नत्वं सूचितम्। ननु मास्त्वचूत्वं तयोर्भानाभावादित्येतद्भाष्ये यथाश्रुतमेवास्त्वत आह। **तथा चेति।** इदमेवावश्यकमिति भावः। नन्वट्यपि क्व पाठः कार्य

'धनक्रीता' इत्यादिसिद्ध्यर्थमनित्यताया वक्ष्यमाणत्वात् ''पाशकल्प'' (का०वा०) इत्यादिपरिगणनाच्च। 'प्रोम्भणम्' ''अट्कुप्वाङ्'' (पा०सू० ८-४-२) इति सूत्रे नुम्ग्रहणं न कर्त्तव्यं भवति।

अत्रेदमवधेयम् – अट्सु क्रियमाण उपदेशोऽकारानन्तरमिकारात् प्राक्कर्त्तव्यः। तेनेण्सु अनन्तर्भावात् 'पयःसु यशःसु' इत्यादौ ''इण् कोः'' (पा०सू० ८-३-५७) इत्यधिकृत्य विधीयमानम् ''आदेशप्रत्यययोः'' (पा०सू० ८-३-५९) इति षत्वं न भवति। अक्षु चान्तर्भावात् 'संस्कर्त्ता' इत्यत्रानुस्वारादचः परत्वमाश्रित्य सकारस्य द्वित्वं कैयटेनाष्टमे वक्ष्यमाणं सङ्गच्छते। न चैवं 'हरिः करोति' इत्यादौ ''इको यणचि'' (पा०सू० ६-१-७७) इति यण्प्रसङ्गः, विसर्गस्यासिद्धत्वात्। एवं 'हरिः पश्यति' इत्यादावनुस्वारस्यासिद्धत्वं बोध्यम्।

शर्षु चोपदेशः कर्त्तव्यः। जश्भावस्तावत्प्रयोजनम्। तथाहि, वार्त्तिकमते ''उब्ज आर्जवे'' (तु०प०) इति धातुरुपध्मानीयोपधः पठ्यते। तत्र ''झलां जश् झशि'' (पा०सू० ८-४-५३) इति जश्भावे आन्तरतम्याद्बकारादेशः – ''उब्जिता' 'उब्जितुम्'

---

इत्याशङ्कायां भाष्यानुक्तमपि तदनुमतं सिद्धान्तमाह। **अत्रेदमित्यादिना बोध्यमित्यन्तेन।** इदं वक्ष्यमाणांशो अकारेति प्रथमोपस्थितत्वेनान्तरङ्गत्वादिति भावः। **तेन** तत्र पाठेन। अस्य भवति सङ्गच्छते इत्युभयत्रान्वयः। नाष्टमे अध्याये अक्षु चेति च सङ्गच्छत इत्यग्रे योज्यः। प्रसङ्गात्साधारणं भाष्याद्यनुक्तं दोषमाशङ्कते। **न चैवमिति।** तत्र यणङ्गीकारे इत्यर्थः। एवं विसर्गवत्। बोध्यमित्यस्येतीति शेषः।

## २.३५ अयोगवाहानां शर्षूपदेशफलम्

द्वितीयखण्डार्थमाह। **शर्षु चोपेति। जश्भाव इति।** तदुक्तयोर्जश्त्वषत्वयोर्मध्ये क्रमप्राप्तत्वादादौ शर्षु पाठेन नान्तरीयकतया सफलत्वस्यापि सिद्धत्वेन **झलां जश् झशी**ति जश्भाव इत्यर्थः। इदमपि प्रत्यासत्यानादरे। तदादरे तु अग्रिममेव फलम्। अत एव तस्य परनिपातः। ननु धातोर्दोपधत्वान्नेदं फलमत आह। **तथा हीति।** खण्डयितुमाह। **वार्तिकेति। उपध्मानीयोपध इति।** अयं च स्वतः सिद्धो, न तु शास्त्रकल्पितः, तव नकारजाविति पद्येऽस्याग्रहणम्, क्वचित्पकारः पठ्यते, स उच्चारणार्थो न तु श्रवणार्थ इत्युपध्मानीयस्योपधात्वमक्षतमिति भावः। **पठ्यत इति।** वर्तमानेति भूते लट्। **तत्र** उपध्मानीये। **जश्भावे** तत्प्रसङ्गे। **आन्तरतम्यादिति।**

**शर्षूपदेशाद्धि नान्तरीयकत्वादेव झल्त्वमप्यायाति। भाष्यकारस्तु नैतन्मेने। तथा हि, उपध्मानीयोपधत्वपक्षे 'उब्जिजिषति' इति न सिध्यति, अभ्यासे वकारमात्रश्रवणप्रसङ्गात्। हलादिःशेषेण जकारस्य निवृत्तिः। यदि तु ''पूर्वत्रासिद्धमद्विर्वचने'' (प०आ० १२५) इत्युक्तेः सबकारस्य द्वित्वं तदा स्पष्ट एव बकारस्य शेषः। अथ ''उभौ साभ्यासस्य'' (पा०सू० ८-४-२१) इत्यनेनानित्यताज्ञापनाद् द्विर्वचनेप्यसिद्धत्वमाश्रीयते, ''औजिढत्'' इत्यत्र यथा; तथाप्यभ्यासे उपध्मानीयस्य शेषे ''अभ्यासे चर्च''**

---

स्थानप्रयत्नोभयान्तरतम्यादित्यर्थः। अयुग्मा वर्गयमगा यणश्चेत्यत्रत्यचेन अन्येत्वित्यनेन चाचो ग्रहणात्तत्र चोपध्मानीयस्यान्तर्भूतत्वादिति भावः। ननु शर्षूपदेशे प्रत्यासत्त्या तत्त्वस्यैव लाभेन तत्प्रयुक्तकार्यसिद्धावपि 'शरां जशो भवन्ती'ति लक्षणाभावात् शर्षुपाठस्य फलं कथं जश्त्वमत आह। **शर्ष्विति।** हि यतः। नान्तरीयकत्वस्य झल्त्वव्याप्यत्वेन तत्वं विना तत्वासम्भवेन प्रासङ्गिकत्वात्। अपिना खर्त्वादिसमुच्चयः। **आयाती**त्यस्येतीति शेषः। **नैतत्** उपध्मानीयोपधत्वप्रयुक्तं फलम्। मूले एव कुठारः, तदाह। **तथा हीति।** वकारमात्रेति शेषः। इदमुपलक्षणमग्रे बकारश्रवणापत्तेरपि। मात्रपदेन तत्रैवेष्टजकारश्रवणव्यावृत्तिः। तदाह। **हलादीति।** निर्विसर्गपाठे हल् आदिः शेषेणेत्यर्थः। सविसर्गपाठे सूत्रानुकरणम्। तथा चोबिब्जिषतीति रूपं स्यादिति भावः। ननु द्वित्वं प्रति तस्यासिद्धत्वान्न बकारसहितस्य द्वित्वं, किन्तु ततः प्राक्। एवं **हलादिः शेष (पा०सू० ७-४-६०)** इति शेषोऽपि। अत एवाभ्यासे जश्त्वं दुर्लभम्, झश्परत्वाभावादिति नायं दोष इत्याशङ्कायामुभयपक्षेऽप्युक्तं दोषं दृढयन्नादौ **पूर्वत्रासिद्धीयमद्वित्वे** (प. १२६) इत्यङ्गीकारे आह। **यदि हीति।** हिर्वाक्यालङ्कारे। यत् पूर्वत्रासिद्धीयं तत्राद्वित्वे इत्युपतिष्ठत इति तदर्थः। गहादित्वाच्छः। तदधिकारभवं शास्त्रमेतस्या लिङ्गम्। पूर्वत्रासिद्धं यद्वीत्यपाठः। तत्र तदुपस्थितौ द्वित्वभिन्ने पूर्वत्र कर्तव्ये परमिदमसिद्धमिति तत्तत्सूत्रार्थः। द्वितीयपक्षे आह। **अथेति। अनित्यतेति।** उक्तपरिभाषाया इति भावः। **असिद्धत्वमिति।** पूर्वत्रासिद्धमित्यनेनेति भावः। **औजिढदिति।** अन्यथा ओडिढदिति स्यादिति भावः। **तथापी**त्यस्य तथा सत्युपध्मानीयसहितस्याद्वित्वे उपलक्षणतया तयोरपि तत्वाङ्गीकारे चेत्यर्थः। **तयोः** वार्तिकविहितऋकारलृकारयोः। अन्यथाऽन्यत्र तयोः पाठाद्यनुक्त्या तदसङ्गतिः स्पष्टैवेति भावः। इदं **नारायणा**द्यनुरोधेन। वस्तुतस्तयोर्न तत्त्वं, किन्तु वाचनिकमेवाच्त्वम्। अत एव वक्ष्यामीत्याद्युक्तिसङ्गतिः। यद्यपि एतेषामुक्तत्वेऽपि एतेषु तयोः पाठस्य कृतत्वेन करिष्यमाणत्वाल्लट्सङ्गतिः, तथापि तयोः प्रयोगविशेषनिष्ठत्वेन बहुप्रयोगानिर्वाहकत्वेन तत्संज्ञायां मानाभावो गौरवं च। किञ्चायोगवाहानामलिण्त्वाया-

**(पा०सू० ८-४-५४) इति जश्त्वेन बकार एव श्रूयेत। इष्यते त्वभ्यासे जकार इति प्राञ्चः। वस्तुतस्तु द्वितीयपक्षे उपध्मानीयमात्रमभ्यासे श्रूयेत तच्चोच्चारयितुमप्यशक्यम्। जश्त्वं तु दुर्लभं, 'प्रकृतिचरां प्रकृतिचर' इत्यष्टमे सिद्धान्तयिष्यमाणत्वात्, उपध्मानीयेऽच्त्वस्यापि सत्त्वेन तावन्मात्रद्वित्वापत्त्याऽभ्यासे इकारदौर्लभ्याच्च।**

---

कारोत्तरपाठेन तयोरण्त्वापत्त्याहो लृकारादौ रपरत्वापत्तिरिति यथाश्रुतमेवात्रत्यं भाष्यं युक्तमिति बोध्यम्। नन्वफलत्वादच्त्वं नेति तस्यैवासङ्गत्यैतत्सङ्गतिरेवात आह। [१]**तदिति।** तस्याच्त्वस्य फलमित्यर्थः। **तत्रैवेति।** तुल्यस्यसूत्रे एवेत्यर्थः। होतृकारादौ प्लुतादिरूपमिति भावः। नन्वन्येषां योगादितः स्पष्टत्वेऽपि यमाः केऽत आह। **तत्रेति।** पञ्चानां मध्ये इत्यर्थः। एवं पदार्थमुक्त्वा खण्डशो वाक्यार्थे प्रतिपादयन्, शेषपूरणं तु न युक्तं, वाक्यभेदापत्तेः, तदुपपादयति। **उर इत्यादि। अडित्यस्यात्रेत्यादिः। उपध्मानीयैरिति।** प्रत्येकमिति शेषः। ननूरःकेणेत्यादावज्ञातादौ कप्रत्ययसत्वेनापदादिकवर्गपरत्वात्सोपदादावित्यस्य प्रसङ्गेन विसर्गघिभावान्न तत्फलमत्रात आह। **अयमिति।** पिबतेः शस्य विधानादाह। **पातीति। नुपसर्गेक इत्यस्येति।** क इति शेषः। नन्वेवमपि **कुप्वो**रिति सूत्रेण तयोरेव विधेर्विसर्गोल्लेखः कथमत आह। **कुप्वोरिति। पाक्षिक इति।** तथा च जिह्वामूलीयोपध्मानीयाविति पूर्वोक्तचतुर्षु त्रयाणां फलं युक्तमेवेति भावः। **चैवमपि** कप्रत्ययाभावेऽपि। **अभ्युपेति।** गतीति परिभाषयेति भावः। **प्रवर्त्तेतेतीति।** प्रवर्त्तेतैवेत्यर्थः। **तस्य** अभ्युपगमस्य। अन्यथा तत्र षत्वङीषाद्यापत्तिरिति भावः। ननु पदादादिरिति व्याख्यानाद्बहुल-ग्रहणाच्च तेषां सिद्धावनित्यत्वे न फलमत आह। **पाशककेति।** अस्यात एवेत्यादिः। **प्रणयनाच्चेति।** वृत्तिकारादिभिरिति शेषः। परिगणनाच्चेति क्वचित्कोऽपपाठः। 'सम्भवप्रदर्शनमेतन्न तु परिगणनम्, अन्यस्यासम्भवादि'ति [२]**मनोरमा**विरोधात्। न च प्रागुक्ते उरः केणेत्यादावुक्तरीत्या तत्सम्भवात्सैव चिन्त्येति वाच्यम्। अपदे इत्युक्त्यैव कुप्वोरित्यनुवर्त्य यस्मिन् विधिरित्येतेनाल्ग्रहणे इत्यस्याल्मात्रबोधके इत्यर्थकेन कवर्गादावपदे इत्यर्थेन सिद्धे आदिग्रहणसामर्थ्येन तल्लब्धावधारणेन च पदत्वयोग्यप्रातिपदिकानवयवस्यैव तस्य ग्रहणादिति भावः।

अनुस्वारांशे भाष्याद्यनुक्तमपि फलमाह। **प्रोम्भणमिति।** नन्विदं नुम्ग्रहणेन नान्यथासिद्धमत आह। **अडिति।** व्यापकत्वादिति शेषः। **तस्य शेषे अभ्यासे चर्चेति।** जश्त्वेन वत्वादिति भावः। एवव्यवच्छेद्यो जकारः। अत एवाह। **जकार इति।** सोऽपीत्यर्थः।

---

१. प्रकृतमुद्रिते कौस्तुभे एतत्प्रतीकमारभ्य वस्तुतस्त्विति प्रतीकावधिकं विद्यमानानि प्रतीकानि न सन्ति। मूलमन्वेषणीयमस्ति। २. प्रौ.म.पृ.सं. २१० (सोऽपदादौ (पा०सू० ८-३-३८) सूत्रे)

**किञ्च अत्र पक्षे अस्मात् घञि कृते उपध्मानीयस्य जश्त्वे 'अभ्युब्जाः' 'समुब्जाः' इति स्यात्। इष्यते तु 'अभ्युद्गः' 'समुद्गः' इति। नन्वत एव ''कुप्वोः'' (पा०सू० ८-३-३७) इत्यधिकारे ''सोपदादौ'' (पा०सू० ८-३-३८) इति सूत्रे 'उपध्मानीयस्य च' इति वार्त्तिकेन कवर्गे परत उपध्मानीयस्य सकारो विधीयते। ततो जश्त्वेन दत्वं विधीयते इति**

---

इदमुपलक्षणमग्रे जकारमात्रश्रवणस्यापि। प्राञ्चः कैयटादयः। अनेन सूचितामरुचिं प्रकटयन् सिद्धान्तमाह। **वस्तुतस्त्विति।** मात्रपदेन पूर्वसम्मतजशचौ व्यावर्त्येते। दोषान्तरमाह। **तच्चेचेति।** अत एव चः प्रयुक्तः। स च व्युत्क्रमे। तत्राद्ये हेतुमाह। **जश्त्वं त्विति।** अभ्यासे चर्चेति जश्त्वं हीत्यर्थः। तथा तन्निवृत्त्या तच्छ्रवणमिति तन्मात्रश्रवणे हेतुरयं सम्पन्नः। अत्र हेतुमाह। **प्रकृतीति।** तथा च तेन चर्त्वेऽप्यान्तरतम्यादुपध्मानीयस्योपध्मानीय एव स्यादिति भावः। अन्त्ये हेतुमाह। **उपध्मानीय इति।** अपिना हल्त्वादिपरिग्रहः। मात्रपदेनेकारव्यावृत्तिर्न तु जकारस्य, उत्तरावधिकस्य द्वित्वात्तदाह। **इकारेति।** तथा च तच्छ्रवणे एवायमपि हेतुरिति न चासङ्गतिरिति भावः। **दौर्लभ्याच्चेति।** तस्य द्वित्वाभावेनाश्रवणादिति भावः। अत्र यद्यपि द्वितीयपक्षे इत्युक्त्या आद्यपक्षे कैयटाद्युक्तदोषसाङ्गत्यमुक्तप्रायम्, तच्चोक्तरीत्या स्फुटमेव, तथापि पक्षद्वयसाधारण्येन प्रवृत्ततद्ग्रन्थासङ्गतिरेवेति बोध्यम्। न चाद्यपक्षेऽपि यद्यपि परत्वादन्तरङ्गत्वाच्च पूर्वजातजश्त्वस्य द्वित्वेऽसिद्धत्वात् सवकारस्य द्वित्वं, तथापि **हलादिः शेष** (पा०सू० ७-४-६०) इति शेषे तस्यासिद्धत्वस्य दुर्वारत्वेनोपध्मानीयस्य शेषे पूर्ववज्जश्त्वाप्राप्त्या तस्यैव श्रवणापत्तिरिति पक्षद्वयेऽपीति वाच्ये कथं च तत्पक्षे तत्साङ्गत्यमिति वाच्यम्। यथा द्वित्वे पूर्वत्र कर्त्तव्ये परस्यासिद्धत्वं नेति तत्तदर्थस्तथा [१]...... त्यादिभाष्योक्तल-क्ष्यसिद्ध्यर्थं द्वित्वे कृतेऽपि द्वित्वाश्रयस्य कार्ये कर्तव्ये तस्य तत्त्वं नेत्यपि तत्तदर्थेनाकारादावसि-द्धत्वेन जश्त्वनिवृत्तावुभयोः प्राप्तौ तथाऽसिद्धत्वाचारणे जश्त्वे सत्वे च तद्वत् हलादिः शेष इत्याशयादिति दिक्।

अत्र भाष्याद्यनुक्तमपि भाष्योक्तप्रथमपक्षे तद्ध्वनितं दोषान्तरं **नारायणा**द्यनुरोधेनाह। **किञ्चेति। अत्र पक्षे** उपध्यानीयोपधत्वपक्षे। **अस्मात्** उब्जधातोरुपतापादन्यत्र। **अत एवेति।** अस्मादनन्तरोक्तदोषादेवेत्यर्थः। एतद्दोषनिवृत्त्यर्थमेवेति यावत्। यद्वोक्तहेतोरेवेत्यर्थः। तस्य च प्रागुक्त एवार्थः। उभयथाऽपि विधौ यत इत्यत्रान्वयोऽस्य। अनुवृत्ते सूत्रे साफल्येनात्र पवर्गपरत्वासम्भवादाह। **कवर्गे इति।** तेनोब्जितेत्यादौ न दोष इति भावः। दत्वं सकारस्येति

---

१. अत्र ग्रन्थः त्रुटितः।

**चेत् ? सत्यम्, 'उपध्मानीयस्य च' इति वार्त्तिकारम्भ एव तु गौरवार्ह इति ब्रूमः। वकारोपधोऽयमिति वृत्तिकारमते तु वकारस्य द्वित्वनिषेधः 'समुद्गः' इत्यादौ दकारादेश-श्चेत्युभयमपि वचनेनैव साधनीयं स्यात्। तस्माद्दकारोपध एवायम् 'अभ्युद्गः' 'समुद्गः' इति यथा स्यात्। कथं तर्हि 'उब्जिता' 'उब्जितुम्' इत्यादि सिध्यतीति चेत् ? शृणु, ''भुजन्युब्जौ पाण्युपतापयोः'' (पा०सू० ७-३-६१) इत्यस्मिन्कुत्वाभावनिपातनार्थे सूत्रे बकारोच्चारणेनानुमीयते – उब्जेरकुत्वविषये दकारस्य भकारविधायकं बकारविधायकं वा वचनमस्तीति तच्चानुमीयमानं वचनं 'भ उदुजेः' इति वा 'ब उदुजेः' इति वा। उभयथापि ''स्तोः श्चुना श्चुः'' (पा०सू० ८-४-४०) इत्यस्यानन्तरं कल्पते। उदुजेः स्तोर्दकारस्येति यावत्। श्चुना योगे भकारो बकारो वा भवतीति सूत्रार्थः। उदुजेरिति किम् ? तज्जः। श्चुनेति किम्? अभ्युद्गः, समुद्गः। इह हि ''चजोः कुघिण्ण्यतोः'' (पा०सू० ७-३-५२) इति कुत्वे कृते श्चुना योगो नास्ति, 'स्तोः' श्चुना' इति पदद्वयोपजीवनार्थं चोक्तस्थले एव कल्पनं युक्तम्। अन्यथा बहुतरकल्पने गौरवं स्यात्।**

---

शेषः। **गौरवेति।** एवञ्च दोषद्वयं वार्तिकमते सर्वथा फलितमिति तात्पर्यम्। वस्तुतस्तु अथवा नैतदिति भाष्यात्ततोऽन्यत्र घञाद्यनभिधानत्वाभावाय दोष इत्याद्य एव दोषः। अत एव भाष्ये नोक्तः। एतेन तथा **नारायणा**द्युक्तमप्यपास्तमिति बोध्यम्, दोषतौल्यात्। **वृत्ति**मतमपि खण्डयति। **बकारोपेति। स्यादिति।** तथा च तत्प्रयुक्तं गौरवं, तदनङ्गीकारे इष्टासिद्धिरिति भावः। अनार्षत्वान्निर्मूलत्वं च तस्येत्यपि बोध्यम्। सिद्धान्तमाह। **तस्मादिति।** मतद्वयस्य दुष्टत्वादि-त्यर्थः। **कथमिति।** दोपधत्वपक्षे दस्य जश्त्वेन बो दुर्लभो भिन्नस्थानत्वादिति प्रश्नः। **तर्हि** तदङ्गीकारे। **कुत्वाभावेति।** जकारस्येति शेषः। **अकुत्वेति।** जस्थानिकयथाकथञ्चित्कुत्वाभाव-विषये इत्यर्थः। एवञ्च भाष्योक्तप्रथमपक्षाशयकोऽयं सर्वो ग्रन्थ इति बोध्यम्। अत एवाभ्युद्ग इति वक्ष्यमाणप्रत्युदाहरणसङ्गतिः। भाष्यानुरोधेनाह। **भकारेति।** क्रियालाघवायाह। **बकारेति।** तत्स्वरूपमपि तथैवाह। **तच्चेति।** एवमग्रेऽपि बोध्यम्। चस्त्वर्थे। समविकल्पसूचनाय वा द्वयम्। तत्रापि लाघवादाह। **उभयथेति।** अनुवृत्त्या वाक्यार्थमाह। **उदुजेरिति।** सकाराद्यसम्भवादाह। **दकारेति।** मज्ज इत्यपि प्रत्युदाहरणं बोध्यम्। नन्वभ्युद्ग इत्यादावपि जोऽस्त्येवात आह। **इहेति।** अभ्युद्ग इत्यादौ यतो भकारादेरसिद्धत्वादित्यर्थः। **कृते इति।** तस्य पूर्वत्वेन सिद्धत्वादिति भावः। तदग्रे करणे हृदिस्थलाघवं प्रकाशयति। **स्तोरिति। जीवनार्थं चोक्तेति।** चेन तस्य सिद्धत्वसमुच्चयः। एवञ्चोभयफलसिद्धिः, तत्रैव पाठे तन्मात्र फलसिद्धिस्त्वन्यत्र पाठेऽपीति भावः।

**एवम् 'उब्जिजिषति' इत्यपि सिद्धम् ''नन्द्राः'' (पा०सू० ६-१-३) इति दकारस्य द्वित्वनिषेधात्। न च परत्वाद्भत्वबत्वे, ''पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य'' (भा०इ०) इति वक्ष्यमाणत्वात्। अन्तरङ्गत्वाद्भत्वबत्वे इत्यपि न, असिद्धत्वादेव। न च ''पूर्वत्रासिद्धीयमद्विर्वचने'' (प०भा० १२५) इत्यसिद्धत्वप्रतिषेधः शङ्क्यः, द्वित्वे कर्त्तव्ये सति हि स निषेधः, न तु द्वित्वनिषेधेऽपि। इह तु ''नन्द्राः'' (पा०सू० ६-१-३) इति सूत्रेण द्वित्वनिषेधे कर्त्तव्ये निर्बाधमेवासिद्धत्वमिति दिक्।**

**अथवा माऽस्तु वाक्यशेषानुमानं, ''भुजन्युब्जौ (पा०सू० ७-३-६१) इति निपातनादेव बकारोऽस्तु। न चैवमसिद्धताविरहाद्धकारस्यैव द्वित्वं स्यादिति वाच्यम्, दकारोपधनिर्देशसामर्थ्याज्जिशब्दस्य द्वित्वे कृते ततो दकारस्य बकारप्रवृत्तेः। न**

---

**बहुतरेति।** पदचतुष्टयकरणापत्त्येति भावः। **एवं चोब्जीति।** तत्र तस्य कल्पने चेत्यर्थः। अपिना प्रागुक्तसमुच्चयः। **परत्वादिति।** निषेधादित्यादिः। **भत्वबत्वे इति।** भत्वं वत्वं चेत्यर्थः। यद्वा तेन भत्वं, झलामिति जश्त्वेन बत्वं चेत्यर्थः। एवमग्रेऽपि। **पूर्वत्रेति।** निषेधदृष्ट्याऽसिद्धत्वादिति भावः। **अन्तरङ्गेति।** पूर्वोपस्थितनिमित्तवत्वात् वर्णाश्रयत्वात्प्रत्ययानपेक्षत्वाच्चेति भावः। **असिद्धत्वादेवेति।** कार्यकालपक्षेऽपि त्रिपाद्यं तदप्रवृत्तेर्भाष्यसम्मतत्वादिति भावः। एतेन यथोद्देशे इदमित्येवमेतद्ग्रन्थयोजनमपास्तम्। यथाश्रुतस्यैव युक्ततमत्वात्। हि यतः। उपसंहरति। **इह त्विति।** तुः तस्मादित्यर्थे। **दिगिति।** एतदर्थस्त्वनुपदमेव स्फुटीभविष्यति।

ननु निपातनाल्लक्षणमात्रमनुमितं स्यान्न तु प्रदेशविशेषावच्छिन्नम्, किञ्च गौरवं वचनकल्पनादत आह। **अथ वेति। वाक्यशेषेति।** वाक्यशेषेत्यर्थः। तत्रत्यपदानुवृत्त्या वाक्यार्थसम्पत्तेस्तच्छेषत्वं वा। चैवं निपातनेनैव वत्वाङ्गीकारे। **विरहादिति।** तस्य साप्तमिकत्वादिति भावः। **बकारेति।** अशं आद्यचा तद्विशिष्टस्यैवेत्यर्थः। **निर्देशेति।** धातुपाठे इति भावः। **सामर्थ्यादिति।** आदौ **नन्द्रा** (पा०सू० ६-१-३) इति निषेधप्रवृत्त्येति शेषः। अकुत्वेति प्राग्वत्। इदमुपलक्षणं पदान्तत्वविषये चेत्यपि बोध्यम्। अत एव उदेः क्विपि संयोगान्तलोपो अभ्युदिति सिद्ध्यति। अत एव पक्षयोर्न फलभेद इति केचित्। अन्ये त्वकुत्वविषये निपातना**ज्झलां जशि**त्यनेनानन्तरतमोऽपि बकारो भवतीति विज्ञायते, नत्वपूर्वः क्रियते। तेन न कश्चिद्दोष इत्याहुः। अपरे तु अकुत्वविषये इत्यस्य यथाकथञ्चित्कुत्वाभावविषये इत्यर्थः। स च क्वचित्प्राप्तिपूर्वकः, क्वचिदप्राप्तेरेव, अन्त्योऽपि स्थानिनिमित्तोभयाभावकृतः क्वचिन्निमित्ताभावमात्रकृत इति न दोषः। कुत्वाभावविशिष्टबत्वनि-

**चास्मिन्पक्षे 'अभ्युद्रः' इत्यादावपि बकारप्रसङ्गः, अकुत्वविषये एव बकारो निपात्यते इत्यभ्युपगमात्। नन्वेवं कुत्वविषये चरितार्थत्वात्कथं दकारोपदेशस्य सामर्थ्यमुक्तम्। येन द्वित्वानन्तरमेव बकारः प्रवर्त्तेतेति चेत् ? अनभिधानात्। अतो घञादि माऽस्तु, निपातनं चैवमविशेषेणास्तु। 'अभ्युद्रः' 'समुद्रः' इत्येतन्नोब्जे रूपम्, किन्तु उपसर्गद्वयपूर्वकाद्गमेः ''अन्येष्वपि दृश्यते'' (पा०सू० ३-२-१०१) इति डप्रत्ययः। व्युत्पत्तिमात्रं चेदम्, रूढिशब्दत्त्वात्। ''समुद्रकः सम्पुटकः'' (अ०को० २-६-१३९) इत्यमरः। तदेवमयोगवाहानां शर्षूपदेशस्य जश्त्वाभावरूपं प्रयोजनं वार्त्तिकमतेऽस्ति। भाष्यकारमते तु नास्तीति स्थितम्। तथा षत्वमपि प्रयोजनं सर्पिःषु' 'धनुःषु'।**

---

पातनमिति तु तस्य नार्थः। उब्जितेत्याद्यसिद्ध्यापत्तेरित्याहुः। परे तु अकुत्वविषये इत्यादिभाष्योक्त्या [१]...... क्विबाद्यनभिधानमेवेति न दोषलेश इत्याहुः। **अभ्युपेति।** भगवतेति भावः। **नन्वेवं** उक्तविषये एव बकारनिपातने। **कुत्वविषये** अभ्युद्र इत्यादौ। इदमुपलक्षणं, उक्तरीत्याभ्युदित्यादेरपि इति केचित्। **देशेति।** घटकतयेति भावः। येन सामर्थ्येन। **चेदिति।** सत्यमिति शेषः। अतः उब्जधातोः उपतापातिरिक्तविषये। आदिना घक्विबादिपरिग्रहः। **चैवं** अस्मात् घञाद्यभावे। **अविशेषेणेति।** अकुत्वविषये इत्येवंरूपसङ्कोचाभावेनेत्यर्थः। चो व्युत्क्रमे, स च समासात्तयोः समुच्चये। ननु सर्वसम्मताभ्युद्रादीनां कथमपलापोऽत आह। **अभ्युद्र इति। किन्त्विति। गमेरिति।** शेषो रूपमित्यस्याग्रेऽनुषङ्गः कथमत आह। **उपसर्गेति।** यत इत्यादिः। **द्वयेति।** अभ्युदित्यादीत्यर्थः। **उप्रेति।** नचैवं स्वरभेदापत्तिरिति वाच्यम्। डे कृत्स्वरेणेव घञपि थाथादिस्वरेणान्तोदात्तत्वात्। नत्वभ्युदादिपूर्वस्य गमे रूपे, द्व्यवयवार्थासम्भवेनाभ्युद्गत इत्यादि-भाष्योक्ते तद्व्युत्पत्त्यसङ्गतिरर्थभेदापत्तिरिति भावः। अत एवाह। **रूढीति। सम्पुटक इति।** चण्टे इति महाराष्ट्रभाषायां प्रसिद्धेः। उपसंहरति। **तदेवमिति।** तस्मादुक्तप्रकारेणेत्यर्थः। अस्य स्थितमित्यत्रान्वयः। अत्रेदं तत्वम्। न चास्मिन् पक्षे इत्यादिग्रन्थो भाष्योक्तप्रथमपक्षाश्रयकत्वान्न वास्तवः। एवञ्च प्रागुक्तपक्षभेदाभाव एव। एवञ्चास्तु वेत्याद्युक्तपक्षोऽथापीति कैयटानुरोधी। अथ वा नैतदिति भाष्योक्तसिद्धान्तभूतद्वितीयपक्षाश्रयकः। अकुत्वविषये इति पक्षे तु प्रागुक्त एव समाधिर्भाष्याभिमतः। अत एव तत्र पक्षे तत्सत्वेन क्विबन्ते न दोष इति बोध्यम्। इदमेव ध्वनयितुं दिगिति प्रागुक्तमिति ॥

वार्तिकमतेनाह। **तथा षत्वमपीति।** भाष्यमते त्विदमेवमेव प्रयोजनम्। अत एव तथा

---

१. अत्र ग्रन्थः त्रुटितः।

**''नुम्विसर्जनीयशर्व्यवायेऽपि'' (पा०सू० ८-३-५८) इति सूत्रे विसर्जनीयग्रहणं न कर्त्तव्यं भवति शर्व्यवाये इत्येव सिद्धत्वात्। नुमग्रहणं तूभयथाऽपि कर्त्तव्यमेव। नुम्स्थानिकेनैवानुस्वारेण व्यवधाने यथा स्यात्, इह मा भूत् 'पुंसु' इति। नुम्ग्रहणं हि स्वस्थानिकस्यानुस्वारस्य लक्षकम्, अन्यथाऽसम्भवात्। न हि इण्कवर्गाभ्यामुत्तरः सकारो नुमा व्यवहितः षत्वविधौ सम्भवति, अनुस्वारे षत्वस्यासिद्धत्वादित्याहुः। अस्तु वा स्थानिवद्भावेन नुम्त्वम्, तथापि स्वाश्रयस्यानुस्वारत्वस्यापि सत्त्वात् शर्त्वेनैव सिद्धे नियमार्थता युक्ता। नियमश्च सजातीयापेक्ष इत्यनुस्वारेण व्यवाये चेद्भवति तर्हि नुमैव न त्वन्येनेति फलितम्। वस्तुतस्त्वतिदेशं प्रति अनुस्वारस्यासिद्धत्वादतिदेश एव दुर्लभः**

---

इत्युक्तम्। तस्य च वार्तिकरीत्या इत्यर्थः। अन्यथा तदाधिक्यं स्पष्टमेव। ननु तत्र **वा शरी**(पा०सू० ८-३-३६)ति विकल्पात् सत्वपक्षे शरा विसर्गपक्षे विसर्जनीयेन व्यवधानात्षत्वं तेनैव सिद्धमिति नेदं फलमत आह। **नुम्विसर्जेति।** पुनः पाठो विसर्जनीयग्रहणाल्लघ्विति भावः। केनचिदुक्तं लाघवान्तरं निरस्यति। **नुमिति**। [1]..... लक्षणे। **उभयथापि** शर्षुपाठेऽपाठे च। ननु तत्र पाठे विध्यर्थमावश्यकत्वेऽपि पाठे सषृनुमो नश्चेत्यनुस्वारस्यापि नियतत्वेन सर्पींषीत्यादौ अनुस्वारे कृते तस्य शर्त्वात्तद्व्यवाये षत्वसिद्धेर्नुमग्रहणमपि न कर्तव्यमेवात आह। **नुम्स्थानीति।** एवञ्च नियमार्थमावश्यकमिति भावः। इति इत्यत्र। उक्ततथानियमोपपत्तिमाह। **नुमग्रहणं हीति।** यत इत्यर्थः। **अन्यथा** लक्षणानङ्गीकारे। असम्भवमेव विशिष्याह। **न हीति। षत्वविधौ** तस्मिन् कार्ये। लक्ष्ये इति शेषः। षत्वविधिनिमित्तभूत इति यावत्। यद्वा बहुव्रीहिः, लक्ष्ये इत्यर्थः। **अनुस्वारे इति।** कर्त्तव्य इति शेषः। अनुस्वारं प्रति षत्वस्यासिद्धत्वेन षत्वात्पूर्वं तस्य प्रवृत्तेरित्यर्थः। **आहुरिति। दण्डि**प्रभृतय इत्यर्थः। अनेनारुचिः सूचिता। तद्बीजं त्वादौ तदभ्युपेत्य स्थानिवद्भावेन नुम्त्वादसम्भवोऽनुपपन्न इतीदमयुक्तमिति। अत एव तदीयं पक्षान्तरमाह। **अस्तु वेति।** 'नुम्विसर्जे'ति सूत्रे नुम्इति समुदायाश्रयणेनाल्विधित्वादिति भावः। **स्वाश्रयेति।** पूर्वसूत्रेण स्थानिप्रयुक्तातिदेशो नादेशप्रयुक्तानिवारणमिति भावः। चस्त्वर्थे। **सजातीयेति।** युक्त इति शेषः। औचित्यादिति भावः। इतिर्हेतौ। **नुमैवेति।** आतिदेशिकनुम्त्वकेनाऽनुस्वारेणैवेत्यर्थः। नुम्स्थानिकेनैवेति यावत्। तथा च नुमादिस्थानिकोऽनुस्वारो व्यावर्त्त्य इति भावः। **फलितमिति।** इति सामर्थ्याल्लक्षणया तथार्थाङ्गीकारेण तदावश्यकत्वं युक्तमितीति शेषः। इदमपि न युक्तमिति **नारायणा**द्यनुरोधेनाह। **वस्तुतस्त्विति।** यद्यपीति शेषः। यद्यपि नुम्त्वस्य स्थान्यलूधर्मत्वेन

---

१. अत्र ग्रन्थः त्रुटितः। नुम्विसर्जनीयलक्षणे इति पाठेन भाव्यमिति भाति।

**'सुहिन्सु' इत्यादौ विधायकत्वसम्भवे नियामकत्वानुपपत्तिश्च, तथापि लक्ष्यानुरोधाल्लक्षणेत्येव शरणम्, यथाऽट्कुप्वाङ्सूत्रे। तत्र प्रेन्वनादौ णत्वं मा भूत्, प्रोम्भणादौ च स्यादित्येवमर्थं लक्षणेति चेत् ? इहापि 'सुहिन्सु' 'पुंसु' इत्यादौ मा भूदिति तुल्यम्। णत्वविधावनुस्वारमात्रे लक्षणा षत्वे तु नुमस्थानिक एवेत्यन्यदेतत्। अस्मिंश्च पक्षे शर्षूपदेशेऽपि झल्त्वमिव हल्त्वयत्वे अपि नान्तरीयकत्वादेव सिद्धे। तत्फलं तूत्तरवार्तिकव्याख्यानात्समन्तरमेव स्फुटीभविष्यति। तथा खर्त्वमपि। तेन ''कुप्वोᳶकᳶपौ च'' (पा०सू० ८-३-३७) इति सूत्रान्तर्गतो विसर्गः सिद्धः। एवञ्च**

निषेधात्तदप्रवृत्तिरित्यपि सुवचम्, तथापि मूले एव कुठार इत्याशयेनाह। **अतिदेशं प्रतीति।** स्थानिवद्भावरूपातिदेशं प्रतीत्यर्थः। तथा चासम्भवादुपलक्षकत्वं तदुक्तं युक्तमिति भावः। ननु चिन्त्यमेतत्, पूर्वत्रासिद्धे नेत्यस्य न पदान्तेति वाक्यशेषत्वेनाचः परेत्यस्यैव निषेधकत्वं, न पूर्वसूत्रस्येति पूर्वसूत्रं त्रिपाद्यामपि प्रवृत्तेरि**दुदुपधे**ति सूत्रे **मनोरमायां** स्पष्टत्वात्। अन्यथा तद्विरोधापत्तेश्च। एवञ्च तत्सम्भवेनासम्भवोक्तिरयुक्ता। न चैवमप्युक्तरीत्या नियामकत्वं सुवचमेवेति वाच्यम्। अतिदिश्यमानधर्म [1].... त्यनेन तथा दुर्वचत्वात्, कार्यशब्देन शास्त्रतात्पर्यं [1]..... । एवञ्चासम्भवो युक्त एवेति बोध्यम्। अथेदमपि खण्डयन्नुभयसाधारणनिष्कृष्टं दोषमाह। **सुहिनिति।** इण्कवर्गाभ्यामुत्तरस्य सकारस्य नुमा व्यवहितस्यात्र सम्भवादिति भावः। **लक्ष्यानुरोधादिति।** वस्तुतस्त्वनुस्वारविशेषणं नुम्ग्रहणमिति भाष्यव्याख्यानात्तत्तत्स्थानिकानुस्वारोपलक्षकम्। सुहिन्सु इत्यादेस्त्वनभिधानं तत एव। एवं तु प्रथमदण्डिग्रन्थो युक्त एवेति बोध्यम्। लक्ष्यानुरोधमेवोभयत्र क्रमेणाह। **तत्रेति।** अट्कुप्वाङित्यत्रेत्यर्थः। चस्त्वर्थे। **इहापि** नुम्विसर्जनीयेत्यत्रापि। **भूदिति।** सर्पिषीत्यादौ स्यादित्यपि बोध्यम्। द्वयोर्विशेषमाह। **णत्वेति। न्यदेतदिति।** लक्षणाया अविशेषेण दृष्टान्तत्वसम्भवादिति भावः। आद्यरीत्याऽह। **अस्मिंश्चेति।** हलां मध्ये शर्ष्वेवोपदेश इति पक्षे इत्यर्थः। यद्वा फलविशेषोद्देशेन तत्प्रतिपादकपक्षे इत्यर्थः। झल्त्वस्य प्रागुक्तत्वादत्र दृष्टान्तता। **तत्फलं** हल्त्वयत्वफलं। **व्याख्यानादिति।** ल्यब्लोपे पञ्चमी। व्याख्यानमभिसमीक्ष्येत्यर्थः। यद्वा हेतुपञ्चम्येव। व्याख्यानकरणाद्धेतोरित्यर्थः। विशेषं वक्तुं तत्रानुक्तमन्यदप्याह। **तथेति।** हल्त्वादिवदित्यर्थः। नान्तरीयकत्वादेव सिद्धमिति शेषोऽग्रे। अत एव तत्फलमप्याह। **तेनेति।** तस्य तवासिद्धत्वेनेत्यर्थः। **सिद्ध इति।** जिह्वामूलीयस्य खर्त्वात्। तथा च तस्य शर्त्वात्सत्वापवादत्वात्खर्परे शरीति विसर्गलोपः। इदं च निर्विसर्गपाठे। सविसर्गपाठे

१. अत्र ग्रन्थः त्रुटितः।

**सौत्रनिर्देशेनैवोक्तवार्त्तिकस्यार्थो ज्ञाप्यते इति बोध्यम्। अनेन सौत्रं विसर्गग्रहणमेवोपष्टभ्य शर्षूपदेशं प्रत्याचक्षाणा यथाश्रुतमट्सूपदेशपरं वृत्तिग्रन्थं व्याचक्षाणाः परास्ताः, अट्सूपदेशेनाल्त्वाच्त्वयोर्लाभेऽपि हल्त्वयत्वालाभात्, तत्फलस्य च वक्ष्यमाणत्वात्। न चाट्स्वेव यकारोत्तरमुपदेशात्तल्लाभ इति वाच्यम्, तथा सति 'पयःसु' इत्यादाविणः परत्वेन षत्वापत्तेः, अच्त्वासिद्ध्या ''समः सुटि'' (पा०सू० ८-३-५) इत्यत्रत्यकैयटादिग्रन्थविरोधापत्तेश्चेति दिक्।**

**अविशेषेणेत्यादि वार्त्तिकस्यायमर्थः - यत्र यत्र प्रदेशे प्रयोजनं दृश्यते तत्र**

---

तु लोपस्य वैकल्पिकत्वादभावे सत्वापवादत्वा**द्वा शरी**ति विसर्ग इति बोध्यम्। **एवञ्च** उक्तरीत्या सौत्रद्विविधनिर्देशसिद्धौ च। **स्यार्थ इति।** द्वितीयखण्डस्यार्थ इत्यर्थः। तथा च शरंशेनापूर्ववार्तिकं ज्ञापकस्य सामान्यापेक्षत्वादिति भावः। **सौत्रेति।** सूत्रत्वाद्विसर्ग इति भावः। सौत्रमिति व्यस्तपाठः क्वचित्। सविसर्गपाठाभिप्रायेणेदम्। एवेन तत्रौपदेशिकत्वनिरासः। प्रत्या**चक्षाणा इति।** जश्त्वस्याफलत्वस्योक्तत्वात् षत्वे विसर्जनीयग्रहणस्य कृतत्वाच्चेति भावः। अनेनेत्यस्यार्थमाह। **अडिति**। तथा च वृत्त्यादीनां न्यूनतेति भावः। ननु तयोर्न फलमत आह। **तत्फलेति।** चोऽग्रे योज्यः। तत्र तां परिहरन् शङ्कते। **न चेति।** एवेन शर्व्यावृत्तिः। **तल्लाभः** हल्त्वयत्वलाभः। **तथा सति** यकारोत्तरपाठे सति। **पयःस्विति।** प्रतिपादितमनुपदमेवैतत्सर्वम्। षत्वार्थं शर्षूपदेशस्य भगवता प्रतिपादितत्वेन तद्विरोधापत्तेश्च, अविशेषेणेत्यादिभाष्यस्यासंगत्यापत्तेश्चेत्यपि बोध्यम्। तदाह। **दिगिति।।**

## २.३६ 'अविशेषे संयोगोपधासंज्ञाऽलोन्त्यद्विर्वचनस्थानिवद्भावप्रतिषेध' इति वार्तिकखण्डार्थनिरूपणम्

तृतीयखण्डार्थमाह। **अवीति।** नन्वविशेषेणेत्यस्य यदि चतुर्दशसूत्र्याः पूर्वमनन्तरं वा पाठेन सूत्रविशेषानाश्रयणेनेत्यर्थः तर्हि तत्तत्प्रत्याहारासन्निवेशात्कथं तन्निबन्धनकार्यप्रवृत्तिरत आह। **यत्र यत्रेति।** यद्यत्प्रदेशस्थप्रयोजनसाधनमुद्देश्यं दृश्यते, तत्तत्प्रदेशस्य सफलप्रयोजनोद्देशेनाट्शरोरुपदेशः कार्य इत्यर्थः। तथा चाविशेषेणेत्यस्य प्रागुक्तप्रयोजनविशेषनिर्देशं विना तत्रैव स कार्य इत्यर्थः। एवञ्च वाशब्दाभावेऽपि विकल्पोऽनेन प्रतिपाद्यत इति भावः। अस्य **नारायणा**द्यनुरोधेन यथाश्रुतार्थस्तु न युक्त इति स्पष्टीकृतं **छायायां** तत एव बोध्यम्। द्वन्द्वान्ते श्रूयमाणत्वात्संज्ञाशब्दस्य प्रत्येकं

---

१. छाया. पृ.सं. १३० (प्रथमो भागः)

**तत्रोपदेशः कर्त्तव्यः, प्रयोजनानि तु संयोगसंज्ञादीनि पञ्चेति। तथाहि, वार्त्तिकमते उब्जेरुपध्मानीयोपदतया उपध्मानीयस्य हलूसंज्ञां विना संयोगसंज्ञा न सिद्ध्यति। जश्त्वं त्वसिद्धम्। ततश्च ''संयोगे गुरु'' (पा०सू० १-४-११) इति गुरुसंज्ञाया अपि विरहाद् 'उ३ब्जक' इत्यत्र ''गुरोरनृतः'' (पा०सू० ८-२-८६) इति प्लुतो न स्यात्। तस्मात्प्लुतगुरुसंज्ञाहलूसंज्ञानामुत्तरोत्तरसापेक्षतया प्लुतसिद्ध्यर्थं हलूसंज्ञा एषितव्या। तदेतदभिप्रेत्योक्तम् — ''संयोगसंज्ञा प्रयोजनम्'' इति। तथोपधासंज्ञाऽपि प्रयोजनम् — 'निष्कृतं' 'दुष्कृतम्' ''इदुदुपधस्य च'' (पा०सू० ८-३-४१) इति षत्वं यथा स्यात्। भाष्यकारस्त्वाह - इदुदुपधस्थानिको यो विसर्ग इति व्याख्यानान्नेदं प्रयोजनम्, उपधाग्रहणप्रत्याख्यानाद्वा। इदुद्भ्यां परस्य विसर्गस्येत्येवेष्टसिद्धिरिति।**

---

सम्बन्ध इत्याशयेनाह। **संयोगसंज्ञेति।** इतिस्तदर्थसमाप्तौ। **संयोगेति।** तदाद्योर्वर्णयोरिति भावः। ननु तस्य जश्त्वेन बत्वे सति तस्य हलूत्वात्स सुलभोऽत आह। **जश्त्वं त्वसिद्धमिति।** संयोगसंज्ञां प्रतीति शेषः। इष्टापत्तिं परिहरति। **ततश्चेति।** संयोगसंज्ञाया अभावात्त्वित्यर्थः। अपिना तस्या एव समुच्चयः। **उ३ब्जक इति।** तत्र सम्बोधनमात्रं, न तु सम्बोधनविभक्तिनियामकमिति भावः। उपसंहरति। **तस्मादिति।** सूत्ररीत्योक्तं वार्तिककृता, न तु तस्याः स्वतः फलत्वम्, [१]...... नत्वाद्धलूसंज्ञाफलत्वं चेति भावः। एवमग्रेऽपि बोध्यम्। इतिराद्यफलप्रतिपादनसमाप्तौ। अत्र वार्तिकमते इत्युक्त्या प्राग्वद्दोपधत्वे भाष्यसम्मतेनैतत्प्रयोजनमिति सूचितम्। वार्तिकमतेनैवाह। **तथेति।** संयोगसंज्ञावदित्यर्थः। **इदुदुपेति।** वार्तिकमते इदुदुपधस्य विसर्जनीयस्येत्यादिः। सूत्रार्थविसर्गस्यालूत्वे हि इकारादेरुपधत्वमिति भावः। **इदुदुपधस्थानिक इति।** इदुतौ उपधे यस्य सकारस्थानिकस्वाभाविकरेफान्यतरस्य सस्थाना यस्य स यो विसर्गस्तस्येत्यर्थः। यद्यपि भाष्ये सकारो विशेष्यत इत्युक्तम्। तथापि तद्विसर्गस्थान्युपलक्षणमित्येतत्तात्पर्यम्। एवञ्च निरादेरपि निष्कृतमित्यादि सिद्ध्यति। अत एव पक्षान्तरेणाविरोधः। अन्यथा तत्र पक्षे षत्वमत्र पक्षे नेति स स्पष्ट एव। निष्कृतमित्यादौ सुबुत्पत्तेः पूर्वं समासेऽपि **इणः ष** (८-३-३९) इति न। पाशादिष्वेव तत्प्रवृत्तेः। एतेन **इणःष** इत्यनेनैव तस्य सिद्धेस्तथैव व्याख्यानं तस्यास्त्वित्यपास्तम्। तथा च तस्यालूत्वात्तस्य तत्वं सुलभमिति भावः। सकारादिस्तत्वेनाप्रकृतत्वादहलूत्वाच्चाह। **उपधेति।** ख्यानाद्वेत्यस्यापि नेदमित्यत्रैवान्वयः। प्रत्याख्यानप्रकारमाह। **इदुद्भ्यामिति।** इति भाष्योक्तिसमाप्तौ ॥

---

१. अत्र ग्रन्थः त्रुटितः।

**अलोन्त्यविधिश्च प्रयोजनम् - 'वृक्षस्तरति'। विसर्जनीयान्तस्य पदस्य स इति पक्षे अन्त्यस्य सत्वं यथा स्यात्। पदस्य यो विसर्जनीय इति व्याख्यानात् ''निर्दिश्यमानस्य'' (पा०सू० १२) इति परिभाषया वा सिद्धत्वादिदमपि न प्रयोजनम्। द्विर्वचनं च प्रयोजनम्। 'उरः कः, उरः पः' ''अनचि च'' (पा०सू० ८-४-४७) इत्यच उत्तरस्य यरो विधीयमानं द्वित्वं सिद्धं भवति। तथा स्थानिवद्भावप्रतिषेधोऽपि प्रयोजनम्। यथा 'उरः केण' इत्यादौ अड्व्यवायेति णत्वं सिद्धं भवति। एवं 'व्यूढोरस्केन' इत्यादावपि प्राप्नोपि स्थानिवद्भावात्सकारस्य तत्र ''अनल्विधौ'' (पा०सू०ए० १-१-५६) इति प्रतिषेधोऽलूत्वे सति सिध्यति। न च ''पूर्वत्रासिद्धे न स्थानिवत्''(भा०इ०) इति निषेधोऽस्त्विति वाच्यम्, न पदान्तसूत्रशेष-भूतस्य तस्य ''अचः परस्मिन्'' (पा०सू० १-१-५७) इत्येतद्विषयकत्वात्।**

---

**अलोऽन्त्यविधिरिति।** अलोऽन्त्येति सूत्रैकदेशानुकरणम्, तच्छब्दोपलक्षितो विधिरिति कर्मधारय इति भावः। चो वार्तिकमते पूर्वपरफलसमुच्चायको, भाष्यमते परमात्रफलसमुच्चायकः। तथा चेदमपि वार्तिकमतेनैवेति बोध्यम्। **पदस्य स इति।** पदस्येत्यस्याधिकारात्तस्य च विशेष्यत्वस्यैव **पदाङ्गाधिकारे** (परि. २९) इत्यनेन सति सम्भवे बोधितत्वादिति भावः। अनेन पूर्वत्र भाष्योक्तपक्षद्वयमपि तत्परिभाषा सम्भवतीति द्वयोरनाश्रयणेन तयोराश्रयणे त्वीदृश एव अध्वा तत्रापि बोध्य इति सूचितम्। इति पक्षे सिद्धान्तभूते यथा स्यादिति। अन्यथा सर्वादेशः स्यात्। अलां मध्येत्यस्याल इत्यर्थे त्वकारस्य स्यादिति भावः। **व्याख्यानादिति।** नन्वयुक्तमेतत् पदाङ्गाधिकारे इत्यादिविरोधादत आह। **निर्दिश्येति।** एवञ्चालोऽन्त्यसूत्राप्रवृत्तावपि न दोष इति भावः। **द्विर्वचनमिति।** विसर्गजिह्वामूलीयादेर्द्विरुच्चारणे विशेषस्याप्याग्रहेऽप्युच्चारणस्य कर्तुमशक्यत्वेऽपि च शास्त्रप्राप्तिमात्रेणैतत्प्रयोजनकथनमिति बोध्यम्। च प्राग्वत्। **उरः क इति।** व्युत्पत्तिः प्राग्वत्। **इदं** यर्त्वस्य फलं चेति। अनेन सूत्रेण तस्य विधित्वमपि अत्रत्यभाष्यादितः। **तथेति।** द्वित्ववदित्यर्थः। अपिः पूर्वद्वित्वस्यैव समुच्चायकः। तदुपपादयति। **यथेति। सकारस्येति। सोपदादा**(८-३-३८)विति विहितस्येत्यर्थः। अट्त्वादिति शेषः। तत्राट्त्वं तु प्रागुक्तरीत्या वर्त्तत एव। अत एव तत् दृष्टान्ततयोक्तम्। तत्रासकारव्यवायेन प्राप्तिविषये णत्वे लक्ष्ये वा। **लूत्वे सतीति।** विसर्गस्येत्यादिः। तेनानिषेधेऽपि प्रकारान्तरेण सिद्ध्येदमपि न फलमित्याशयेनाशङ्कते। **न चेति।** ननु स वाचनिको न्यायसिद्धो वा, तत्राद्ये आह। **न पदान्तेति।** तत्सूत्रस्य तद्विषयकत्वात्तच्छेषभूतस्य तस्यापि तत्वं, न त्वाद्यसूत्रविषयकत्वमिति

**स्थानिवद्भावं प्रति त्रिपादीस्थस्यासिद्धतया न्यायसिद्धं तदिति पक्षे तु नेदं प्रयोजनम्। 'उरः केण' इति णत्वं 'संस्कर्ता' इत्यत्र सकारस्य द्वित्त्वं चाधिकं प्रयोजनं बोध्यमिति दिक्। यद्यपि सर्वमिदमट्शरोरुपदेशेन सिद्ध्यत्येव, तथापि वार्त्तिकाक्षररचनाया द्वेधापि सम्भव इति भावः ॥**

---

भावः। अन्त्ये आह। **स्थानीति।** अचः परेति स्थानिवद्भावं प्रतीत्यर्थः। तदा तद्वदाद्यस्यापि युक्तितौल्येन त्रिपाद्यामप्रवृत्तेरिति भावः। इदं च **नारायणा**द्यनुरोधेनोक्तम्। वस्तुतश्चिन्त्यमिदम्, प्रागुक्तयुक्तेरत इति शेषः। अत्र पक्षे पूर्ववार्तिकद्वयाभावात्। अत एवेदं भाष्ये अथ वाऽविशेषेणेत्येव व्याख्यातमिति भावः। वस्तुतस्तु इदमपि चिन्त्यम्। लक्ष्यविशेषे द्वित्वरूपफलस्योक्तत्वेन लक्ष्येतरेऽप्युक्तप्रायत्वेनानाधिक्यात्। अविशेषेणेति वार्तिकाशयस्योक्तत्वेन णत्वस्य तत एव सिद्ध्या तत्राप्यतत्वाच्च। अत एव तस्य पूर्वं दृष्टान्ततयोल्लेख इति बोध्यम्। ननु सिद्धान्ते अट्कुप्वित्यस्य नियामकत्वेन तदन्यसकारव्यवायादेव तदभावे सिद्धे किमत्र तन्निषेधप्रवृत्त्येति चेन्न अतिदिश्यमानधर्मेति न्यायेन तथा प्रपञ्चत्वात्। [१]तन्निषेधाभावे सस्य स्थानिवत्वेनाद्वित्वे तदनन्यत्वादिति तु **रत्नकृत्**। तदेवं वार्तिकमते फलपञ्चकमधिकम्, भाष्यमते फलद्वयमेवाधिकम्। तत्रापि चरममयुक्तम्। एतेन तथा **नारायणा**द्युक्तमपास्तमिति स्पष्टीकृतं **छायायाम्।** तदाह। **दिगिति।** तदेतद् ध्वनयन् लाघवात् प्रथमोपस्थितत्वाज्जश्त्वांशे तथावश्यकत्वाच्चायं पक्ष एव युक्त इत्याशयेनाह। **यद्यपीति।** सर्वमिदं अनन्तरोक्तप्रयोजनजातं। अट्शरोरित्यस्य तयोरेवेत्यर्थः। सर्व वाक्यमिति न्यायात्। **सिद्ध्यत्येवेति।** जश्त्ववन्नान्तरीयकतया तेषां सिद्धत्वादित्यर्थः। तथा च फलोद्देशस्य तत्रोपलक्षणतेति भावः। एवेनासिद्धिनिरासः। तथा चाविशेषेणेत्यादिना मतान्तरं न वाच्यम्, वार्तिके तु विशेषेणेति छेदेन तस्य च मतभेदेनेत्यर्थकत्वेन तस्यैव प्रपञ्चकथनमिदमिति तात्पर्यम्। **द्विधाऽपीति।** विशेषेणाविशेषेण चेत्यर्थः। तथा च सम्भवप्रदर्शनमेतन्न तु आवश्यकमिति केचित्। वस्तुतस्तु विशेषेणेति छेदे दोषस्य **छायाया**मुक्तत्वादविशेषेणेत्येव छेदः। अत एवेदं पक्षान्तरपरतयैव भगवता व्याख्यातम्। तदाशयस्तु तत्रैवोक्तोऽत्र च प्रागुक्तः। विकल्पश्च फलमात्रांशे नत्वधिकरणांशेऽपि। तत्फलं तु पूर्वत्र फलोद्देशेन तत्रैव कार्य एतदुपदेशो नान्यत्रेति भ्रमनिवृत्तिः। द्विधापीत्यस्य च फलवत्वेन तच्छून्यत्वेन चेत्यर्थः। एवञ्च वार्तिकं सप्रयोजनमप्रयोजनं वा कार्य इति तात्पर्यम्। यद्वोक्तरीत्या खण्डद्वयभेदेन द्विधेत्यर्थः। अत एव वार्तिकाक्षररचनाया इत्युक्तं मूले, न तु छेदस्येतीति तत्वं बोध्यम् ॥

---

१. तन्निषेधाभावे सकारस्य स्थानिवदट्त्वे सत्यड्भिन्नत्वाभावादिति रत्नप्रकाशेऽस्ति। र.प्र.पृ.सं. १८३ (प्र. भागः)

**लण् (मा०सू० ६)। अत्राकारोऽनुनासिकः प्रतिज्ञायते, न तु हकारादिष्विवोच्चारणार्थः। तेन ''उरण् रपरः'' (पा०सू० १-१-५१) इत्यत्र रप्रत्याहारग्रहणं भवति। प्रत्याहारग्रहणे ज्ञापकस्तु ''ऋकारलृकारयोः सवर्णविधिः'' (का०वा०) इति वार्तिकनिर्देशः। ननु ''अइउण्'' (मा०सू० १) इत्यत्रानुबद्धो णकारः स एवेहानुबध्यते। तेनाण्ग्रहणेष्विण्ग्रहणेषु च पूर्वेण परेण वेति सन्देहः प्राप्नोति। तस्मादसन्देहायेहानुबन्धान्तरमेव कुतो न कृतमिति चेत्? न, ''व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्'' (प०भा० १) इति परिभाषां ज्ञापयितुमनुबद्धस्यैव पुनरनुबन्धात्।**

---

## २.३७ कैयटरीत्या रप्रत्याहारस्थापनम्

**लण्।** तुल्यास्यसूत्रस्थकैयटानुरोधेनाह। **अत्रेत्यादि निर्देश इत्यन्तेन। प्रतीति।** शिवेनेति भावः। वर्तमानेति भूते लट्। एवमग्रेऽपि। **ज्ञापक इति।** तथा च तत्सामर्थ्यादनन्त्येनापीता रप्रत्याहारखण्डने भवेति तत एवावधार्यमिति बोध्यम्। 'असन्दिग्धं पराभावात् सवर्णेऽण् तपरं ह्युर्ऋत्। व्योरन्यत्र परेणेण् स्यात् व्याख्यानाच्च द्विरुक्तित' इति श्लोकवार्तिकतुर्यपादतद्भाष्यार्थमाह। **नन्विति। स एवेहेति।** तज्जातीय एवेत्यर्थः। असञ्जातविरोधेनेति न्यायेनात्रैव शङ्का न तत्रेति ध्वनयन् पूर्वपक्षमुपसंहरति। **तस्मादिति। पुनरनुबन्धादिति।** पुनरनुबन्धकरणादित्यर्थः। **विशेषस्या**न्यतराद्यर्थरूपस्य। 'पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं मतम्' इत्युक्तोपदेशपरम्परारूपागमरूपात् व्याख्यानाच्छिष्टकृतात्। **प्रतिपत्ति**र्निश्चयः। हि यतः। सन्देहाच्छास्त्रमलक्षणमननुष्ठापकं लक्षणमलक्षणं तदर्थान्तर्भाविणात्र वृत्ति तथा न। शास्त्रस्य निर्णयजनकत्वौचित्यात्। अन्यथा शास्त्रानर्थक्यापत्तेरिति परिभाषार्थः। असन्दिग्धानुष्ठानसिद्धिफलकेऽत्र शास्त्रे सन्दिग्धार्थप्रतिपादकणकारानुबन्धोच्चारणरूपशिवव्यवहारेण सन्देहनिवृत्तेर्व्याख्यानातिरिक्तनिमित्तानपेक्षत्वं बोध्यते। अन्यथा ज्ञापकाद्यभावस्थलेऽनिर्वाहापत्तेरिति नान्यत्रेवात्र ज्ञापकताभिमता। एतेन ज्ञापितेऽपि प्रवर्त्तकतया निवर्त्तकतया नास्याचरितार्थ्यमिति कथं ज्ञापकत्वमित्यपास्तम्। तत्सिद्ध एवायमर्थो णकारानुबन्धरूपशिवव्यवहारेण बोध्यत इत्याशयात्। तेनाणुदिदिति विहाय पूर्वेणाण्ग्रहणं सर्वत्र परेणैवेण्ग्रहणं सिद्धमिति ज्ञापकाद्यनुसरणक्लेशो वृथेति भावः॥

**ञमङणनम् । झभञ् (मा०सू० ७-८) । अत्र मकारानुबन्धो भाष्ये प्रत्याख्यातः । स हि प्रत्याहारत्रये उपयुज्यते - अम् यम् ङमिति । तच्च त्रयं ञकारेणैव निर्वहति । तथा हि, ''पुमः खय्यञ्परे'' इत्येवास्तु । न च झकारभकारपरः खयस्ति, येनातिप्रसङ्गः स्यात् । तथा ''हलो यञां यञि लोपः'' इत्येव पाठ्यम् । न च झकारभकारौ झकारभकारपरौ स्तः । हल उत्तरयोस्तयोः सम्भवे तु ''झरो झरि'' (पा०सू० ८-२-३९) इति लोपेन भाव्यमेव । तथा ''ङञो ह्रस्वादचि ङञुण्नित्यम्'' इति पाठ्यम् । न च झकारभकारौ पदान्तौ स्तः । उत्झेर्लभेश्च क्विपि तौ स्त एवेति चेत् ? न, उज्झेर्दोपधतया संयोगान्तलोपे सति 'उद्' इति रूपाभ्युपगमात्, लभेस्तु जश्त्वविधानात् । नन्वेवमप्यागमिनस्रयो ङणनेभ्यः परे अचः, आगमास्तु पञ्चेति संख्यातानुदेशो न स्यादिति चेत् ? न, ''यथासंख्यम्'' (पा०सू० १-३-१०) इत्यत्र हि विध्यर्थप्रमितिवेलायां निर्दिश्यमानगतसंख्यासाम्यमाश्रीयते, न तु लक्ष्यसंस्कारवेलायां प्रयोगगतम् । तस्मान्माऽस्तु मकारोऽनुबन्ध इति स्थितम् ।**

---

## २.३८ 'ञमङणनम्' सूत्रे मकारानुबन्धप्रत्याख्यानम्

**ञमङणनम् । झभञ् ।** अत्र पूर्वत्र सूत्रे । तथा चैकमेव सूत्रमिदं कार्यमिति तात्पर्यम् । अत एव सुत्रद्वयोल्लेखः । हि यतः । वर्णक्रमेणाह । **अमिति । तच्च** उक्तप्रत्याहाररूपं त्रयं च । उक्तक्रमेणाह । **पुम इत्यादि । न चेति ।** न हीत्यर्थः । न च बहुपुम्कुज्झा इत्यस्ति शास्त्रबोधितम् । सौत्रं च विहाय हलामुच्चारणार्थं च विनोच्चारणस्यासाधुत्वस्य **सुट्तिथो** (पा०सू० ३-४-१०७) रित्यादाविकारोच्चारणेन बोधनेनैतदसम्भवात् । अत्र चेदं भाष्यमपि मानम् । अन्यथैतदसङ्गतिः स्पष्टैव । एवमग्रेऽपि । सम्भवे त्विति तु न, वस्तुतोऽसम्भव एवेति सूचितम् । **तौ स्त एवेतीति ।** पदान्तौ झभावित्यर्थः । एवञ्च ततः पराजादिपदयोर्झभौ स्यातामिति भावः । **एवमपि** अतिप्रसङ्गाभावेऽपि । ननु के त्रयोऽत आह । **ङणनेभ्य इति । पञ्चेतीति ।** ङुट्णुट्नुट्मुट इत्यर्थः । लक्ष्यसंस्कारकालिकमेव संख्यासाम्यं यथासंख्यमिति सूत्रप्रवृत्तौ निमित्तमिति भावः । प्रतिपत्तिकालिकमेव तत्तत्प्रवृत्तौ निमित्तमित्याशयेन समाधत्ते । **यथेति ।** हि यतः । आदौ योज्योऽयम् । सिद्धान्तमुपसंहरति । **तस्मादिति ।** स्थितमित्यनेनात्रारुचिः सूचिता । तद्बीजं तु स्पष्टप्रतिपत्तये भगवता शिवेनानुबन्धद्वयमदर्शि । स्पष्टप्रतिपत्त्यर्थत्वाच्छास्त्रस्य । प्रतिपत्तिसौकर्यं यथा भवति तथा किञ्चिद्गौरवमप्याश्रित्य शास्त्रं प्रणेयम् । अन्यथा प्रतिपत्तिगौरवमुक्तरीत्या दुरुद्धरमेव ।

**घढधष् ।। जबगडदश् ।। खफछठथचटतव् ।। कपय् ।। शषसर् ।। हल् (मा०सू० ९।१०।११।१२।१३।१४) ।। इति माहेश्वराण्यक्षरसमाम्नायसूत्राणि । अत्रायं संग्रहः —**

**एकस्माण्ङञणवटा द्वाभ्यां षस्त्रिभ्य एव कणमाःस्युः ।**
**ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ षड्भ्यः ।। इति ।**

**अस्यार्थः – ङञणवटा एकस्मात्परे ग्राह्याः स्युः । तथा हि, ङकार एकारादेव परो ग्राह्यः ''एङि पररूपम्'' (पा०सू० ६-१-९४) इति यथा । ननु ''षिद्भिदादिभ्योऽङ्'' (पा०सू० ३-३-१०४) ''अस्यातिवक्तिख्यातिभ्योऽङ्'' (पा०सू० ३-१-५२) इत्यकारेण ग्रहणमस्त्विवति चेत् ? न, ''आदिरन्त्येन'' (पा०सू० १-१-७१) इत्यत्र ''अणुदित्सवर्णस्य च'' (पा०सू० १-१-६९) इत्यतोऽप्रत्यय इत्यनुवृत्तेः । अत एव ''रोः सुपि'' (पा०सू० ८-३-१६) इति न प्रत्याहारग्रहणम् । ''सुपि च'' (पा०सू० ७-३-१०२) इत्यत्र तु अप्रत्यय इति प्रतिषेधो नास्ति, यञादाविति विशेषणाद् उत्तरत्र च**

---

व्याख्यानत इति त्वगतिकगतिः । अन्यथा पृथोदरादीत्येव शास्त्रं स्यादिति तदाकूतम् । भाष्यकृता तु शिष्यबुद्धिवैशद्यायात्रैतावदेवोक्तम् । एतेन मात्रालाघवमसार्वत्रिकमिति कथमत्रैवमुक्तमित्यपास्त-मितीति दिक् ।।

## २.३९ प्रत्याहारसंग्राहककारिकाविवरणम्

**घढधष् । जबगडदश्** । इति इमानि माहेश्वराणि महेश्वरादागतानि । तत्प्रसादलब्धानीति यावत् । एवञ्चैवमानुपूर्वीका श्रुतिरेव । अनुबन्धास्तु शिवप्रणीताः, तेन तत्प्रोक्तानीत्यर्थो नेति स्पष्टमन्यत्र । अत एवाह । **अक्षरेति ।** श्रुतिरूपवर्णसंघातप्रतिपादकानि सूत्राणीत्यर्थः । **अत्रेति ।** चतुर्दशसूत्रीबोध्यप्रत्याहारविषये वक्ष्यमाणः **प्रक्रियाकृतां** सङ्ग्रह इत्यर्थः । तथा चैकचत्वारिंशत्प्रत्याहारा इति फलितम् । तदुपपत्तिस्तु **मनोरमायां** स्पष्टाऽग्रे च स्फुटीभविष्यति । संज्ञात्वं नेति तदर्थः । एवञ्च तत्र प्रत्याहारग्रहणं न । इदं चान्यर्थमावश्यकं तवापीत्याह । **अत एवेति ।** तदनुवृत्तेरेवेत्यर्थः । सुपानि ? इत्यत्र सुबिति तत्रस्थरीत्यनुवृत्त्या न तद्ग्रहणमित्यपि बोध्यम् । तथा सति प्राप्तातिप्रसङ्गं निराचष्टे । **सुपि चेत्यत्र त्विति । यञादावितीति ।** अन्यथा तस्य तत्वासम्भवात्तद्विशेषणस्य भाष्याद्युक्तस्यासङ्गत्यापत्तिरिति भावः । उत्तरत्र च बहुवचने । अत एवापिः प्रागुक्ताप्रत्यय इति निषेधपरामर्शकः । इति सूत्रे तु । **विशेषणात्** विशेषणद्वयदानात् ।

---

१. प्रौ.म.पृ.सं. ५६ ।

**''बहुवचने झलि'' (पा०सू० ७-३-१०३) इति विशेषणात्। ''सुप्तिङन्तं पदम्'' (पा०सू० १-४-३४) इत्यत्र तिङ्साहचर्यात् ''शास इदङ्हलोः'' (पा०सू० ६-४-३४) इत्यत्र तु अङ्ग्रहणसामर्थ्यादपि प्रत्याहारग्रहणं न भवति। अङादौ हलादौ चेति हि व्याख्याने अङ्हलोरिति व्यर्थमेव स्यात्। द्विविधा एव हि कूङितः प्रत्यया अङादयो हलादयश्च। 'व्यतिशासै' इत्यत्र तु क्ङित्त्वमेव नास्ति, अटा सहैकादेशस्य स्थानिवद्भावेनाङादित्वाच्च। ''ऋदृशोऽङि'' (पा०सू० ७-४-१६) इत्यपि न प्रत्याहारः, ऋकारान्तेषु ''ऋच्छत्यॄताम्'' (पा०सू० ७-४-११) इति गुणविधानाज्ज्ञापकात्। ''सनि च'' (पा०सू० २-४-४७) ''इङश्च'' (पा०सू० २-४-४८) इति न प्रत्याहारः ''इको झल्'' (पा०सू० १-२-९) इति कित्त्वविधानात् ''अज्झनगमां सनि'' (पा०सू०**

---

अन्यथाऽव्यभिचारात्तदसङ्गतिः स्पष्टैव। अप्रत्यय इति प्रतिषेधो नास्तीत्यस्यानुषङ्गः। एवमग्रेऽपि। अर्थाधिकारानुरोधात्तथेत्यपि बोध्यम्। एवञ्च मूलं शब्दाधिकाराभिप्रायेणेति बोध्यम्। इत्यत्र रोऽसुपीत्यत्रापि न निषेधः, असुपीत्यस्य वैयर्थ्यापत्तेः। स च तत्र प्रसज्यप्रतिषेध इत्यपि बोध्यम्। यद्यप्युभयवैयर्थ्यं वक्ष्यमाणं, तथापि प्रकृतत्वादाह। **अङिति।** यद्वाऽङिति अङ् गृह्यते यत्र पदे तत्सामर्थ्यादित्यर्थः। एतेन वक्ष्यमाणविरुद्धमिदमित्यपास्तम्। गत्यन्तरस्यापि सम्भवेन पूर्वतो वैलक्षण्यात्तुः प्रयुक्तः। तदेवाह। **अङादाविति।** हि यतः। द्वयोर्वैयर्थ्यमुक्तमेवोपपादयति। **द्विविधा एवेति।** हि यतः। तथा च शास इदित्येवं सूत्रं कार्यमिति भावः। नन्वैजाविस्तदन्योऽप्यस्तीति तद्वारणायाङ्हलोरित्यावश्यकमित्यत आह। **व्यतीति।** पित्वातिदेशादिति भावः। ननु विनिगमनाविरहात्तद्वारणायाङ्हलोरित्येव कृतमूरीक्रियते, न क्ङितीत्यस्यानुवृत्तिः स्वरितत्वादि-कल्पनेन ज्ञानगौरवादत आह। **अटेति। अचः परे**त्यनेन सः। **किलुगुपधात्वेति** निषेधस्तूपधावन्निमित्तकप्रत्ययविधावेव। तथा च तेनावारणेन तदावश्यकत्वं, तेनैव सिद्धे तद्व्यर्थमेवेति भावः। वस्तुत उक्तपरादिवत्वेन कित्प्रत्ययानयनेनोभयत आश्रयणादिति बोध्यम्। एवं प्रागुक्तप्रकारेण वारणे सत्यपि प्रकारान्तरेणापि वारणं सम्भवतीत्याशयेनान्यत्रापि समाधत्ते। **ऋदृशोऽङतेत्यपीति।** इत्यत्राङित्यपीत्यर्थः। **ऋकारान्तेष्विति।** ऋधातौ ऋकारान्तेषु चेत्यर्थः। अन्यथा आरतुरारुस्तेरतुस्तेरुरित्यादौ लिटि तत्र ग्रहणकशास्त्रप्रवृत्त्या ऋदृशोऽङीति गुणस्याङ्त्वादेव सिद्धौ तद्वैयर्थ्यं स्पष्टमेवेति भावः।[1]) एवमकारेण तन्निरस्येकारेण तदाह। **सनि चेति।** विषयविशेषनिर्देशार्थमिदम्। एवमग्रेऽपि। **चेति।** इत्यत्र इङिति। **कित्वेत्यादि** यदीङश्चेत्यनेनेङन्तानां धातूनां गम्यादेश **इको झलिति** (पा०सू० १-२-९) कित्ववैयर्थ्यम्।

---

१. २०५ पृष्ठतः एतावत्पर्यन्तं मूलस्य व्याख्या कपाठे नास्ति।

**६-४-१६) इति दीर्घविधानाच्च। इङन्तानां सनि गम्यादेशे हि सति उदाहृतसूत्रद्वयं निर्विषयं स्यात्। ''परिमाणाख्यायां सर्वेभ्यः'' (पा०सू० ३-३-२०) ''इङश्च'' (पा०सू० ३-३-२१) इत्यपि न प्रत्याहारः वैयर्थ्यप्रसङ्गात्। तथा हि, इकारान्तेभ्य एरचा भाव्यम्। उकारान्तेभ्य ''ऋदोरप्'' (पा०सू० ३-३-५७) इत्यपा। ऌकारान्तास्सन्त्येव न। एजन्तानामप्यनैमित्तिकेनात्वेन प्रत्ययोत्पत्तेः प्रागेव भाव्यम्। अतः प्रत्ययोत्पत्तिवेलायामेजन्ता न सन्त्येव। ऋदन्ताः परमवशिष्यन्ते। तत्र 'उः' इत्येव लाघवाद् ब्रूयात्। वस्तुतस्तु सामान्यलक्षणेनैव ऋदन्तेषु घञः सिद्धत्वात्सूत्रमेवेदं न कुर्यात्। अथोच्येत– ''इङश्च'' (पा०सू० ३-३-२१) त्यारम्भसामर्थ्यादिवर्णो-वर्णान्तेष्वेवाजब्भ्यां सह वैकल्पिको घञ् समाविशत्विति, तदपि न; एवं हि सति**

---

**अज्झने**(पा०सू० ६-४-१६)त्यत्र विशिष्टप्रत्याहारग्रहणस्य बहुवचनस्य वैयर्थ्यापत्तिरिति भावः। तदभिप्रेत्याह। **इङन्तानामिति।** हि यतः। श्चेत्यपि इत्यत्रेङ इत्यपि। **वैयर्थ्येति।** इङश्चेत्यस्येति भावः। **एरचा** एरजित्यचा। अपिस्त्वर्थे। यद्वाऽग्रे योज्यस्तदसत्तासमुच्चायकः। एजन्ता अपि न सन्त्येवेत्यर्थः। **परं** केवलं। **तत्रेति।** इङश्चेत्यत्र। अस्य स्थान इति शेषः। ततोऽपि लाघवादाह। **वस्तुतस्त्विति। सामान्येति।** अकर्तरि चे(३-३-१९)त्यनेनेत्यर्थः। वेदं इङश्चेति। एतेन ऌकारान्ता नामधातवः सन्त्येवेत्यपास्तम्। तेनैव सिद्धत्वात्, ऌकारान्तप्रातिपदिकानामेवा-नभिधानाच्च। प्रकारान्तरेण सार्थक्यमाह। **अथोच्येतेति।** उक्तरीत्या केषाञ्चिदसम्भवात्कचित्फला-भावादाह। **इवर्णेति।** तेष्वेवेति स्फुटप्रतिपत्त्यर्थमेवकारः। **एवं हि सतीति।** यतः समावेशस्येष्टत्वे सतीत्यर्थः। अजपोरिति पाठः। अयं भावः। एरज्वेति वाच्यं ऋदोरबित्यत्रानुवर्तते तदिति। अत एवैकवचनान्तेनाह। **विधावेव वाग्रहणमिति।** तथा च सामान्यसूत्रेणैव पक्षे तत्सिद्धिरिति भावः। क्वचिदनयोरिति पाठः। सोऽप्युक्तार्थक एव। उभयोरित्यपाठः। उपपत्त्यभावात्। **णावितीति।** इत्यत्रेङित्यपीत्यर्थः। **इकारान्तानामिति।** मुख्येकारान्तानामित्यर्थः। सजातीयापेक्षनियमौचित्यात् इङन्तत्वेन मुख्येकारान्तानां यदि भवति तर्हि तेषां मध्ये एतयोरेवेति तदाकारः। अत एवेङन्तानामिति विहायेकारान्तानामित्युक्तम्। तथा चानेनेङो न व्यावृत्तिरिति सूचितम्। **एवं हीति।** यतस्तयोर्ग्रहणस्य तथा नियमार्थत्व इत्यर्थः। गीत्येवेति पाठः। क्रीगृजीनामिति[1] तदर्थः। क इत्येवेति पाठान्तरम्। तस्यायं भावः। नियामकत्वे वाक्यार्थद्वयावश्यकत्वमिति इको णौ ततः

---

१. क्रीगृजीनामित्येवेति खपाठः।

**अजपोर्विधावेव वाग्रहणं कुर्यात्। ''क्रीङ्जीनां णौ'' (पा०सू० ६-१-४८) इति न प्रत्याहारः क्रीज्योः पृथग्ग्रहणवैयर्थ्यापत्तेः। न चेकारान्तानां मध्ये एतयोरेवेति नियमार्थं पृथग्ग्रहणमिति वाच्यम्, एवं हि 'इक' इत्येव ब्रूयात्, एङन्तानां सामान्यलक्षणेनैवात्वस्य सिद्धत्वात्। ''इङ्धार्योः'' (पा०सू० ३-२-१३०) इत्यपि न प्रत्याहारः, धारिणा साहचर्यात्। तस्मात्सिद्धं ङकार एकस्मादेवेति।**

**तथा ञकारोऽप्येकस्मादेव। ''अतो दीर्घो यञि'' (पा०सू० ७-३-१०१) इति।**

**तथा ''अइउण्'' (मा०सू०१) इत्येव णकारोऽप्येकस्मादेव। अणिति यथा। अथ ''इणः षीध्वम्'' (पा०सू० ८-३-७८) इत्यादाविण्प्रत्याहारोऽप्यनेन कुतो नेति चेत् ?**

---

क्रिज्योरिति पृथगेव न्यासः कार्य इति। यद्वा फलितवाक्यभेदाभिप्रायेण तथोक्तमिति। एवेनेङ्मात्रव्यावृत्तिः। तदाह। **एङन्तानामिति।** आदेच इत्यनेनेत्यर्थः। एतेनेक इत्येवेति क्वाचित्कोऽपपाठः। क्रिज्यन्येकारान्तस्याप्यात्वापत्तेस्तथा सूत्रपाठाभावाच्चेति परास्तम्। आशयस्योक्तत्वात्। इणादावतिव्याप्तिरप्यत्र पक्षे नियमेन वारणे तु इङोऽपि तदभावापत्तेरिति तु तथाङ्गीकर्तृमते दुर्वचमिति भावः। इत्यपि इत्यत्रेङपि। एवमग्रे सर्वत्र बोध्यम्। धारिग्रहणवैयर्थ्यं तु न। प्राग्वन्नियामकत्वसम्भवात्। सुभोपज्ञेत्यस्यापि नियामकत्वसम्भवादत आह। **धारिणेति।** धातुत्वेन सादृश्यमिति भावः। सिद्धान्तमुपसंहरति। **तस्मादिति। एकस्मादेवेति।** यकारादेवेत्यर्थः। परो ग्राह्य इति शेषः। **यञीतीति।** यद्यप्यत्रापि 'उत्सादिभ्योऽञ्' (पा०सू० ४-१-८६) 'अत इञ्' (पा०सू० ४-१-९५) 'उञः' (पा०सू० १-१-१७) 'उञि च' (पा०सू० ८-३-२१) 'नञ्स्नञौ भवना' दित्यादावतिप्रसङ्गः सम्भवति। तथापि प्रत्ययस्थल अप्रत्यय इत्यनुवृत्या प्राग्वन्न दोषः। उञ इत्यत्राप्यदोषः। उञ्ग्रहणसामर्थ्यात्। अन्यथा उच इत्येव ब्रूयात्। अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसीति न्यायाच्च। अत एवोञि चेत्यत्रापि न दोषः। पदिग्रहणाच्चेति दिगिति बोध्यम्।

णकारद्वयसत्वादाह। **तथा अइ इति।** परो ग्राह्य इति शेषः। **अणिति यथेति।** 'केऽण' (पा०सू० ७-४-१३) इत्यादौ ग्राहकशास्त्रातिरिक्ते इति भावः। इदमेव ध्वनयन् **प्राग्दीव्यतोऽणि** (पा०सू० ४-१-८३)त्यादौ प्रागुक्तरीत्या दोषाभावं मनसि निधायाह। **अथेण इति।** अथेति प्रश्ने। **अनेन** अनेनैव। प्रथमोपस्थितत्वात्।

न, ''अचि श्नुधातुभ्रुवां य्वोः'' (पा०सू० ६-४-७७) इत्यत्रेकारोकारयोः स्वरूपेण निर्देशात्। अन्यथा हि संहितायां मात्रालाघवात्पदच्छेदेऽप्यर्द्धमात्रालाघवाद् 'इणः' इत्येव ब्रूयात्। व्याख्यानाच्च पूर्वेण न तु परेण ग्रहीष्यते। व्याख्यानं च सिद्धान्तेऽपि शरणम्। य्वोरित्यपि हि निर्देशे किं ह्रस्वयोर्ग्रहणमुत दीर्घयोरुत यकारवकारयोरिति सन्देहः स्यादेव। एवञ्च ''एच इग्घ्रस्वादेशे'' (पा०सू० १-१-४८) इति सूत्रे इणित्येव प्रतिपत्तिलाघवार्थं वक्तव्ये इग्ग्रहणमपीह लिङ्गम्। इण्ग्रहणे हि तत्र यथासंख्यप्राप्तिरेव नेति न तत्परिहाराय यतितव्यमिति दिक्।

एवं वकारोऽप्येकस्मादेव ''नश्छव्यप्रशान्'' (पा०सू० ८-३-७) इति ''एचोऽयवायावः'' (पा०सू० ६-१-७८) इति सूत्रे अविति न प्रत्याहारः, अयादिसाहचर्यात्।

एवं टकारोऽप्येकस्मात् ''अट् कुप्वाङ्'' (पा०सू० ८-४-२) इति।

द्वाभ्यां षः ''एकाचो बशो भष् झषन्तस्य स्ध्वोः'' (पा०सू० ८-२-३७) इति यथा।

ककारस्त्रिभ्यः। ''अकः सवर्णे'' (पा०सू० ६-१-२०१) ''इको यण्'' (पा०सू० ६-१-७७) ''इसुसुक्तान्तात्कः'' (पा०सू० ७-३-५१) इति यथा।

---

**निर्देशादिति।** तस्माद् ज्ञापकादित्यर्थः। **अन्यथा हि** यतस्तेनापि तदङ्गीकारे। ननु सन्देहरीत्या तथा न कृतमत आह। **व्याख्यानाच्चेति।** चस्त्वर्थे। नन्वेवं प्रतिपत्तिगौरवमत आह। **व्याख्यानं चेति।** चो ह्यर्थे। तत्र हेतुमाह। **य्वोरित्यपि हीति।** यत इत्यर्थः। **नारायणा**द्यनुरोधेन ज्ञापकान्तरमाह। **एवमिति।** उक्तवदित्यर्थः। मात्रालाघवादेरभावादाह। **प्रतीति। अपीह** परेणैवेण्ग्रहणे। तल्लाघवमेवाह। **इणिति।** हि यतः। तत्र एच इति सूत्रे। **अयतीति।** स्वरितत्वाद्याश्रयणरूपमित्यर्थः। **दिगिति।** तदर्थस्तु प्रागुक्तमेव ज्ञापकं नेदमस्य प्रत्याख्यानात्। तत्तु लण्सूत्रे भाष्ये एव स्पष्टं, अत एव ज्ञापकादित्येकवचनान्तमग्रे वक्ष्यतीति। **एवकार इति।** सोऽपीत्यर्थः। एकस्मादेव परो ग्राह्य इत्यस्यानुषङ्गः शेषो वा। अवास्तवस्यासम्भवादाह। **अवितीति।** अयोऽपि तत्वस्य सम्भावित्वादाह। **अयादीति। एकस्मादिति।** परो ग्राह्य इति शेषः। तत एवेत्यर्थः। एवमग्रेऽपि। **आर्धधातुकस्येडि**(पा०सू० ७-२-३५) त्यादाविट् तु न प्रत्याहारः। **नेटी**(पा०सू० ७-१-४)त्यादिवैयर्थ्यापत्तेः। इडादाविडन्ते वेत्यर्थासम्भवात्। इटि सिचीत्यर्थस्याप्यसम्भवात्। अल्विधित्वेन तत्वस्यालाभादिति भावः॥

**"लण्" (मा०सू० ६) इत्यत्रत्यो णकारोऽपि त्रिभ्यः "अणुदित्सवर्णस्य" (पा०सू० १-१-६९) इत्येक एवाण्, । "इणः षीध्वम्" (पा०सू० ८-३-७८) इत्यादयः सर्वे इणः, "इको यण्" (पा०सू० ६-१-७७) इत्यादौ यण् च। तत्र यण् तावत्पूर्वेण न सम्भवत्येव। इण्तु सम्भवन्नपि ज्ञापकात्त्यक्तः। अणस्तु उभाभ्यां ग्रहणे स्थिते क्व पूर्वेण क्व वा परेणेति विवक्षायां ग्रहणकशास्त्रे परेणैवान्यत्र तु पूर्वेणैवेति सिद्धान्तः। उक्तं हि – "व्याख्यानतो विशेषप्रतिपत्तिः" (प०भा० १) इति। न हि "परेश्च घाङ्कयोः" (पा०सू० ८-२-२२) इत्यादौ व्याख्यानादन्यन्नियामकमस्ति। किञ्च, अण् ग्रहणानि तावत्पञ्च – "उरण् रपरः" (पा०सू० १-१-५१) "अणुदित्सवर्णस्य" (पा०सू० १-१-६९) "ढ्रलोपे पूर्वस्य दीर्घोऽणः" (पा०सू० ६-३-१११) "केऽणः" (पा०सू० ७-४-१३) "अणोऽप्रगृह्यस्य" (पा०सू० ८-४-५७) इति। तत्र "उरण् रपरः" (पा०सू० १-१-५१) इति तावत्पूर्वेण "ऋत इद्धातोः" (पा०सू० ७-१-१००) इति धातुग्रहणाज्ज्ञापकात्। तद्धि "मातॄणाम्" इत्यादिव्यावृत्त्यर्थं क्रियते। परेण च ग्रहणे "नामि" (पा०सू० ६-४-३) इति दीर्घस्यापि रपरत्वापत्त्या व्यावर्त्याप्रसिद्धिः। ननु 'चिकीर्षति' इत्यत्र "अज्झनगमाम्" (पा०सू० ६-४-१६) इति दीर्घरपरत्वे च सति "उपधायाश्च" (पा०सू० ७-१-१) इतीत्वमेषितव्यम्। तद्वत् 'मातॄणाम्'**

---

पूर्वणकारेण तस्योक्तत्वादाह। **लणित्यत्रत्य इति। स्येत्येक एवेति।** इत्यत्रत्य एक एवेत्यर्थः। इत्यादयः इत्यादिसूत्रस्थाः। **तत्र** तेषां मध्ये। **ज्ञापकात् य्वोरि**ति निर्देशात् ज्ञापकात्। **विवक्षायां** विचारे। सन्देह इति यावत्। उक्तसिद्धान्ते भाष्यसिद्धान्त्युक्तं हेतुमाह। **उक्तं हीति।** यतो भगवतैतत्साधनेनोक्तमित्यर्थः। तस्मात् व्याख्यानेनैव तथानिर्णय इति भावः। तस्या आवश्यकत्वमाह। **न हीति।** यत इत्यर्थः। तत्र हि घशब्देन तरप्तमपौ वा शब्दो वेति संशये व्याख्यानात् स्वरूपग्रहणमिति सिद्धान्तितम्। ननु तत्राङ्कशब्दसाहचर्यादपि प्रत्ययग्रहणं न। किञ्चाङ्कशब्दस्य प्रकृतित्वेनाभ्यर्हितत्वात् **दीधीवेवीटा**मितिवत् सर्वनिपाते कर्तव्ये परनिपातकरणेन घशब्दस्य पूर्वनिपातकरणान्न प्रत्ययग्रहणम्। एवञ्च नियामकान्तरसत्वेनागतिकगतिव्याख्यानस्य तत्रैवानाश्रयणेन कथमत्र तदाश्रयणमत आह। **किञ्चेति।** तावदित्यव्ययं तावन्तीत्यर्थे। सर्वाणीति तदर्थः। सूत्रपाठक्रमेणाह। **उरणित्यादि। तत्र** तेषां मध्ये। इति इत्यत्र। **तद्धि** यतो धातुग्रहणम्। **इत्यादीति।** इत्यादावित्वेत्यर्थः। **परेणेति।** तत्रेत्यादिः। चस्त्वर्थे। ज्ञापकत्वं विघटयति। **नन्विति। चिकीरिति।** यथेत्यादिः। **एषीति।** सति तत्र परेण ग्रहण इति भावः। **तदिति।**

**इत्यत्रापि प्रसङ्गे तद्व्यावर्तकतयोत्तरार्थं धातुग्रहणं भविष्यतीति चेत् ? न, एवं हि सत्युत्तरत्रैव कुर्यात् । इह करणं ज्ञापकमेव । तथा च वक्ष्यति - ''नुड्वाच्य उत्तरार्थं तु, इह किञ्चित् त्रपो इति'' इति । किञ्च अण्ग्रहणसामर्थ्यादपि पूर्वेणैवायम् । यदि हि परेण स्याद् 'उरच्' इत्यज्ग्रहणमेव कुर्यात् 'कृत्तिः' 'कृतं' 'प्रकृतं' 'नॄःपाहि' मातॄणाम्' इत्यादावाद्युदात्तानुदात्तस्वरितानुनासिकदीर्घाणां रपरतायाः परेणाण्ग्रहेणोपपादयितव्या-यास्तावतापि लाभात् । 'कर्त्ता' 'कारकः' इत्यादौ गुणवृद्धिप्रसङ्गे एचामवर्णस्य**

---

मातॄणामित्यत्र [१]प्रसङ्गोक्तो**पधायाश्चे**(पा०सू० ७-१-१०१)ति सूत्रप्राप्तेत्वेत्यर्थः । **एवं हि सेति ।** यतस्तस्योत्तरार्थत्वमात्रत्वे सतीत्यर्थः । उपसंहरति । **इहेति ।** तस्मादित्यादिः । अत्रार्थे वार्तिकसम्मतिमाह । **तथा चेति । इकोऽची**(पा०सू० ७-१-७३)ति सूत्र इति भावः । **नुड् वाच्य इति । इकोऽची**त्यत्राज्ग्रहणे सति नुम्नुटोरनित्यत्वाद्विप्रतिषेधविषयत्वात्पूर्वविप्रतिषेधान्नुटि सति नुमोऽप्राप्त्या **नामी**ति दीर्घसिद्धिः । असति तु तस्मिन्नित्यत्वान्नुमि दीर्घानापत्तिरिति नित्यमपि तं बाधित्वा पूर्वविप्रतिषेधवचनसामर्थ्यान्नुट् वाच्य इत्यज्ग्रहणं व्यर्थमित्यर्थः । ननु तत्रापि पुनर्नुमि नामीति दीर्घो न स्यादिति तदावश्यकत्वमिति चेन्न **नोपधाया** (पा०सू० ६-४-७) इति दीर्घस्य सिद्धत्वात् । एवं चाज्ग्रहणं व्यर्थमेवात आह । **उत्तरार्थं त्विति । तृतीयादि**(पा०सू० ७-१-७४) ष्वित्यादिसूत्रार्थमित्यर्थः । अज्ग्रहणमिति शेषः । नन्वेवमिह करणं व्यर्थमेवात आह । **किञ्चिदिति ।** फलमस्तीति शेषः । उत्तरमाह । **त्रपो इतीतीति । न लुमते**ति निषेधानित्यत्वज्ञापनद्वारैतत्सिद्धिः फलमित्यर्थः । नन्वयुक्तमेतत्, गृ इत्यादेरनुकरणे **प्रकृतिवदि**(परि. ३६)त्यस्य विभक्त्युत्पत्त्यर्थम-नित्यत्वेनाप्रवृत्तौ **ग्रो यङी**(पा०सू० ८-२-२०)त्यादावित्वाभावार्थमिहापि तदावश्यकत्वात् । तन्न्यायस्य तथैव स्वरूपेण गत्यन्तराभावे एव तन्न्यायेन ज्ञापकत्वाश्रयणाच्च । तथा चोभयार्थतया न धातुग्रहणं ज्ञापकमत आह । **किञ्चेति ।** अपिर्व्याख्यानसमुच्चायकः । **वायं** उरणित्यत्रत्योऽण् । हि यतः । **स्यादिति ।** तर्हीति शेषः । उद्देशक्रमेणाह । **आद्युदात्तेत्यादि । ञ्नित्यादि** (पा०सू० ६-१-१९७)रित्याद्युदात्तत्वं, प्रत्ययस्वरेण शेषनिघातेनानुदात्तत्वं, **उदात्तादनुदात्ते** (पा०सू० ८-४-६६)ति स्वरितत्वं, **अत्रानुनासिक** (पा०सू० ८-३-२) इत्यनुनासिकत्वं,

---

१. प्रसक्तोपधायाश्च इति खपाठः ।

**चाविशेषाद्रपरत्वस्य विकल्पेन प्रसङ्ग इत्यप्यज्ग्रहणेन सिध्यत्येव।**

**स्यादेतत्, 'कर्त्रर्थम्' इत्यत्र इको यणि रपरत्वे रेफद्वयश्रवणार्थमण्ग्रहणं स्यात्। नह्येतदज्ग्रहणेन सिध्यति। ''हलो यमाम्'' (पा०सू० ८-४-६४) इति लोपस्तु वैकल्पिकः ''झयो होऽन्यतरस्याम्'' (पा०सू० ८-४-६२) इत्यतोऽन्यतरस्यांग्रहणानुवृत्तेः। अत्र च ज्ञापकं ग्रहणकशास्त्रेऽण्ग्रहणम्। तद्धि 'संय्यँन्ता' सव्वँत्सरः'। यलूँलोकम्' इत्यादौ परसवर्णस्य सानुनासिकस्य यग्रहणेन ग्रहणाद् ''अनचि च'' (पा०सू० ८-४-८७) इति द्वित्वे कृते पक्षे यवलानां त्रिकस्य श्रवणार्थं क्रियते। ''हलो यमाम्'' (पा०सू० ८-४-६४) इत्यस्य नित्यत्वे तु व्यर्थमेव तत्स्यात्। यद्यपि गुणानामभेदकत्वेनैव सानुनासिकयवलानां द्वित्वसिद्धेर्ग्रहणकशास्त्रेऽज्ग्रहणमेवोचितं न त्वण्ग्रहणं, तथापि 'गुणा भेदकाः' (प०भा०) इत्यपि पक्षे ज्ञापयितुमण्ग्रहणम्। भेदकाभेदकपक्षयोश्च जातिव्यक्तिपक्षयोरिव लक्ष्यानुरोधाद्व्यवस्था। अत एव ''चतसर्याद्युदात्तनिपातनम्'' (भा०इ०) इत्यादि सङ्गच्छते। अत एव च ''अष्टन आ विभक्तौ'' (पा०सू० ७-२-८४) इत्यादाविदमस्त्यदाद्यत्वे चानुनासिको नेति वक्ष्यामः।**

---

**नामी**(पा०सू० ६-४-३)ति दीर्घत्वमिति बोध्यम्। **तावतापि** अज्ग्रहणेनापि। **चाविशेषात्** अनान्तरतम्यस्य तुल्यत्वात्। **रपरस्य** तत्वावच्छिन्नस्य एव अवर्णस्य च। **विकल्पेनेति।** उभयो रपरत्वेन विनिगमनाविरहादिति भावः। सामर्थ्यं विघटयति। **स्यादेतदिति। यणीति।** इको यणिति यणित्यर्थः। **रपरेति।** तस्येत्यादिः। **नह्येतदिति।** रेफस्यानच्त्वात्। **वैकल्पिक इति।** तथा च पाक्षिकफलमस्त्येवेति भावः। सूत्ररीत्याऽऽह। **अत्र चेति।** तत्र तदनुवृत्तौ चेत्यर्थः। **तद्धि** यतोऽण्। **सानुनेति।** अनुनासिकशब्दोऽत्र धर्मपरः। **हलो यमा**(पा०सू० ८-४-६४)मिति लोपविकल्पस्य वक्ष्यमाणत्वादाह। **पक्ष इति।** भाष्यसिद्धान्तरीत्या शङ्कते। **यद्यपीति।** एवेनोक्तप्रकारव्यावृत्तिः। तथा च ज्ञापकत्वस्य सुतरामभाव इति भावः। सूत्ररीतेरेव प्रक्रान्तत्वात्तयैव समाधत्ते। **तथापीति। इत्यपीति।** अण्विषय इति शेषः। इति पक्षमपीत्यर्थः। न ह्येकेनैकमेव ज्ञाप्यमिति नियमो, यावता विनाऽनुपपत्ति तत्सर्वं तेन ज्ञाप्यमिति सिद्धान्तादिति भावः। नन्वेवमपि भेदकपक्षे दोष एवात आह। **भेदकेति।** चोऽप्यर्थे। अग्रे चः समुच्चये। **अत एव** तयोर्व्यवस्थिततत्वादेव। एवमग्रेऽपि। अन्यथा कृतेऽपि तस्मिन्निष्टस्वरापत्त्या तदसङ्गतिः स्पष्टैव इति।

**यत्तु विकल्पानुवृत्तौ ज्ञापकान्तरवर्णनम्-अनुवर्त्तते विभाषा शरोऽचि यद्वारयत्ययं द्वित्वं, नित्ये हि तस्य लोपे प्रतिषेधार्थो न कश्चित्स्याद् इति, तत्तु भाष्ये दूषितम्। तथा हि, लोपस्य नित्यत्वे ''अचो रहाभ्याम्'' (पा०सू० ८-४-४६) इति द्वित्वेनारम्भसामर्थ्यात्तद्बाधः। द्विविधा एव हि यरः - यमो झरश्चेति। तत्र ''हलो यमाम्'' (पा०सू० ८-४-६४) इति ''झरो झरि'' (पा०सू० ८-२-३९) इति च लोपे कृते द्वित्वं वृथा स्यात्। किं तर्हि तयोर्योगयोरुदाहरणमिति चेत् ? यत्रान्तरेण द्वित्वं व्यञ्जनत्रयं लभ्यते, यथा आदित्यो देवताऽस्य आदित्यः, प्रत्तम्, अवत्तमिति। एवं स्थिते 'चतुर्षु' इत्यत्रापि यदि द्वित्वं स्यात्तर्हि लोपो न स्यादेव। ततश्च सार्थकः ''शरोऽचि''(पा०सू० ८-४-४९)**

---

उभयप्राचां मतं खण्डयति। **यत्त्विति। विकल्पेति।** उभयत्र विकल्पानुवृत्तावित्यर्थः। अत एवाग्रे तत्र हल इत्यादिना तथा वक्ष्यति। **अनुवर्तत इति।** स रोरीति लोपे इति शेषः। एवञ्च मध्यस्थतया **हलो यमा**मित्यस्यापि तत्वं सिद्धम्। अन्यथा मण्डूकप्लुत्यापत्तिरिति भावः। शरोऽचीत्यस्येत्यनेनेति शेषः। त्ययं पाणिनिः हि यतः। **तस्य** निषेधकर्तुः पाणिनेः। लोपे तत्वावच्छिन्ने निषेधार्थं तत्प्रयोजनम्। **लोपस्य** तन्मात्रस्य। **नारम्भेति।** यद्यपि हर्य्यनुभव इत्यादौ तदुदाहरणे लोपे प्राप्तेपि द्विर्वचनमारभ्यत इति न येन नाप्राप्तिन्यायविषयः, तथापि कृते द्वित्वे पश्चाल्लोपेऽपि द्विर्वचनं व्यर्थमिति सर्वथा निरवकाशत्वेन बाधः। यद्यप्यन्यत्र सर्वथा निरवकाशत्वेन बाधस्थले तस्य पूर्वप्रवृत्तिरित्येव बाध इति निमित्तसत्वे पुनस्तदपि भवतीति सिद्धान्तितं, तथापि अत्र तत्वादेव तदप्रवृत्तिरूपो बाध इत्याशयः। बाध इत्यस्य स्यादिति शेषः। सामर्थ्यमुपपादयति। **द्विविधा इति।** एवेनेतरप्रकारव्यावृत्तिः। हि यतः। **तत्र** उभयत्र। नन्वेवं लोपोऽपि नित्योऽचरितार्थ इत्युभयारम्भसामर्थ्यादेव विकल्पः फलतीत्याशयेनाह। **किं तर्हीति।** तेन तद्बाध इत्यर्थः। **तयो**र्योगयोः लोपविधायकयोः। **आदित्य इति।** भवाद्यर्थकण्यप्रत्ययान्ताद्देवतार्थे ण्यः। **प्रत्तमिति।** प्रावपूर्वकाभ्यां दादोधातुभ्यां क्तेऽ**च उपसर्गा**दित्यनेनातस्तकारे **खरि चे**ति चर्त्वे व्यञ्जनत्रयम्। दोषं उपसंहरति। **एवं स्थित इति।** लोपस्यान्यत्र सावकाशतया द्वित्वस्य तद्बाधकत्वे स्थित इत्यर्थः। यदि तु **हलो यमा**मित्यत्राणग्रहणात् ज्ञापकात् विकल्पं सिद्धं कृत्वा द्विकत्वस्य तद्विषये चारितार्थ्येन 'झरो झरी'त्यत्र तदनुवृत्तौ शरोऽचीति ज्ञापकोपन्यासः प्राचामित्युच्यन्ते, तदा सम्यगेव। परन्तु प्राचां भाष्यानुपूर्वीकानुवादेन तत्कथनं प्रामादिकम्। तद्भाष्यस्योभयविषयतया प्रवृत्तेः। वस्तुतो व्याख्यानादेव तत्र तदनुवृत्तिर्न तूक्तज्ञापकेन। तस्य प्रत्याख्यानात्। अत एव तस्य भेदकत्वपक्षस्य तत्र ज्ञापकत्वमप्ययुक्तमि**त्यत्र चेत्यादि वक्ष्याम** इत्यन्तं प्रागुक्तं **चिन्त्य**मेवेति

**इति निषेधः कथं विभाषानुवृत्तिं ज्ञापयेदित्यास्तां तावत्। सर्वथापि विकल्पानुवृत्तेः स्थितत्वात्पाक्षिकरेफद्वयश्रवणार्थमण्ग्रहणमस्त्विति ।**

**अत्रोच्यते 'कर्त्रर्थम्' इत्यादौ सत्यपि रपरत्वे रेफद्वयश्रवणं दुर्लभम् रो रि' (पा०सू० ८-३-१४) इति लोपात्। न च तत्र 'पदान्तस्य' इति व्याख्यातुं युक्तं, जर्गृधेर्लङ् 'अजर्घाः' पास्पर्द्धेर्लङ् 'अपास्पाः' इत्यादेरसिद्धिप्रसङ्गात्। न चाण्ग्रहण-सामर्थ्यात्तद्बाधः, पूर्वेणापि ग्रहणेऽबाधेनैवोपपत्तेरिति दिक्। तस्माद्धातुग्रहणसामर्थ्या-दण्ग्रहणसामर्थ्याद्वा ''उरण् रपरः'' इति पूर्वेण ग्रहणमिति स्थितम्। वस्तुतस्तु धातुग्रहणमेव ज्ञापकम्, अण्ग्रहणस्य 'लाकृतिः' इत्यादौ लपरताफलमित्यपि वक्तुं**

---

बोध्यम्। तदेतद्ध्वनयन्नाह। **इत्यास्तां तावदिति। अत एव** तथैव। स्यादेतदिति पूर्वपक्षमुपसंहरति। **सर्वथापीति।** तस्यैतस्य वा ज्ञापकत्वेऽपीत्यर्थः। न मम तत्खण्डने तस्य ज्ञापकत्वे च तात्पर्यं किं तु तदनुवादेन तत्खण्डने तदनुवृत्तौ चेति सा निर्बाधैवेति भावः।

**रो रीतीति।** त्रिपाद्यां बहिरङ्गपरिभाषायाः सर्वथाप्यप्रवृत्तेः। एतेन कार्यकालपक्षे बहिरङ्गत्वेन यणोऽसिद्धत्वेऽपि यथोद्देशपक्षेणायं नेय[1] इत्यपास्तम्। **अजर्घा इति।** गृधेर्यङो लुकि रुगागमे लङि सिपि शपो लुकि गुणरपरत्वसिलोपभष्भावजश्त्वदश्चेतिरुत्वरलोपदीर्घत्वेषु रूपम्। गुणरपरत्व-भष्भावभिन्नसर्वप्रक्रियाऽग्रेऽपि। **तद्बाधः** रो रीति लोपबाधः। अपिरेवार्थे। क्वचित्तथैव पाठः। तत्सामर्थ्यात् पूर्वेणैव ग्रहण इत्यर्थः। बाधं विनापि साफल्ये सम्भवति [2]तत्कल्पनमनुचितमिति भावः। **दिगिति।** तदर्थस्तु तद्दृष्ट्या तस्यासिद्धत्वेन [3]तद्धि दुष्कर इति। परमप्रकृतमुपसंहरति। **तस्मादिति।** तथा वक्तुमशक्यत्वादित्यर्थः। अत्रारुचेरुक्तत्वादाह। **अणिति।** इति इत्यत्र। पूर्वेण तेनैव। **स्थितमिति।** भाष्यादाविति शेषः। अनेनास्य सिद्धान्तत्वं सूचितम्। एवञ्च भाष्यविरुद्धः प्राचां ग्रन्थोऽयुक्त एवेति ध्येयम्। तदेतत्स्वरूपव्यक्रियैव पराक्रियेति न्यायेन तस्य दुष्टत्वं च ध्वनयितुं तद्ग्रन्थमनुवदति। **वस्तुतस्त्वित्यादिना शक्यत्वादित्यन्तेन।** एवव्यावर्त्यमेव ध्वनयन्नाह। **अणिति।** परेणेत्यादिः। अत एवेति बोध्यमित्यस्यान्तेऽनुल्लेखः। अन्यथा तदौचित्येन यथाश्रुतासङ्गतिः स्पष्टैव। वस्तुतस्त्वित्यस्य तु ज्ञापकमित्यत्रान्वयः। **इत्यपि** इत्यस्यापि। वस्तुतः

---

१. ग्रन्थ इति खपाठः।

२. तत्कल्पनया तत्वमनुचितमिति ख पाठः।

३. तद्बाध इति खपाठः।

**शक्यत्वात्। ''अणुदित्सवर्णस्य चाप्रत्ययः'' (पा०सू० १-१-६९) इति तु परेणैव ''ऊर्ऋत्'' (पा०सू० ७-४-७) इति लिङ्गात्। तत्र हि ''कृत संशब्दने'' (चु०उ०) इत्यस्माच्चुरादिण्यन्ताल्लुङि चङि 'अचीकृतत्' इत्यत्र ऋकारस्य दीर्घस्यापि स्थाने ह्रस्व एव यथा स्यादित्येवमर्थं तपरकरणं कृतम्। ग्रहणकशास्त्रे पूर्वेण ग्रहणे तु दीर्घस्य ऋकारस्य न स्थानित्वं न वाऽऽदेशत्वं प्रसक्तमिति व्यर्थं तपरत्वं स्यात्। ननु सत्यपि परेण ग्रहणे ''ऊर्ऋत्'' (पा०सू० ७-४-७) इत्यत्र तपरत्वं वृथैव। भाव्यमानेन सवर्ण-ग्रहणाप्रसक्तेरिति चेत् ? न, वक्ष्यति हि तत्र वृत्तिकारः - न चायम्भाव्यमानोऽण् किन्तु आदेशान्तरनिवृत्त्यर्थं स्वरूपेणाभ्यनुज्ञायते इति। कृते तु तपरत्वे तद्बलादेव दीर्घस्थाने भाव्यमानताऽपि लभ्यते इत्यन्यदेतत्। तस्माद् ग्रहणकशास्त्रेण परेणेति स्थितम्। तत्फलं तु ''उरण् रपरः'' (पा०सू० १-१-५१) इत्यत्र उरित्यनेन ऋकारस्य ग्रहणाद् ''ऋत इद्धातोः'' (पा०सू० ७-१-१००) ''उदोष्ठ्यपूर्वस्य'' (पा०सू० ७-१-१-१०२)**

---

चिन्त्यमिदम्। ऋकारांशे **कर्त्रर्थम्** इत्यादौ हल रूपाणि रो रीति प्रवृत्त्या फलाभावेन तत्साहचर्याल्लृकारांशेऽपि हलृरूपाण्यप्रवृत्तेरिति केचित्। अन्ये तु रलयोः समानश्रुतित्वेन तत्रापि रो रीत्यस्य प्रवृत्तेरित्याहुः। परे तु धातुग्रहणस्य ज्ञापकताखण्डनपरभाष्य-प्रामाण्येनाणग्रहणस्य तत्परभाष्यप्रामाण्येन चानभिधानमेव लृकारस्थानिकयणघटितप्रयोगाणाम्। अत एव न पदान्ता इत्यपि भाष्यं सङ्गच्छते इत्याहुरिति बोध्यम्। **इति तु** इत्यत्रत्याण् तु। **लिङ्गादिति।** तपरकरणादित्यादिः। अत एव तस्यैव तत्वमुपपादयति। **तत्र हीति।** यत **उर्ऋदि**त्यत्रेत्यर्थः। ऋकारस्येति पाठः। एवमग्रेऽपि। अत एव निस्सन्देहं स्फुटप्रतिपत्तय आह। **दीर्घेति।** स्थान्यंशे ग्राहकशास्त्रप्रवृत्तेरिति भावः। अपिना ह्रस्वसमुच्चयः। **करणं कृतमिति।** रै पौषं पुष्णातीति वत्प्रयोगः। अत एवाह। **ग्रहणकेति।** इदानीन्तनस्यापूर्वबोध्यत्वरूपविधेयत्वा-भावात्तेनावारणादाह। **न वेति।** वाशब्दश्चार्थे। यद्वोपमायां सः। सिद्धान्तरीत्या दृष्टान्तः। तदेतद् ध्वनयितुं ज्ञापितेऽपि चारितार्थ्याभावात् ज्ञापकत्वासम्भव इत्याशयेनाशङ्क्ते। **नन्विति।** हि यतः। **तत्र** 'ऊर्ऋत्' (पा०सू० ७-४-७) इत्यत्र। **न चायमिति।** न हि ऋकार इत्यर्थः। तपरत्वाभावे इति शेषः। **आदेशान्तरेति।** इरादीत्यर्थः। उभयत्र सवर्णोपस्थितावान्तरतम्येन विधानात्सा फलतीति भावः। तदाह। **स्वरूपेणेति। अभ्यनुज्ञानं** प्रतिप्रसवः। लाघवेन तस्यैव युक्तत्वादिति भावः। **एतद्बलादेव** तपरत्वबलादेव। तथापि ह्रस्वस्थानेऽपूर्वबोध्यत्वरूपभाव्यमानत्वाभावादाह। **दीर्घेति।** अपिना शङ्कोक्तसमुच्चयः। उपसंहरति। **तस्मादिति।** उक्तज्ञापकादित्यर्थः। **स्येत्यादौ**

**इत्यादौ रपरत्वसिद्धिः। ''ढ्रलोपे पूर्वस्य दीर्घोऽणः'' (पा०सू० ६-३-१११) इत्यत्रापि हलामणामसम्भवादेचान्तु विशेषाभावादनर्थकमेवाणग्रहणं स्यात्। ततश्च ''अचश्च'' (पा०सू० १-२-२८) इत्येव सिद्धमित्यण्ग्रहणसामर्थ्यात्पूर्वेण।**

**ननु ''वृह् उद्यमने (तु०प०) अस्मात्तृचि ऊदित्वादिडभावे गुणे ढत्वधत्वष्टुत्व-ढलोपेषु रेफस्य दीर्घे स्थानसाम्यादृकारे ढकोपस्यासिद्धत्वाद् ''उपधायाश्च'' (पा०सू० ७-१-१-१०१) इतीत्वे पूर्ववद् गुणे 'वर्ढा' इति यथा स्यादिति परेण ग्रहणं स्यात्। एवं तर्हि 'तृतीया' इति निर्देशाल्लिङ्गात्पूर्वेणैव। परेण हि ग्रहणे ''हलः'' (पा०सू० ६-४-२) इत्यत्राप्यस्यैवाण्ग्रहणस्यानुवृत्तेस्त्रेः सम्प्रसारणे कृते दीर्घः स्यात्। तथा दृढादिषु वृढशब्दस्य पाठोऽपि ज्ञापको बोध्यः। ''वृहू उद्यमने'' (तु०प०) अस्मान्निष्ठायां ढत्वधत्वष्टुत्वढलोपेषु कृतेषु 'वृढः' इति रूपम्। दन्त्योष्ठ्यादिश्चायम्। ''उद्वृहरक्षः सह मूलमिन्द्र'' इति दर्शनात्। ''मूलमस्याबर्हि'' (पा०सू० ४-४-८८) इति सूत्रे**

---

इत्यादिविधेये। इत्यत्रापीत्यस्याण्ग्रहणसामर्थ्यात्पूर्वेणेत्यत्रान्वयः। सामर्थ्यमुपपादयति। **हलामिति। असम्भवादिति।** ततः प्राक् तेषामसत्वात् वर्देत्यादौ गुणस्यासिद्धत्वाच्चेति भावः।

असम्भवादित्युक्तिरयुक्तेति शङ्कते। **नन्विति। ऊदित्वादिडभाव इति।** तेन वेट्त्वेन पक्षे तदभाव इत्यर्थः। गुणे पुगन्तेत्यनेन पूर्वेणाद्गुणे इति। ढलोपस्यासिद्धत्वात्पुगन्तेत्यस्याप्राप्तिः। पुनर्दीर्घस्तु लक्ष्ये लक्षणमिति न्यायान्न भवति। एवञ्चाद्गुण इति पूर्ववर्णेन सह गुण इति भावः। क्वचित्पूर्ववद्गुण इति पाठः। तत्रापि गुणत्वेन सादृश्यम्। शास्त्रं चाद्गुण इत्येव। यद्वा तत्र कर्मधारयः षष्ठीतत्पुरुषो वा। आद्ये पूर्वपदेनैकः। पूर्वेत्यस्याधिकारः। तत्र द्वितीये पूर्वविशिष्टपरस्य स्थाने गुण इत्यर्थ इति बोध्यम्। एतेन सोऽपपाठ इत्यापास्तम्। अनिष्टसम्पादकतया साफल्यमिति सूचयन्नाह। **यथा स्यादितीति। एवं तर्हीति।** हलामणामसम्भवेन तत्र यथाकथञ्चित् फलसत्वे**नाचश्चे**त्य-स्योपस्थित्याऽसिद्ध्यभावेनाण्ग्रहणस्यावश्यकत्व इत्यर्थः। हि यतः। **अस्यैव** उक्तार्थकस्यैव। ननु सिद्धान्ते तदनुवृत्त्या वारणवदिदानीं तन्निर्देशस्य सौत्रत्वादिनोपपत्तौ न ज्ञापकताऽत आह। **तथेति।** 'दृढस्थूले'त्यादीनां मध्ये 'प्रभौ परी'त्यत्र वृढशब्दस्य पाठोऽपीत्यर्थः। अपिर्वक्ष्यमाणरीत्याऽण्ग्रहणसमुच्चायकः। परेण तत्राण्ग्रहणेहस्थ ऋकारोपधपाठोऽसङ्गतः स्यादिति भावः। तदुपपादयति। **वृहू इति।** इडभावस्तु ऊदित्वेन वेट्कत्वेन **यस्य विभाषे**(पा०सू० ७-२-१५)ति सिद्ध इति भावः। प्रासङ्गिकमाह। **दन्त्योष्ट्येति।** चो वाक्यलङ्कारे। 'उद्वृहेति' ऋक्

**हरदत्तादिग्रन्थे स्पष्टमेतत् । तुदादौ एतद्धातूत्तरत्वेन पठ्यमानयोः ''तृहू स्तृंहू हिंसायाम्'' (तु०प०) इति धात्वोरपि निष्ठायां 'तृढः' 'स्तृढः' इति रूपं बोध्यम् । ''दृढः स्थूल-बलयोः'' (पा०सू० ७-२-२०) इति तु इडभावो नकारहकारयोर्लोपो निष्ठातकारस्य ढत्वं च निपात्यते न त्वसिद्धकाण्डस्थढत्वादेरिह प्रवृत्तिरिति वक्ष्यते । तेन 'परिद्रढय्य' 'पारिद्रढी कन्या' इत्यादौ लघुत्वप्रयुक्तो णेरयादेशः ष्यङभावश्च सिध्यतीति दिक् । तेन द्रलोपसूत्रे परेणाण्ग्रहणपक्षेऽपि वृढतृढस्तृढेष्वेवातिप्रसङ्गो न तु दृढेऽपीति विवेकः ।**

**''केऽणः'' (पा०सू० ७-४-१३) इत्यत्र परेणाण्ग्रहणे 'गोका' 'नौका' 'गीष्का' 'उपानत्का' 'चतुष्कम्' इति घत्वविसर्जनीययोरसिद्धत्वाद्ध्रस्वप्रसङ्गः, तथापीह ह्रस्वश्रुत्योपस्थितस्य ''अचः'' (पा०सू० १-२-२८) इत्यस्याबाधाय पूर्वेण भविष्यति । तस्य ''अचः'' (पा०सू० १-१-२८) इत्यस्याबाधाय पूर्वेण भविष्यति । अबाधेनोपपत्तौ**

---

श्रुतिः । प्राचोग्रन्थासाङ्गत्यायाह । **तुदेति । एतद्धात्विति ।** वृहधात्वित्यर्थः । धात्वोरपि रूपमित्यत्रान्वयः । **बोध्यमिति ।** प्रक्रिया पूर्वोक्तैवेति तदपि द्वयं सिद्धान्ते तत्प्रत्युदाहरणमिति भावः । प्राथमिकदृढशब्दपाठस्य तत्वानुक्तौ बीजमाह । **दृढ इति । इति तु** इत्यनेन तु । **इह** दृढ इत्यत्र । **तेनेति ।** असिद्धकाण्डस्थढत्वाद्यभावस्य सत्त्वेनेत्यर्थः । **लघुत्वेति ।** एतेनेडभावो ढत्वं च निपात्यतां, धत्वषत्वढलोपास्तु भविष्यन्त्यैवेति शङ्काऽपि निरस्ता । वस्तुतस्तु अस्यापि निर्देशादेव सिद्धेर्न ज्ञापकत्वम् । किञ्च स्वस्मिन्नसाफल्येन ज्ञापकत्वासङ्गतिश्च । अतः प्रथमं भाष्योक्तमण्ग्रहण-मेव ज्ञापकम् । वर्ढेत्यादौ तु गुणस्यासिद्धत्वात् फलाभावेन वेर्ढेत्यादिरूपस्यैवाभावेनादोषात् । अन्यत्र तु हलामणामसम्भवस्यैव प्रागुक्तत्वान्न दोष इति बोध्यम् । तदाह । **दिगिति ।** तथा च प्राचोक्तमण्ग्रहणस्य दृढ इति प्रत्युदाहरणमसदिति बोध्यम् । तद् ध्वनयन्नाह । **तेनेति ।** तत्र तदभावेनेत्यर्थः । अपिरण्ग्रहणाभाववदच्परिभाषोपस्थितिपक्षस्यापि समुच्चायकः ।

भाष्योक्तमाह । **गोका नौकेति ।** अस्य यद्यपीत्यादिः । कैयटोक्तमाह । **गीष्का उपानत्केति ।** स्वयमाह । **चतुष्कमिति ।** इति इत्येतेषु । गीष्केत्याशयेनाह । **घत्वेति ।** क्रमाविवक्षाया**मल्पाच्तर**मिति घत्वशब्दपूर्वनिपातः । यद्वा अनेन पूर्वमपि उपानत्का गीष्का चतुष्कमित्येव पाठ इति सूचितम् । तावताप्यवतरणाविरोधाप्रसङ्ग इति । तथा चानिष्टं फलमस्तीति भावः । न मुने इति योगविभागस्य भाष्यानारूढत्वात्तेन तयोरनसिद्धत्वमिति कैयटोक्तसमा-धेरसाङ्गत्यादाह । **तथापीहेति ।** 'केऽण' (पा०सू० ७-४-१३) इत्यत्रेत्यर्थः । हि यतः ।

**हि बाधो न न्याय्यः। ''अणोऽप्रगृह्यस्य'' (पा०सू० ८-४-५७) इत्यत्र परेण सति – 'कर्तृ' 'अग्ने' 'वायो' 'मत्यै' 'पपौ' मालामाचक्षाणो माल्' 'वृक्षवयतेरप्रत्ययः वृक्षव्' अत्रापि प्राप्नोति। रेफवर्जिता अन्तस्थाः सानुनासिकनिरनुनासिकभेदेन द्विधेत्युक्तत्वात्। तस्मादिहाप्रगृह्यस्येति पर्युदासादच एवानुनासिको बोध्यः। न चाण्ग्रहणसामर्थ्यान्नञिव-युक्तन्यायस्य बाधः, तस्य पूर्वेणाप्युपपन्नत्वात्। अत्र लण्सूत्रे स्थित्वा वृक्षवृशब्दमित्थं कैयटो व्युदपादयत् - वृक्षं वृश्चतीति क्विपि कृते वृक्षवृश्चमाचष्ट इति णिचि टिलोपे च कृते वृक्षवयतेर्विचि वृक्षव् इति भवति। क्विपि तु ''कौ लुप्तं न स्थानिवत्'' ''कौ विधिं प्रति**

---

**न्याय्य इति।** इदं च प्राचामनुरोधेन। निर्दिष्टस्थानिकत्वेन परिभाषाया अनुपस्थितेः। तस्मा'न्नहि के परेऽणः सन्तीति। इदमस्ति। गोका नोका' इति च भाष्यात्[1] गीष्कादीनामनभिधानम्। गोकेत्यादौ त्वजुपस्थित्यैव सिद्धेऽण्ग्रहणसामर्थ्यात्पूर्वेण ग्रहणेन न दोष इति समाधितत्वमत्र बोध्यम्। **परेणेति।** अण्ग्रहण इति शेषः। भाष्यस्थं कर्तृ हर्तृ इत्येचामप्युपलक्षणम्। अत एवाचोऽप्रगृह्यस्येत्युक्तं भाष्येऽग्ने। अन्यथाऽकोऽप्रगृह्यस्येत्येव वदेदित्याशयेनोदाहरति। **कर्तृ अग्ने इत्यादि।** तावदित्यादिः। **अत्रापीति।** एष्वपीत्यर्थः। पपावित्यन्तेष्विव वृक्षव् मालादावपि प्राप्नोतीति तात्पर्यार्थः। अनुनासिक इति शेषः। यान्तस्यासम्भवात् त्त्यागः। रेफस्य तु तदभावात्तदनत्त्यागः। अत एवाक्रमसम्भवं निरस्यन्नाह। **रेफेति।** अन्यथा विशिष्य तदुक्तिरसङ्गता स्यादिति भावः। सानुनेत्यादि प्राग्वत्। **उक्तत्वादिति।** [2]**यमोऽनुनासिकानह्व**विति शिक्षादिनेति भावः। पूर्वपक्षमुपसंहरति। **तस्मादिति।** उक्तदोषस्य स्थितत्वादित्यर्थः। **इह** अणोऽप्रगृह्येति सूत्रे। परेणाण्ग्रहणे स्वीक्रियमाणेऽपीति शेषः। **बोध्य इति।** आपाद्यलेनेति भावः। तथा च तथैवेष्टसिद्धावणग्रहणसामर्थ्यात् पूर्वेण ग्रहणमिति भाष्योक्तः सिद्धान्तो बोध्यः। अत एव तत्सामर्थ्यात् अन्यथाकल्पनेन तत्सार्थक्यात् प्राथमिकदोष एवेति नेष्टसिद्धिरिति नेति भावः। तामेवाह। **न चेति।** तथा च हल्संग्रहार्थं तदावश्यकमित्युक्तदोषगण एवेति भावः। उक्ताशयेनैव समाधत्ते। **तस्येति।** अण्ग्रहणस्येत्यर्थः। अपिरुक्तसमुच्चायकः। तथा चाबाधेनैवोपपत्तौ बाधो न न्याय्य इति भावः। वस्तुतो दोषवादिनः पर्युदासस्य ज्ञानमालादेस्त्वनभिधानम्। एवञ्च तत्रादोष एव। अक्षु दोषेऽपि अच इत्येव वाच्यम्। अप्रगृह्येति पर्युदासेन वा तेषां सिद्धे पुनः तत्सामर्थ्यात् पूर्वेणैवेष्टसिद्धिरिति बोध्यम्। दूषयितुं कैयटं प्रसङ्गादनुवदति-**अत्रेति।** भाष्यप्रतीके वाणोऽप्रगृह्येत्यत्र तत् ग्रहणविचारप्रसङ्गे वा। **इत्थं** वक्ष्यमाणप्रकारेण। तमेवाह। **वृक्षमिति।** ननु पुनरपि क्विबेव कुतो न कृतोऽत आह। **क्विपि त्विति। कौ विधिमिति।** क्वौ परतो विधिमित्यर्थः। क्वित्वेन

---

१. म.भा.पृ.सं. १४२ (प्रथमो भागः) २. पाणि.शिक्षा (श्लो.सं. ३८)

**न स्थानिवत्'' इत्युभयथापि स्थानिवद्भावनिषेधात्सम्प्रसारणप्रसङ्गो ''लोपो व्योर्वलि'' (पा०सू० ६-१-७६) इति लोपं बाधित्वा तदपवादस्योठः प्रसङ्गश्च। विचि तु स्थानिवद्भावाद्वल्निमित्तो वलोपो न भवति।**

**नन्वेवमपि वृक्षव्करोतीत्यत्र ''हलि सर्वेषाम्'' (पा०सू० ८-३-२२) इति प्राप्नोति। न च स्थानिवद्भावः, पूर्वत्रासिद्धे तन्निषेधादिति चेत् ? न, ''भो भगो'' (पा०सू० ८-३-१७) इत्यतोऽशीत्यनुवर्त्याशि हलि तद्विधानादिति। न च विच्पक्षेऽपि णिचः प्राग्भाविनं क्विपमेवाश्रित्योठ् प्रसञ्जनीयः, अन्तर्भूतक्विबाश्रयतयाऽन्तरङ्गे कर्त्तव्ये बहिर्भूतणिजपेक्षतया बहिरङ्गस्य टिलोपस्यासिद्धत्वात्। इदं त्विह वक्तव्यम्। विच्पक्षेऽप्येकदेशविकृतस्यानन्यत्वेन व्रश्चतिग्रहणेन ग्रहणाद् ''व्रश्च''(पा०सू० ८-२-३६) इति षत्वं दुर्वारम्। न च णिलोपस्य स्थानिवत्त्वम् 'पदान्तविधौ न' इति निषेधात्,**

---

क्विपोऽपि तन्निमित्तत्वात् क्विबि त्वित्वमित्याशयो वा। वस्तुतस्तु दोषद्वयाभिप्रायेण यथाक्रमं निषेधद्वयोल्लेखः। तत्र द्वितीयेऽऽद्यस्यापि प्रवृत्तिरित्यन्यदेतत्। एतदर्थमेवोभयथेत्युक्तम्। अपिनाऽऽद्ये प्रथमप्रकारस्यैव समुच्चयः। प्रथमपक्षद्वये तु यथाश्रुतमेव युक्तमपि मिथः समुच्चायक इति बोध्यम्। **सम्प्रेति।** एकदेशविकृतमिति न्यायेन वकारे वृश्चतित्वा**द्ग्रहिज्ये**(पा०सू० ६-१-१६)ति तत्प्रसङ्ग इत्यर्थः। यद्यपि अग्रे कैयटेन **लोपो व्यो**रिति वलोपप्रसङ्गश्चेत्युक्तम्। तथापि तदसाङ्गत्यादाह। **लोपो व्योरिति।** उक्तरीतिद्वयेन स्थानिवत्वनिषेधादिति भावः। तदसाङ्गत्यध्वननायाह। **तदपवादेति।** हेतुगर्भमिदं विशेषणम्। नन्वेवमपि विचि उक्तदोषद्वयाभावेऽपि वलोपः स्यादेवात आह। **विचि त्विति।** उक्तनिषेधद्वयाप्रवृत्तेरिति भावः।

विचि दोषान्तरमाशङ्कते। **नन्वेवमपीति।** उक्तहेतोर्वल्निमित्तवलोपवारणेऽपीत्यर्थः। एवञ्च कैयटासङ्गतिरेवेति भावः। तं समर्थयन् शङ्कते। **न चेति।** ननु विच्पक्षेऽपि प्रागुक्तदोषद्वयसत्वात् कैयटासङ्गतिरित्येवेत्याशयेन शङ्कते। **न च विजिति।** अपिः क्विप्पक्षसमुच्चायकः। एवमग्रेऽपि। एवेन विचो व्यावृत्तिः। **ऊठिति।** सम्प्रसारणस्याप्युपलक्षणमिदम्। अनजादेशत्वा**दचः परे**त्यस्याप्राप्तेः टिप्रयुक्तकार्याभावात् स्थानिवदित्यस्याप्यप्राप्तेरिति भावः। अत एवान्यथा तदुक्तिं समर्थयन्नाह। **अन्तरिति। अन्तरङ्गे** ऊडादौ। **असिद्धत्वादिति।** इति तद्भाव इति शेषः। यक्षानुरूपो बलिरिति न्यायेन कैयटरीतिमभ्युपेत्य खण्डयति। **इदं त्विहेत्यादिना।** तुरुक्तवैलक्षण्ये। एवञ्च तथा केनचिदुक्तमयुक्तमेवेति भावः। **इह** कैयटोक्तौ। **वृश्चतीति।** वकारस्येत्यादिः। भवदापादितसम्प्रसारणवदिति भावः। **न चेति।** तथा चापदान्तत्वात्तस्य

**"पूर्वत्रासिद्धे न" (भा०इ०) इति निषेधाच्च। तस्मान्नायं वृश्चतिरपि तु वेतिर्वातिर्वा, वृक्षं वेतीति वृक्षवीः वृक्षं वातीति वृक्षवाः। वृक्षव्यं वृक्षवां वाऽऽचष्टे वृक्षव्, विच्, न तु क्विप् ऊठ्प्रसङ्गात्, क्वौ विधिं प्रति स्थानिवत्वनिषेधात्। तथा च देवयतेः 'द्युः' इति सिद्धान्तितम्। न चैवमपि "लोपो व्योः"(पा०सू० ६-१-७६) इत्यस्य प्रसङ्गः,**

---

तदप्रवृत्तिरिति भावः। ननु प्रातिपदिकार्यिण पदत्वं बहिर्भूतसुबनिमित्तकं तु तन्न। णांशे स्थानिवद्भावादत आह। **पूर्वत्रासिद्धे चेतीति।** वार्तिकानुकरणमिदम्। न स्थानिवदित्यस्य पूर्ववार्तिकादनुवृत्तिरिति बोध्यम्। ननु पदसंज्ञाया अपि पदचरमावयवविधित्वेन पूर्वत्रासिद्धे इत्यत्र पदचरमावयवविधायकातिरिक्तस्यैव त्रैपादिकस्य ग्रहणस्य पदे अन्त इत्यर्थेन वेतस्वानित्यादौ स्थानिवत्वनिषेधव्यावृत्तिपरभाष्यप्रामाण्येन स्वीकारेण कथमस्योल्लेखः। किञ्च पदचरमावयवादि-साधकस्तत्प्रतिबन्धकश्च स्थानिवद्भावस्तेन निषिध्यते विनिगमनाविरहादिति स एवोचित इति बहिर्भूततन्निमित्तकं तत्वं तत्र सुलभमेवेति चेन्न एकदेश्युक्तित्वेनादोषात्। वस्तुतस्तु इदं सम्प्रसारणप्रसङ्ग इति कैयटोक्तं च चिन्त्यम्। णौ परतस्तत्प्रकृतिभूतप्रातिपदिकस्य टिलोपविधानेन वृश्चतेः स्थानित्वे मानाभावेन वकारे एकदेशविकृतिन्यायेन वृश्चतित्वस्य दुर्लभत्वात्। अर्धाधिकविकारेण प्रत्यभिज्ञाया अभावाच्च। न च वृश्च एव टिलोपो स्थानित्वम्। प्रकृत्यैकाजिति प्रकृतिभावापत्तेः। एतेन व्रश्चेति सूत्रे पदाधिकारेण व्रश्चन्तत्वमेकदेशेति न्यायेन सुलभमित्यपास्तम्। उक्तरीत्या तस्याप्राप्तेः। स्कोरित्यतोऽन्ते इत्यनुवर्त्त्य वैयधिकरण्येनैवान्वयाश्रयणेनादोषाच्च। अत एवान्तेग्रहणं चरितार्थमिति दिगिति बोध्यम्। नन्वेवं तथा कैयटोक्तिः सङ्गतैवेति चेन्न 'अत उपधाया' इति वृद्धेर्दुर्वारत्वात्। तदेतदभिप्रेत्याह। **तस्मादिति।** उक्तरूपबुद्धिस्थाद्धेतोरित्यर्थः। तत्प्रकारमाह। **वृक्षमिति। वा इति।** क्विबिति शेषः। **चष्ट इति।** णिजिति शेषः। ततो विच् वृक्षविति पाठः। आचष्टे वृक्षव् विच् इत्यपाठः। असम्बद्धत्वात्। विजित्युक्तिफलमाह। **न त्विति।** ननु णिलोपस्य स्थानिवत्वमत आह। **क्वौ विधिमिति।** तत्वेन तन्निमित्तकाचं प्रतीत्यर्थः। ननु क्वौ विधिमिति नाङ्गीक्रियतेऽत आह। **तथा चेति।** उक्तार्थस्य तस्याङ्गीकारे चेत्यर्थः। देवयतेत्यस्य क्विबिति शेषः। ण्यन्तदिव्धातोरिति तदर्थः। उपपदे क्वौ लुप्तमित्यस्यैव फलमुक्तं कैयटेन। यद्यप्यूठ्क्वौ विधिमित्येव सिद्धम्। तथापि णेः स्थानिवत्त्वेनोकारस्य वृद्धिः स्यात्। स्थानिद्वारकस्यानादिष्टादचः पूर्वत्वस्याश्रयणादिति तदाशयः। तथापि नासौ सिद्धान्तः। तदाश्रयणे फलाभावस्य तदनित्यत्वस्य च **भावप्रकाशे** प्रतिपादितत्वादित्याशयेनाह। **सिद्धान्तितमिति।** तस्य तु सखीयते सख्युरित्यादीन्यसाधारणफलानि बोध्यानि। **न चैवमपीति।** यत

**स्थानिवत्त्वात्। न च पदान्तविधित्वम्, पदान्तश्चेद्विधीयते इत्यर्थात्, लोपस्य चानवयवत्वात्। विभावितं चेदं ''भो भगो'' (पा०सू० ८-२-१७) इति सूत्रे कैयटेनेति दिक्।**

**यत्तु ''हलि सर्वेषाम्'' (पा०सू० ८-३-२२) इति सूत्रे हरदत्तेनोक्तम् - ''वृक्षव् करोतीत्येवं रूपः प्रयोगो नास्त्येव, अनभिधानात्। लण्सूत्रे ''न पदान्ता हलोऽणः सन्ति'' (भा० इ०) इति भाष्यकारोक्तेश्चानभिधानं निश्चीयते इति, तच्चिन्त्यम् लण्सूत्र-भाष्ये ''न पदान्ताः परेऽणः सन्ति'' इति पाठात् अप्रगृह्यस्येति पर्युदासाश्रयणेनाचामेव कार्यभाक्त्वादितरे कार्यभाजो न सन्तीत्येवंपरतया कैयटेन तद्विवरणाच्च, ''ननु चाय-मस्ति कर्तृ'' इत्युत्तरभाष्येणास्य दूषितत्वाच्च, त्वदुदाहृतपाठे उत्तरभाष्यस्योक्तिसम्भ-**

---

पदचरमावयवश्चेदित्यर्थः। अत एवाह। **लोपस्येति।** चस्त्वर्थे। एवं तद्व्याख्यानेनैतत्प्रयोगसाधने मानमाह। **विभेति।** पदान्तस्य स्थाने विधौ नेति व्याख्याने तु न सिद्ध्येदिदमित्यादि **मनोरमायां**[1] द्रष्टव्यम्। अत्र पक्षे टिलोपस्य स्थानिवत्वेना**त उपधाया** इति वृद्धिर्नेति बोध्यम्। वस्तुतोऽनभिधानमेवास्येति न तत्र निर्भरौचित्यमित्यनुपदमेव स्फुटीभविष्यति। तदाह। **दिगिति।**

**एवंरूप इति।** वृक्षव्घटित इत्यर्थः। **वानभीति।** अन्यथा वृक्षव् हसतीत्यादावगतेरिति भावः। चो ह्यर्थे। **न हि पदान्ता इति।** पदानामेवाचः सा। तेन नासिको जायत इत्याश्रित्येदमुक्तम्। न तु तत्र पदान्ताधिकारोऽस्तीति बोध्यम्। एवञ्च तथा तदुक्तिरसङ्गतेति भावः। ननु पाठभेदेऽप्यनभिधानांशे न विप्रतिपत्तिरत आह। **अप्रगृह्येति। कार्येति।** अनुनासिकेत्यर्थः। इतरे अज्भिन्ना हलः। **तद्विवेति।** कर्मणः शेषत्वविवक्षायां शेषषष्ठ्या समासो बोध्यः। तथा च न तेन भाष्येण तेषां सत्वमेव निषिध्यते। किन्तु कार्यत्वमेवेति पदान्ते वर्तमानाः परे ऋकारादयोऽणोऽनुनासिकप्राप्तियोग्या न सन्तीति भाष्यार्थो बोध्यः। एतेन युध्यौहरति हेत्यादेः सत्वाच्चिन्त्यमिदमित्यपास्तम्। ननु कैयटेन तथोक्तं न तु भगवतेति तदसत्वमेव तत्तात्पर्यविषय इति **हरदत्तोक्तं** युक्तमेवात आह। **ननु चेति। भष्येणास्येति।** सिद्धान्त्युक्तिरूपेण पूर्वपक्षरूपोक्तपूर्वभाष्यस्येत्यर्थः। तथा च तत्वेन तस्य नोक्तार्थसाधकत्वमिति भावः। नन्वेवमपि **हरदत्तो**क्तपाठेऽनभिधानसिद्धिरेवात आह। **त्वदुदेति। उत्तरेति।** 'ननु चायमस्ति कर्तृ हर्तृ' इति भाष्यस्येत्यर्थः। हलां तेषामसत्वे उक्तेऽचां तेषां सत्वोक्तिरसंवहेति भावः। ननु तत्पाठसाङ्गत्त्येऽपि

---

१. प्रौ.म.पृ.सं. १६३

**वालाभाच्च। अत एव ''भो भगो'' (पा०सू० ८-२-१७) इतिसूत्रे भाष्यकारवृत्तिकारादिभिः सर्वैरपि 'वृक्षव्' इत्युदाहृतम्। स्वयमपीह तथैवोदाहृतमिति पूर्वापरस्वग्रन्थविरोधो भाष्यवृत्तिकैयटादिसकलमहाग्रन्थविरोधो मूलयुक्त्यभावश्चेति तिष्ठतु तावत्।**

**प्रकृतमनुसरामः। मकारोऽपि त्रिभ्यो ग्राह्यः – ''पुमः खय्यम्परे'' (पा०सू० ८-३-६) ''हलो यमां यमि लोपः'' (पा०सू० ८-४-६४) ''ङमो ह्रस्वादचि'' (पा०सू० ८-३-१२) इति।**

**चकारश्चतुर्भ्यः - ''इको यणचि'' (पा०सू० ६-१-११) ''इच एकाचोऽम्'' (पा०सू० ६-३-३८) ''एचोऽयवायावः'' (पा०सू० ६-१-७८) ''पूर्वौ तु ताभ्यामैच्'' (पा०सू० ७-३-३) इति।**

**यकारोऽपि चतुर्भ्यः - ''अनुस्वारस्य ययि'' (पा०सू० ८-४-४५) ''मय उञः'' (पा०सू० ८-३-३३) ''झयो होऽन्यतरस्याम्'' (पा०सू० ८-४-६२) ''पुमः खयि'' (पा०सू० ८-३-६) इति।**

---

तत्र पाठे यदि तदभिधानं स्यात्तर्हि कर्तृ इत्यादिवत् वृक्षवादेरपि प्रदर्शनं कुतो न कृतमतोऽनभिधानमेवात आह। **अत एवेति।** तत्सत्वानिषेधादेवेत्यर्थः। **स्वयमिति। हरदत्ते**नापि प्रकृतभोभगो इति सूत्र इत्यर्थः। इदं च सर्वं प्राचामनुरोधेन। वस्तुतो हरदत्तपाठासाङ्गत्येऽपि अनभिधानं तदुक्तं युक्तमेव। तदग्रेऽप्रगृह्यस्येति पर्युदासादच एव सम्भवतीत्यज्ग्रहणमपि न कार्यमित्यणुग्रहणसामर्थ्यात् पूर्वेणेति सिद्धान्तिनोक्तमिति तदज्ञानेनैव पूर्वपक्षौ चिन्त्येते। तथा भाष्यव्याख्यानानौचित्यात्। अन्यथा पूर्वपक्षस्य सन्देहस्य चानुत्थानप्रसङ्गात्। तस्मादाष्टमिकं भाष्यमेकदेश्युक्तिरेव। अन्यथोक्तस्थलेऽगतेः। उक्तं च तत्र कैयटेनापि तथैवेति बोध्यम्। तद् ध्वनयन्नाह। **इति तिष्ठतु तावदिति।** न तत्र ममाग्राह इति भावः॥

**त्रिभ्य इति।** 'एकाचोम्' 'तृणह इम्' 'वच उम्' 'रमन्यातरस्या'मित्यादौ तु न तत्। तथा सति तेषां प्रत्ययत्वे तदधिकारे पाठौचित्यात् षष्ट्यनन्वयापत्तेश्च। रोपधयोरित्यस्यासाङ्गत्यापत्तेश्च। आदेशत्वे तत्प्रकरणे पाठौचित्याच्च। आगमप्रकरणे तत्पाठासाङ्गत्यापत्तेश्च। प्रत्ययवच्चेत्यस्यासङ्गत्यापत्तेश्च, लक्षाविरोधापत्तेश्चेति दिक्। ञमादिसत्वे यथा न दोषस्तथाऽग्रे स्फुटीभविष्यति अनुपदमेव। यवायावः पूर्वौत्विति निरितिः पाठः। यवायाव इति पूर्वौत्विति त्वपाठः। मध्ये तस्यासम्बद्धत्वात्। ऋच इत्यादौ तु न तत्। अनन्वयापत्तेः। **खयीतीति।** एचो यङ्नियमः

---

१. म.भा.पृ.सं. १६३ (षष्ठो भागः)।

**रः पञ्चभ्यः — ''यरोनुनासिके'' (पा०सू० ८-४-४५) ''झरो झरि सवर्णे'' (पा०सू० ८-२-३९) ''खरि च'' (पा०सू० ८-४-५५) ''अभ्यासे चर्च'' (पा०सू० ८-४-५४) ''वा शरि'' (पा०सू० ८-३-३६)।**

**शकारः षड्भ्यः– ''भो भगो अघो अपूर्वस्य योऽशि'' (पा०सू० ८-३-१७) ''हशि च'' (पा०सू० ६-१-११४) ''नेड्वशि कृति'' (पा०सू० ७-२-८) ''झलां जश् झशि'' (पा०सू० ८-४-५३) ''एकाचो बशो भष्'' (पा०सू० ८-२-३७)**

**लकारोपि षड्भ्यः — ''अलोऽन्त्यस्य'' (पा०सू० १-१-५२) ''हलि सर्वेषाम्'' (पा०सू० ८-३-२२) ''इड् वलादेः'' (पा०सू० ७-२-३५) ''रलो व्युपधात्'' (पा०सू० १-२-२६) ''झलां जश्'' (पा०सू० ८-४-५३) ''शल इगुपधाद्'' (पा०सू० ३-१-४५) इति।**

**अयं च चतुर्दशसूत्रीस्थैर्हल्भिरिद्भिः सम्पन्नानामष्टाध्याय्यां व्यवहृतानां प्रत्याहाराणां संग्रहः। तेन सुप्तिङादे रप्रत्याहारस्य ''ञमन्ताड्डः'' (उ०सू० १-११९) इत्युणादिषु व्यवहृतस्य अमृप्रत्याहारस्य ''यमिर्ञमन्तेष्वनिडेक इष्यते'' इति व्याघ्रभूतिना व्यवहृतस्य च ''चयो द्वितीयाः शरि पौष्करसादेः'' (का०वा०) इति वार्तिककृता व्यवहृतस्य चयृप्रत्याहारस्य चाधिक्येऽप्यदोषः। संख्यानियमश्चायमत्तरत्र एकचत्वारिंशद्भिर्व्यवहारादध्यवसीयते इति बोध्यम्।**

---

जपकरणमित्यादौ तु न तत्। साहचर्यात्दसम्भवाच्च वैयर्थ्यापाताच्चानन्वयापत्तेश्च। सूत्रान्तरा-नर्थक्यापत्तेश्च। चयृसत्वेऽपि न दोष इति अनुपदमेव वक्ष्यते। 'झलां जश् झशि' इत्यत्र लक्ष्यद्वयम्। ननु सुप्तिङादेश्चयो ञमश्चोधिकस्य सत्वात्कथमिदमतः [1]**प्रकाशो**क्तं तदर्थमाह। **अयं चेति।** एकस्मादित्यादिना [2]**प्रक्रियाकृदुक्त** इत्यर्थः। विशेषणत्रयस्य क्रमेण व्यावर्त्यत्रयं तदुक्तमेवाह। **तेनेति।** तथा व्याख्यानेनेत्त्यर्थः। **तस्यैव** ञमृप्रत्याहारस्यैव। नन्वेवं संख्यानियमस्वीकारे एव किं मानमत आह। **संख्येति।** उक्तरूप इत्यर्थः। **उत्तरत्रा**ष्टाध्याय्यां। एवेन तादृशतद्वयव्यावृत्तिः।

---

१. प्र.कौ.प्र.पृ.सं. ३१

२. प्र.कौ.पृ.सं. २९

**अत्र श्लोकवार्त्तिकम् —**

**प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न।**
**आचारादप्रधानत्वाल्लोपश्च बलवत्तरः॥ (म.भा.पृ.सं. १३६ प्रथमो भागः)**

**प्रत्याहारोऽक्षरसमाम्नायः। तत्र येऽनुबन्धास्तेषामज्ग्रहणेष्वित्युपलक्षणम्। अजादिप्रत्याहारग्रहणेषु। कथं नेति। 'ग्रहणम्' इति शेषः। ''आदिरन्त्येन'' (पा०सू० १-१-७१) इति सूत्रेण हि अकारमारभ्याऽऽचकाराद्वर्णानां भवन्त्यच्संज्ञा मध्यस्थत्वाविशेषादिकारादीनामिव णकारककारङकाराणामपि स्यात्। ततश्च 'दधि-णकारः' 'दधि-ककारः' 'दधि-ङकारः' इत्यादौ यण् स्यात्। एवमड्ग्रहणे चकारस्यापि ग्रहणाद् 'रुचीनाम्' इत्यादौ ''अड्व्यवाये'' इति णत्वं स्यात्। एवमिण्ग्रहणेन चकारग्रहणाद् 'रुचिध्वे' इत्यादौ ''विभाषेटः'' (पा०सू० ८-३-७९) इति ढः स्यादिति पूर्वपक्षः पूर्वार्द्धस्यार्थः।**

**उत्तरमाह– आचारादिति। आचारोऽत्र सूत्रकृतो निर्देशः। ''उणादयो बहुलम्'' (पा०सू० ३-३-१) ''तृषिमृषिकृशेः'' (पा०सू० १-२-२५) ''ङसिङसोश्च'' (पा०सू० ६-१-११०) इत्यादौ यणोऽकृतत्वान्मध्यस्थानामप्यनुबन्धानां संज्ञित्वं नेति ज्ञाप्यते**

---

## २.४० प्रत्याहारेऽनुबन्धाग्रहणनिरूपणम्

यद्यपि **वार्तिककृता** श्लोकवार्तिकं हयवरट्सूत्रशेषे भाष्ये 'अइउणि'त्यादिसूत्रचतुष्टयं संलिख्य पठितम्। तथापि तत्प्रत्याहारमात्रविषयकत्वं प्राचीनैरुक्तम्। तदनुरोधेनाह। **अत्रेति।** यावत्प्रत्याहारविषय इत्यर्थः। अत एव पूर्वं सर्वेषामुपक्रमणम्। तादर्थ्यात् ताच्छब्दमित्याशयेनाह। **रोऽक्षरेति। उपेति।** दोषसाम्यादिति भावः। अक्षरसमाम्नाये पठितानामनुबन्धानां तत्तत्प्रत्याहारे ग्रहणं कुतो नेति परमार्थः। तदेव सदोषमुपपादयति। **आदीति।** हि यतः। **आचकारात्** तमभिव्याप्य। अपिरादिरन्त्येत्यस्य समुच्चायकः। एवमग्रेऽपि। आदिना दधि चकार इत्यादिसंग्रहः। एवं अज्ग्रहण इव। एवमग्रेऽपि। अपिना णकारपरिग्रहः। अपिना णकारपरिग्रहः। आदिनाऽरुणानामित्यादिपरिग्रहः। **निर्देश इति।** तदकरणेन निर्देश इत्यर्थः। तदाह। **उणेति।** आदिना 'किति च' (पा०सू० ७-२-११८) 'कुत्सितानि कुपापाणके कुत्सितैः' (पा०सू० २-१-५३) इत्यादिपरिग्रहः। **ज्ञाप्यत इति।** तेनैवं निर्देशेनेति भावः।

**इत्यर्थः। समाधानान्तरमाह – अप्रधानत्वादिति। अणित्यादिसंज्ञाः प्रणेतुं तद्रूपप्रतिपादनायानुबन्धा उच्चार्यन्ते। ततश्च परार्थमुपादीयमानतया तेषामप्राधान्यम्। इतरेषां तु स्वार्थमुपादीयमानत्वात्प्राधान्यम्। तेन तेषामेव संज्ञा न त्वनुबन्धानाम्। ''प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः'' (प०भा० १०५) इति न्यायात्। नन्वेवमकारस्याच्संज्ञा न स्यात्, संज्ञाप्रतिपादने चकारस्येव तस्याप्यङ्गत्वाविशेषादिति चेत्? न, ''स्वं रूपम्'' (पा०सू० १-१-६८) इत्यनुवृत्त्याऽऽदेरपि संज्ञित्वात्। स्वं रूपं चादेरेव गृह्यते नान्त्यस्य, सर्वनाम्नां प्रधानपरामर्शकताया औत्सर्गिकत्वात्। इतेति तृतीयया इतोऽप्राधान्यलाभात्। तदेवं संज्ञाप्रवृत्तिकालेऽनुबन्धानां संनिधानमभ्युपेत्य द्वेधा समाहितम्। वस्तुतस्तु तदेव नास्तीत्याह-लोपश्चेति। बलवानेव बलवत्तरः स्वार्थे तरप्। ''अल्पाच्तरम्'' (पा०सू० २-२-३४) इति यथा। ''हलन्त्यम्'' (पा०सू० १-३-३) इतीत्संज्ञायां हि कृतायां पकारादीनामच्संज्ञा प्राप्नोति लोपश्च। तत्र परत्वान्नित्यत्वा-**

---

**समाधानान्तरमिति।** ज्ञापकापेक्षया न्यायेन वारणे लाघवादिति भावः। प्रणेतुमित्यन्तस्य व्याख्यातद्वयेति। यद्वा प्रणेतुमिति विधिषु ता उच्चारयितुमित्यर्थः। **तद्रूपेति।** संज्ञास्वरूपेत्यर्थः। **ततश्च** तदर्थं तदुच्चारणाच्च। **परार्थमिति।** अजादिसंज्ञास्वरूपबोधनार्थत्वेन परार्थत्वमित्यर्थः। **तेषां** अनुबन्धानां **इतरेषां तु** स्वराणां तु। **न त्वनुबन्धेति।** यथेकारादयः संज्ञिविशेषसमर्पणायोपात्ता न तथा णकारादय इति तेषामितामसंज्ञित्वमेवेति भावः। **एवं** न्यायेनानुबन्धानां संज्ञावारणे। **अकारेति।** तस्यापीत्यर्थः। **तस्याप्यङ्गेति।** अकारस्यापीत्यर्थः। **स्वं रूपमिति।** इत्थं पक्षेत्यर्थः। नन्वेवमन्त्यस्यापि स्यादनुवृत्तेरप्रामाणिकत्वादत आह। **स्वं रूपं चेति।** 'केषां शब्दानां' इत्यादौ तदभावादाह। **औत्सर्गिकेति।** ननु तस्याप्राधान्यमेव कुतोऽत आह। **इतेतीति।** तृतीयमवतारयितुमुपसंहरति। **तदेवमिति।** तस्मादुक्तप्रकारेणेत्यर्थः। **तदेवेति।** सन्निधानमेवेत्यर्थः। उत्कर्षस्य प्रतियोगिसापेक्षत्वेनात्र तदभावात्तस्यानुपयोगाच्चाह। **बलेति।** इदमुपपादयति। **हलन्त्यमिति।** हि यतः। अच्संज्ञासिद्ध्यर्थमन्त्यस्येत्संज्ञाया आवश्यकत्वेन तत्काले मध्यानुबन्धानामपि सा भविष्यतीत्याशयात्। तदाह। **कृतायामिति।** प्राप्नोतीति मध्यमणिन्यायेनान्वेति। **तत्र** तयोर्मध्ये। नन्वतुल्यबलत्वेन परत्वस्यासम्भवोऽत आह। **नित्यत्वादिति।** नन्विदमप्ययुक्तम्। कार्यकाले तस्य मुख्यतया तत्र संज्ञाशास्त्रस्य पृथक् वाक्यार्थाबोधेनान्तरङ्गत्वेन तदानीमेव[1] सा स्यात्। कृताकृतप्रसङ्गित्वाभावादत आह।

---

१. तदानीमेव प्राप्ता स्यादिति खपाठः।

**दन्तरङ्गत्वाच्च लोपे कृते संज्ञाप्रवृत्तिकाले णकारादीनामसत्त्वदेव तेषामजादिसंज्ञा नेति भावः। यस्मिंस्तु प्रत्याहारे योऽनुबन्धोऽपेक्षितस्तस्य वचनसामर्थ्यात्तत्प्रवृत्तेः प्राग् लोपाभावः। लुप्तेऽपि वा तस्मिन् भूतपूर्वेण तेन सहित आदिः संज्ञा भविष्यति। अन्तःपातिनां तु लुप्तानां न संज्ञा श्रूयमाणेष्विकारादिषु सावकाशत्वादिति। ननु हल्प्रत्याहारेऽकारस्य प्रवेशो दुर्वारः। न हि तत्र लोपो लभ्यते। ततः प्रागच्संज्ञाविरहेण ''उपदेशेऽज्'' (पा०सू० १-३-२) इतीत्संज्ञाया अप्रवृत्तेः। एवञ्चाद्यसमाधानमपि दुरुपपादम्। उदाहृतस्याचारस्य ''लोपश्च बलवत्तरः'' इत्यनेनैव गतार्थत्वादिति चेत् ? न, ''सोऽस्यादिः'' (पा०सू० ४-२-५५) इति निर्देशेन प्रथमस्य गुणानां**

---

**अन्तरङ्गेति।** एतेन परत्वादिसत्वे अत बह्वपेक्षया द्वित्वस्यान्तरङ्गत्वस्य [1]......... युक्तत्वेऽपि नित्यत्वान्तरङ्गत्वयोः सत्वेऽन्यतरस्य निमित्तत्वेनोल्लेखे इच्छाया एव नियामकत्वं, अत एव ह्रस्वापेक्षया द्वित्वस्यासत्वेऽपि नित्यत्वमेव भाष्ये उक्तमिति तावत्पर्यन्तानुधावनं व्यर्थमित्यपास्तम्। तथा सत्यपि प्रकृते तदसम्भवात्। एवञ्च तदुत्तरं प्रवर्तमानं तत्सूत्रमनुबन्धसदृशभिन्नानामेव मध्यगसदृशानां ग्राह्यतां बोधयतीति भावः। नन्वेवं प्रत्याहारसिद्धिरेव न स्यादत आह। **यस्मिन्स्त्विति।** तुर्वैलक्षण्ये। **प्रत्येति।** अजादिसंज्ञास्वरूपे इत्यर्थः। **वचनेति। आदिरन्त्येनेति** वचनेत्यर्थः। अयमेव तत्पदार्थः। सामर्थ्यावलम्बनाद्बाधकल्पनापेक्षयाऽबोधेनैवोपपत्ताविति न्यायेन लाघवादाह। **लुप्ते वेति।** साम्प्रतिकाभावादिति भावः। वैषम्यादेवातिप्रसङ्गो नेत्याह। **अन्तरिति।** मध्यवर्तिनामित्यर्थः। वैलक्षण्यसूचक एव तुः। तदेवाह। **लुप्तेति।** इतिर्वार्तिकार्थसमाप्तौ। तत्राद्यतृतीययोरव्याप्तिमाशङ्कते। **नन्विति। अकारस्येति।** लणित्यत्रत्यस्येत्यर्थः। तस्यानुच्चारणार्थत्वादिति भावः। क्वचित्समस्तः पाठः। हि यतः। **तत्र** तदकारे। **दृश्यते** लभ्यते। तथा पाठस्तु सम्यगेव। अन्तरङ्गत्वादिति शेषः। **ततः** हल्प्रत्याहारसिद्धितः। **विरहेणोपेति।** इत्संज्ञाभावेनो**पदेशेऽजि**त्यस्य वाक्यार्थभावेन तदप्रवृत्तेरिति भावः। **एवञ्च** तृतीयसमाध्यसम्भवे च। मध्यमस्य सम्भवादाह। **आद्यसमेति।** अपिः तस्यैव समुच्चायकः। **उदेति।** 'उणादय' इत्यादिनेति शेषः। स च उणाद्यग्राहको न तु हलि अकाराग्राहकः। तादृशस्तु पूर्वोदाहृतातिरिक्त इति भावः। **गतार्थत्वादिति।** एवञ्च नातिरिक्तः सः समाधिरस्ति येन वारणमत्र स्यादिति भावः। पूर्वोदाहृतातिरिक्ताचारसत्वाभिप्रायेण समाधत्ते। **सोऽस्यादिरिति।** अकारस्यानुबन्धत्व उक्तरीत्या

---

१. अत्र ग्रन्थः त्रुटितः।

**भेदकत्वेन चरमस्य च समाधानस्य सूपपादत्वादिति दिक् ।।**

**इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमे पादे द्वितीयमान्हिकम् ।। २ ।।**

---

तदानीं लोपाप्राप्त्या तस्य सन्निधानाद्धल्संज्ञाया**मेतत्तदो**रिति सुलोपापत्त्या तन्निर्देशासाङ्गत्या-पत्तिरिति तेन तदभावस्तस्य ज्ञाप्यत इति भावः । **भेदकत्वेनेति ।** तथा चानुनासिकस्य तस्य हल्त्वेऽपि निरनुनासिकस्य प्रयोगस्थस्य तत्प्रवृत्तिकाले तत्रासन्निधानेन तदभावः सिद्ध एवेति भावः । चेन मध्यमसमाधेरपि समुच्चयः । इदं सर्वं प्राचामनुरोधेनोक्तं, न तु सिद्धान्ततयेति स्पष्टं **शब्देन्दुशेखरे**[१] प्रारम्भे । विस्तरस्तु [२]**मत्कृतरप्रत्याहारखण्डनतो**ऽवगन्तव्यः । वार्तिकार्थोऽपि तत्वभूतो **मत्कृतभाष्यादिव्याख्यातश्छायातोऽ**[३]वगन्तव्यः । [४]समाध्यन्तरमपि भाष्यादावुक्तम् । एतेन मा माँस्त्रायस्वेत्यत्रा**त्रानुनासिक** इत्यनुनासिकपक्षेऽनुस्वारः स्यादिति दोषस्य भेदकपक्षेऽपि सत्वाच्चिन्त्यमित्यपास्तम् । तदाह । **दिगिति ।।**

**इति श्रीमत्पायगुण्डोपाख्यवेणीगर्भजमहादेवसुतवैद्यनाथकृते कौस्तुभव्याख्याने प्रभाभिधे प्रत्याहाराह्निकं परिपूर्णम् ।।**

---

१. ल.शे.पृ.सं. २६ (रप्रत्याहारविचारे)

२. रप्र.ख.पृ.सं. ४

३. इत्थं हि छायाग्रन्थः - एवं पूर्वपक्षे समाधित्रयम् - **आचारादित्यादि ।** तत्र तावदाचारो ज्ञापकः, स च व्यापकः । अक्षु हलामनुबन्धानां सर्वेषामग्रहणे उणादेत्वादीनां तत्त्वसंभवात् । एवं ज्ञापकेन सर्वसिद्धावपि तत एव प्रधानाप्रधानयोरिति लोकन्यायमूलकोऽपरो हल्षु अजग्रहस्यापि प्रसङ्गतः साधकः समाधिरित्याह – **अप्रधानत्वादिति ।** अक्षु हल्षु च णादीनामुपदेशेऽपि यत्रानन्यार्थ उपदेशस्तत्र स्वरूपप्रतिपत्त्यर्थ एव सः । हल्पु चोच्चारणार्थाकारयुतानां तेषामेव तया, न त्वन्येषाम् । केषांचिदुच्चारणार्थस्वात् केषांचिदित्संज्ञासिद्ध्यर्थत्वात् । एवं तेषामक्ष्वपि अणादिसंज्ञासिद्ध्यर्थत्वेनान्यार्थत्वान्न स्वरूपप्रतिपत्तये सः । अत एव लोकन्यायमूलकत्वेनाद्यतोऽस्य लधुत्वात्सौत्रत्वात्तेषामुपपत्तौ तदसंभवाच्चोक्तिः । तस्मादयमपि व्यापकः । यद्यपि वार्तिकादयमुक्तरीत्या एक एव हेतुरिति प्रतीयते, तथापि भगवतोक्तयुक्त्या खण्डशः सचकारं व्याख्यातत्त्वाद्धेतुद्वयमेवेति बोध्यम् । तदेवं संज्ञाप्रवृत्तिकालेऽनुबन्धानां संनिधानमभ्युपेत्य द्वेधा समाहितम् । वस्तुतस्तु तदेव नेति हल्ष्वपि हलामितामग्रहणमित्याह – लोपश्चेति ।।

४. ऊकालोऽजिति वा योगक्तत्कालानां यथा भवेत् ।
अचां ग्रहणमच्कार्यं तेनैषां न भविष्यति ।। इति समाध्यन्तरम् म.भा.पृ.सं. १३८ (प्रथमो भागः)